# व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षात्मकमध्ययनम्

**(Vyākaraṇādvaitavedāntayoḥ Śabdaśaktīnāṁ Samīkṣātmakamadhyayanam)**

जवाहरलालनेहरूविश्वविद्यालयीय-पी-एच्.डी.इत्युपाध्यर्थम्प्रस्तुतः

शोधप्रबन्धः


शोधनिर्देशकः
डॉ.हरिराममिश्रः

शोधार्थी
यीशनारायणद्विवेदी

संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली-११००६७


२०१९

संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- ११००६७

**SCHOOL OF SANSKRIT & INDIC STUDIES**
**JAWAHARLAL NEHRU UNIVERSITY**
**NEW DELHI-110067**


14 July, 2019

## DECLARATION

I **Yeeshnarayan Dwivedi,** hereby declare that this thesis entitled **"व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षात्मकमध्ययनम्" "(Vyākaraṇādvaitavedāntayoḥ Śabdaśaktīnāṁ Samīkṣātmaka-madhyayanam)"** submitted in the School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi 110067, for the award of degree of Doctor of Philosophy is an original research work and has not been previously submitted ever before, in part or full, for any other degree or diploma of any institution/University.

यीशनारायण द्विवेदी
(Yeeshnarayan Dwivedi)

संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- ११००६७

**SCHOOL OF SANSKRIT & INDIC STUDIES**
**JAWAHARLAL NEHRU UNIVERSITY**
**NEW DELHI-110067**

14 July, 2019

# CERTIFICATE

The Thesis entitled "व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षात्मकमध्ययनम्" **"(Vyākaraṇādvaitavedāntayoḥ Śabdaśaktīnāṁ Samīkṣātmakamadhyayanam)"** submitted by **Yeeshnarayan Dwivedi** to School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi 110067, for the award of degree of **Doctor of Philosophy** is an original research work and has not been submitted so far, in part or full, for any other degree or diploma of any University/Institution.

This may be placed before the examiners for evaluation and for award of degree of Doctor of Philosophy.

Prof. Girish Nath Jha
(Dean)
Dean
School of Sanskrit & Indic Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

Dr. Hari Ram Mishra
(Supervisor)
**Dr. Hari Ram Mishra**
**Assistant Professor**
School of Sanskrit and Indic Studies
**Jawaharlal Nehru University**
**New Delhi-110067, INDIA**

"श्रीरामः शरणं समस्तजगतां रामं विना का गती
रामेण प्रतिहन्यते कलिमलं रामाय कार्यं नमः।
रामात् त्रस्यति कालभीमभुजगो रामस्य सर्वं वशे
रामे भक्तिरखण्डिता भवतु मे रामस्त्वमेवाश्रयः"॥

(वाल्मीकिरामायणमाहात्म्यम्, १.१)

"मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव"।

"यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि"।

(तैत्तिरीयोपनिषद्, १.११)

"यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु"॥

(यजुर्वेद, ३४.१)

"ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं सेवते,
सूर्यो भ्राम्यति नित्यमेव गगनं तस्मै नमः कर्मणे"॥

(नीतिशतकम्, ९२)

## ॥ सङ्केताक्षरसूची ॥

| | |
|---|---|
| अ०क०टी० | अम्बाकर्त्रीटीका |
| अपरो० अ० | अपरोक्षानुभूति |
| अप० का० | अपरोक्षानुभूतिकारिका |
| अ०वे०इ० | अद्वैतवेदान्त का इतिहास |
| अष्टा० | अष्टाध्यायी |
| आ०बो | आत्मबोधः |
| उ०सा० श्लो० | उपदेशसाहस्त्रीश्लोकः |
| ऋग्०वे० | ऋग्वेदः |
| ऐ०ब्रा० | ऐतरेयब्राह्मणम् |
| का०द० | काव्यादर्शः |
| काठ०सं० | काठकसंहिता |
| का० | काशिका |
| का० पदम० | काशिका पदमञ्जरी |
| का०प्र० | काव्यप्रकाशः |
| कि०का० | किष्किन्धाकाण्डम्, |
| कै०उ० | कैवल्योपनिषद् |
| को०न० | कोविदानन्दः |
| कौ०उ० | कौशीतकी उपनिषद् |
| गण०महो० | गणरत्नमहोदधिः |
| महा०भा०वा० | महाभाष्यवार्तिकम् |
| गी०अ० | गीता अध्यायः |
| गी०शा०भा वा०रा० | वाल्मीकिरामायणम् |
| गी० शा० | गीताशाङ्करभाष्यम् |

| | |
|---|---|
| गी०शा० भा० | गीताशाङ्करभाष्यम् |
| गो०ब्रा० | गोपथब्राह्मणम् |
| गौ०ध० | गौतमधर्मसूत्रम् |
| चा०व्या० | चान्द्रव्याकरणम् |
| छा०/छा०उ० | छान्दोग्योपनिषद् |
| तृ०दी०प्र० | तृप्तिदीपकप्रकरणम् |
| तैत्ति०उप० | तैत्तिरीयोपनिषद् |
| न्या० सि०मु० | न्यायसिद्धान्तमुक्तावली |
| ना० शा० | नाट्यशास्त्रम् |
| निरु० | निरुक्तम् |
| नै०सि० | नैष्कर्म्यसिद्धिः |
| नै०सि०भू० | नैष्कर्म्यसिद्धिभूमिका |
| प०द० | पञ्चदशी |
| प०ल०म० | परमलघुमञ्जूषा |
| प्रौ० म० | प्रौढमनोरमा |
| प्रौ०म० श०र० | प्रौढमनोरमाशब्दरत्नम् |
| पं०प्र० | पञ्चप्रक्रिया |
| ब्र०सू० | ब्रह्मसूत्रम् |
| बृ०उ० | बृहदारण्यकोपनिषद् |
| ब्रह्म०वैव० | ब्रह्मवैवर्तपुराणम्, |
| तैत्ति०सं० | तैत्तिरीयसंहिता |
| बौ०ध० | बौधयनधर्मसूत्रम् |
| भा०द०इति० | भारतीय दर्शन का इतिहास |
| महा०भा०शा० प० | महाभारतशान्तिपर्व |
| महा०/ म०भा० | महाभाष्यम् |

| | |
|---|---|
| महा०भा० पा० सू० | महाभाष्यपाणिनिसूत्र |
| महा०पश० | महाभाष्यपश्पशाह्निकम् |
| म० हा०भा० पश० | महाभाष्यपश्पशाह्निकम् |
| महा०भा०उ० | महाभाष्योद्योतः |
| महा०उ०प० | महाभारत, उद्योगपर्वम् |
| महा०भा०वा० | महाभाष्यवार्तिकम् |
| मा० उ० | माण्डूक्योपनिषत् |
| मु०उ० | मुण्डकोपनिषद् |
| मै०सं० | मैत्रायणी संहिता |
| यजु० | यजुर्वेदः |
| यो०सू०भा० | योगसूत्रभाष्यम् |
| रामा० बा० | रामायणबालकाण्डम् |
| रा०च०मा० | रामचरितमानसः |
| लघुसि०कौ०भू० | लघुसिद्धान्तकौमुदीभूमिका |
| वा०प० | वाक्यपदीयम् |
| वा०प०ब्र०का० | वाक्यपदीयब्रह्मकाण्डम् |
| वा०प०भू० | वाक्यपदीयभूमिका |
| वा०प०वा०का० | वाक्यपदीयवाक्यकाण्डम् |
| वा०रा० | वाल्मीकिरामायणम् |
| वा० वृ० का० | वाक्यवृत्तिः, कारिका |
| वि०प्र०सं० | विवरणप्रमेयसङ्ग्रहः |
| वि०चू० | विवेकचूडामणिः |
| वे०क०ल० | वेदान्तकल्पलतिका |
| वे० प० | वेदान्तपरिभाषा |
| वे०सा० | वेदान्तसारः |

| | |
|---|---|
| वे०सि०मु० | वेदान्तसिद्धान्तमुक्तालीी |
| वै०सि०कौ | वैयाकरणसिद्धान्तकौमुदी |
| वै०भू०सा० | वैयाकरणभूषणसारः |
| वै०ल०म० | वैयाकरणलघुमञ्जूषा |
| वै०सि०म० | वैयाकरणसिद्धान्तमञ्जूषा |
| बृ०आ० | बृहदारण्यकम् |
| बृ०उ० | बृहदारण्योपनिषद् |
| स्फो०सि० | स्फोटसिद्धिः |
| स०द०सं० | सर्वदर्शनसंग्रहः |
| सि० ले० | सिद्धान्तलेशसंग्रह, |
| सौ०ल० | सौन्दर्यलहरी |
| सं० शा० | सङ्क्षेपशारीरकम् |
| सं०व्य०इति० | संस्कृतव्याकरणशास्त्रस्येतिहासः |
| श्वे० उ० | श्वेताश्वतरोपनिषद् |
| श्लो०वा० | श्लोकवार्तिक |
| श०वा० | शक्तिवादः |
| शत० ब्रा० | शतपथब्राह्मणम् |
| श्रीमद्०भा०/श्रीमद्भा० | श्रीमद्भागवतम् |

## ॥ कृतज्ञताज्ञापनम् ॥

“व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षात्मकमध्ययनम्” विषयममुं स्वीकृत्य शोधकार्यङ्कृतवता मया प्राथम्येन भगवन्तो मर्यादापुरुषोत्तमश्रीरामचन्द्राः प्रणम्यन्ते। अहं भगवतीं सुरभारतीमधीयानः सन्नात्मानं धन्यं मन्ये, तथा च संस्कृताध्ययने मत्प्रेरकाः पूजनीयाः पितृचरणा उमेशचन्द्रद्विवेदिनः स्नेहमूर्तयो मातरः श्रीमत्यः प्रभावतीदेव्यश्च स्तूयन्तेऽतो मया शोधकार्यत्वेन विरचितः शोधप्रबन्धोऽयं मातृपितृचरणकमलयोः समर्प्यते।

तत्रादौ प्राथमिककक्षातो मध्यमाकक्षां यावत्पाठितवतां शिक्षकाणां कृते धन्यवादा वितीर्यन्ते, यतोहि तेभ्यो विना न सम्भावितमासीदुच्चशिक्षाध्ययनम्, एतेषु महता स्नेहेन मां व्याकरणं पाठयद्भ्य आचार्येभ्यः, श्रीरामसंस्कृतमहाविद्यालयीयेभ्यः प्राचार्येभ्यो मत्परमश्रद्धास्पदेभ्यो गुरूभ्यो हार्दिका धन्यवादाः सम्प्रदीयन्ते, वाराणस्यां व्याकरणस्य लाक्षणिकग्रन्थानामध्यापनेन समनुग्राहितवतां शाब्दिकशिरोमणीनां विद्वद्धौरेयाणामादरणीयानामाचार्याणां श्रीरामयत्नशुक्लमहाशयानाम्, श्रीराममनोहरमिश्रमहोदयानाम्, श्रीरमाकान्तपाण्डेयमहोदयानामन्येषाञ्च सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयाणामाचार्याणां कृते हार्दा धन्यवादा दीयन्ते, जवाहरलालनेहरूविश्वविद्यालयेऽत्रत्यैराचार्यैर्महता स्नेहेन एम.ए. (संस्कृतम्) इति कक्षायामध्यापयद्भिः शोधवतीबुद्धिर्मयि समुद्भाव्यत।

अत्र शोधच्छात्रत्वेन चीयमानस्य शोधप्रबन्धस्य निर्देशकेभ्यः काव्यव्याकरणशास्त्रनिष्णातेभ्यः सहृदयहृदयेभ्यः राष्ट्रसमृद्धयेऽहर्निशं प्रयतमानेभ्यः श्रीहरिराममिश्रमहोदयेभ्यः समर्प्यते कार्तज्ञ्यम्, येषां

वात्सल्यपूर्णेन व्याकरणादिशास्त्रविशेषप्रतिबोधनेन कुशलनिर्देशनेन च समुपकारितोऽहम्, तेषां साहाय्येनैव कठिनोऽपि विषयोऽयं सारल्यं भजते तद्वशात् समाप्तिं याति शोधप्रबन्धरूपमिदं कार्यम्।

कृतज्ञताज्ञापनक्रमेऽस्मिन्नस्मद्विशिष्टसंस्कृताध्यययनकेन्द्रीयेभ्यो विविधशास्त्र-पारङ्गतेभ्यो गुरूभ्यो मादृशशोधप्रेरकेभ्यः साम्प्रतिकसङ्कायाध्यक्षेभ्यः प्रो.गिरीशनाथझामहोदयेभ्यः, प्रो.शशिप्रभाकुमारमहाशयाभ्यः, प्रो.चौडूरि-उपेन्द्ररावमहाशयेभ्यः, प्रो.सन्तोषकुमारशुक्लमहोदयेभ्यः, प्रो.रामनाथझावर्य्येभ्यः, प्रो. सुधीरकुमारार्यमहाशयेभ्यः, प्रो.सत्यमूर्तिमहाशयेभ्यः, प्रो.ब्रजेशपाण्डेयमहोदयेभ्यः, डॉ. रजनीशकुमारमहोदयेभ्यः, डॉ.टी.महेन्द्रमहोदयेभ्यश्च, डॉ.गोपाललालमीणामहोदयेभ्यः सादरं धन्यवादाः समर्प्यन्ते। तत्र भवद्भिर्गुरुचरणैर्लाभान्वितोऽहम्। अस्मिन्नेव क्रमे जवाहरलालनेहरूविश्वविद्यालयलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानां पुस्तकालयाध्यक्षेभ्यः तत्रत्यानां सदस्यानामपि कृते सविनयं कार्तज्ञ्यं समर्पयामि, केन्द्रकर्मचारिणां विकासमञ्जूशबनमारुणादीनां कृतेऽपि विज्ञाप्यते कृतज्ञता, यतोहि तैः सर्वदा सहर्षं साहाय्यं समदायि।

शोधप्रबन्धात्मकं कार्यमत्यन्तं गभीरं मन्यते तच्च समुचितवातावरणेन चित्तवृतीनां स्थैर्येणैव सम्भवति, तदर्थं पारिवारिकाणां सदस्यानामपि महती भूमिका भवत्यतः तेषां समुल्लेखोऽवश्यमेव कर्तव्यः, तेषु सर्वप्रथमं पूजनीयेभ्यः पितृचरणेभ्यो ज्योतिर्विद्भ्यः सर्वदाध्ययनायोत्साहवर्धकेभ्यः श्रीमदुमेशचन्द्रद्विवेदिभ्यः, मातृभ्यः श्रीमतीप्रभावतीदेवीभ्यः भातृभ्यामनुजाभ्यां शिवमशुभमाभ्याम्, भगिनी ज्योतिः, तस्यै,

सहधर्मचारिण्यै मोनूद्विवेदिने पुत्र्यै अञ्जलीदेव्यै, च धन्यवादाः सादरं समर्प्यन्ते, एतेषां साहाय्येनापि मम कार्यं सफलीभूतम्।

अस्यामेव सरण्यां शोधकार्यरतानामग्रजानामनुजानां मित्राणाञ्च कृते- तत्राग्रजेषु नारायणहरीशाभ्यां धन्यवादो दीयते, यैर्विवेकपूर्णं साहाय्यं प्रदाय मम कार्ये सारल्यमानीयत। अङ्कुशभूपेन्द्रमनीषनिहारिकादिभ्योऽपि विज्ञाप्यते कृतज्ञता, एतैः सर्वदा प्रत्यक्षापरोक्षरूपेण सहाय्यमदीयत। सहोदरकल्पेभ्योऽनिलदीपकजितेन्द्रेभ्यश्च साधुवादो दीयते। सर्वैरपि सङ्गणकादिकार्यसंयोजनादिसाहाय्येनाहर्निशमुपकृतोहम्, तदर्थमेतेषां कृतेऽपि धन्यवादः सम्प्रदीयते, चीनदेशवास्तव्याय मित्रतमाय जीझोमहोदयाय विशेषतो धन्यवादो दीयते येन ममकृते शैक्षणिकयात्राया व्यवस्था विदेशेष्वकल्प्यत। सर्वेभ्यश्च भविष्यते मङ्गलमयीकामना क्रियते। अन्ते "निर्मोही-अखाडा-चित्रकूटम्" इति उत्तरप्रदेशस्थाश्रमस्याधिकारिणे दीनदयालदासायाधमर्ण्यं संवहामि, येषामाशिषा निर्देशनेन साहाय्येन च सर्वदाऽनुगृहीतो भवामि। अन्ते च 'जनतन्त्र-इण्टरकालेज' इत्यस्य प्रधानाचार्याय श्रीजयप्रकशानुरागीमहोदयाय धन्यवादं वितरामि। येन सर्वदा मम शोधकार्याय सहायता सुविधा प्रोत्साहनं चादीयत। सर्वान्ते च यैरपि प्रत्यक्षपरोक्षरूपेणानुकृतोऽहं तेभ्यस्सर्वेभ्यो धन्यवान् वितरन् विरमामि

**यीशनारायणद्विवेदी (शोधच्छात्रः)**

संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्,

जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-६७

## ॥ विषयानुक्रमणिका ॥


मङ्गलाचरणम् ..........................................................i

**सङ्केताक्षरसूची....................................................ii-v**

**कृतज्ञताज्ञापनम् ....................................................vi-viii**

**विषयानुक्रमणी....................................................ix-xxvii**

**प्राक्कथनम् ..........................................................१-१३**

**प्रथमोऽध्यायः**..........................................................**१४-८७**

व्याकरणस्य वेदमूलकत्वम्

ब्रह्मणः प्राथम्येन व्याकरणस्य प्रवक्तृत्वम्

वृहस्पतिद्वारकं व्याकरणशास्त्रस्य प्रवचनम्

व्याकरणस्य नाम्नि विचारणा

व्याकरणस्यादिमः संस्कर्तृत्वेनेन्द्र

व्याकरणस्य सम्प्रदायशो विचारः

व्याकरणस्याष्टप्रवक्तारः

नवव्याकरणपरम्परा

अष्टाध्यायीदिशा व्याकरणस्य द्विधा विभाजनम्

आचार्यपाणिनेः पूर्ववर्तीनि व्याकरणानि

पाणिनेः पश्चाद्वर्तिनः

आचार्यपाणिनिः

पाणिनेर्नामान्तराणि

सङ्ग्रहस्य परिचयः

सङ्ग्रहस्यास्तविषयकज्ञानम्

आचार्यस्य व्याडेः रचनाः

आचार्यकात्यायनः

कात्यायनानैक्यम्

दक्षिणदेशस्थो विद्वान् तत्र प्रमाणम्

कात्यायनस्य प्रामाण्यम्

कालविषयकविचारः

कात्यायनस्य ग्रन्थाः

स्वर्गारोहणम्

अन्यवार्तिककाराः

आचार्यपतञ्जलिः

भाष्यपदप्रयोगः

महाभाष्यमेव किमर्थम्

देशवंशविषकविचारः

काश्मीरजत्वसाधकानि प्रामाणानि

आचार्यपतञ्जलेः शाखा चरणं च

पतञ्जलीनां विचारः

समयविषयकनिर्धारणम्

देशविषयकमवान्तरमतम्

उत्पत्तौ कथानकम्

आचार्यस्य कृतयः

पूर्वाचार्यविषयकश्रद्धा

महाभाष्यस्य महत्त्वम्

महाभाष्यस्य टीकाः

आचार्य भर्तृहरिः

अज्ञातकर्तृकः

कैय्यटः

व्याकरणशास्त्रस्य दार्शनिकी परम्परा

आचार्यव्याडिः

आचार्यभर्तृहरिः

अधोलिखिताः तत्सम्बद्धाः कृतयः

वाक्यपदीयस्य टीकाकाराः

मण्डनमिश्रः

आचार्यकौण्डभट्टः

वामनजयादित्यौ

भट्टोजिदीक्षितः

आचार्यस्य कृतयः

आचार्यनागेशः

आचार्यनागेशस्य कृतयः

अद्वैतवेदान्तपरम्परा

ब्रह्मसूत्रस्य प्रसिद्धभाष्यकाराः

अद्वैतवेदान्तस्य केचनाचार्याः

शङ्करपूर्ववर्तिन आचार्याः

आचार्यशङ्करः

आचार्यशङ्करस्य रचना

शङ्कराचार्यात् परवर्तिनः आचार्याः

**द्वितीयोऽध्यायः** ..................................................८८-२०४

व्याकरणाद्वैतवेदान्तयोः शब्दस्वरूपविमर्शः

अद्वैतवेदान्ते पारमार्थिकशब्दस्य स्वरूपम्

शक्तेरावश्यकत्वप्रतिपादनम्

शक्तेः स्वरूपविचारः

शब्दः सम्बन्धिनमर्थमेव प्रकाशयति

शक्तिस्वरूपविमर्शः

वाक्यैकदेशन्यायः

वृत्तेर्विशिष्टता

वृत्तेरवगतौ प्रमाणम्

शक्तेः परिभाषाः

परिभाषाद्वारा शक्तिकथनम्

शक्तिसम्बन्धत्वप्रतिपादनम्

वैयाकरणनिकाये वेदान्ते च व्यावहारिकशब्दस्य विमर्शः

उपादानः

स्फोटलक्षणम्

स्फोटस्यवर्णव्यञ्जकत्वसमर्थनम्

सूत्रकर्तुरपि सम्मतिः

वार्तिककारस्य साहमत्यम्

स्फोटस्वरूपस्य समर्थने मतान्तराणि

स्फोटो विभुः

महाभाष्यकारस्याप्यनुमोदनम्

वैयाकरणैः स्फोटस्य दार्ढ्यप्रतिपादना

स्फोटस्वरूपभेदकथनम्

स्फोटस्याभिव्यञ्जनत्वविमर्शः

प्रकारान्तरेण स्फोटस्य व्यञ्जकत्वनिर्णयः

शाब्दिकनयेऽभिधाविचारः

शब्दविषयकविचारः

शब्दप्रमाणे व्यापारविषकविमर्शणम्

व्याकरणे वृत्तिस्वरूपम्

अद्वैतवेदान्ते शब्दशक्तिः

सौन्दर्यलहरी

गीतायाः शाङ्करभाष्ये शङ्काराचार्यस्य विचारः

अपरोक्षानुभूतौ

ब्रह्मसूत्रशाङ्करभाष्ये शास्त्रस्य विचारः

गीतायां भाषायाः स्थितिः

वेदस्य च परमार्थबोधकत्वं विद्यते-

अक्षरब्रह्मणः एव परमार्थता

अक्षरब्रह्मणः प्रतिपादनं प्रकारान्तरेण

संक्षेपशारीरकेऽभिधाविचारः

मुख्यार्थवतीं वृत्तिं तत्त्वमदिवाक्यस्य प्रतिपादनेऽसमर्था इति प्रतिपादयति-

सदत्पादार्थधीर्जनस्यैव महावाक्यार्थबोधः

शास्त्रस्य प्रयोजनम्

भाषया नाखण्डार्थवस्तुप्रतिपत्तिः

वेदान्ते वाक्यस्य लक्षणम्

लौकिकस्य वाक्यस्य वेदान्तवाक्यैः सह भेदः कथम्

मुख्यपदार्थस्य वर्णनं तस्य च विरोधो वेदान्तशास्त्रे

वाचकपदम्

पञ्चप्रकियायां शब्दवृत्तिः

शब्दवृत्तीनां प्रयोजनम्

शब्दशक्तयः

भाषायाः प्रयोजनम्

नैयायिकमतखण्डनपुरस्सरं शक्तिपदार्थस्योपस्थापनम्

कार्येणानुमेयत्वं शक्तेः

व्याकरणदर्शने शब्दशक्तिः

सङ्केतादिनाऽपि बोधः

वृत्तित्वशक्तित्वप्रतिपादनम्

शक्तिसद्भावेऽप्यर्थाभावस्य कारणानि

भर्तृहरिसम्मतः शब्दव्यापारः

भर्तृहरिमते शब्दव्यापारविमर्शः

वाक्यपदीयस्थाभिधास्वरूपम्

शब्दैकानेकदर्शनयोर्भेदस्य विमर्शः

शब्दैकत्वप्रतिपादनम्

अर्थोपचारविचारः

शब्दानैक्यपक्षविमर्शः

शब्दभेददर्शने वेदस्यानुमोदनम्

अनेकशब्दलभ्यत्वमभिधायाः

शक्तिद्वारा सम्बन्धनियमनत्वविचारः

अभिधयाऽर्थप्रतिपादनप्रकारः

अर्थभेच्छब्दानैक्यम्

शब्दार्थनियामकसाधनानि

नागेशस्य शक्तिस्वरूपम्

नैयायिकैः प्रतिपादितस्य मतस्यास्वीकारः

सङ्केतवर्णनपूर्वकनैयायिकमतनिरासः

नागेशस्य शक्तिस्वरूपविचारः

शब्दार्थयोरध्यासप्रतिपादनम्

तादात्म्यस्वरूपम्

ईश्वरकृताध्यासवर्णनम्

बौद्धार्थस्वरूपम्

सङ्केतस्य पर्यायत्वम्

शक्तिसङ्केतयोरभेदः

तादात्म्यसम्बन्धस्य त्रिप्रकारकत्वं भावति

तादात्म्यभेदाच्छब्दार्थयोर्भेदः

अपभ्रंशेषु शक्तिसद्भावविमर्शः

मीमांसकनैयायिकानां निरसनविचारः

आर्यम्लेच्छाधिकरणविमर्शः

साधुत्वप्रतिपादनम्

योगशक्तिस्वरूपम्

योगरूढिवर्णनम्

**तृतीयोऽध्यायः**..................................................... २०५-२८८

व्याकरणाद्वैतवेदान्तयोर्लक्षणाविमर्शः

वाक्यवृत्तौ लक्षणाविचारः

लक्षणा प्रवर्तनम्

लक्षणायाः त्रिधात्वम्

तत्त्वं पदे लक्षणा

सिद्धान्तबिन्दौ लक्षणा

जहदजहल्लक्षणा

सङ्क्षेपशारीरके लक्षणाविचारः

लक्षणा त्रिधा

जहदजहत उदाहरणम्

गौणीवृत्तिः

लक्षणागुणवृत्त्योः  भेदः

पञ्चदशीग्रन्थे लक्षणाविचारः

ब्रह्मणः परोक्षज्ञानम्

ब्रह्मज्ञानाय समुचितवाक्यम्

तत्त्वंपदार्थयोः प्रतिपादनम्

अखण्डार्थस्य स्वरूपम्

वेदान्तवाक्यैर्द्विधा ब्रह्मणः प्रतिपादनम्

पञ्चप्रक्रियायां लक्षणा

गौणी

परमात्मनि कतमा वृत्तिः

अत्रविषये वाचस्पतिमिश्रस्य मतम्

गौणीवृत्तेर्निरसनम्

जहदजहल्लक्षणा

धर्मराजाध्वरीन्द्रस्य मते महावाक्यार्थबोधनाय लक्षणा नास्तीत्येतन्मतखण्डनम्

लक्षणायाः प्रवृत्तौ बीजम्

लक्षणा -शब्दशक्तेर्वाक्यवृत्तित्वम्

अभिन्ननिमित्तोपादाने प्रमाणम्

शब्दस्याप्यत्मसाक्षात्कारे कारणत्वम्

प्रकाशानन्दस्य मतम्

शास्त्रस्य प्रयोजनम्

तत्त्वज्ञानस्य प्राबल्यम्

नैष्कर्म्यसिद्धौ लक्षणा

व्याकरणदर्शने लक्षणा विचारः

वाक्यपदीयकर्तुर्मते लक्षणास्वरूपम्

शब्दानां गौणमुख्यार्थविभाजनम्

अध्यारोपात्मकविपर्यासे गौणी

मञ्जूषासु लक्षणाविमर्शः

लक्षणाप्रवृत्तौ बीजम्

लक्षणाप्रवृत्तावन्ययानुपपत्तिविचारः

अन्वयानुपपत्तिरूपबीजस्वीकारे दोषाः

लक्षणाविभागाः

मञ्जूषाकारस्य व्याकरणाभितलक्षणा

शक्यताऽवच्छेदकाऽऽरोपस्य व्याख्यानम्

आरोपे भ्रमत्वाशङ्का

लक्षणायां भ्रमत्वनिरासः

बाधनिश्चयस्याप्रतिबन्धकत्वम्

प्राचां मते दोषः

कचतस्त्रस्यति वदनम्, अत्रारोपप्रकारः

गौणीलक्षणायाः जघन्यत्वम्

गौणीलक्षणायां बीजम्

प्रकृतिप्रत्यययोर्लक्षणाविवेचनम्

न्यायदर्शनस्य द्विरेफपदे लक्षणायाः खण्डनम्

संस्कारविशेषस्य लक्षणात्वप्रतिपादकत्वविश्लेषणम्

अप्रसिद्धाशक्तिविचारः

लक्षणाभावप्रतिपादनम्

अप्रसिद्धयैव लक्षणा गम्यत इति विचारः

सर्वे सर्वार्थवाचका इति स्वीकृते सति सम्प्राप्तदोषनिवारणम्

समीक्षणं निष्कर्षश्च

**चतुर्थोऽध्यायः**......................................................२८९-३३१

व्याकरणाद्वैतवेदान्तयोर्व्यञ्जनाविमर्शः

वाक्यवृत्तौ व्यञ्जनाबीजम्

अपरोक्षानुभूतौ

अभिव्यक्तिवादः

उपदेशसाहस्त्र्यामभिव्यक्तिवादः

वेदान्ते पदार्थः

ईश्वरस्य भेदाः

जीवः

दृश्यपदार्थः

दृश्यपदार्थस्त्रिविधः

आभासवादः

वाक्यवृत्तावाभासः

सिद्धान्तविन्दुकारः कथयति

प्रतिबिम्बवादः

प्रतिबिम्बवादे ब्रह्मणः स्थितिरेवं विद्यते

विम्बाभासयोर्विशेषः

अवच्छेदवादः

जगतो निमित्तोपादानकारणत्वम्

उपादानप्रकाराः

आरम्भवादस्य स्वरूपम्

परिणामस्य स्वरूपम्

विवर्तस्वरूपम्

गीतायां शास्त्रस्य प्रयोजनम्

शब्दद्वारा ब्रह्मणो बोधस्तत्र प्रमाणानि

भामतीप्रस्थानम्

नामरूपात्मकं जगदिति पक्षो वेदान्तिनाम्

ब्रह्मणि युक्त्यनुभवयोरपेक्षा

वाचः सर्वशक्तिमत्त्वं प्रतिपादयति

व्याकरणदर्शने व्यञ्जनायाः स्वरूपम्

कलाटीकाकारस्य व्यञ्जनाविचारः

व्यञ्जनायाः प्रयोजनम्

द्योतकत्वप्रतिपादनम्

व्यञ्जनास्वरूपप्रतिपादनम्

व्यञ्जनाया विषये नागेशस्य विनोदनम्

नागेशकर्तृकव्यञ्जनास्वरूपम्

व्यञ्जनाभेदविचारः

व्यञ्जनाद्विधा

शब्दवृत्तिता चेष्टावृत्तिव्यञ्जनायाः

अर्थनिष्ठव्यञ्जनाव्यापरस्य प्रतिपादनम्

शाब्दबोधे व्यञ्जना स्वरूपसती हेतुः

व्यञ्जनाया विलक्षणत्वम्

शक्तिलक्षणान्यात्वं व्यञ्जनात्वम्

व्यञ्जनायाः समालोचनम्

व्यञ्जनायाः समालोचनम्

न्यायदर्शनस्य व्यञ्जनानिरसनम्

**पञ्चमोऽध्यायः**......................................................३३२-४०५

व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षा

व्याकरणस्य महत्त्वम्

व्याकरणे शब्दस्य स्थितिः

नैयायिकेच्छारूपसम्बन्धस्य निरासः

सङ्केतस्वरूपपुरस्सरं नैयायिकखण्डनम्

नागेशानुमोदितशक्तिस्वरूपम्

शब्दार्थयोरध्यासः

तादात्म्यवर्णनम्

बौद्धार्थनिरूपणम्

सङ्केतस्य पर्यायत्वम्

सङ्केतस्य न शक्तित्वम्

तादात्म्यभेदे शब्दार्थयोरपि विभेदः

अपभ्रंशेषु शक्तिस्वीकारः

साधुत्वस्य प्रतिपादनम्

शक्तिभेदकथनम्

ज्ञानस्य स्वप्रकशकता

शक्तिद्वारा बोधः

लक्षणायाः व्याख्यानम्

शब्दस्य व्यवहारविषयत्वम्

स्फोटस्यैकत्वमखण्डत्वञ्च

शब्दानां विश्वकारणत्वम्

शब्दैकमात्रगम्यं ज्ञानम्

संसारिणां सञ्ज्ञा शब्द एव

असत्पदार्थसत्तामपि प्रकल्पयति शब्दः

शब्द एव परमात्मा

शब्दसंस्कारः परमात्मनस्सिद्धिः

शब्दाद्वैतवादे वाचां स्वरूपम्

वैखरीस्वरूपम्

मध्यमा वाक्

पश्यन्ती वाक्

अपरपश्यन्ती

परपश्यन्ती वाग्, आचार्यनागेशस्य परा, भर्तृहरेश्शब्दब्रह्म

शब्दप्रमाणम्-

अद्वैतवादो व्याकरणस्य

भर्तृहरिशङ्कराचार्ययोरद्वैवादस्य तुलना

अद्वैतवेदान्तेऽपि ब्रह्मातिरिक्तसत्ताया अभावः

इन्द्रियजन्यज्ञानेन ब्रह्मणो साक्षात्काराभाव एव

घटादिषु प्रत्यक्षस्य प्रकारः

प्रत्यक्षस्य प्रयोजकम्

इन्द्रियजन्यत्वं प्रत्यक्षे न प्रयोजकम्

तत्त्वमसीति निर्विकल्पकमपि ज्ञानं शब्दद्वारैव भवति

फलव्याप्यत्ववृत्तिव्याप्यत्वयोः स्पष्टीकरणम्

वाक्येन सविकल्पकज्ञानस्य भ्रमः

वाक्यजन्यज्ञाने पदार्थसंसर्गस्य निरासः

वाक्यजन्यज्ञाने तात्पर्यज्ञानस्य प्रयोजकत्वम्

वाक्यजन्यज्ञानस्यैव प्रत्यक्षत्वम्

कल्याणसाधकवाक्येन ब्रह्मप्राप्तिः

वेदान्ते तात्पर्यम्

सैन्धवमानयेत्यस्य विश्लेषणम्

तात्पर्यस्यावच्छेककत्वम्

तात्पर्यनिर्धारणम्

सिद्धार्थबोधकत्वे शब्दानां प्रामाण्यम्

आगमविभागः

वेदान्तस्य प्रयोजनम्

मोक्षस्य स्वरूपम्

वाक्यद्वारैव ब्रह्मात्मविषयकैक्यज्ञानम्

वाक्यजन्यज्ञानस्य परोक्षत्वमेव

ब्रह्मसाक्षात्कारप्रकारो वाक्यप्रत्यक्षविरोधिनां मते

श्रवणमनननिदिध्यासनानां ज्ञानसाधनत्वप्रतिपादनम्

ब्रह्मसाक्षात्कारे श्रवणस्य प्राधान्यम्

असदर्थस्य ज्ञानाभावः

व्याकरणस्य स्थितिः

शब्दशक्तीनां समीक्षणम्

वेदान्तस्य परिस्थितिः

**उपसंहार-..........................................................४०६-४१३**

**सन्दर्भग्रन्थसूची-..................................................i-xiii**

# ॥ प्राक्कथनम् ॥

भाषाया विषये जनाः प्राचीनकालादेव चिन्तयन्तो भवन्ति। भाषयैव जागतिकव्यवहाराः प्रचाल्यन्ते। भाषाया अभावे कृत्स्नमिदं जगदन्धकारयुत-मेव स्यात्। भाषा च किमर्थमिति प्रच्छ्यते चेत्? **"अर्थगत्यर्थः शब्दप्रयोगः। अर्थं प्रत्याययिष्यामीति शब्दः प्रयुज्यते"।**[1] इत्येतदर्थमेव भाषायाः प्रयोगः। सर्वतोभावेन प्रयुक्ताया भाषायाः कार्यमर्थावगतिः, ततश्चाज्ञानस्य निवृत्तिः। तस्मादेव निरुक्तकारः प्रतिपादयति महत्त्वमर्थस्य।

**"अर्थनित्यः परीक्षेत"**[2] अर्थादर्थस्य ज्ञानं विना न किमपि साध्यते व्यावहारिकजगति। तदाह भर्तृहरिः-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिवज्ञानं सर्वं शब्देन भासते"॥**[3]

एतावन्महिम्ना शब्दो जगतीह राजते। विचार्यतां भवद्भिरेव तावच्छब्देनाभिधीयमानेन पदार्थेन व्यवहारस्तु कर्तुं शक्यते। किन्त्वनभिधानवतां पदार्थानां व्यवहारपथ्यानयनं कथं स्यादिति। तस्माच्छब्दा एव तादृशं ज्योतिर्यया जगदिदं प्रकाश्यते।

शब्दस्यार्थात्मकेन प्रकाशेनैव संसारस्य जना लाभान्विताः सन्तो विहरन्तो दृश्यन्ते। एतस्य विषये आचार्यदण्डिनोक्तिरत्यन्तं प्रसिद्धिं गता वर्तते। सा चेत्थम्-

**"इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"॥** [4]

पूर्वोक्तं भावमेव प्रकाशयतीदमपि वाक्यम्। किम्बहुना नाट्यशास्त्रस्यस्याचार्यभरतोऽपि सर्वं वाङ्मयमिति प्रतिपादयति-

**"वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च।**

**तस्माद्वाचः परं नास्ति वाग्घि सर्वस्य कारणम्"॥** [5]

---

[1] महाभाष्यम्, २/१/१

[2] निरुक्तम्, १.२

[3] वाक्यपदीयम्, १/१२३

[4] काव्यादर्शः, १.४

सर्वस्य व्यावहारिकस्य जगतः कारणं वागेव। आचार्यभरतेन शब्दस्य व्यावहारिकं पारमार्थिकं वा स्वरूपमभ्यधायि। एतेनासाध्यत यच्छब्दस्य व्यावहारिकं स्वरूपं शास्त्रेषु अक्षरवद्भ्यो शब्देभ्योऽदीयत। अक्षरवतां शब्दानां व्यावहारिकजगति प्रयोगं कृत्वा पारमार्थिकं स्वरूपं प्रति प्रयामः। यतोहि व्यावहारिकज्ञानं विना पारमार्थिकज्ञानं न कर्तुं कारयितुं वा शक्यते।

**"अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा।**

**परो दिवा पर एना पृथिव्यैतावती महिनासम्बभूव"॥** [6]

शतपथब्राह्मणेऽपि निजगादर्षिः- **"वागेव विश्वा भुवनानि जज्ञे"।**[7] वाचस्सर्वशक्तिमत्त्वं प्रतिपादितम्। वाचैव निखिलमिदं जगत् प्रवर्तते तयैव सर्वस्य ब्रह्माण्डस्य रचना विधीयते। कैवल्योपनिषद्यपि महर्षिर्भिरुक्तम्-

**"मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।**

**मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्"॥**[8]

वेदेषूपनिषत्सुचविवेचिताऽवधारणावैयाकरणैरप्याविरभाव्यत। तत्रभवद्भिर्भर्तृहरिभिः प्रतिजज्ञे,[9] व्याकरणस्य कियन्महत्त्वं विद्यते। इति वाल्मीकिरामायणे श्रीरामचन्द्रेण हनुमन्मिलनप्रसङ्गे प्रोक्तम्–

**"बहु व्याहरताऽनेनन किञ्चिदपभाषितम्।**

**नूनं कृत्स्नं व्याकरणमनेन बहुधा श्रुतम्"॥**[10]

अर्थाद्वाचो वैशिष्ट्यं तु जायत एव वाचा विना न किमपि प्रवर्ततयितुं शक्यते। समाजिकजीवने भगवतश्श्रीरामचन्द्रस्य श्रीमता हनुमता सह सम्भाषणेन ज्ञायते। यद्वैयाकरणस्य कियत्सम्माननमासील्लोके।

व्याकरणस्य प्रारम्भिकं कार्यं शब्दसाधुत्वमेवासीत्। शब्दसाधुत्वं तदर्थं प्रकृतिप्रत्यायानां विवेचनं तत्तदर्थनिर्धारणं कृत्वा तेषां व्यावहारिकप्रयोगः

---

[5] नाट्यशास्त्रम्, १४.३

[6] ऋग्वेदः, १०/१२५/८

[7] शतपथब्राह्मणम्, ६/५/३/४

[8] कैवल्योपनिषद्, १/१९

[9] "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥ वा०प०, १/१

[10] रामायणे किष्किन्धाकाण्डम्, ३/२९

समाजाय भवत्विति कार्यम्। शनैः शनैः जनानां दार्शनिकीं प्रवृत्तिं दृष्ट्वा वैयाकरणा अपि स्वशास्त्रस्य दार्शनिकं व्याख्यानं कृतवन्तः। दर्शने तु किं किं चिन्त्यते। के च ते विषयाः, इत्यादिकं सर्वं वेदसम्मतं चिन्तनं वैयाकरणैरपि प्रारम्भि। तत्र च जिज्ञासैवम्भूता समायाति-

**"किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः।**

**अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थायाम्"॥**[11]

एवम्भूता विषया जिज्ञास्यन्ते, किं संसारस्य कारणम्, कथं जीवामः, किमर्थं सुखं दुखं चानुभवामः ब्रह्मविदां का व्यवस्था। एवम्प्रकारकान् विषयान् स्वीकृत्यैव दर्शनानि प्राचलन्त। तथैव वैयाकरणा विद्वांसोऽपि दार्शनिकसिद्धान्तान् संस्थापितवन्त। तेषु प्रामुख्येन प्राथम्येन च भर्तृहरेर्नामायाति। सैव व्याकरणं व्याकरणदर्शनपदं प्रति प्रापयत्ल्लोके। तन्मते शब्द एव ब्रह्म तद्वारैव प्रवृत्तिनिवृत्ती भवतः। शब्दस्यैव निखिलं ब्रह्माण्डं कार्यजातं विद्यते। तच्च शब्दतत्त्वमविद्यावशाद् विवर्तते।

विवर्तदशायां तदेव ब्रह्माविद्यायाः कारणाद् भिन्न-भिन्नरूपेण प्रतिभासते। किन्तु तदेव ब्रह्मविद्यादशायां संवर्तावास्था जायते। संर्वतावस्थायां जागतिकभेदानां तत्रैव शब्दब्रह्मणि लयो जायते। सर्वविधविकाराणां ब्रह्मणि विलीनतायां सत्यां शब्दब्रह्ममात्रमेव भवति। इत्याकारकाः सिद्धान्तास्तत्रभवता भर्तृहरिणा प्रादीयन्त। एवम्भूता च दशा प्रारमार्थिकी विद्यते तदैव। **"वाग् वै ब्रह्म" "वागेव विश्वा भूतानि जज्ञे" "अहमेव...बभूव"** इत्यादीनि श्रुतिवाक्यानि सङ्गच्छन्ते।

तदनु नागेशभट्टस्य नाम नव्यवैयाकरणेषु महत्प्रसिद्धं विद्यते। तेन च वैयाकरणानां सम्प्रदाये नूतनानां महतां सिद्धान्तानां व्याख्यानं दार्शनिकरीत्या स्पष्टत्वेन व्यचारि। वैयाकरणानां यथोत्तरं मुनीनां प्रामाण्यमिति सिद्धान्तं साक्षादनुपालयन् भर्तृहर्यादिभिराचार्यैः प्रतिष्ठापितस्य व्याकरणस्य दर्शनत्वमितोऽपि द्रढीयः कृतवान्। तेन च शब्दब्रह्मणो व्याख्यानं परावाग्रूपेण प्रत्यपादि। शब्दब्रह्म च द्विधा शास्त्रेषु नित्यात्मा कार्यात्मा च। नित्यात्मनः परत्वं कार्यात्मनोऽपरत्वं च प्रत्यपद्यते।

---

[11] श्वेताश्वतरोपनिषद्, १

ब्रह्मणश्चापरा दशा व्यवहारदशा तस्यां दशायां व्यावहारविषयीभूतस्य शब्दस्य कार्यात्मनो वैयाकरणैर्विवेचनं विधीयते। कार्यात्मा च तस्यैव शब्दब्रह्मणो विवर्तभूतः शब्दः। तदात्वे तु प्रकृतिप्रत्यययोः शब्दानां वाक्यानां च विवेचनपुरस्सरं व्याख्यानं क्रियते। तस्मादर्थस्य बोधाय पदानि वाक्यानि च प्रयुज्यन्ते। तेषामर्थावबोधस्तु सत्तामात्रेण भवितुं न शक्नोति। तस्मात् किं कारणं स्याद्येन सत्तावन्तश्शब्दा अर्थं बोधयेयुरिति तादृशस्य कारणस्यान्वेषणेन ज्ञायते। यत्तादृशं कारणं तु किमपि शक्तिनामकं विद्यते। शक्तिश्च पदस्यार्थं प्रकाशयति, इति सार्वभौमिकः सिद्धान्तः। तस्माद्भिन्न-भिन्नमतानि शक्तीनां विषये विद्यन्ते। तेषां तत्र तत्र चर्चा व्यधीयत। शक्तिश्च प्रमुखरूपेण अर्थस्य प्रकाशनं करोति। सा च शक्तिर्नैयायिकैरीश्वरेच्छा 'इच्छा' वा। तस्या एव सङ्केतत्त्वं सम्बन्धत्वं शक्तित्वं पर्यवस्यति। वैयाकरणेष्वपिबोधजनकतैवशक्तिः[12] इति भर्तृहरिः कौण्डभट्टश्च स्वीकुरुतः। तथा च नव्येषु नागेशः कथयति यद् वृत्तित्वं नाम-

**"शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वम्।**[13] **वाच्य-वाचकभावरूपाशक्तिः"।**[14]

अत्र नागेशो द्विधा व्याख्याति- शाब्दबोधानुकूलपदपदार्थसम्बन्धत्वं वृत्तित्वम्। पुनश्चान्ते वाच्यवाचकभावात्मिकामखण्डोपाधिस्वरूपां शक्तिं स्वीकरोति। तस्य ग्राहकं च इतरेतराध्यासमूलकं तादात्म्यं संस्थापयति। सा च वृत्तिस्तादात्म्यसम्बन्धेन नियम्यते। शक्तेरेवार्थबोधं जनयति। अर्थबोधं विना शब्दानां प्रयोगेणापि प्रवृत्तिर्निवृत्तिर्न सम्भवति-

**"यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्"॥**[15]

---

12 "इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा"॥
वैयाकरणभूषणसारः,शक्तिनिर्णयः, कारिका, ३७

13 वैयाकरणसिद्धान्तमञ्जूषा, पृ० ६

14 परमलघुमञ्जूषा, पृ० १२

15 निरुक्तम्, १/१/८

तस्माद्भाषाया अर्थज्ञानमेव मुख्यं कार्यम्। भाषाविज्ञाने वाक्यस्यैव सत्यत्वं न तु वाक्येषु पदानि वर्णा वा भवितुमर्हन्ति। किन्तु कल्पना तु क्रियते सा च कल्पना[16] जनसामान्यानां कृतेऽवबोधनायैव। असत्यमार्गेण सत्यस्य परमतत्त्वस्यान्वेषणाय। एवम्भूतायां कल्पनायां सत्यामेवापोद्धारस्य कल्पना व्यधीयत सा चेत्थम्-

**"यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।**

**आपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते"॥**[17]

आपोद्धारप्रक्रियायां वाक्यानि पदेषु पदानि च प्रकृतिप्रत्ययेषु विभज्य सामान्येभ्यः बोध्यन्ते। शाब्दबोधाय च कार्यकारणभावस्य कल्पना क्रियते। तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्ति-विशिष्टज्ञानं हेतुः।

कार्यकारणाख्योऽयं सिद्धान्तश्शाब्दबोधं कारयति नान्यथा शाब्दबोधो भवितुमर्हति। शाब्दबोधे च कारणीभूता शक्तिः। ज्ञानेचवृत्तिवैशिष्ट्यंद्विधा स्वविषयकोद्बुद्धसामानाधिकरण्येन स्वाश्रयपदविषयकत्वेन च। एवंप्रकारेणवृत्तेर्कारणता समायाति। अभिधाया विषये विदुषां साहमत्यमेकस्वरेण विद्यते। किन्तु लक्षणाव्यञ्जनयोर्विषये भेदो दृश्यते। तत्र वैकरणानां सम्मतस्त्रिशक्तिवादः। शक्तिवादमात्रं वा। अद्वैतवेदान्तिनस्तु केवलं शक्तिद्वयमेव स्वीकुर्वते। शक्तिलक्षणाभेदात्। शक्तिश्च व्यावहारिकजगतो बोधं कारयतीति सम्प्रदायः प्राचीनो विद्यते। नव्येषु धर्मराजाध्वरीन्द्रस्य मतेनाभिधयैव बोध्यते तत्परमार्थतत्त्वं 'ब्रह्म' इति तन्मते नास्ति लक्षणाया आवश्यकता। वेदान्तदर्शनस्य मुख्यं प्रयोजनं महावाक्यार्थावबोधनम्। 'तत्त्वमसी'त्यादिमहावाक्यानां ज्ञानं लक्षणां विना न सम्भवत्येतदर्थं तत्रलक्षणा स्वीकृता विद्यते। व्यञ्जनाया वेदान्तशास्त्रेऽनुपयुक्तत्त्वात् तस्याश्चर्चा न विद्यते।

अत्र च प्रमुखरूपेण भाषाया विश्लेषणमुखेन शब्दशक्तीनां व्याख्यानं तेषां समीक्षा च कृता विद्यते। कथं च तासामुपयोग इति सर्वं द्वयोर्दर्शनयोः प्रत्यपादि।

---

[16] "पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन"॥ वाक्यपदीयम्, १/७३

[17] तत्रैव, २/१०

शोधप्रबन्धस्य प्रमुखं कार्यं शब्दाद्वैतार्थाद्वैतयोश्चर्चा। किं शब्दब्रह्म वेद्यते भाषया न वा इत्यस्य युक्तियुक्ता वैयाकरणानां वेदमूलकं व्याख्यानं कृतं विद्यते। तथैवाद्वैतवेदान्तिनां मते ब्रह्मणश्चर्चा विधिवद्विचारिता विद्यते। अत्र प्रमुखो बिन्दुर्विद्यते यच्छब्देन ब्रह्मणो ज्ञानं सम्भवति न वा।

तेनात्र वैयाकरणानां मते तु सर्वपरिकल्पातीततत्त्वं भेदसंसर्गादिरहितं तत्त्वं शब्दब्रह्म। एवं लक्षणोपेतमद्वैतवेदान्तिनामपि ब्रह्म तत्र च। वैयाकरणैश्शब्देनैव सर्वं भाव्यते शब्दातिरिक्तं किमपि तत्त्वं विद्यते ब्रह्माण्डेऽस्मिन्। अद्वैतवेदान्तेऽपि व्यावहारिकदशायां वैयाकरणानामिव शब्दानां प्रवृत्तिः। किन्तु शब्दैर्ब्रह्मणो ज्ञानं न कारयितुं शक्यत इत्येकः पक्षश्शब्दवती भाषा ब्रह्मसम्बन्धिनमज्ञानमहाय भाषा निवृत्ता भवति ।

तस्मादज्ञाननिवृत्तिरेव भाषायाः कार्यम्। न तु भाषया बोध्यते ब्रह्म। किन्तु विवरणकारस्य विद्यारण्यस्वामिनो मते शब्दैरेव महावाक्यानि प्रबोध्यन्ते। शब्दश्च च साक्षात्कारणं भवति ब्रह्मज्ञाने इति तेषां मतम्। तस्माच्छब्देनापि ब्रह्मणो ज्ञानं कार्यते। शब्द च साक्षात् कारणं भवति ब्रह्मज्ञाने। वेदान्तवाक्यानि तत्परमं तत्त्वं प्रबोधन्ति। अत्र च परब्रह्मणो बोधे शब्दशक्तीनां कारणता नोपयाति। शब्दशक्तीनां व्यवहारमात्रविषयकत्वात्। **“यत्र द्वैतमिव भवति तत्र इतर इतरं पश्यति, यत्र तु सर्वमात्मैवाभूत् तत्र केन कं पश्येत्”।** आत्मा नाम पारमार्थिकदशा। तत्र ‘प्रमाता प्रमाणं प्रमेयः प्रमितिश्च’ सर्वेषामेक्यमेव जायते। एवम्भूताया दशाया व्यवहाराविषयता। ब्रह्ममात्रमेवावशिश्यते।

अ**द्वैतवेदान्तः –**

भारतीयक्रान्तप्रज्ञमहर्षिभिः परमतत्त्वं नानानामभिरभ्यधीयत। किन्तुपारमार्थिकं तत्त्वं तु एकमेव।[18] पारमार्थिक्याः सत्तायाः प्राप्तये तु सर्वैर्दर्शनैर्मार्गाः प्रादर्श्यन्त। तद्यथा- **“सर्वं खल्विदं ब्रह्म” “एकमेवाद्वितीयं ब्रह्म” “नेह नानास्ति किञ्चन”** इत्यादिश्रुतिवाक्यैरेवाद्वैतवेदान्तस्य पूर्णताखण्डयोः सम्प्रत्ययो जायते। अद्वैतवेदान्तस्य प्रतिपाद्यं ब्रह्मज्ञानमेव वर्तते। किन्तु ब्रह्मज्ञाने कारणत्वं नोपयाति किल भाषा। तथाप्यद्वैतवेदान्तदर्शने

---

18 “इन्द्रं मित्रं वरुणमग्निमाहुरथोदिव्यः ससुपर्णोगरुत्मान्।
एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः”॥ ऋक्, १०/१२५/१

भाषयैवतद्ब्रह्मणो ज्ञानाय विश्लेषणमक्रियत। वेदान्तसारग्रन्थे सम्बन्धत्रयेणाखण्डार्थबोधकं वाक्यं महावाक्यम्। किन्तु ब्रह्मविद्यायां ब्रह्मणोऽनिर्वचनीयत्वमुदघोषि।[19] ब्रह्मण उभयविधलक्षणप्रतिपादनं वाक्यैरेव। **"विज्ञानमानन्दं ब्रह्म"**[20] **"सत्यं ज्ञानमनन्तं ब्रह्म"**[21] इन्द्रियातीतत्वं ब्रह्मत्वम्, तज्ज्ञानं भाषया नैवापितु सङ्केतमात्रत्वम्। ब्रह्मज्ञानमाधृत्याद्वैतवेदान्ते नैके ग्रन्था व्यरच्यन्त। आचार्यबादरायणेन "अनुभवावसानत्वात्" अतीन्द्रियत्वादेव वाक्यैरनवेद्यत्वं ब्रह्मणः। किन्तु लोकव्यवहारे यथार्थतत्त्वप्रतिपादने शास्त्रस्यैव प्रामाण्यं स्व्यक्रियत। यतोहि महर्षीणामतीन्द्रियात्मकस्तत्त्वानुभव एव श्रुत्यात्मकशास्त्रत्वेन प्राकट्यत। भाषायाः प्रयोजनं तु नैरर्थ्यंनस्यात्तदर्थं प्रतिपाद्यतेऽस्याः प्रयोजनवत्ता। ब्रह्मसम्बन्धिन्या अविद्याया निवर्तना शास्त्रद्वारैव सम्भाव्यते। तदाह- "शास्त्रं हि प्रत्यगात्मन्यविद्याऽध्यारोपित-मतद्धर्मं निवर्तयत्येव केवलं न तु तं कर्मीकरोति" वस्तुतस्त्वद्वैतवेदान्ते मुख्यप्रमेयत्वं तु शुद्धचैतन्यं जीवब्रह्मणोरैक्यमेव तत्रैव वेदान्तिनस्तात्पर्यमा-मनन्ति। व्यावहारिकीं पारमार्थिकीं सत्तास्वरूपं मनस्याधाय शाब्दबोधप्रक्रिया व्यश्लिष्यत। महावाक्यार्थबोधस्तुजहद-जहल्लक्षणयैव सम्भाव्यते न तु गौण्यभिधाभ्याम्। तस्मादस्ति महावाक्यार्थावन्तरवाक्यार्थबोधाय शब्दशक्तीनामावश्यकता। एतेनात्र निसचीयत शब्दशक्तीनामध्ययना-परिहार्यत्वम्। वाक्यपदीयेऽचीकथत-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते॥** [22]

काथञ्चित्कोऽपि सम्प्रत्ययो भाषयैव परिसमाप्यते। तस्माल्लोकोपकारित्वं भाषायाश्शिष्टैः प्राख्याप्यत। लोकव्यवहारेऽद्वैतवेदान्तं महीयते केवलं ब्रह्मज्ञानयैव न तु तत्ख्यातिर्भाषाया विश्लेषणाय, अतस्तद्प्रतिष्ठापयितुं शोधकार्यममुं प्रवर्तते। सर्वत्र शब्दैरर्थज्ञानाय कानिचन

---

[19] "यतो वाचो निवर्ततन्ते अप्राप्य मनसा सह"। तैत्तिरीयोपनिषद्, २/४/१

[20] बृहदारण्यकोपनिषद्, ३/९/२८

[21] तैत्तिरीयोपनिषद्, २/१/१

[22] वाक्यपदीयम्, १/ १२३

तत्त्वानि भवन्ति। तेष्वन्यतमत्वं शब्दशक्तीनाम्। शक्तिलक्षणान्यतरत्वं सम्बन्धत्वमगद्यत। एतदभिलक्ष्यैव शक्तीनामध्ययनमवश्यम्भावि।

**अर्थाद्वैतः–**

वैयाकरणाश्शब्दाद्वैतमामनन्ति। शब्दाद्वैतमाधृत्यैव ते सर्वविधं व्यवहारं निर्वहन्ति तद्वदेवाद्वैतवेदान्तिनश्शब्दार्थं स्वीकृत्यभाषाचिन्तनमाधारीयन्ति। नाम्नो वैकार्यमर्थस्य च सत्यता वेदान्तेऽमीमनत[23] सत्तात्रयवादिभिः परमतत्त्वज्ञानं शब्दागोचरत्वं सङ्केतमात्रत्वञ्च शब्दानां संप्रत्यज्ञायत। तस्मात्पदार्थाभाववद्ब्रह्मेति सिद्ध्यति।[24] **"न तत्र चक्षुर्गच्छति.....अविदितादधि"॥**[25] **"यद्वाचानाभ्युदितं......उपासते"॥**[26] उच्यते यद्योगिनश्शब्दरहितमर्थमवबुध्यन्ते। तद्यथा दक्षिणामूर्तिस्त्रोत्रे-

**"चित्रं वटतरोर्मूले वृद्धाः शिष्यागुरुर्युवा।**

**गुरोस्तुमौनं व्याख्यानं शिष्यास्तुछिन्नसंशयाः"॥** [27]

अद्वैतवेदान्तदर्शने सर्वत्र महावाक्यावान्तरवाक्यार्थज्ञानाय शब्दशक्तीनां प्रयोगो व्यधायि तासामुपयोगो लोकव्यवहारायापि शोधमाध्यमेन कृतं विद्यते। ब्रह्मसूत्रेसङ्केतः प्रापशब्दशक्तीनाम्। आचार्यशङ्करस्तु साक्षान्निर्दिशति गीताया भाष्ये सर्वो हि शब्द अर्थ प्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिः जातिगुणक्रियासम्बन्धद्वारेण सङ्केतग्रहणं संव्यवेक्ष्य अर्थं प्रत्याययति। तद्यथा गौः अश्वः वा इति जातितः। पचति पठति इति वा क्रियातः। शुक्लः कृष्णः इति वा गुणतः। धनी गोमान् इति वा सम्बन्धतः।[28] एतेनाचार्यशङ्करोऽभिधां व्याख्याति। सैव मुख्यार्थदा भवति।

---

[23] "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्"। छान्दोग्योपनिषद्, ३/१/१४

[24] "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह:। तैत्तिरीयोपनिषद्, २/४/१

[25] केनोपनिषद्, १/३

[26] तत्रैव, १/४

[27] सर्वज्ञातमुनिप्रणीत पञ्चप्रक्रिया हिन्दी अनुवाद एवं विश्लेषण, पृ०८

[28] गीताशाङ्करभाष्यम्, ८/१२

**"प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता।**

**विरुध्यते यतस्तस्माल्लक्षणा सम्प्रवर्तते"।** [29]

अद्वैतवेदान्तदर्शने तिस्त्र एव शब्दशक्तयः सममन्यन्त- तिस्त्रश्शब्दस्य शक्तयः प्रसिद्धिलक्षणागुणवृत्तयः इति लोके प्रसिद्धाः।[30] **"प्रसिद्धिपदेन मुख्यावृत्तिरभिधीयत"।**[31] **"लक्षणा तु पुनर्मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे सति मुख्यार्थसम्बन्धादर्थान्तरे वृत्तिः"।**[32] **"गुणवृत्तिस्तुमुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे सति मुख्यार्थगुणयोगादर्थान्तरे वृत्तिरिति। त्रिधात्वम्। तत्र शक्तिर्नाम पदानामर्थेषुमुख्यावृत्तिसा च शक्तिः पदार्थान्तरकारणम्"।**[33] लक्षणाविषयोलक्ष्यः,[34] गौणीलक्षणाया अन्तर्भावो लक्षणायामेव व्यधात्। नव्यवेदान्ते धर्मराजाध्वरीन्द्रेणाभिधयैव महावाक्यार्थोऽवाबोध्यत। व्याकरणमपि मोक्षं प्रापयति[35] एवंरीत्या वेदान्तदर्शने शब्दशक्तीनां विश्लेषणं व्यधीयत। तथा च व्याकरणमद्वैतवेदान्तमाधृत्यैव शब्दशक्तीनां समीक्षात्मकमध्ययनं व्यक्रियत।

**प्रस्तावितशोधकार्यस्यक्षेत्रम्–**

प्रस्तुतशोधकार्यस्य क्षेत्रं व्याकरणाद्वैतवेदान्तयोश्शब्दशक्तीनां समीक्षात्मकमध्ययनम्। अत्र शब्दशक्तीनां किं स्वरूपं किं च तासामावश्यकता कथं च सम्बन्धत्वेन शाब्दबोधाय शब्दशक्तयः प्रवर्तन्ते व्यवहारिकजगति। पारमार्थिकजगति च किं तासामुपयोगोऽस्ति न वा। पुनश्च शब्दस्य किं स्वरूपं प्रयोजनं च किं च शब्देन वाक्येन वा ब्रह्मणो बोधो भावयितुं शक्यते न वा इत्यादिका विचारा अत्र व्यभावयन्। तदर्थं च मुख्योपादेयभूता ग्रन्थाश्चर्चिता विद्यन्ते। अस्य शोधकार्यस्य क्षेत्रमित्थं विद्यते।

---

[29] वाक्यवृत्तिः, पृ० ७८

[30] पञ्चप्रक्रिया, पृ० १२७

[31] तत्रैव, पृ० १२७

[32] तत्रैव, पृ० १२७

[33] वेदान्तपरिभाषा, पृ० २०७

[34] वेदान्तपरिभाषा, पृ० २११

[35] "इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं हि मोक्षमाणानामजिह्मा राजपद्धतिः"। वाक्यपदीयम्, १/१६

**व्याकरणसम्प्रदायीयग्रन्थाः–**

- अष्टाध्यायी पाणिनिकृता
- वार्तिकानि कत्यायनस्य
- व्याकरणमहाभाष्यम्
- वाक्यपदीयम्, काण्डत्रयम्
- काशिकावृत्तिः
- सिद्धान्तकौमुदी
- प्रौढमनोरमा
- लघुशब्देन्दुशेखरः
- परिभाषेन्दुशेखरः
- वैयाकरणभूषणसारः
- वैयाकरणसिद्धान्तमञ्जूषा,
- वैयाकरणसिद्धान्तलघुमञ्जूषा
- परमलघुमञ्जूषा
- व्याकारणशास्त्रस्येतिहासः युधिष्ठिरमीमांसकस्य

**वेदान्तसम्प्रदायस्यग्रन्थाः–**

- ब्रह्मसूत्रम्
- ब्रह्मसूत्रशाङ्करभाष्यम्
- सौन्दर्यलहरी
- अपरोक्षानुभूति
- विवेकचूडामणिः
- सङ्क्षेपशारीरकम्
- पञ्चप्रक्रिया
- वेदान्तकल्पलतिका
- वाक्यवृत्तिः
- वाक्यपदीयब्रह्मकाण्डम्
- विवरणप्रमेयसङ्ग्रहः
- उपदेशसाहस्त्रीश्लोकः
- सिद्धान्तबिन्दुः
- पञ्चदशी

- नैष्कर्म्यसिद्धिः
- आत्मबोधः
- सिद्धान्तलेशसंग्रह
- वेदान्तसिद्धान्तमुक्तावली
- वेदान्तपरिभाषा
- वेदान्तसारः
- सर्वदर्शनसङ्ग्रहः

एतान् ग्रन्थान् विहायापि अन्येषां ग्रन्थानां शब्दशक्तिसम्बन्धितानां व्याकरणाद्वैतवेदान्तयोरितरशास्त्राणां सहायताऽनीयत। तत्र च वेदा पुराणानि साहित्यम्, इत्यादिकम्।

**प्रस्तावितशोधकार्यस्यौचित्यम्–**

यद्यपि शब्दशक्तिविषयिणी चर्चा बहुषुदार्शनिकग्रन्थेष्वथ च शोधकार्येषु सविस्तरं सर्वत्राक्रियत। तथापि वैयाकरणानां सम्प्रदायेऽद्वैतवेदान्तसम्प्रदाये च एवम्भूतं शोधकार्यंद्वयोः शब्दशक्तीनां तुलनात्मकाध्ययनं विधाय लोकव्यवहारे भाषिको व्यवहारः सामान्यजनेभ्यः साधुसरलरीत्या स्यादथ च लोकात्परं पारलौकिकं तत्त्वमपि सम्बोध्येत। तत्र च का विसङ्गतयस्तन्मूलञ्च किं कथं च तासां परिहार इत्यादिकं सर्वं शोधमाध्यमेन प्राकट्यत।

- प्रस्तुतशोधकार्यस्य तात्पर्यं शब्दशक्तीनां ज्ञानमात्रं न प्रत्युतशब्दशक्तीनां समग्रं स्वरूपं व्याख्याय शास्त्रसम्मतायाः परम्परायाः पालनपूर्वकं सुसाधीयो ज्ञानम्।
- व्याकरणपरम्परायां शब्दशक्तीनां स्वरूपं व्याख्यानञ्च सम्बन्धत्वम्। सम्बन्धस्य नियामकत्वम्, शक्तिग्राहकसाधनानि, सङ्केतस्य शक्तित्वाभावः, सम्बन्धस्य च शक्तित्वाभावः, इत्येतेषां समीक्षणपुरस्सरं व्याख्यानम्।
- शाब्दबोधकाले वृत्तिविशिष्टत्वं च केन केन सम्बन्धेन सम्भवति। समग्रशाब्दबोधप्रकारः।
- शब्दस्य स्वरूपप्रतिपादनम्, व्यावहारिकपारमार्थिकभेदाच्छब्दस्य प्रदर्शनम्, युक्तयश्च।

- व्यावहारिकजगति व्याकरणाद्वैतवेदान्तयोश्शब्दयोश्शाब्दबोधस्य च साधना। भाषायाश्चाज्ञाननिवर्तकत्वम्, अज्ञाननिवृत्तिरेव मोक्ष इति प्रतिपादनम्।
- तत्र वैयाकरणानां शब्दाद्वैतस्याद्वैतवेदान्तिनामर्थाद्वैतस्य च ब्रह्मत्वं समानमेवेति प्रतिपादनम्।
- शब्द एव साक्षात्कारे साक्षात्कारणतामुपयाति इति विवरणकारस्य मतम्, वाचस्पतिमिश्रस्य च मतम्। द्वयोस्समीक्षणपुरस्सरं शब्दस्य प्रधानकारणत्वम्। तत्र वैयाकरणसम्मतिश्च।
- मोक्षमूलिकाया भाषायाः प्रतिपादनम्।

**विद्यमानशोधकार्येभ्योऽस्यवैशिष्ट्यम् –**

शब्दशक्तीनां विषयेबहूनि शोधकार्याण्यजायन्त विविधदर्शनान्याश्रित्य तथापि व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षात्मकमध्ययनम्, इत्यस्मिन् विषये शोधार्थिदृष्टिपथे शोधकार्याणि न समायन्। अतोऽस्य शोधकार्यस्य वैशिष्ट्यं पूर्ववर्तिशोधकार्येभ्यो भिद्यत एव।

अत्रत्यं वैशिष्ट्यमिदमेव यद्व्याकरणस्याद्वैतवेदान्तेन सह तुलनात्मकमध्ययनं विधाय शब्दशक्तीनां समीक्षा कृता विद्यते। तेष्वपि वैयाकरणानामपि मते तेषां परम्परायां शब्दशक्तेः स्वरूपं भेदाः, कारणानि, च कानि इत्यादिकं प्रत्यपादि शोधार्थिना। तथैवाद्वैतवेदान्तद्दर्शने तेषां तेषामाचार्याणां ग्रथानामध्ययनेन शब्दशक्तीनां विचारोऽक्रियत। तथा च शब्दशक्तीनामद्वैतवेदान्तदर्शने का आवश्यकता। किमर्थं च शब्दशक्त्या न प्रतिपाद्यते परब्रह्म इत्यादिकं सर्वं सकारणं शोधार्थिना न्यरूप्यत।

शब्दशक्तयश्च भाषाया अर्थावबोधाय यथाऽवेदान्ते तथैव व्याकरणदर्शनेऽपिव्याख्याताः। पदपदार्थानां चर्चाऽपि द्वयोर्दर्शनयोः समानैव। पुनश्च व्यावहारिकजगतः सञ्चालनाय तत्तत्पदार्थजातानामर्थानामवबोधाय शब्दशक्तीनामावश्यकत्वात्।

अद्वैतवेदान्तस्य व्याकरणस्य च परमं तत्त्वं समानमेव। तत्र च तत्त्वे नामकृतो भेद इत्यपि प्रतिपादितं विद्यते। अविद्यायाश्च प्राबल्यादेव द्वयोर्दर्शनयोः प्रतिपादितं ब्रह्म विवर्तते। एतत्सर्वं व्याख्यातं विद्यते।

भाषायाश्शास्त्रस्य च प्रयोजनं वेदान्तवाक्यैरेव परब्रह्मणोऽनुभवात्मकः साक्षात्कारस्सम्भवति।

- स्नेही, ममता, सर्वज्ञातमुनि प्रणीत पञ्चप्रक्रिया “हिन्दी अनुवाद एवं विश्लेषण” जवाहरलालनेहरूविश्वविद्यालयः, नईदिल्ली, २०१४. लघुशोधकार्यमिदं ममतास्नेहीद्वारा कृतं विद्यतेऽत्र तया स्वकीये लघुशोधप्रबन्धे सर्वज्ञातमुनेः पञ्चप्रक्रियाया आश्रयणं प्रमुखरूपेण कृतं विद्यते। न प्रमुखवेदान्तशास्त्रीयग्रन्थानां तस्मादेतच्छोधकार्यं तस्याः शोधकार्याद्भिद्यते एव।

उपर्युक्तशोधकार्याच्छोधकार्यमिदं सर्वथा नवीनं विद्यते। अत्र च व्याकरणाद्वैतवेदान्तसम्मतशब्दशक्तिसिद्धान्तानां चर्चा कृता। तथा च समग्रा समीक्षाऽपि विद्यते। येन जिज्ञासूनामालोचनात्मिकाया दृष्टेर्विकासो भविष्यति।

अत्रैतदपि वक्तव्यं यद्यथा व्याकरणशास्त्रस्य भाषादर्शनं विद्यते। तस्य च महत्त्वं जगतीह पदशास्त्रत्वेन खातिङ्गतम्। तथैव भाषाशास्त्रस्य विश्लेषणं वेदान्तशास्त्रेऽपि बहुत्र कृतं विद्यते। सिद्धान्तबिन्दौ संक्षेपशारीरके, उपदेशसाहस्त्र्यां पञ्चदश्यां च विशिष्य भाषासम्बन्धिनस्सिद्धान्तास्समैक्ष्यन्त। तस्मान्न केवलं व्याकरणं प्रत्युताद्वैतवेदान्तस्य भाषादर्शनस्य सिद्धान्तानां ज्ञानं जनानां समक्षं समागच्छेदित्यपि शोधप्रबन्धस्य समुद्देश्यम्।

**शोधप्रविधिः–**

प्रस्तुतशोधकार्यस्य पूर्णतायै शोधार्थिना शोधकार्यसम्बन्धिनीनां सामग्रीणां सङ्कलनमकरोत्। ततश्च शोधसामग्रीणां सूक्ष्मैक्षिकया गभीरमध्ययनं कृतवान्। तदनु परीक्षणपुरस्सरं व्याकरणाद्वैतवेदान्तसिद्धान्तैः सह तुलनां कृत्वा सूक्ष्मचिन्तनपुरस्सरं शोधप्रबन्धस्य लेखनमकरोत्। यथावसरं विवेचनवर्णनात्मकविश्लेषणात्मकप्रविधीनामाश्रयणं कृतं विद्यते।

प्रस्तुतशोधकार्ये मुख्यत्वेनात्र तुलनात्मकप्रविधेराश्रयणं कृत्वा आलोचनात्मकाध्ययनं विभावितं विद्यते। प्रस्तुतशोधकार्याय प्रमुखरूपेणा-ध्ययनाय सामग्र्यै च, राष्ट्रियसंस्कृतसंस्थानजवाहरलालनेहरूविश्वविद्यालय-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठसम्पूर्णानदसंस्कृतविश्वविद्यालय-स्थानां पुस्तकालयानां तथा च केषाञ्चनान्यमठमन्दिरस्थानां लघुपुस्तकालयानामपि प्रयोगो व्यधीयत शोधार्थिना।

## ॥ प्रथमोऽध्यायः ॥

## ॥ व्याकरणस्य दर्शनत्वं परम्परा च ॥

**व्याकरणस्य वेदमूलकत्वम्–**

वेदो हि विश्वस्य प्राचीनं श्रेष्ठतमं विद्यास्थानम्। अस्माकं भारतीयायां परम्परायां वेदेषु सर्वविधं ज्ञानं विज्ञानं तथा च संसारोपयोगीनि ब्रह्माण्डोपयोगीनि तत्त्वानि विद्यन्ते, तज्ज्ञानमेव सर्वत्र ग्रन्थेषु भिन्न-भिन्नप्रकारेण चकास्तितमाम्। तथा च मनूक्तौ प्राप्यते यत्–

**"यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**

**स सर्वो निगदितो वेदे सर्वज्ञानमयो हि सः"॥**[1]

एवं रीत्या सर्वमपि ज्ञानं वेदमूलकतां पुष्णाति। तस्माद्वेदानां सर्वज्ञानमयत्वमिति गम्यते। सर्वज्ञानमस्य वेदस्यैव। अस्माकं परम्परायां संस्कृतावपि स्वीकृतत्वात् सर्वजनश्रद्धास्पदत्वम्। उच्यते चाचार्येण मनुना–

**"श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः।**

**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्"॥**[2]

तात्पर्यमिदं यच्छ्रुतिस्मृतिभ्यां यद् बोध्यते तस्यैव धर्मानुष्ठानं क्रियते। किमर्थं वेदस्मृतिद्वारा प्रत्यायिते धर्मे एव प्रवृत्तिस्तद्वदति उत्तरार्धेनेह संसारेऽर्थादितस्यात्मनो हेतोर्भोगायतनविषयभूताय शरीरायाभ्युदयपूर्विकां कीर्तिं सन्दायान्ते च सति नाशे शरीरस्य प्रेत्यभावे उत्तमोत्तमेन सुखेन संयुनक्ति। तस्माद्धेतोर्भारतवर्षस्य संस्कृतिस्तथा चैतस्याः संस्कृतेः समुपासकाः "वेदाः" इत्येव सर्वासां संविद्यानामौत्सस्थलमित्यामनन्ति।

---

[1] मनुस्मृतिः, २/७

[2] तत्रैव, २/९

वेदेन तथा च स्मृत्या बोधिते धर्मे तर्कोऽविधेयः, यतोहि धर्मो श्रुतिस्मृतिभ्यामेवाजायत।[3] एवम्भूतस्य सर्वविधस्य व्याख्यानस्याशय एव यद् भारतीयज्ञानपरम्परा वैदिकेन ज्ञानेनैव प्रकाशमाना जायमाना दृश्यते। अत एव मन्वादयो महर्षयः प्रोचुः सर्वज्ञानमयो वेद इति। पाश्चात्यविदुषा मैक्समूलरद्वारा कथ्यते यद्भारतीयज्ञानविषयीभूतग्रन्थानां विषये।[4] इत्थं तस्य प्रतिपादनाया विचारणायां सत्यां व्याकरणशास्त्रस्य मूलं वेदा एव तच्च वेदमन्त्राणां प्रामाण्यद्वारा एव प्रमाणयितुमीहेऽत्र-

तत्र ऋग्वेदे "**यज्ञेन यज्ञमयजन्त देवाः**"[5] इति मन्त्रांऽशे यज्ञशब्दस्य यजधातुना कीदृशी साधीयसी व्युत्पत्तिः प्रदर्शिताऽस्ति निरुक्तकृतो व्याख्यानञ्च।[6] अष्टाध्याय्याञ्च तदेव पदप्रतिपादकं शास्त्रमपि।[7] "**पूर्वीरश्नन्तावश्विना**"[8] एतस्य पदस्यापि व्याख्या निरुक्तशास्त्रे समदीयत।[9] एवम्प्रकारिकाणां श्रुतीनां व्याकरणस्य मूलप्रतिपादकानां दर्शनं भवति। एवमेव "**धान्यमसि धिनुहि देवान्**"[10] इति यजुर्वेदे मन्त्रभागे धान्यशब्दस्य। एतस्यैव धान्यपदस्य व्याख्यानं महाभाष्यकृद् विदधाति।[11] तथैव "**केतपूः केतं नः पुनातु**",[12] अत्र केतपूशब्दस्यापि व्युत्पत्तिः क्रियते। केतोपपदात् पूङ्धातोः क्विपि सति केतपूरिति सिध्यति। "**येन देवाः पवित्रेणात्मानं पुनते सदा**"[13] इति सामवेदे पवित्रशब्दस्य। एतस्य

---

[3] "योऽवमन्येत् ते मूले हेतुशास्त्राश्रयाद्द्विजः। स साधुभिर्वहिष्कार्यः नास्तिको वेदनिन्दकः"॥ तत्रैव, २/११०

[4] "We may divide the whole of Sanskrit literature, beginning with tha RigVed endind with Dayaananda's introduction to his edition of the RigVed". Mexmular, India: What can it teach us, Lecture, P. 111 उद्धृतम्, संस्कृतव्याकरणशास्त्रस्येतिहासः, पृ० ६२

[5]ऋग्वेदः,१०/९०/१६

[6] "यज्ञः कस्मात्? प्रख्यातं यजति कर्मेति नैरुक्ताः"। निरुक्तम्, ३/१९

[7] "यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्"। अष्टाध्यायी, ३/३/९०

[8] ऋग्वेदः, ८/५/३१

[9] "अश्विनौ यत् व्यवश्नुवाते सर्वम्"। निरुक्तम्, १२/१

[10] यजुर्वेदः,०१/२०

[11] "धिनोतेर्धान्यम्"। महाभाष्यम्, ५/२/४

[12] यजुर्वेदः, ११/७

[13] सामवेदः,उत्तरार्चिकः,५/२/८/४

व्युत्पत्तिरपि[14] पूङ्धातोः ष्ट्रनि सति कृता। **"तीर्थैस्तरन्ति"**[15] इत्यथर्ववेदे, तीर्थशब्दस्य तृधातोरौणादिके थक्प्रत्यये कृते सति तीर्थ इति साध्यते।

एवं विविधमन्त्राणां प्रकृतिप्रत्ययविश्लेषणेन व्याकरणशास्त्रस्य मूलभूतः सङ्केतः साधूपलभ्यते। शब्दार्थयोः स्वरूपनिर्धारणं[16] व्याकरणशास्त्रस्य मुख्यं प्रतिपाद्यमस्ति। शब्दतत्त्वस्य दार्शनिकस्वरूपं वेदब्राह्मणोपनिषत्सु स्पष्टीकृतमस्ति। ऋग्वेदे प्रतिपादितं वर्तते यत्-

**"अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा।**
**परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव"॥**[17]

शतपथब्राह्मणेऽपि निगदितम्-

**"वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।**
**अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह"॥**[18]

गोपथब्राह्मणे पाणिनिव्याकरणे प्रयुक्तानामनेकानां शब्दानाम् उपलब्धिमपि समर्थयति।[19] कैवल्योपनिषद्यपि सर्वमपि वाक्तत्त्वे संवर्तत्वेन रारार्ष्टि–

**"मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।**
**मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्"॥**[20]

---

14 "पूङश्च"। अष्टाध्यायी, ३/२/१८५

15 अथर्ववेदः१८/४/८

16 "व्याक्रियते व्युत्पाद्यते प्रकृतिप्रत्ययविभागतत्तदर्थविभाग-तत्तदन्वयबोधविषयकज्ञानम् अनेन इति व्याकरणम्"। परमलघुमञ्जूषाया मङ्गलाचरणे।

17 ऋग्वेदः,१०/१२५/८, अथर्ववेदः,४/३०/८

18 शतपथब्राह्मणम्, ६/५/३/४

19 "ओङ्कारं पृच्छामः, को धातुः, किं प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गम्, किं वचनम्, का विभक्तिः, कः प्रत्ययः, कः स्वर उपसर्गो निपातः। किं वै व्याकरणम्, को विकारः, को विकारी, कतिमात्रः, कतिवर्ण, कत्यक्षरः कतिपदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम्"। गोपथब्राह्मणम्, १/१४

20 कैवल्योपनिषद्, १/१९

तैत्तिरीयसंहितायां प्रतिपेदे- **"वाग्वै पराच्यव्याकृतावदत् ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्व्वीति, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते"।**[21]

आदौ वाक्तत्त्वमव्याकृतमासीत्। देवैः प्रार्थितस्सन्निन्द्रस्तस्या व्याकरणमकरोत् (अव्याकृताद्व्यक्त इति)। तदारभ्य वाक्तत्त्वं व्याकृतवाग् इत्यकथ्यत।

वैयाकरणैरप्येषा वेदोपनिषत्सु विवेचिताऽवधारणा स्पष्टीकृता। तत्रभवान् भर्तृहरिः समुद्घोषयामास- उत्पत्तिविनाशरहितम्, शब्दतत्त्वं यदक्षरं त्रैकालिकव्याप्तसत्ताकमविनाशि, व्यापकमक्षरात्मकं वा ब्रह्म, यतो ब्रह्मणो जगतः संसारस्य प्रक्रिया क्रियाकलापः प्रवर्तते, तच्छब्दतत्त्वमर्थभावेन गोघटाद्यर्थस्वरूपेण विवर्तते- विवृत्तं भवति।[22] **"सर्ववेदपारिषदं हीदं शास्त्रम्"**,[23] अस्यैव फलितार्थोक्तिर्वर्तते शिष्टैर्प्रयुज्यमानत्वात्।

**"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्"।**[24]

इत्युक्तिद्वारा व्याकरणस्य सार्वेयता गम्यते। एतेषां व्याख्यानेन विभाव्यते यद् वेदमन्त्रेष्वेव व्याकरणमन्तर्भूतस्सद् वेदात्मकतां लभते। एवं महर्षिणा पतञ्जलिना महाभाष्ये प्रत्यपादि–

**"चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश"॥**[25]

---

[21] तैत्तिरीयसंहिता, ६/४/७, मैत्रेयीसंहिता, ४/५/८, काण्वसंहिता, २७/२, कापिष्ठलसंहिता, ४२/३

[22] "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥ वाक्यपदीयम्, १/१

[23] महाभाष्यम्,२/१/६८

[24] विदुषोक्तिः

[25] महभाष्यपस्पशाह्निकम्, पृ० ४५, ऋग्वेदः, ४/५८/३

**"चत्वारि वाक्परिमितापदानि..........मनुष्या वदन्ति"।**[26] **"उत त्वः पश्यन्न ददर्श........सुवासाः"।**[27] **"सक्तुमिव तितउना ........निहिताऽधि वाचि"।**[28] **"सुदेवोऽसि वरुण...................सुषिरामिव"।**[29]

एतेषां मन्त्राणां व्याकरणशास्त्रीयं व्याख्यानं निरुक्तमहाभाष्यकृद्भ्यां प्रतुष्टुवे। एतेन निश्चीयते यद् व्याकरणस्य वेदमूलकतैव विद्यते। इतोऽपि व्याकरणस्य पुरातनत्वविचारे प्रामाण्येन प्रथ्यते यद् वाल्मीकिरामायणे हनुमता कथं स्वगुरुणा व्याकरणमग्राहीति वर्ण्यते-

**"असौ पुनर्व्याकरणं ग्रहीष्यन् सूर्योन्मुखः प्रष्टुमनाः कवीन्द्रः।**

**उद्यद्गिरेरस्तगिरिञ्जगाम ग्रन्थं महद् धारयन्नप्रमेयः"॥**[30]

किष्किन्धाकाण्डेऽपि श्रीरामचन्द्रेण हनुमन्मिलनप्रसङ्गेऽबोधि-

**"बहु व्याहरताऽनेन न किञ्चिदपभाषितम्।**

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्"॥**[31]

यदा पवनसुतो रामचन्द्रेण सह धाराप्रवाहरूपेण गीर्वाणवाण्यां व्याहरति। व्यवहारकाले काश्चन त्रुटयो नाजायन्त तदा तस्यानुभावनमासीद् यदनेन न सम्भाषणे स्खलितं प्रत्युत उत्तमोत्तमं सम्भाषणं व्यधीयत। तस्य पाण्डित्यपूर्णेन सम्भाषणेन निसचीयत यन्महान् वैयाकरणोऽसौ। न केवलं रामायणे महाभारतस्योद्योगपर्वण्यपि प्राप्यते।[32] षडङ्गत्वनिर्देशोऽपि मुण्डकोपनिषद्या-

---

[26] ऋग्वेदः, १/१६४/४५

[27] तत्रैव, १०/७१/४

[28] तत्रैव, १०/७१/२

[29] तत्रैव, ८/६९/१२

[30] रामायणम्,

[31] तत्रैव, ७/३६/४५

[32] "सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते। तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा"॥ महाभारतम्, उद्योगपर्व, ४२/६०

दिग्रन्थेषु[33] प्रत्यपद्यत। रामायणेऽपि न्यगद्यत।[34] एतेन निश्चितं भवति यत् व्याकरणस्य परम्परा श्रुतिषु यथा लभ्यमाना तथैव स्मृतिषु सूत्रग्रन्थेषु, अथ च इतिहासमूलकेषु रामायणमहाभारतादिषु पुराणग्रन्थेषु सर्वत्र षडङ्गत्वेन व्याकरणं निरदिश्यत न केवलं व्याकरणं षडङ्गत्वेन प्रत्युत षडङ्गेषु मुखत्वेन वर्णनं, यदि मुखविरहितः सन् कश्चिद् भवति संसारे तदा तु तस्य निर्वाह एव दुर्लभोऽत आह- **"षडङ्गेषु प्रधानं व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति"।**[35] सम्प्रति समुपलभ्यमानेषु ब्राह्मणेषु प्राचीनतमे देवलव्याकरणे व्याकरणस्य षडङ्गत्वनिर्देशः प्राप्यते। एवं न व्याकरणमात्रस्य प्राचीनता साधिता भवति किन्तु षडङ्गत्वरूपेण वर्णनमपि प्राचीनं विद्यते। न केवलमेतावतैव सन्तुष्यन्ति शास्त्रकारा व्याकरणस्य षडङ्गेषु प्राधान्यमपि साक्षाच्छब्दमुखेन निरदिश्यन्त तस्मादेवम्भूतस्य महिमप्रधानस्य व्याकरणस्य समध्ययने-अध्यापने च कस्य जनस्य साधीयसी प्रवृत्तिर्न स्यात्, अर्थादवश्यम्भाविन्यैव।

**ब्रह्मणः प्राथम्येन व्याकरणस्य प्रवक्तृत्वम्–**

भारतीयज्ञानपरम्परायां सर्वासामपि विद्यानां मूलप्रवक्तृत्वेन ब्रह्मणः स्वीकार्यता विद्यते। तच्च विविधानां ग्रन्थानां समालोचनात्मकाध्ययनेन समभाव्यत विद्वद्भिः, तामेव परामपरां परिपालयन्नत्र शास्त्रेऽपि ब्रह्मण एव आदिप्रवक्तृत्वेन मान्यता, अतो ब्रह्मा व्याकरणस्य प्रवक्ता। विषयेऽस्मिन् ऋक्तन्त्रकारस्य वर्णनम् एव आवहति प्रामाण्यम्।[36] परमवैयाकरणो मनीषी युधिष्ठिरमीमांसको वदति यद्ब्रह्मा एतत्कल्पस्य विगतजलप्लावनात् पश्चादभवत्। यद्यप्युत्तरकाले एतन्नाम उपाधित्वेन बहुभ्यो जनेभ्यो प्रायुज्यत,

---

[33] "षडङ्गविदस्तत् तथाधीमहे"। गो०ब्रा०पू०, १/२७, बौ०धर्म०, २/१४/२, गौ०धर्म०, १५/२८

[34] "नाषडङ्गविदत्रासीन्नाव्रतो नाबहुश्रुतः"। रामा०बा०, १४/२१

[35] "आगमः खल्वपि- ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति, प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति"। महा०भा०, पस्पशा०, पृ० २५

[36] "ब्रह्मा बृहस्पतये प्रोवाच। बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः"।ऋक्तन्त्रम्/२/४

तथापि सर्वविद्यानामादिप्रवक्ता ब्रह्मैव। ऐतिहासिकः पुरुषस्तस्य कालो न्यूनातिन्यूनं षोडशसहस्त्रवर्षाणि पूर्वम्।[37]

द्वितीयप्रवक्तृरूपेण बृहस्पत्तेर्गणना क्रियतेऽङ्गिरसः पुत्रत्वाच्छास्त्रेषु "आङ्गिरस" इति नाम्ना ख्यातिरप्यस्य विविधग्रन्थेषु विविधनामभिः स्मृतः। ब्राह्मणग्रन्थेषु देवानां पुरोहितरूपेण[38] अकथ्यत। कोशग्रन्थेषु सुराचार्यस्तथा च पुराणे वाक्पतिरूपेण न्यगद्यत।[39]

**बृहस्पतिद्वारकं व्याकरणशास्त्रस्य प्रवचनम्–**

वेदाङ्गवर्णनप्रसङ्गे बहुत्र व्याकरणस्य समुल्लेखः प्राप्यते। महाभाष्यानुसारिणि व्याख्याने इन्द्राय वर्षसहस्त्रं यावत् प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच।[40] न केवलमत्रैव अन्यत्रापि लभ्यते। एकदा महेन्द्र आचार्यबृहस्पतिं शब्दशास्त्रम् अपृच्छत्। तदा पुष्कराभिधे ब्रह्मणस्तीर्थविशेषे बृहस्पतिर्ब्रह्मणः सकाशाद् दिव्यं वर्षसहस्त्रं यावदध्यनं कृत्वा ब्रह्मणो वरञ्च सम्प्राप्य सुरेश्वरायेन्द्राय तथैव दिव्यं वर्षसहस्त्रं यावदध्यापयामास।[41]

**व्याकरणस्य नाम्नि विचारणा–**

महाभाष्यकारेण समलिख्यत- "**शब्दपारायणं प्रोवाच**"।[42] आचार्यो भर्तृहरिर्महाभाष्यस्य दीपिकाव्याख्यायामुल्लिखति- "**शब्दपारायणं रूढिशब्दोऽयं**

---

37 संस्कृतव्याकरणशास्त्रस्येतिहासः, प्रथमभागः, पृ० ७५

38 "बृहस्पतिर्वै देवानां पुरोहितः"। ऐ०ब्रा०, ८/२६

39 "भार्यामपर्यय वाक्पतेस्त्वम्"। म०पु०. १३/४७

40 "बृहस्पतिरिन्द्रायदिव्यवर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच"। महा०भा०, पस्पशा०

41 "पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिम्। दिव्यं वर्षसहस्त्रं च स त्वा दध्यौ च पुष्करे"॥
"तदा तत्वत्तो वरं प्राप्य दिव्यं वर्षसहस्त्रकम्। उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरम्"॥
ब्रह्मवैव० प्र०ख० २७/२८

42 महाभारतम्/ संस्कृतव्याकरणशास्त्रस्येतिहासः, पृ.सं.२८

**कस्यचिद् ग्रन्थस्य"।**[43] एतेनान्वमीयत यद् बृहस्पतेर्व्याकरणं शब्दपारायणाभिधमासीत्।

प्रतिपदपाठस्य स्वरूपावाप्तिस्तु न भवति, तथापि एवं विभावितुं शक्यते यदधुनातनैर्यथा शब्दरूपाणां धातुरूपाणां शब्दानां कतिपयानां स्मरणं कार्यते तथैव स्यादिति।

**व्याकरणस्यादिमः संस्कर्तृत्वेनेन्द्रः–**

पातञ्जलेर्महाभाष्ये यथा उदलिख्यत यद्बृहस्पतिना प्रतिपदपाठविषयी-भूतः शब्दोपदेशोऽदीयत, तस्मादिन्द्र एव बृहस्पतेर्व्याकरणमवगम्य तस्य स समानजनबोधाविषयत्वं विचार्य प्रकृतिप्रत्ययविभागप्रकल्पनया प्रक्रियाविषयी-भूततामानयल्लोके।

एतस्य प्रामाण्यं तु कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायाः संहितयाऽव-बुध्यते।[44] काठिन्यमवगम्यते व्याकरणस्य यद् देवा अपीन्द्रं प्रार्थितवन्तः, यन्न एतस्याः शब्दशास्त्रस्य व्याख्यानं कुरु येनावबोधो नो देवेभ्यः स्यादिति प्रार्थितवतेन्द्रेण तथाभूताम् अखण्डां वाचं मध्यतो विच्छिद्य-विच्छिद्य प्रकृतिप्रत्ययोपसर्गनिपातादिविभागपूर्वकं व्याख्यानं व्यधात्। अतोऽखण्डवाक्य-स्फोटलक्षणां वाचं देवेभ्यः सारल्येनाधिगमयितुं व्याकरोत्।

**व्याकरणस्य सम्प्रदायशो विचारः–**

व्याकरणशास्त्रस्य परम्पराऽत्यन्तं सुदृढा तथा च वैदिकदार्शनिकैतिह्यस्थैर्विविधप्रमाणैः परिपोषिता विद्यते। तस्यामपि द्विधा चिन्तनं व्यधीयत। अत्रैकः पन्था ऐन्द्रानुसारी गण्यते। अपरश्च माहेश्वरः (शैवः) पन्थाः। इदानीन्तने प्रवर्तमानेषु व्याकरणेषु कातन्त्रव्याकरणमैन्द्रसम्प्रदाये स्वीक्रियते तथा च पाणिनिव्याकरणं शैवसम्प्रदाये आमनन्ति विद्वांसः।

---

[43] माहाभाष्यदीपिका, संस्कृतव्याकरणशास्त्रयेतिहासः पृ.सं.२८ उद्धृतम्

[44] "वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्व्विति। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्"। तैत्ति०सं०, ६/४/७

स्पष्ट्यते यद् बृहस्पतिवच्छिवोऽपि षडङ्गानां प्रवचनं कृतवान्। महाभारतीयवचनमेव प्रस्तौत्यत्र प्रामाण्यम्।[45] एतद्वचनं शान्तिपर्वणि शिवसहस्रनाम्नि उदलिख्यत। निरुक्तकृता वचनैरपि स्पष्टः सङ्केतो भवति यदेतस्य वेदङ्गस्य प्रवक्तारो[46] बहव आसन्। समाम्नासिषुरित्येतस्य क्रियापदस्य प्रयोगविषयीभूता एव बहव आचार्या दृष्टिपथमागताः। नैको प्रवक्ता वेदाङ्गानां तद्विद्वद्भिर्निरणीयत।

**व्याकरणस्याष्टप्रवक्तारः–**

आचार्यदुर्गसिंहो निरुक्तस्य टीकायां चर्चति प्राधान्येनाष्टशाब्दिकान्।[47] हैमबृहद्वृत्त्यवचूर्णावपि व्याकरणान्यष्टौ, तानि च–

**"ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।**

**त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टकम्"॥**[48]

अर्थाद् ब्राह्मम्, ऐशानम् (शैवम्), ऐन्द्रम्, प्राजापत्यम्, बार्हस्पत्यम्, त्वाष्ट्रम्, आपिशलम्, पाणिनिव्याकरणम्। कविकल्पद्रुमग्रन्थारम्भेऽप्यष्ट-व्याकरणानां वर्णनं विद्यते–

**"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः"॥**[49]

एवं रीत्या व्याकरणस्याष्टप्रवक्तृपरम्परा प्राप्यते।

---

45 "वेदात् षडङ्गान्युद्धृत्य"। महाभारतम्, २८४/१९२

46 "बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च"। निरु०

47 "व्याकरणमष्टप्रभेदम्"। दुर्गस्य निरुक्तवृत्ति, आनन्दाश्रमसंस्करणम्, पृ० ७४

48 हैमबृहद्वृत्त्यवचूर्णिः, उद्धृतम्.सं.व्य.इति. पृ.सं.२९

49 वोपदेवः, कविकल्पद्रुमः, ग्रन्थारम्भे।

**नवव्याकरणपरम्परा–**

यथाऽष्टव्याकरणपरम्परापक्षे प्रमाणानि सन्ति तथैव नवव्याकरणपरम्परा-पक्षस्य पोषकानि प्रमाणानि समुपलभ्यन्ते। वाल्मीकिरामायणस्याध्यनेन प्रतिभाति यच्छ्रीरामचन्द्रस्य समये बहुविधानि व्याकरणान्यासन्–

**"सर्वासु विद्यासु तपोविधाने प्रस्पर्धतेऽयं हि गुरुं सुराणाम्।**

**सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात्"॥**[50]

अत्र श्लोके नवसङ्ख्याकानां व्याकरणानां वर्णनं प्राप्यते। रामायणस्य किष्किन्धाकाण्डेऽपि तथैव व्याकरणस्याथ च व्याकरणयुतस्य श्रीहनुमतो वाचि विचारो[51] व्यधीयत श्रीरामचन्द्रेण।

पुण्यपत्तननगरस्य "भण्डारकर-रिसर्च-इंस्टीट्यूट" इति संस्थायामुप-लभ्यमाने गीतासारनामकग्रन्थस्यैकस्मिन् हस्तलेखे नवव्याकरणानामुल्लेखो[52] वर्तते, किन्तु रामायणकालिकव्याकरणानां वर्णनं सङ्ख्यामुखेनालभ्यत न तु नाममुखेन।

परम्पराऽस्य विद्यत एवम्भूता- **"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः"।**[53]

व्याकरणनिकाये नवविधं व्याकरणमवाप्यते तत्त्वविधिनामकवैष्णवग्रन्थे-

**"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतं चाऽपिशलं शाकल्यं पाणिनीयकम्"॥** [54]

---

[50] वाल्मीकिरामायणम्, उ०का०, ३६/४७

[51] तत्रैव, कि०का०, ३/ २९ तः ३३ पर्यन्तम्

[52] "गीतासरमिदं शास्त्रं गीतासारसमुद्भवम्। अत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसमुच्चयम्"॥ ५५
"अष्टादश पुराणानि नवव्याकरणानि च। निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम्॥
५७ हस्तलेखसं० १६४, सन् १८८३-८४, उद्धृतम्, सं०व्या०शा इति०, पृ० ७५

[53] ऋक्तन्त्रम्, १/४

[54] संस्कृतव्याकरणशास्त्रस्येतिहासप्रथमभागे, पृ० ७५

अत एवम्भूतसम्प्रदायेषु सत्सु तत्रास्माकीने पाणिनीयव्याकरणेऽष्टाध्यायी-माधृत्य पाणिनिव्याकरणस्य विभाजनं कर्तुं पार्यतेऽर्थादुपलभ्यमाने व्याकरणे आचार्यपाणिनिं केन्द्रबिन्दौ संस्थाप्य विचारयामः।

**अष्टाध्यायीदिशा व्याकरणस्य द्विधा विभाजनम्–**

अत्र व्याकरणविभाजनविचारणायामाचार्यपाणिनेर्महान् ग्रन्थोऽष्टाध्यायी प्रमाणत्वमुपयाति, यतोहि तत्कर्ता आचार्यपाणिनिरेवातस्तस्मात् पूर्ववर्तिनामाचार्याणां व्याकरणानि तथा च तस्मात् पश्चाद्वर्तिनामाचार्याणां व्याकरणानि सन्ति, तानि च कालक्रमेण विचारयामः–

**आचार्यपाणिनेः पूर्ववर्तीनि व्याकरणानि–**

आचार्यपाणिनिः स्वकीयायामष्टाध्यायां दशसङ्ख्याकानां शाब्दिक-शिरोमणीनां वर्णनं नामग्राहं करोति- आपिशलिः,[55] काश्यपः,[56] गार्ग्यः,[57] गालवः,[58] चाक्रवर्मणः,[59] भारद्वाजः,[60] शाकटायनः,[61] शाकल्यः,[62] सेनकः,[63] स्फोटायनश्च।[64] एते विद्वांस आचार्येण स्वयमेवोदध्रियन्त। एतदतिरिक्तानामपि वैयाकरणानामुल्लेखोऽन्यत्र प्रचीनग्रन्थेषु प्राप्यते। तद्यथा–

महेश्वरः, बृहस्पतिः, इन्द्रः, वायुः, भरद्वाजः, भागुरिः, पौष्करसादिः, चारायणः, काशकृत्स्नः, शान्तनुः, वैयाघ्रपात्, माध्यान्दिनिरौढः, शौनकिः, गौतमः, व्याडिरित्येते सन्ति प्राच्या आचार्याः पाणिनेः पूर्ववर्तिनः।

---

55 "वा सुप्यापिशलेः"। अष्टाध्यायी, ६/१/९२

56 "तृषिमृषिकृशेः काश्यपस्य"। तत्रैव, १/२/२५

57 "ओतो गार्ग्यस्य"। तत्रैव, ८/३/२०

58 "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य"। तत्रैव ७/१/७४

59 "ई३ चाक्रवर्मणस्य"। तत्रैव, ६/१/१३०

60 "ऋतो भारद्वाजस्य"। तत्रैव, ७/२/६३

61 "लङः शाकटायनस्यैव"। तत्रैव, ३/४/१११

62 "सम्बुद्धौ शाकल्यस्यैतावनार्षे"। तत्रैव, १/१/१६

63 "गिरेश्च सेनकस्य"। तत्रैव, ५/४/११२

64 "अवङ् स्फोटायनस्य"। तत्रैव, ६/१/१२३

**पाणिनेः पश्चाद्वर्तिनः–**

पाणिनेः पश्चाद्वर्तिनामाचार्याणां नामानि तद्ग्रन्थाश्च दीयन्ते–

| | |
|---|---|
| 1. ............... | कातन्त्रव्याकरणम् |
| 2. चन्द्रगोमिन् | चान्द्रव्याकरणम् |
| 3. क्षपणकः | क्षपणकव्याकरणम् |
| 4. देवनन्दी (दिग्वस्त्रः) | जैनेन्द्रव्याकरणम् |
| 5. वामनः | विश्रान्तविद्याधरम् |
| 6. पाल्यकीर्तिः | जैनशाकटायनः |
| 7. शिवस्वामी | .............. |
| 8. भोजदेवः | सरस्वतीकण्ठाभरणम् |
| 9. बुद्धिसागरः | बुद्धिसागरः |
| 10. भद्रेश्वरसूरिः | दीपकम् |
| 11. वर्धमानः | ......... |
| 12. हेमचन्द्रः | हैमव्याकरणम् |
| 13. मलयगिरिः | शब्दानुशासनम् |
| 14. क्रमदीश्वरः | जौमरः |
| 15. अनुभूतिस्वरूपः | सारस्वतव्याकरणम् |
| 16. वोपदेवः | मुग्धबोधः |
| 17. पद्मनाभः | सुपद्मव्याकरणम् |
| 18. विनयसागरः | भोजव्याकरणम् |

**आचार्यपाणिनिः–**

निस्सीमप्रतिभासम्पन्नस्याचार्यपाणिनेर्जन्मकालविषयेऽद्यावधिपर्यन्तमेकमत्यं नावलोक्यते। विद्वद्भिरीसाया अष्टशतोत्तरद्विसहत्रवर्षेभ्यः पूर्वस्मात् प्रारभ्य ईसायाः पूर्वं पञ्चशताब्दीं यावत् स्वीकुर्वन्ति।

**पाणिनेर्नामान्तराणि–**

आचार्यस्य नामान्तराण्यपि प्राप्यन्ते, तेषु नामसु पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आह्किः। एतेषां प्रत्येकं नाम्नश्चर्चा विधीयतेऽत्र।

**१-पाणिनः–**

एतस्य नाम्नोल्लेखः काशिकायाः (६/२/१४) सूत्रस्य व्याख्याने तथा च चन्द्रवृत्तौ (२/२/६८) इत्यस्य व्याख्याने लभ्यते।[65] अस्य शब्दस्य निष्पत्तिः 'पणिन्' इति नकारान्ताच्छब्दाद् अपत्यार्थेऽण् प्रत्यये कृते सति जायते। एतस्य निर्देशोऽष्टाध्याय्याः (४/४/१६५) सूत्रे सम्मिलति।[66] पाणिनीयशब्दस्य मूलप्रकृतिः 'पाणिन' इत्यकारान्तशब्दः, तस्माच्छप्रत्यये सति पाणिनीयमिति निष्पद्यते। अतो महाभाष्ये निर्दिष्टं पाणिनिना प्रोक्तं पाणिनीयम् इति वचनमर्थप्रदर्शनपरं न तु विग्रहपरम्। इकारान्तपाणिनिशब्दात् 'इञश्च' इत्यनेन सूत्रेण प्रोक्तार्थे अण् प्रत्यये कृते सति 'पाणिन' इति शब्दो निष्पद्यते।

**२-पाणिनिः–**

एतन्नाम्ना एव लोके विश्रुतस्तत्रभवान् आचार्यः पाणिनिः। एतस्य नाम्नो व्युत्पत्तौ द्विधा वैयाकरणानां मतं वर्तते। 'पणिन्' शब्दादपत्यार्थेऽणि सति पाणिनः पुनरपत्यार्थे 'इञ्' प्रत्यये सति पाणिनिरित्युपपद्यते[67]

**३- दाक्षीपुत्रः–**

दाक्षीपुत्र इति नाम महाभाष्ये[68] पाणिनीयशिक्षायां[69] समुद्रगुप्तविरचिते कृष्णचरिते[70]ऽपि मिलति।

---

[65] "पाणिनोपज्ञमकालकं व्याकरणम्, पणिनो भक्तिरस्य पाणिनीयः"। काशिका, ४/३/९९

[66] "गाथिविदथिकेशिपणिनश्च"।अष्टा.६/४/१६५

[67] "पणिनोऽपत्यमित्यण् पाणिनः। पणिनस्यापत्यं युवेति इञ् पाणिनिः"। कैयटमहाभाष्यप्रदीपः १/१/७३

[68] "सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः"। १/१/२०

[69] "शङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते"। पा०शि०, ५६

[70] "दाक्षीपुत्रवचोव्याख्या पटुर्मीमांसकाग्रणीः"। मुनिकविवर्णनश्लोकः १६

**४-शालङ्किः–**

पितृव्यदेशजं नामेदं मतमिदं महामहोपाध्यायस्य शिवदत्तशर्मणो वर्तते। कोशग्रन्थातिरिक्तं नोपलभते। पैलादिगणे शालङ्केः पाठसामर्थ्याच्छलङ्कुस्थाने शलङ्कादेशो भवति ततः इञ्।

**५-शालातुरीयः–**

पाणिनेः कृते एतस्यापि नाम्नः प्रयोगो काव्यालङ्कारे[71] काशिकाविवरणपञ्जिकायां[72] तथा च गणरत्नमहोदधौ[73] मिलति।

**६- आहिकः–**

एतस्योल्लेखः कोशेषु लभ्यते, नान्यत्र।

पाणिनेर्गुरुर्वर्ष[74] आसीत्। पाणिनेः शिष्यः कौत्स आसीत्। उपसेदिवान् कौत्सः पाणिनिम्।[75] पाणिनेर्नाम शालातुरीय आसीत्। जैनलेखको वर्धमानो गणरत्नमहोदधौ व्युत्पादयति-

**"शलातुरो नाम ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयः, तत्रभवान् पाणिनिः"।**[76] अभिजननिवासयोर्भेदो वर्तते तद्यथा यत्र पूर्वैरुषितं सोऽभिजनः, निवासश्च यत्र साम्प्रतमुष्यते।

एतल्लक्षणं यदि विचार्यते तदा तु पाणिनेः पूर्वजा आसन् शालातुरवास्तव्याः। पाणिनेर्निवासोऽन्यत्र क्वचिदासीत्। पश्चिमोत्तरसीम्नि 'अटक' समीपवर्ती वर्तमानो 'लाहुरग्रामः' एव प्राचीनः शालातुर इति पुरातत्त्वविदां मतम्।

---

71 "सालातुरीयपदमेतदनुक्रमेण"। ६/६२

72 "शालातुरीयेण प्राक् ठञश्च इति नोक्तम्"। न्यासः, ५/१/१

73 "शालातुरीयस्तत्र भवान् पाणिनिः"। गणारत्नमहोदधिः

74 "अथ कालेन वर्षस्य शिष्यवर्गो महान् अभूत्। तत्रैको पाणिनिर्नाम जडबुद्धितरोऽभवत्"॥ कथा०, १/०४/२०

75 महा०भा०, ३/२/१०८

76 गण०महो०, पृ० १

**मृत्युः–**

पाणिनेर्जीवनस्येतिवृत्तं वस्तुतोऽलभ्यप्राय एव, पञ्चतन्त्रे एकः श्लोको लभ्यते यत्र केषाञ्चन विदुषां मृत्योः कारणान्युल्लिखितानि सन्ति-

**"सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः**

**मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।**

**छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्**

**अज्ञानावृतचेतसामतिरुषां कोर्थः तिरश्चां गुणैः"॥**[77]

एतेन ज्ञायते यत् सिंह एव पाणिनेर्वधमकरोत्। शाब्दिकनिकाये किंवदन्ती विद्यते यदाचार्यपाणिनेर्मृत्युस्त्रयोदश्यां तिथावभूत्, मासपक्षयोर-निश्चयत्वाद् वैयाकरणैस्त्रयोदश्यामनध्यायकाल आचर्यते।

**व्यक्तित्वम्–**

पाणिनिव्याकरणस्याध्ययनेन सञ्ज्ञायते यन्न केवलं शब्दशास्त्रस्य वेत्तृत्वमपितु समस्तवाङ्मये तस्याप्रतिहता गतिरासीत् महाभाष्यकारः पतञ्जलिराचार्यपाणिनेर्विषये विलिखति- **"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण"।**[78]

महाभाष्यकारो निश्चाययति येनैवम्भूतेन महता तपसा सूत्राणि प्राणीयन्त तत्र तु वर्णमात्रस्य आनर्थक्यप्रसङ्गाभावः सूत्राणामानर्थक्यप्रसङ्गस्य वार्त्तैवासम्भवा। आचार्यः पतञ्जलिः प्रतिजानीते यत्–

**"सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्"।**[79] तथैव "**उदक् च विपाशः**"[80] इति सूत्रस्य वृत्तौ व्याख्याति- **"महती सूक्ष्मैक्षिका**

---

[77] पञ्चतन्त्रम्, मित्रसम्प्राप्तिः, श्लोकः २६

[78] महाभाष्यम्, १/१/१

[79] तत्रैव, ६/१/७७

**वर्तते सूत्रकारस्य"।**[81] एवं रीत्याऽऽचार्यस्य पाणिनेरनुगामिनः परवर्तिनो व्याकरणशास्त्रस्याचार्या व्याकुर्वन्।

**आचार्यपाणिनेः रचना–**

अष्टकम्, अष्टाध्यायी, शब्दानुशासनम्, वृत्तिसूत्रम्, धातुपाठः, गणपाठः, उणादिसूत्रम्, लिङ्गानुशासनं पाणिनीयशिक्षा च।

**काव्यग्रन्थः–**

जाम्बवतीविजयम् (पातालविजयम्) द्विरूपकोशः, हस्तलेखरूपेण लन्दननगरस्य इण्डिया-ऑफिस-लाइब्रेरी-मध्ये प्राप्यते। तस्य सङ्ख्या ७८९० इति वर्तते। कोशोऽयं षट्पत्रेषु पूर्णम्। ग्रन्थान्ते पुष्पिकायां लिखितं वर्तते पाणिनिमुनिना कृतं द्विरूपकोशं सम्पूर्णम्।

**सङ्ग्रहकारव्याडिः (२९०० वि०पू०)–**

आचार्यव्याडिर्दाक्षायणापरनामा जनः सङ्ग्रहाभिधं ग्रन्थं[82] विरचयामास, स ग्रन्थः पणिनिव्याकरणे आसीद् धारणेयं[83] वैयाकरणानाम्।

महाराजसमुद्रगुप्तोऽपि व्याडिं दाक्षिपुत्रवचोव्याख्यापटुर्लिखितवान्।[84] महाभाष्यकारः पतञ्जलिरपि पश्पशाह्निके लिखति यत् सङ्ग्रहे एतत् प्राधान्येन परीक्षितम्– "**सङ्ग्रहे तावत् कार्यप्रतिद्वन्द्विभावान् मन्यामहे"।**[85] महाभाष्ये सङ्ग्रह-ग्रन्थो दाक्षायणस्य कृतित्वेनोक्तः। सङ्ग्रहपदस्यार्थो भवति सङ्क्षेपः।

**व्याडिपदस्यार्थः–**

अडो वृश्चिकलाङ्गूलम्, तेन च तैक्ष्ण्यं लक्ष्यते, विशिष्टोऽडस्तैक्ष्ण्यमस्य व्यडः, तस्यापत्यं व्याडिः, 'अत इञ' 'स्वागतादीनां चेति वृद्धिप्रतिषेधैजागमयोः

---

80

81 तत्रैव, ४/२/६६

82 "सङ्ग्रहो व्याडिकृतो लक्षसङ्ख्यो ग्रन्थः"। महाभाष्यप्रदीपोद्योतः,

83 "सङ्ग्रहोऽप्यस्यैव शास्त्रस्यैकदेश"। महाभाष्यदीपिका भर्तृहरिकृत, पूना संस्करणम् पृ०सं० २३

84 "परिमाणसङ्ग्रहाभिधानं निबन्धमासीत्"। पुण्यराजकृता वाक्यपदीयटीका, कृष्णचरितमुनिकविवर्णनश्लोकः १६

85 महाभाष्यम्, पश्पशाह्निकम्।

निषेधः।[86]

एतस्य पितुर्नाम 'व्यड' इति प्रतीयते मातुर्नामाज्ञातं वर्तते, दाक्षिदाक्षायणनाम्नोर्वेद्यते यदेतस्य वंशस्य मूलपुरुषः कश्चिद् दक्षाभिध आसीत्। क्रौड्यादिगणे[87] व्याडेर्निर्देशो वर्तते, तदनुगुणमेव एतस्य भगिन्या नाम 'व्याड्या' इति प्रतीतं भवति। दाक्षिदाक्षायणोरेकत्वे सति व्याड्या व्याडेर्भगिनी तथा च आचार्यपाणिनिर्भागिनेय इति।

महाराजसमुद्रगुप्तस्य कृष्णचरितनाटकीयप्रस्तावनायाः कविमुनिवर्णनप्रसङ्गे विद्यते–

**"रसाचार्यः कविर्व्याडिः शब्दब्रह्मैकवाङ्मुनिः।**

**दाक्षीपुत्रवचो व्याख्या पटुर्मीमांसकाग्रणीः॥**

**बलचरितं कृत्वा यो जिगाय भारतं व्यासं च"।**[88]

महाकाव्यविनिर्माणे तन्मार्गस्य प्रदीपमिव। एतेन श्लोकेन ज्ञायते यद् व्याडिरासीत् व्याख्याताऽष्टाध्याय्या अर्थाद् दाक्षीपुत्रवचसां रसाचार्यः श्रेष्ठमीमांसकश्चासीत्। बालचरितनाटकं लिखित्वा व्यासं भारं च जितवान् तस्य बलचरितं भारतादपि महत्तरमासीत्।

**सङ्ग्रहस्य परिचयः–**

**"शोभना खलु दाक्षायणस्य सङ्ग्रहस्य कृतिः"।**[89] तत्र भवान् पतञ्जलिर्यस्याः कृतेः प्रशंसां करोति तस्या प्रामाण्ये तु सन्देहलेशो नास्ति। साम्प्रतं सङ्ग्रहाख्या कृतिर्नोपलभ्यते। अतस्तस्य विषये किमपीदमित्थमिति वक्तुं न शक्यते, किन्तु व्याकरणसम्प्रादायस्य ग्रन्थेषु तस्य सङ्ग्रहस्य वचानानि समुद्धियन्ते तद्द्वारैव

---

86 धातुवृत्तिः पृ० ८२

87 अष्टाध्यायी, ४/१/८०

88 कृष्णचरितम्, कविमुनिवर्णनप्रसङ्गः, श्लोकः १६-१७

89 महाभाष्यम्, २/३/६६

विचारः क्रियते। सङ्ग्रहे पञ्चाध्याया आसन्निति चान्द्रव्याकरणे प्राप्तं भवति- पञ्चकः सङ्ग्रहः।[90]

सङ्ग्रहस्य परिमाणविषये आचार्यः पुण्यराजमहोदयः प्रतिपादयति– "**इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं लक्षग्रन्थपरिमाणं सङ्ग्रहाभिधानं निबन्धमासीत्**"। [91]

वस्तुतः सङ्ग्रहो दार्शनिको ग्रन्थ आसीत्, महर्षिपतञ्जलिर्महाभाष्ये लिखति–

"**सङ्ग्रहे तावत् प्राधान्येन परीक्षितम्, नित्यो वा स्यात् कार्यो वा, तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः, यद्येव नित्योऽथापि कार्यः, उभयथा लक्षणं प्रवर्त्यम्**"।[92] न केवलमेतावता एव। अग्रे व्याडेर्ग्रन्थस्य नामोल्लेखं करोति पतञ्जलिः–

"**सङ्ग्रहे तावत् कार्यप्रतिद्वन्द्विभावान् मन्यामहे नित्यपर्यायवचिनो ग्रहणम्**"।[93] उपर्युक्तैरुद्धरणैः प्रतिभाति यद् व्याडेः सङ्ग्रहात्मको महान् ग्रन्थ आसीत्। "**सङ्ग्रहे तावत् प्राधान्येन परीक्षितम्**"[94] इत्येतस्यांशस्य व्याख्याने आचार्यो भर्तृहरिः सङ्केतयति विशालपरिमाणविषये-

"**चतुर्दशसहस्राणि वस्तून्यस्मिन् सङ्ग्रहग्रन्थे**[95] अर्थाच्चतुर्दशसहस्राणां पदार्थानां व्याख्यानपुरःसरमत्र निर्णयो विहितः।

**सङ्ग्रहस्यास्तविषयकज्ञानम्–**

आचार्य भर्तृहरेर्वाक्यपदीयस्य द्वितीयकाण्डे लभ्यते-

---

90 चा०व्या०, ४/१/६२ इत्यस्य वृत्तौ उदाहरणम्

91 वा०प०, टीका, काशी सं०, पृ० २८३

92 महा० पस्पशाह्निकम्,

93 तत्रैव,

94

95 सं०व्या०शा०इति०, पृ० ३१९०

**"प्रायेण सङ्क्षेपरुचीनल्पविद्यापरिग्रहान्।**

**सम्प्राप्य वैयाकरणान् सङ्ग्रहेऽस्तमुपागते।**

**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**

**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने"॥**[96]

एवम्भूताभ्यां कारिकाभ्यां न्यगद्यत यदासीत् तु सङ्ग्रहः, किन्तु आचार्यपतञ्जलेः पूर्वमेव तस्य ह्रासोऽभवत्। परिवर्तिभिर्विद्वद्भिरेतस्य सङ्ग्राहाभिधस्य ग्रन्थस्य सम्यग्रूपेणोद्धरणानि दत्तवन्तः, यथा स्वकीयविचारचर्चायामस्माभिस्तत्र तत्र विचारितं अत आचार्यव्याडेर्वैयाकरणानां परम्परायां महत्त्वपूर्णं स्थानं धारयति।

**आचार्यस्य व्याडेः रचनाः–**

व्याकरणम्, बलचरितम्, परिभाषापाठः, लिङ्गनुशानम्, विकृतिवल्ली, कोशः। आचार्यव्याडेः परं क्रम आयाति वार्तिककारस्याचार्यकात्यायनस्य।

**आचार्यकात्यायनः–**

पाणिनिव्याकरणे यावन्त्यपि वार्तिकानि व्यरच्यन्त। तेषु कात्यायनस्य वार्तिकानामेव प्रासिद्ध्यं वरीवर्ति। महाभाष्येऽपि यावतां वार्तिकसूत्राणां व्याख्यानमस्ति, तत्र स्थानद्वये आचार्यपतञ्जलिर्वार्तिककर्तृत्वेन कात्यायनं नामग्राहं स्मरति।[97]

तथैव आचार्यपुरुषोत्तमदेवोऽपि कात्यायनस्य पञ्चसङ्ख्याकानि नामान्तराण्यप्युल्लिखति। तानि च कात्यः, कात्यायनः, पुनर्वसुः मेधाजित्, वररुचिः, इति सन्ति।[98]

अत्र प्रतिनाम विचारणा विधीयते कात्यम् इति गोत्रप्रत्यान्तमिदं नाम। **"प्रोवाच भगवान् कात्यस्तेनासिद्धिर्यणस्तु ते"**[99] इति महाभाष्यस्य व्याख्याने

---

[96] वा०प०, द्वितीयकाण्डम्।

[97] "न स्म पुराद्यतन इति ब्रुवता कात्यायनेह। स्मादिविधः पुरान्तो यद्यविशेषेण भवति, किं वार्तिककारः प्रतिषेधेन करोति- न स्म पुराद्यतन इति"। ३/२/१८

सिध्यत्येवं यत्विदं वार्तिककारः पठति- विप्रतिषेधात्तु टापो बलीयस्त्वम् इति एतदसङ्ग्रहीतं भवति। ७/१/१

[98] "मेधात् कात्यायनश्च सः पुनर्वसुर्वररुचिः"। त्रिकाण्डकोषः

समुप- लभते। पूज्यव्यक्तेः सम्माननाय तन्नामस्मरणं युवप्रत्ययान्तेन स्मर्यते।[100] पुनर्वसुरिति नाक्षत्रं नाम भाषावृत्तौ पुनर्वस्वपरपर्यायो वररुचिरिति प्रायुज्यत।[101] मेधातिथेस्तु प्रयोगो न क्वचिदप्यागतः।

वररुचेस्तु प्रयोगो महाभाष्ये लभ्यते "वाररुचं काव्यम्"।[102] कृष्णचरितेऽपि महाराज्ञः समुद्रगुप्तस्य कथनं विद्यते यत् स्वर्गारोहणकाव्यस्य कर्ता वररुचिर्विद्यते सैव वररुचिर्वार्तिककारादभिन्न इति। कात्यायनस्य वंशविषयकविचारणायां 'कात्य' इति पदं गोत्रप्रत्यायान्तं तस्मात् कात्यायनकात्ययोर्मूलपुरुषः 'कत' इत्यभिध आसीत्।

**कात्यायनानैक्यम्–**

अत्र कात्यायनस्य देशकालविषये तु न स्फुटं न किमपि ज्ञायते। ऐतिहासिकैरप्येतस्मिन् विषये निश्चेतुं नापार्यत। कात्यायनो वररुचिरित्यादीनि नामान्यपि बहुततरदेशकालव्यवहितानामनेकासां व्यक्तीनां सम्भाव्यन्त इति। सोऽयं देशकालयोर्निर्णये महानन्तरायः। कात्यायनो हि शुक्लयजुश्श्रौतसूत्रकार एकः, सोऽतिप्राचीनः सम्भाव्यते। प्रातिशाख्यकर्ताऽपि कश्चित् कात्यायनः, पाणिनेः सूत्रवार्तिककारोऽपि च कात्यायनः, स्वर्गारोहणकाव्यनिर्माताऽपि च कात्यायन उच्यते। तदत्र कस्यैक्यं को वा भिन्न इति जटिलः प्रश्नः। तथैव वररुचिरप्येकः कौटिल्येण स्वीयेऽर्थशास्त्रे राजनीतेराचार्यत्वेन स्मृतः।

एकश्च विक्रमस्य सभायां नवसु रत्नेष्वपि स्मर्यते। वररुचिकाव्यं चापि तत्र तत्रोल्लिख्यते इति तत्रैक्यम्, भिन्नत्वं वा सुदृढं वक्तुं सुदुष्करम्। अत्रैतावदेव शक्यते वक्तुं यत् कथासरित्सागरे पाणिनिकात्यायनयोः समकालिकत्वं परस्परं विद्वेषः शास्त्रार्थादिकश्च यदुपनिबध्यते, तत्तु प्रायेण काल्पनिकमेव प्रतिभाति। उक्तरीत्या पाणिनिकात्यायनयोर्बहुकालव्यवधानमेवानुमीयते। यच्च कथासरित्सागरे कौशाम्बीनिवासित्वं कात्यायनस्योक्तं कौशाम्बीं च प्रयागसन्निहितामेव सम्भावन्त्यैतिहासिकाः। तदेतदप्यनुपन्नमिव।

---

[99] महा०भा०, ३/२/३

[100] "वृद्धस्य च पूजायाम्"। महा०भा०वा०, ४/१/१६३

[101] पुनर्वसुर्वररुचिः, भाषावृत्तिः, ४/३/३४

[102] महा०भा०, ४/३/१०१

**दक्षिणदेशस्थो विद्वान् तत्र प्रमाणम्–**

भाष्यकारो हि "**प्रियतद्धिता दाक्षिणात्याः। यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते**"[103] इत्यादिना दाक्षिणात्यत्वेन वार्तिककारमुपहसति, तेनानेन दृढेन प्रमाणेन कात्यायनस्य दाक्षिणात्यत्वं स्फुटीभवति।

कात्यायनशाखाया अध्ययनमपि प्रायशो महाराष्ट्रे आसीदित्यपि प्रमाणमेव दाक्षिणात्यत्वे। शुक्लयजुःप्रातिशाख्यस्यानेकानि सूत्राणि कात्यायनवार्तिकैस्सह साम्यं भजन्ते, समानता च पारस्परिकं सम्बन्धं साधयति। सायणाचार्य ऋग्वेदभाष्यभूमिकायां स्पष्टरूपेण वार्तिककर्तुर्नाम वररुचिरित्यलिखत्।[104]

**कात्यायनस्य प्रामाण्यम्–**

आचार्यपतञ्जलिः स्पष्टरूपेण कात्यायनाय "भगवान्" इति शब्दस्य प्रयोगं करोति- "**प्रोवाच भगवान् कात्यायनः**"॥[105] न्यासकृताऽपि प्रतिपाद्यते- "**एतच्च कात्यायनप्रभृतीनां प्रमाणभूतानां वचनाद् विज्ञायते**"।[106] एवम्भूतानि वचनानि महाभाष्यादिषु प्राप्यन्ते यद्वशात् तेषां विषये सन्देहलेशो नास्ति। ततश्च प्रयागप्रान्तवासित्वं न तस्य सम्भवति। यदि 'कौशम्बी' दक्षिणप्रान्त एव कश्चिद् भवेत्, तर्हि सम्भवति कौशाम्बीवासित्वम्, भाष्यकारसमये उत आरम्भे दक्षिणदेशो गण्यते स्म, इत्यपि निश्चेतुं दुःशकमेव। ततश्च अभिजननिश्चयोऽपि कात्यायनस्य न पूर्णतया विधातुं शक्यः। दाक्षिणात्यः स आसीदिति एतावन्मात्रं भाष्यरीत्या निश्चितं प्रतीयते।

**कालविषयकविचारः (२८००विक्रमपूर्वः)–**

आचार्ययुधिष्ठिरमीमांसको विभावयति कालविषये। वार्तिककारस्य कात्यायनस्य कालो नवशतोत्तरद्विसहस्त्रात् त्रिवर्षविक्रमसम्वततः (२९००-३००) पूर्ववर्ती सम्भाव्यते।

---

[103] महा०भा०, १/१/१

[104] "तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिककारेण दर्शितः- रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"। षडङ्गप्रकरणम्, पृ० २५, पूना संस्करणम्

[105] ३/२/३

[106] न्यासः, ६/३/५०, भागः १, पृ० ५२७

अथास्य कालविषये यीशुख्रीष्टतः पूर्वचतुर्थशताब्दी तस्य काल इति कैश्चित् पाश्चात्यैतिहासिकैर्निर्णीतम्। दृढं प्रमाणन्तु तत्र न किमप्युपलभ्यते, केचित्तु 'पाण्डोर्ड्यण्' इति वार्तिककारणात् पाण्ड्यराज्यपरिचयः कात्यायनस्यासीत्।

पाणिनेस्तु तदर्थं प्रयत्नकारणात् पाण्ड्यराज्यपरिचयस्तस्य नासीदिति सम्भावयन्ति। परं सर्वमेतेद् दृढानुमानमात्रम्। पाणिनेः परभवा एव शब्दाः कात्यायनेनोपसङ्ख्याता इति मूलभूतः सिद्धान्त एव सपरिकरमस्माभिः खण्डितः। पाण्ड्यराज्यस्य स्थापनकालोऽपि चाद्यावधि सम्यङ्न निश्चितः। तस्मात् कालस्य सम्यङ्निश्चयो नास्ति। अस्मन्मते कौटिलीयेऽर्थशास्त्रे ये राजनीतेराचार्या परिगणितास्तेषूक्तो वररुचिरयमेव स्यादिति विशेषेण सम्भाव्यते। पाणिनिप्रकरणोक्तरीत्याऽस्य कात्यायनापरपर्यायस्य वररुचेः कौटिल्यपूर्वभवत्वसम्भवात्। भाष्यकृतः पतञ्जलेः कात्यायनस्य च काले चतुःपञ्चशताब्दीव्यवधानेनावश्यं भवितव्यमिति प्रोक्तमेतदस्माभिः। सत्यव्रतसामश्रमीमहोदयोऽपि चैतदेव संसाध्नोति। तत्रैतदपि प्रमाणं तेनोपस्थापितं यद् वार्तिककृता स्त्रीप्रत्ययसिद्ध्यर्थं सभाशब्दात् क्रियमाणे प्रत्यये यदनुबन्धासञ्जनमुपसङ्ख्यातम्।

तद्भाष्यकृता कथं स्त्री नाम सभासु साध्वी स्यादित्युक्त्वा प्रत्याख्यातम्। तेनेदं शक्यतेऽनुमातुं यत् कात्यायनकाले सभासु स्त्रीणां साधुत्वमर्थाद् वक्तृत्वादिना भागग्रहणं प्रचलितमासीत् भाष्यकारकाले तु तन्निवृत्तमिति। एवंविधं सामाजिकं परिवर्तनं नाल्पेन कालेन सम्भवति। इत्यनयोश्चतुःपञ्चशताब्दीव्यवधानेनावश्यं भाव्यम्। अस्माभिरपि भाषापरिवर्तनविधया तदेतत् साधितमेव। तस्माद् यीशुख्रीष्टतः षष्ठ्याः सप्तम्या वा शताब्द्या अर्वाङ् न सम्भवति। कात्यायनकाल इत्यनुमितः।

कथासरित्सागरे तु नन्दराज्यकाले स्थितः पाणिनिसमसामयिक एवायमुक्त इति लिखितपूर्वमेतत्। तस्य चैतिहासिकदृष्ट्या न प्रामाणिकत्वम् इति चोल्लिखितपूर्वम्। इदमपि स्मर्तव्यं सरूपसूत्रे 'द्रव्याभिधानं व्याडिः' इति व्याडिर्नाम कात्यायनः स्मरति। तेन व्याडिना पाणिनिसूत्रव्याख्यारूपः सङ्ग्रहो निर्मित इति यदि सत्यं तर्हि तस्मात् परवैभवेनैव कात्यायनेन भवितव्यम्। पाणिनेरस्य च विशेषेण कालव्यवधानमावश्यकमेव।

**कात्यायनस्य ग्रन्थाः–**

आचार्यकात्यायनेन वार्तिकसूत्राणि प्राणीयन्त, एतैर्विना पाणिनिव्याकरणस्य सामात्स्यमेव न कल्प्यते, यतोह्याचार्यकात्यायनस्य वार्तिकेष्वेव महाभाष्याख्यं भवनं संस्थितं भवति। सम्प्रति कात्यायनवार्तिकानां स्वतन्त्रः कश्चन ग्रन्थो नोपलभ्यते अतो वार्तिकानामध्ययनं महाभाष्यद्वारकमेव सम्भवति।

**स्वर्गारोहणम्–** महाभाष्ये 'वाररुचं काव्यम्' इति उल्लेखः प्राप्यते वररुचेर्कात्यायनगोत्रत्वात् स कात्यायन इत्यपि कथ्यते। यतोहि समुद्रगुप्तः स्वयमेव प्रतिपादयति–

**"यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।**

**काव्येन रुचिरेणैव ख्यातो वररुचिः कविः॥**

**न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः।**

**काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः"॥**[107]

तात्पर्यमिदं यद् यः स्वर्गं गत्वा स्वर्गं पृथ्वीमानयत्, एवम्भूतो वररुचिः स्वकीयेन मनोहारिकाव्येन विख्यातः सन् कीर्तिं लभते, सः कात्यायनो न केवलं वार्तिकरचनाद्वारा पाणिनिव्याकरणमेवापोषयत् प्रत्युत काव्यरचनायामपि तमेवान्वकरोत्।

**भ्राजासञ्ज्ञकश्लोकाः–** महाभाष्यस्य प्रथमाह्निके भ्राजासञ्ज्ञकश्लोकानां वर्णनं मिलति।

अन्येषामपि केषाञ्चन ग्रन्थानां वर्णनं छन्दश्शास्त्रं साहित्यशास्त्रं वा, स्मृतिः, सामुद्रिकग्रन्थः, उभयसारिका भाणश्च प्राप्यते, किन्तु तेषामुपलब्धिर्न भवति।

---

[107] कृष्णचरितम्, कविमुनिवर्णनप्रसङ्गे।

**अन्यवार्तिककाराः–**

न केवलमाचार्यकात्यायनस्य वार्तिकानि महाभाष्ये उपलभ्यन्ते प्रत्युत अन्येषामपि वार्तिकसूत्राणि महाभाष्ये विद्यन्ते।

**सौर्यभगवान्–** तत्र सौर्यभगवता उक्तम्- "**अनिष्टिज्ञो वाडवः पठति**"।[108]

**कुमारवाडवः– "कुमारवाडवस्त्वाह- नैषा शङ्करा, शङ्गरैषा। कुत एतत्? गृणातिः शब्दकर्मा तस्यैषः प्रयोगः। कुमारवाडवस्त्वाह- नैष वहीनरः, कस्तर्हि? विहीनर एष। विहीनो नरः कामभोगाभ्यां विहीनरः। विहीनस्यापत्यं वैहीनरिः"।**[109]

**भवन्तः– "इह भवन्तस्त्वाहुः- न भवितव्यमिति"।** [110] अत्र भवत्पदेन कं कान् वा स्मरति न ज्ञायत एव।

**वार्तिकस्य लक्षणानि–**

**"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**
**तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः"॥**[111]

अन्यदपि लक्षणं वर्तते–

**"प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवं च।**
**कृतव्युदासोऽकृतशासनं च स वार्तिको धर्मगुणोऽष्टकश्च"॥**[112]

अपरमपि- **"उक्तानुक्तदुरुक्तचिन्ता वार्तिकम्"।**[113]

---

108 महा०भा०, ८/२/१०६

109 महा०भा०, ३/२/१४००० ७/३/१

110 महा०भा०, ३/१/१८

111 पराशरोपपुराणम॥

112 विष्णुधर्मोत्तरपुराणम्, व्याकरणवार्तिक- एकसमीक्षात्मक अध्ययन, पृ० २३ पर उद्धृत, सं०व्या०शा०इति० द्वारा युधिष्ठिर मीमांसक।

113 काव्यमीमांसा, पृ० ५

**आचार्यपतञ्जलिः–**

आचार्यपतञ्जलिर्व्याकरणशास्त्रे देदीप्यमानो दिनकर इव राराष्टि। तमाचार्यं विना तु व्याकरणशास्त्रस्य तु सामास्त्यमेव नोपयाति। आचार्यस्य पतञ्जलेः रचना चिरनवीना सती संस्कृतजगति व्याकरणाध्ययनं सम्यग् भावयन्ती विदुष आह्लादयति।

तस्या एव रचनाया नाम 'महाभाष्यम्' इति नाम्ना संस्कृतजगति विद्यते। अत्र तावद् भाष्यं नाम किमिति विचारयते–

**"सूत्रार्थो वर्ण्यते यत्र वाक्यसूत्रानुसारिभिः।**

**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः"॥**[114]

अर्थाद् यत्र सूत्रार्थस्य विवेचनं सूत्रानुसारिणां वाक्यानामर्थाद् वार्तिकानां तथा च वाक्यस्थानां पदानां व्याख्यानं क्रियते, एवम्भूतं विरचनमेव भाष्यपदाभिधायि भवति।

**भाष्यपदप्रयोगः–**

आचार्यपतञ्जलिविरचिते भाष्ये स्थानद्वयेष्वलिख्यत- **"उक्तो भावभेदो भाष्ये"।**[115] अत्र कैय्यटादयष्टीकाकारा व्याख्यान्ति भाष्यपदप्रयोगः। **"सार्वधातुके यक्"**[116] सूत्रं महाभाष्यं प्रति सङ्केतयति।

अत्र आचार्ययुधिष्ठिरमीमांसकमहोदयस्य विसम्मतिर्यदत्र भाष्यपद-प्रयोगैर्महाभाष्यस्य स्मरणं नापितु तत्पूर्ववर्तिनो विद्यमानस्य सङ्ग्रहवत् कश्चिदन्यस्य ग्रन्थस्य स्मरणं करोत्याचार्यः।[117]

---

114 विष्णुधर्मोत्तपुराणम्, चतुर्थोऽध्यायः।

115 ३/३/१९००, ०३/४/६७

116 "सार्वधातुके यक् भावभेदः"। ३/३/१९ "सार्वधातुके यक् इत्यत्र बाह्याभ्यान्तरयोर्भावयोर्विशेषो दर्शितः"। ३/४/६७

117 सं०व्या०इति०, पृ० ३६५

महाभाष्यस्य 'उक्तो भावभेदो भाष्ये' इति वाक्यस्य तोलनिकमध्ययनं **"सङ्ग्रहे एतत् प्राधान्येन परीक्षितम्"।**[118] **"सङ्ग्रहे तावत् कार्यप्रतिद्वन्द्विभावान् मन्यामहे"**[119] इत्यादिभिर्वचनैः क्रियते चेत् स्फुटीभवति यदुक्तवाक्यद्वारा सङ्ग्रहवत् किञ्चित् प्राचीनं भाष्यम् इत्यभिप्रेतं भवति। अन्यथा पतञ्जलिः स्वग्रन्थस्य शैलीद्वारा स्वकग्रन्थनिर्देशाय "**उक्तो भवेद् भाष्ये**" इत्यत्र भाष्यपदस्य प्रयोगं न कृतवान् स्यात्।[120]

महाभाष्ये महत्पदस्य विशेषणमप्येतस्यैव द्योतकं यदेतस्य पूर्वं किमपि भाष्यमासीत् सत्तायाम्, अन्यथा महदिति विशेषणदानस्य वैयर्थ्यापत्तिस्स्यात्।[121]

## महाभाष्यमेव किमर्थम्–

विविधशास्त्राणां व्याख्यानभूतग्रन्थेभ्यो भाष्यमित्येव पदमभिधानं वर्तते, किन्तु कस्याश्चिद्विशेषतायाः कारणादेतस्य पातञ्जलव्याख्यानभूतस्य ग्रन्थस्याभिधानं महाभाष्यमिति, एतद्विषयकविचारणायां व्याकरणमहाभाष्यस्य भावबोधिनीटीकायाः सम्पादकीये विचारयति- स्वकीयस्यानुपमस्य वैशिष्ट्यकारणादेव महाभाष्यपदाभिधायिनी रचनेयम्। एवं प्रतिभानं जायते यदाचार्यपतञ्जलेः पूर्वमपि किमपि भाष्यं सत्तायामासीत्।[122] तेषां सत्ताविषयीभूतानामन्यभाष्याणामपेक्षया स्वमतानीष्टिद्वारा प्रास्तौदेतस्मात् कारणादेतस्य व्याख्यानं महाभाष्यपदाभिधायित्वेन लोके व्यवह्रियते, नान्यत् किमति महाभाष्यपदवाच्यमिति।

## देशवंशविषयकविचारः–

महाभाष्यम् इत्येवम्भूतस्य महतो ग्रन्थस्य निर्मातुः परिचयो तस्य ग्रन्थे न कुत्रापि स लभ्यते। तस्मादन्धकारच्छन्नं तस्येतिवृत्तं विद्यते।

---

118 महा०भा०, पस्पशा०

119 तत्रैव,

120 सं०व्या०इति०, पृ० ३६४

121 तत्रैव, पृ० ३६६

122 "महाभाष्य के अवलोकन से ज्ञात होता है कि उसके पूर्व वार्तिकों पर अनेक भाष्य ग्रन्थ भी लिखे गये थे, वे इस समय अनुपलब्ध हैं"। सं०व्या०इति०, प्र०भा०, पृ० ३०८, उद्धृतम्, महा०भा०भाव०बो०टीका०सम्पा०, पृ० ४

अत्र केचन पक्षाः सन्ति येषां द्वारा तेषां स्थानजन्मनोर्विचारे, अत्र आचार्ययुधिष्ठिरमीमांसकस्य मतं विद्यते यत् कैश्चिद्व्याख्याकर्तृभिर्गोणिकापुत्रशब्द-स्यार्थः पञ्जलिरित्यमन्यत, तदात्वे तु तन्माता गोणिकैव स्यात्, किन्तु मतमेतन्नारुच्यतास्मभ्यम्।

केचन ग्रन्थकाराः 'गोनर्दीयः' इति शब्दमपि पतञ्जल्यपरपर्यायमिति मन्वते। यदि तन्मतं प्रामाणिकमस्ति तदानीं तु महाभाष्यकर्तुर्जन्मभूमिः 'गोनर्दः' इत्येव स्यात्। गोर्नददेशः साम्प्रतमुत्तरप्रदेशस्थस्य गोण्डाजनपदस्य समीपवर्ति क्षेत्रं स्वीक्रियते। एकस्तु गोनर्ददेशः काश्मीरेऽपि विद्यते तथात्वे तु गोनर्दीयो यदि पतञ्जलिः, तदा तु तस्य प्राग्देशवास्तव्यत्वं स्वीकरणीयं भविष्यति। यतोहि गोनर्दीयपदे गोनर्दशब्दस्य **"एङ् प्राचां देशे"**[123] इति सूत्रद्वारा वृद्धसञ्ज्ञायां सत्यां छप्रत्यये कृते सति 'गोनर्दीय' इति सिद्ध्यति।[124]

गोनर्दशब्दः शिवस्यापि नाम, तस्मादपि गोनर्दीयशब्दो व्युत्पादयितुं शक्यः, किन्तु महाभाष्यकारः शैवमतानुयायी आसीत् सङ्केत एवम्भूतो न क्वचिदपि प्राप्तः। अतएव गोनर्दीयः महाभाष्यकाराद् भिन्नस्तथा च महाभाष्यकारः प्राग्देशान्तर्गतस्य गोनर्दस्य नासीत्। स 'काश्मीरज' इति शीघ्रमेव सम्पादयामः।[125]

**काश्मीरजत्वसाधकानि प्रमाणानि–**

अत्र महाभाष्यवचनानि दीयन्ते यद्द्वारा विद्वांसः साधयन्ति पतञ्जलेः काश्मीरवासित्वम्।

तद्यथा- **"अभिजानासि देवदत्त कश्मीरान् गमिष्यामः, तत्र सक्तून् पास्यामः"**[126] इत्येवमादिभिरुदाहरणैर्बहुशः काश्मीरगमनस्योल्लेखो विद्यते तेनैवं प्रतिभाति यत्तद् यथा भाष्यकारः काश्मीरं गन्तुमुत्कण्ठते।

---

123 अष्टा०, १/१/७५

124 मत्स्यपुराणम्, ११३/४३ इत्यत्र गोनर्दः प्राच्यजनपदेषु अगण्यत।

125 युधिष्ठिरमीमांसकः, सं०व्या०इति०, पृ० ३७४

126 महा०भा०, ३/२/११४

एवम्भूतैरुदाहरणैः कैश्चिद्विद्वद्भिः काश्मीरदेशीयः स स्व्यक्रियत। महाभाष्यस्य कैश्चिदुदाहरणैर्ज्ञायिते यत् प्रायश आचार्यपतञ्जलिः पाटलिपुत्रे न्यवसत्।[127] विविधैर्महाभाष्यीयैरुद्धरणैरुदध्रियत यत् स मथुरा, साकेतः, कौशाम्बी, पाटलिपुत्रश्चेत्येतैर्नगरैः सह सम्यक् प्रकारेण परिचित आसीत्। अतः कुत्र तस्य जन्मभूमिरिति सन्देहस्तिष्ठत्येव तथापि काश्मीरस्य राजभ्यामभिमन्युजयपीडाभ्यां महाभाष्यस्य पौनःपुन्येनोद्धार एवमभिव्यनक्ति यत् पतञ्जलेः काश्मीरेण सह कश्चन विशिष्टः सम्बन्ध आसीदित्यमीमनत।[128]

**आचार्यपतञ्जलेः शाखा चरणं च–**

महाभाष्यकारस्य का शाखा आसीद्वेदस्य सा तु साक्षात् क्वचिदपि नोपालभ्यत, तथापि कतिपयानां विदुषां मतमस्ति यत् स्वकीये ग्रन्थारम्भे चतुर्ण्णां वेदानां मन्त्रानुद्धरति तत्रादौ **"शन्नो देवीरभिष्टय आपो भवन्तु पीतये"।**[129] एवम्भूतेनाथर्ववेदविषयकप्राथम्योपदेशेन समनुमिन्वन्ति यत् स अथर्ववेदस्य पैप्पलादशाखाया अध्येताऽऽसीत्। शन्नो देवीरभिष्टय इत्यस्य मन्त्रस्य प्राथम्योपदिष्टत्वात्।

एतस्मिन् विषये युधिष्ठिरमीमांसकमहोदयस्य मतं विद्यते यत् पतञ्जलिः काठकसंहिताया मान्त्रान् मुख्यत्वेनोपन्यस्यति। अत्र कानिचनोदाहरणानि दीयन्ते–

**"पुनरुत्स्यूतं वासो देयम्, पुनर्निष्कृतो रथः"।**[130] **"तोलयति- पुनरुत्स्यूतं वासो देयम्। पुनरुत्सृष्टोऽनड्वान्, पुनर्निष्कृतो रथः"।**[131] मैत्रायणी संहितायाम्- **"पुनरुत्स्यूतं वासो देयम्, पुनर्णवो रथः पुरुत्सृष्टोऽनड्वान्"।**[132]

---

127 महा०भा०, ३/२/१२३

128 सं०व्या०इति०, पृ० ३७४-३७५

129 उद्धृतम्, म०भा०, पस्पशा०

130 महा०भा०, २/१/४, सं०व्या०इति०, पृ० ३७४

131 काठ०सं०, ८/१५

132 मै०सं०, १/७/२

तैत्तिरीयसंहितायाम्- **"पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः"।**[133] एतेषु पाठेषु महाभाष्यकारः काठकसंहितायाः पाठमेव प्रामाणिकत्वेन स्वीकुरुते। आचार्यो विचारयति यत् काठकेऽन्तोदात्तः पठ्यते तदभिप्रायेण पुनः शब्दस्य गतित्वाभावादिदमुदाहरणम्। सम्प्रति काठकसंहितायामपि ब्राह्मणग्रन्थेषु स्वरचिह्नानि नोपलभ्यन्ते। मैत्रायणीतैत्तिरीयसंहितयोरप्यन्तोदातत्वमवलोक्यते पुनरप्यानुपूर्वी काठकसंहितया साकमुपैति साम्यम्। महाभाष्यीयं वचनं प्रस्तौति यद् **"ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते"।**[134] एवम्प्रकारेण विविधोदाहरणैर्ज्ञायते यन्महाभाष्यकारस्याग्रहः काठकसंहितां प्रति पौनःपुन्येन दृश्यते, तेनान्वमीयत यत् तेन महाभाष्यकारेण काठकसंहितया सह विशिष्टेन सम्बन्धेन भाव्यम्। काठकशाखा चरकचरणान्तर्गतं विद्यते तस्मादेतस्याध्येतारः चरकाध्वर्यवः कथ्यन्ते। सा च काठकाभिधा शाखा भारतवर्षस्य काश्मीरदेशे प्रचचाल। पैप्प्लादसंहिताया अपि प्रचारोऽत्रैव काश्मीरे आसीदित्येतस्माद् महाभाष्कारो मूलतो काश्मीरवास्तव्य आसीत्।

## पतञ्जलीनां विचारः–

आचार्यस्य युधिष्ठिरमीमांसकमते तु पातञ्जलशाखायाः, निदानसूत्रस्य, गोगसूत्रस्य च रचयितृत्वेन एकैव व्यक्तिः पतञ्जलिरतिप्राचीन ऋषिर्विद्यते महाभाष्यकारः पतञ्जलिस्तेभ्यो भिन्न इति व्यभाव्यत। एवम्भूतः श्लोकः श्रूयते परम्परायाम्–

**"योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि"॥**[135]

ते तु एकमेव पतञ्जलिं भावयन्तीति पारम्परिकाः। अतो भवतु नाम तत्र नाम साम्यम्, किन्तु व्यक्तिभेदस्तु जनैरवालोक्यतैव। इति आचार्यस्य युधिष्ठिरमीमांसकस्य मतम्। शोधार्थिनोऽपि विचारो विविधप्रमाणपूर्वकाध्ययनात् परं यदाचार्यस्य युधिष्ठिरमीमासकस्य मतं सामीचीन्यम् आवहति।

---

[133] तैत्ति०सं०, १/५/२

[134] महा०भा०, ४/१/१००१

[135] कैय्यटमङ्गलाचरणम्, लघुसि०कौ०भू०

**समयविषयकनिर्धारणम्–**

आचार्यपतञ्जलेः समयविषयकनिर्धारणे महान् मतभेदो विद्यते। महाभाष्यकारः पुष्यमित्रस्य समकालिकत्वे सति भारतीयगणनानुसारं प्रायः विक्रमसंवत्सराद् द्वादशशतं पूर्ववर्ति विद्यते। केषाञ्चन विदुषां मते तत्कालः प्रथमशताब्दी स्वीक्रियते। डॉ.वेलवलकरमहोदयस्तस्य कालं पञ्चाशदुत्तरैकशाताब्द्याः पूर्वं स्वीकरोति। एतस्याधारो विद्यते-

महाभाष्यकारः सूत्रस्यैकस्य व्याख्याने लिखति–

**"इह पुष्यमित्रं याजयामः"।**[136] एतेन वेद्यते यद् आचार्यपतञ्जलिः पुष्यमित्रं याजितवान्, फलतस्तस्य याजनत्वात् समकालिकता, समकालिकत्वाच्च पुष्यमित्रस्य काल आचार्यस्य कालः प्रतिफलति। इतिहासकाराणामपि मतं तथैव पञ्चाशदुत्तरैकशतं ईशायाः पूर्वं स्व्यक्रियत। अतिरिक्तैः प्रमाणैरैतिह्यविद्भिरेतन्मतं प्रत्यपद्यत।

आचार्यमीमांसकमहोदस्य मतं भिन्नमेव तैर्विविधैः प्रमाणैरखण्ड्यत सार्धैकख्रीष्टशताब्द्याः पूर्वस्य। भारतीयकालगणनामनुसृत्य आचार्ययुधिष्ठिर-मीमांसको विभावयति यत् पुष्यमित्रस्य काल एवाचार्यपतञ्जलेः कालः किन्तु पाश्चात्यविद्वद्भिः स्वीकृतात् कालात् भिन्न एव, स च कालः विक्रमसंवततो द्वादशवर्षेभ्यः पूर्ववर्त्येव।

**देशविषयकमवान्तरमतम्–**

आचार्यपतञ्जलिर्भगवतः शेषनागस्यावतारभूतः सम्मन्यते, अतः परम्परायास्तेषां कृते क्वचिदहिपतिः क्वचिच्च फणिभृद् इत्यादयः शब्दाः प्रायुज्यन्त। स स्वमतं प्रकटयन्नाह- **"गोनर्दीयस्त्वाह"।**[137] एतेन मन्यते यद् यत् सः गोर्नदप्रदेशस्य वास्तव्य आसीत्। आचार्यपतञ्जलिर्मगधसाम्राज्यस्य महामन्त्री अप्यासीत्। तस्मात् तस्य पटनावसतिरासीदित्यपि निश्चीयते। तद्वचः प्रस्तूयते-

---

[136] महा०भा०, ३/२/१२३

[137] उद्धृतम्, लघु०सि०कौ०भू०, पृ० ८

**"तानेव शालीन् भुञ्जमहे यन्मगधेषु, इह पुष्यमित्रं याजयामः",**[138] **"यदा भवद्विधः क्षत्रियं याजयेत्। यदि भवद्विधः क्षत्रियं याजयेत्"**[139] इत्युक्त्वा पटनानगर्यां स्वराजानं पुष्यमित्रं याजनविषयकं वृत्तान्तं विज्ञापयति।

महाभाष्ये आचार्यपतञ्जले नामद्वयं लभ्यते, गोनर्दीयो गोणिकापुत्रश्च, एतेन ज्ञायते यदाचार्यो गोर्नदप्रदेशस्य निवासी तथा च माता गोणिका आसीत्, कैश्चिज्जनैराधुनिको गोण्डा एव 'गोर्नदः' इति प्रदेशो मन्यते कैश्चिच्च काश्मीरः किन्तूभयपक्षयोः साधकानि प्रमाणानि तथा न विद्यन्ते येन सर्वथा नैश्चित्यपोषकस्य पक्षस्यावस्थापनं स्यात्, किन्तु आचार्ययुधिष्ठिरमीमांसकस्तु तु प्रमाणैः स्वमतं प्रतिपादयन्नाह यत्काश्मीरदेशीय एव आचार्यपतञ्जलिरिति।

**उत्पत्तौ कथानकम्–**

आचार्यपतञ्जलेरुत्पत्तिविषये किंवदन्त्यपि श्रूयते- महासत्या गोणिकया पुत्रप्राप्तिनिमित्तं भगवतश्चन्द्रमौलेरुपासनं व्यधीयत, उपासनायामेव भगवतो मरीचिमालिनोऽर्घ्यप्रदानकाले तस्या अञ्जलयोः कश्चिल्लघुसर्पः (बालसर्पः) प्राकटत, तं दृष्ट्वा तयोदौच्यत- "**कोर्भवान्"?** शेष उवाच- **"सप्पोऽहम्"**। पुनस्तयोदौच्यत- "**रेफः क्व गतः"**। शेष उवाच- "**त्वयाऽपहृतः"**। एतदनन्तरं तमेव महासती गोणिका पालितवती गच्छता कालेन सैव बालको गोणिकया पोषितः सन् शेषावतारभूतो महाभाष्यकारत्वेनाभ्यधीयत।[140]

**आचार्यस्य कृतयः–**

1. पातञ्जलयोगसूत्रम्
2. महाभाष्यम्
3. चरकसंहिता

---

[138] महा०भा०, ३/२/१२३

[139] महा०भा०, ३/३/१४७

[140] उद्धृतम्, लघु०सि०कौ०भू०, पृ० १०

आचार्यकैय्यटस्य माङ्गलिकमभिप्रेत्यात्र व्यलिख्यत स स्वकीयेन आदिममङ्गलेन ध्वनयति यत् तिस्रो रचनास्तस्याचार्यस्य।

**"योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन।**

**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि"॥**[141]

आचार्ययुधिष्ठिरमीमांसकः केषाञ्चनान्यग्रन्थानां वर्णनमकरोत्, ये साम्प्रतं पतञ्जलिनाम्नोपलभ्यन्ते- निदानसूत्रम्, योगदर्शनम्, महाभाष्यञ्च।

1. **चरकसंहितायाः परिष्कारः-** चक्रपाणिः, पुण्यराजः, भोजदेवश्चेत्यादयः पतञ्जलिं चरकसंहितायाः परिष्कर्तृरूपेण स्वीकुर्वन्ति। चरकसंहितायाः अन्ते 'अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते' इत्युदलेखि तेनान्वमीयत यत् पतञ्जलेरपराभिधानं चरकपदवाचमपि सम्भवति।[142]
2. **सिद्धान्तसारावली-** 'वातस्कन्धपित्तस्कन्धोपेतसिद्धान्तसारावली'त्यभिधो ग्रन्थः पतञ्जलिविरचित इति गुरुपदहलधारस्य लेखनम्।[143]
3. **कोषः-**
4. **साङ्ख्यशास्त्रम्-** शेषः सेश्वरसाङ्ख्यस्य कारिकाग्रन्थं रचयामास, तन्नाम आर्यापञ्चाशीतिरासीत्। अभिनवगुप्तपादः कैश्चित्परिवर्तनैः सह तन्नाम परमार्थसार इति चक्रे। साङ्ख्यकारिकाया युक्तदीपिकायां पतञ्जलेः साङ्ख्यविषयकमतान्यदीयन्त।
5. **महानन्दकाव्यम्-** महाराजसमुद्रगुप्तस्य कृष्णचरितेन ज्ञातं भवति यन्महाभाष्यकारो महानन्दमित्यभिधं काव्यं वरचयामास।

---

141 कैय्यटमङ्गलाचरणम्, लघुसि०कौ०भू०

142 सं०व्या०इति०, पृ० ३९८

143 वृद्धत्रयी, पृ० २९-३१, उद्धृतम्, सं०व्या०इति०, पृ० ३८९

6. **साहित्यशास्त्रम्-** शारदातनयविरचिते भावप्रकाशने सप्तत्रिंशत्सप्तचत्वारिंशत्पृष्ठयोर्वासुकिविरचितसाहित्यशास्त्राद् भावैः रसोत्पत्तेरुल्लेखो विद्यते।[144]

7. **लोहशास्त्रम्-** शिवदासश्चक्रदत्तस्य टीकायां पतञ्जलिविरचितलौहशास्त्रस्य वर्णनमकरोत्।[145]

**पूर्वाचार्यविषयकश्रद्धा–**

स्वकीये महाभाष्ये आचार्यपतञ्जलिराचार्यपाणिनेः प्रमुखसूत्राणां तथा च कात्यायनस्य वार्तिकाणां सोदाहरणं व्याख्यानं व्यधात्। आचार्यपतञ्जलिः परमाचार्यपाणिनिं प्रति निष्ठायां पराकाष्ठां प्रास्तौत्- **"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण"।**[146]

महाभाष्यकारो निश्चाययति येनैवम्भूतेन महता तपसा सूत्राणि प्राणीयन्त तत्र तु वर्णमात्रस्यानर्थक्यप्रसङ्गाभावः सूत्राणामानर्थक्यप्रसङ्गस्य वार्त्तैवासम्भवा। आचार्यः पतञ्जलिः प्रतिजानीते यत्–

**"सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्"।** तथैव "**उदक् च विपाशः**" इति सूत्रस्य वृत्तौ व्याख्याति महती सूक्ष्मैक्षिका वर्तते सूत्रकारस्य **"सूक्ष्मैक्षिका वर्तते सूत्रकारस्य"।**

एवं रीत्या आचार्यस्य पाणिनेरनुगामित्वं सम्माननत्वञ्च प्रादर्श्यत। केषाञ्चन सूत्राणां प्रत्याख्यानमपि तेनाकारि। तत्र तत्र स्थलेषु लाघवात्मिकां तथ्ययुतां वा दृष्टिमवलम्ब्यैवासीत्। विचारयन्तु विद्वांसो भवन्तो यं परमाचार्यपाणिनिं प्रत्येतावती श्रद्धा, स कथं नाम दूषयेत् प्रत्याख्यायेच्च।

---

[144] "उत्पत्तिस्तु रसानां या पुरा वासुकिनोदिता। नाना द्रव्यौषधैः पाकैर्व्यञ्जनं भाव्यते यथा"॥
"एवं भावाः भावयन्ति रसानभिनयैः सह। इति वासुकिनाप्युक्तो भावेभ्यो रससम्भवः"॥
उद्धृतम्, सं०व्या०इति०, पृ० ३९९

[145] "यदाह पतञ्जलिः दिव्यं दावं समादाय लौहकर्म समाचरेत् इति"। द्रष्टव्यम्, वृद्धत्रयी, पृ० २९

[146] महाभाष्यम्, १/१/१

वार्तिककारस्य वार्तिकानामपि सम्यगालोचनपुरस्सरं व्याख्यानं तथा च तेषामुपयोगित्वं समकरोत्, ततश्च स्वाभिमत्यं प्रादर्श्यत पाणिनीयव्याकरणे महाभाष्यस्य वचनानि प्रमाणतमान्येव स्वीक्रियन्ते। "**यथोत्तरं मुनीनां प्रामाण्यम्**" इति न्यायेन विचारणैव विचार्यते। अतो नव्यव्याकरणसम्प्रदाये पाणिनेरपेक्षयाऽप्याचार्यपतञ्जलेर्वचनानि प्रमाणत्वेन स्व्यक्रियन्त, यथार्थतो महाभाष्यस्य कार्यमेव पाणिनिव्याकरणस्य यथार्थस्वरूपस्य निर्धारणम्, किन्तु युधिष्ठिरमीमांसकप्रभृतयः केचन एतन्मतं विरोधितवन्तः।

**महाभाष्यस्य महत्त्वम्–**

महाभाष्यं संस्कृतव्याकरणस्यात्यन्तं प्रामाणिको ग्रन्थो विद्यते। प्राचीना उत नवीनाः सर्वेऽपि व्याकरणशास्त्रव्याख्यातारः परम्परायां महाभाष्यं प्रति नतशिरसोऽवलोक्यन्ते, महामुनेः पतञ्जलेः काले पाणिनीयव्याकरणस्य पणिनिव्याकरणेतराणां च ग्रन्थानां महती ग्रन्थराशिरविद्यत। अत आचार्यस्तांस्तान् ग्रन्थान् समालोच्य नवनीतवद् ग्रन्थानां सारभूतं महाभाष्यं जग्रन्थ। अतो महाभाष्यं केवलं वैयाकरणानां प्रामाणिको ग्रन्थः प्रत्युत समस्तविद्यानामाकरग्रन्थत्वेन प्रासिद्ध्यत, एतद्विषयकं वचनमाचार्यभर्तृहरि-रुपस्थापयति–

**"कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**

**सर्वेषां न्याबीजानां महाभाष्ये निबन्धने"॥**

**महाभाष्यस्य टीकाः–**

महाभाष्यस्य बह्व्यष्टीका बहुभिर्बुधैर्व्यरच्यन्त। तत्र काश्चन प्रसिद्धाः उद्धृयन्ते–

**१-आचार्यभर्तृहरिः–**

**महाभाष्यदीपिका-** कीर्लहार्नमहोदयः प्रप्रथमं महाभाष्यदीपिकां प्रत्यायति। चीनदेशस्य यात्री इत्सिङ्गमहोदयो लिखति स्वभारतयात्राया विवरणे यन्महाभाष्यदीपिकायां पञ्चविंशतिसहस्रं श्लोका आसन्, किन्त्वेतन्न

ज्ञायते यट्टीका सम्पूर्णग्रन्थे आसीदथवा कुत्रचिद्भागमात्रे। द्वादशशताब्द्या लेखकस्य वर्धमानस्य मते त्रिपादीं यावदासीदस्य टीका।[147] हेलराजोऽपि तथैव प्रत्यपद्यत[148]

## २- अज्ञातकर्तृकः (६८० विक्रमात् पूर्वम्)–

ऋग्वेदभाष्यकारः स्कन्दस्वामी निरुक्तटीकायां कथयति- "**अन्ये वर्णयन्ति-भावशब्दः शब्दपर्यायः। तथा च प्रयोगः- यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भाव इति, सर्वे शब्दाः स्वेनार्थेनार्थभूताः सम्बद्धा भवन्ति स तेषां स्वभावः**"। इति तत्र व्याख्यायते। अत्र स्कन्दस्वामी पूर्वं तु 'यद्वा.....भावः' इति पाठं लिखित्वा तत्र व्याख्यायत इति लिखति। एतेन स्पष्ट्यते यदुत्तरपाठः कस्याश्चित् प्राचीनटीकात उद्धृतः।

## ३-कैय्यटः (सम्वत् ११०० विक्रमात् पूर्वम्)–

आचार्यकैय्यटेन महाभाष्यप्रदीपनाम्नी टीका व्यरच्यत। एतस्य पितुर्नाम जैय्यटोपाध्याय आसीत्, काश्मीरदेशवास्तव्यश्च। कैय्यटः सम्पूर्णायां प्रदीपटीकायामेकवारमेव महाभाष्यदीपिकां सङ्केतयति।[149] वाक्यपदीयस्य बहून्युद्धरणानि महाभाष्यप्रदीपे दृश्यन्ते एतेन कैय्यटस्य पाण्डित्यमवलोक्यते साम्प्रतं महाभाष्यसदृशस्य ग्रन्थस्य सम्यगवबोधाय प्रदीपटीकैव शरणम्।

१- ज्येष्ठकलशः– (?)

२- मैत्रेयरक्षितः– (?)

३- पुरुषोत्तमदेवः– प्राणपणाटीका

४- धनेश्वरः– चिन्तामणिः उत धनेशटीका

५- शेषनारायणः– सूक्तिरत्नाकरटीका

---

147 "भर्तृहरिर्वाक्यपदीयप्रकीर्णयोः कर्ता महाभाष्यत्रिपाद्याः व्याख्याता च"।

148 "त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदी कृता।
तस्मै समस्तविद्याश्रीकान्ताय हरये नमः"॥ वा०प०, प्रकीर्णकाण्डम्

149 "विस्तरेण भर्तृहरिणा प्रदर्शितः ऊहः"। नवाह्निकम्, निर्णयसागरसंस्करणम्, पृ० २०

६- विष्णुमित्रः– क्षीरोदटीका

७- नीलकण्ठवाजपेयी– भाष्यतत्त्वविवेकटीका

८- शेषविष्णुः– महाभाष्यप्रकाशिका

९- शिवरामेन्द्रसरस्वती– सिद्धान्तरत्नप्रकाशः

१०- प्रयागवेङ्कटाद्रिः– विद्वन्मयूखभूषणम्

११- तिरुमलयज्वा– अनुपदाटीका

१२- कुमारतातयः

१३- राजन् सिंहः– शब्दबृहती

१४- नारायणः– महाभाष्यविवरणम्

१५- सर्वेश्वरदीक्षितः

१६- गोपालकृष्णशास्त्री– शाब्दिकचिन्तामणिः

१७- सदाशिवः– महाभाष्यगूढार्थदीपनी।

१८- राघवेन्द्राचार्यगजेन्द्रगढकरः– (?)

१९- छलारी नरसिंहाचार्यः– शाब्दिककण्ठामणिः

एतदतिरिक्तानामपि विदुषां टीकाऽज्ञातकर्तृकनाम्नोपलभ्यन्ते। महाभाष्यीयटीकानां विचारणानन्तरं कैय्यटविरचितप्रदीपटीकाया महत्त्वं महत्तमं विद्यते तत्रापि विद्वद्भिष्टीका समक्रियन्त—

१- चिन्तामणिः

२- नागनाथः

३- रामचन्द्रसरस्वती

४- ईश्वरानन्दसरस्वती

५- अन्नम्भट्टः

६- नारायणशास्त्री

७- नागेशभट्टः

८- मलययज्वा

९- रामसेवकः

१०- प्रवर्तकोपाध्यायः

११- आदेन्नः

१२- नारायणः

१३- सर्वेश्वरसोमयाजी

१४- हरिरामः

१५- अज्ञातकर्तृकः।

अनुपदकाराः पदशेषकाराणां वृत्तिकाराणामपि वर्णनं व्याकरणशास्त्रीयेषु स्थलेषु तत्र तत्र प्राप्यते, तेषामपि आचार्या प्रासिध्यङ्गताः।

**व्याकरणशास्त्रस्य दार्शनिकी पारम्परा–**

व्याकरणशास्त्रं वास्तविकरूपेण पदसाधुत्वविषयकं शब्दापशब्दविषयकं प्रकृतिप्रत्ययविश्लेषकञ्च विद्यते। आदिमं स्वरूपमेतस्य भाषायां प्रयुज्यमानानां शब्दानां व्याख्यानाय प्रायुज्यत, कालान्तरे विकासपरम्परायामेतस्यापि शास्त्रस्य विविधस्वरूपेषु विकासोऽभवत्। स च विकासस्तत्रभवद्भिस्तपःपूतैर-लोलपैर्यत्किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतैस्तत्रभवद्भिश्शिष्टैर्व्यधीयत।

मानवस्य स्वाभाविकी स्थितिर्यत् स जिज्ञासया युक्तो भवति, जिज्ञासायाश्च विषयोऽध्यात्ममेव पारमार्थिकदृशा। सौभाग्याद्भारतवर्षस्य संस्कृतिरपि प्रश्नोत्तरद्वारिकया जिज्ञासयाऽजायत यद्यथा श्वेताश्वतरोपनिषदो मन्त्रो दीयते-

**"किं कारणं ब्रह्म कुतः स्म जाता जीवामः केन क्व च सम्प्रतिष्ठाः।**

**अधिष्ठिताः केन सुखेतरेषु वर्त्तमाहे ब्रह्मविदो व्यवस्थायाम्"॥**[150]

एवम्प्रकारेण संसारकारणभूतस्य तत्त्वस्य प्रश्नस्य समाधानमप्यदीयत ग्रन्थकृता।

---

[150] श्वेता०उप०, म०सं० १

एवम्भूतानां जिज्ञासाविषयीभूतानां नैकानां प्रश्नानां समाधानं दार्शनिकरीत्या दर्शनात्मव्याख्यानेन दर्शनेष्वेवोपनिबद्धाः सन्ति। तद्यथा प्रस्तावयत्युपनिषदो व्याख्यानम्-

**"कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।**

**संयोग एषां न त्वनात्मभावादात्माप्यनीशः सुखदुःखहेतोः"॥**[151]

यदैतत् संसारस्य कारणभूतं तत्त्वं किमिति? यतोहि ऋग्वेदे निगदितं यत्-शब्दतत्त्वस्य दार्शनिकस्वरूपं वेदब्राह्मणोपनिषत्सु स्पष्टीकृतमस्ति। ऋग्वेदे प्रतिपादितं वर्तते यत्-

**"अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा।**

**परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव"॥**[152]

शतपथब्राह्मणेऽपि निगदितम्-

**"वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।**

**अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह"॥**[153]

कैवल्योपनिषद्यपि– सर्वमपि वाक्तत्त्वे संवर्तत्वेन रारार्ष्टि।

**"मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।**

**मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्"॥**[154]

एवम्प्रकारकैर्बहुभिर्मन्त्रैरभाव्यत व्याकरणदर्शनस्यापि दार्शनिकता। एतेषु मन्त्रेषु संसारकारणभूताया वाचो व्याख्यानं विद्यते– "**यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति च तद्विजिज्ञासस्व तद्ब्रह्मेति**"॥ एतस्मात् कारणाद्वेदेषु विद्यमानेषु स्थित्युत्पत्तिलयप्रवेश-

---

151 तत्रैव, म०सं० २

152 ऋग्वेदः,१०/१२५/८, अथर्ववेदः,४/३०/८

153 शतपथब्राह्मणम्, ६/५/३/४

154 कैवल्योपनिषद्,१/१९

निगमनादिवाक्येषु वेदोक्ता सर्वविधस्य स्थावरजङ्गमात्मकस्य जगतः कारणभूता वागेवात्र परमब्रह्मपदाभिधायिनी विद्यते।

तस्माद्वाच एव इदं निखिलं दृश्यमानं जगज्जायते। सैव वाक् सर्वस्य ब्रह्माण्डस्य ब्रह्माण्डस्थस्य भुवनानां तत्र च विद्यमानस्य स्थावरजङ्गमात्मकस्य भूतभौतिकस्य चराचरस्य सर्जनं कुरुते। प्रादुर्भावपूर्वकं सर्वान् पालयति पोषयति तथा चान्ते सर्वान् विलीयत्यपि। संसारस्य कारणभूता वागेव भूतभौतिकं भावयन्ती सर्वं वशयति। वाचो विना कश्चिदपि व्यवहारो नेह जगति प्रावर्तत प्रवर्तते प्रवर्तयिष्यते च।

कैवल्योपनिषदि यद्व्याख्यानमासीत्तदनुसृत्य परमतत्त्वविद्भिः ऋषिभिर्व्याख्यानं व्यधीयत संवर्तत्वेन विवर्तत्वेन च। विवर्तो नाम "**सतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः**" इति वेदान्तदर्शने व्याख्यत्। अर्थाद् यदा परं तत्त्वं स्थितं सदन्यविविधरूपेषु संसारे भासते सा स्थितिः। तथैव "**अनेकस्यैकत्रोपसंहारः संवर्तः**" अर्थाद् बहुविधेषु स्वरूपेषु वर्तमानमिदं निखिलं जगद् यदा नष्टं सत् स्वकारणे परब्रह्मणि वाचीति विलीनं भवति सा आवस्था संवर्तावस्था भवति। तैत्तिरीयोपनिषदः सम्बन्धभाष्ये वेदान्तदर्शनस्य प्रतिष्ठिततम आचार्यः शङ्करः प्रतिपादयति यत्–

**"यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते।**

**येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः"॥**[155]

ज्ञानात्मनो नमस्कारो विद्यते स च ज्ञानात्मा शब्दं विना न वेद्यते, यतोहि ज्ञानं तु शब्दद्वारकमेव सम्भवति। शब्दैर्विनेह जगति न सम्भवति भाषा। भाषा च समेषां स्थावरजङ्गमात्मकानां व्याहारे प्रवृत्तिनिमित्तत्वमुपयाति। भाषया विना संसारस्य सर्वविधस्य व्यवहारस्योच्छेदप्रसङ्गः स्यात्, तस्माच्चैवम्भूता वागिहामुत्र च सर्वत्र फलदायिनी। तदाह तत्रभवान् भर्तृहरिः-

---

[155] तैत्ति०उप० शां०भा०, सम्बन्धभाष्यम्, श्लो० १

**“अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः”॥**[156]

अत्र सर्वकारणभूतं शब्दब्रह्मैवार्थभावेनार्थाद्घटादिविविधस्वरूपेषूपलभ्यते। तथैव व्याकरणदर्शनमेव मोक्षस्यर्जुः मार्गरित्यपि प्रत्यपीपदत्।

**“इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**

**इयं हि मोक्षमाणानामजिह्माराजपद्धतिः”॥**[157]

एवं प्रकारेण सांसारिकेभ्य ऋषिरुपादिशदकुटिलं मार्गम्, अत्र ये केऽपि मोक्षं प्राप्तुकामाः स्युः, ते एवम्भूतेनाकौटिल्ययुतेन मार्गेण परमतत्त्वस्य ब्रह्मणो ज्ञानायाग्रे सरन्तः प्राप्नुयुरिति। एवम्भूतस्य प्रतिष्ठितस्य व्याकरणस्य दार्शनिकस्वरूपस्य प्रापयितारः व्याख्यातारश्चाचार्यास्तेषां परम्परा च व्याख्यायते।

एकः क्रम उपरि व्याख्यातः, किन्तु पाणिनिव्याकरणे एवम्भूताया दार्शनिकप्रक्रियायाः प्रारम्भः कदेति तु निश्चप्रचं न वक्तुं शक्यते तथापि तत्र तत्र दृग्गोचरेषु सङ्केतेषु विचार्य भावयिष्यते विचारणा। आदिमो व्याख्याकर्ता आचार्ययास्क एव यतोहि तद्द्वारैव पूर्वं शब्दानां नित्यानित्यत्वविचारस्य सङ्केतः निरुक्तस्य प्रथमाध्याये विहितः। अष्टाध्याय्यामेकं सूत्रं लभ्यते ‘अवङ् स्फोटायनस्य’[158], एतस्मिन्नेव सूत्रे सक्षाद्रूपेण व्याख्याकर्तृभिर्व्याख्याता दार्शनिका अंशास्तद्यथा पदमञ्जर्याः कर्ता आचार्यो हरदत्तो व्याख्याति- स्फोटोऽयनं परायणं यस्य स स्फोटायनः स्फोटप्रतिपादनपरो वैयाकरणाचार्यः। ये त्वौङ्कारं पठन्ति ते नडादिष्वश्वादिषु वा (स्फोटशब्दस्य) पाठं मन्यन्ते[159]।

एतस्याचार्यस्य कालः पञ्चाशदुत्तरैकोनत्रिंशद्वर्षं विकमात् पूर्ववर्ती विद्यते इतीतिहासकारा भावयन्ति। स्फोटायनाचार्यात् परमदार्शनिकेषु विद्यत

---

[156] वा०प०, १/१

[157] वा०प०, १/१७

[158] अष्टा०, ६/१/१२३

[159] का०पदम० ६/१/१२३ इत्यस्य टीका

औदुम्बरायणाचार्यस्तस्य व्याख्यानमपि निरुक्तशास्त्रे आचार्यस्य यास्कस्य शब्दैरेव जायते, यतोहि शब्दस्य नित्यानित्यत्वविचारणाप्रसङ्गे तन्मतमुद्धरति- "**इन्द्रियनित्यं वचनमौदुम्बरायण**"।[160] एतेनैवं प्रतिभाति यद् आचार्यस्य व्याख्यानमनित्यत्वपक्षमेव पुष्णाति, किन्तु स्फोटसिद्धेर्लेखकः स्वग्रन्थस्यादौ प्रत्यपद्यत यद् औदुम्बरायणः शब्दस्य नित्यत्वपोषक[161] आसीत्।

अस्तु तावत् किमपि स्यात् किन्तु तेन शब्दस्य नित्यनित्यत्वविचारणा व्यचार्यतैव। औदुम्बरायणस्य कालो विक्रमवर्षपूर्वात् शतोत्तरत्रिसहस्त्रं (३१००)[162] विद्यते।

**आचार्यव्याडिः–**

दार्शनिकव्याख्यानपरम्परायामाचार्यस्य व्याडेः सम्यग्रूपेण विचारो महाभाष्ये यत्र तत्र व्याख्यानेषु विद्यन्ते- "**सङ्ग्रहे एतत् प्राधान्येन परीक्षितम् नित्यो वा स्यात् कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः- यद्येव नित्योऽथापि कार्य उभयथाऽपि लक्षणं प्रवर्त्यम्**"।[163]

एवम्प्रकारकाणि सङ्ग्रहवचनानि महाभाष्यद्वारैव ज्ञायन्ते यच्छब्दानां नित्यानित्यत्वविचार आचार्यद्वारा सम्यग्रीत्या स्वकीये ग्रन्थे कृतः। अन्येष्वपि ग्रन्थेषु सङ्ग्रहकारस्योद्धरणानि प्राप्तानि। तद्यथा–

**"चतुर्दश सहस्त्राणि वस्तून्यस्मिन् सङ्ग्रहग्रन्थे (परीक्षितानि)"**

---

160 निरुक्तम्, पृ० २

161 "भगवदौदुम्बरायणाद्युपदिष्टाखण्डभावमपि व्यञ्जनारोपितनान्तरीयकभेदक्रमविच्छेदादिनिवेष्टैः परैरेकाकार-निर्भासं अन्यथासिद्धिकृत्य अर्थधीहेतुतां चान्यत्र सञ्चार्य भगवदौदुम्बरादीनपि भगवदुपवर्षादिभि-र्निमायापलपितम्"। स्फो०सि०, पृ० १

162 सं०व्या०इति०, पृ० ४३४

163 महा०भा०, पस्पशा०

**“शब्दार्थयोरसम्भेदे व्यवहारे पृथक्क्रिया।**

**यतः शब्दार्थयोस्तत्त्वमेकं तत्समवस्थितम्”॥**[164]

एवमादीनि बहूनि समुद्धरणान्याचार्यव्याडेः शब्दस्य नित्यत्वविषयक-चिन्तनेऽचिन्तन्। आचार्यस्य व्याडेः कालः विक्रमसंवत्तः पूर्वं पञ्चाशदुत्तरैकोन-विशतिवर्षं विद्यते।

व्याडिर्महान् दार्शनिक आसीत्, स चाचार्यपणिनेर्मातुल इत्यपि परम्परा।

**आचार्यपतञ्जलिः-**

ततः प्रतिष्ठितो दार्शनिको लब्धयशस्क आचार्यः पतञ्जलिरासीत् येन साधुरीत्या सारल्येनानुपमया शैल्या गभीरस्य सामान्याग्राह्यस्य व्याकरणशास्त्रस्य दार्शनिकविधया व्याख्यानं व्याकरणशास्त्रस्याकरग्रन्थे उपनिबद्धम्। उपनिबद्धवतस्तस्य आचार्यस्य विषये व्याकरणदर्शनस्य दार्शनिकत्वपक्ष-प्रतिष्ठापको विद्वान् तत्रभवान् भर्तृहरिराह-

**“कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**

**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने”॥**[165]

अर्थात् सर्वविधानां न्यायबीजानां व्याकरणशास्त्रविषयकनिर्णायकत्व-ख्यापकसिद्धान्तानां चर्चणं महाभाष्ये एव आचार्येण व्यकारि, यथोत्तरं मुनीनां प्रामाण्यमिति दृशा त्रिमुनिव्याकरणनिकाये महाभाष्यीयैर्विचारभूतसिद्धान्तैरेव प्रामाण्यं लभते व्याकरणपक्षः।

वाक्यपदीयस्य व्याख्याकार आचार्यपुण्यराजो ब्रूते। एतस्या एव कारिकाया व्याख्याने– **“तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनम्। यावत् सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव ‘सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्य**

---

164 वा०प०, २/३१९ टीका, पुण्यराजः

165 वा०प०, २/४८५

**महाभाष्यमित्युच्यते लोके**"[166] अर्थापयति यन्महाभाष्यस्य महाभाष्यत्वं कथमिति लोके श्रुतिस्तदित्थम्- महाभाष्यं न केवलं व्याकरणनिकायभूतानामेव ग्रन्थः प्रत्युत ग्रन्थेऽस्मिन् समेषां न्यायबीजानां निबन्धनत्वादेव महदित्यस्य विशेषणस्य सार्थकता। न केवलमेतावदेव भर्तृहरिर्महाभाष्याय प्रतिकञ्चुकशब्दस्य प्रयोगमपि करोति- "**आर्षे विप्लाविते ग्रन्थे सङ्ग्रहप्रतिकञ्चुके**"[167] एवम्भूतेन वचनेन स्पष्ट्यते तत् पातञ्जलं महाभाष्यमप्याचार्यव्याडेः सङ्ग्रहग्रन्थवदेव शब्दप्रमाणकानां वैयाकरणानां दार्शनिको ग्रन्थो विद्यते। आचार्यस्य कालः पूर्वमेव विभावितस्तदनु क्रम आयात्याचार्यभर्तृहरेर्येन सम्यग्रूपेण दर्शनपक्षस्य व्याख्यानपुरस्सरं व्याकरणशास्त्रमप्यन्येषां दर्शनानां पुरतः सर्वातिशायित्वेन[168] व्याख्यायत। मोक्षमाणेभ्यो जनेभ्योऽत्यन्तं सरलः राजमार्गः कथितः। यस्यावलम्बिनो भूत्वा तत्र भवन्तः सांसारिका अल्पीयसा प्रयासेन नित्यस्य शुद्धस्य बुद्धस्य शान्तस्य शब्दाख्यस्य परब्रह्मणः साक्षात्कारात्मकं मोक्षं प्राप्नुवन्तु।[169] एवम्भूताभिर्बहुभिः कारिकाभिराचार्यभर्तृहरिर्व्याकरणशास्त्रस्य समक्प्रकारेणाभ्यूहनं विधाय दर्शनपक्षमपोषयत्।

## आचार्यभर्तृहरिः–

व्याकरणदर्शनस्य दार्शनिकपक्षस्य संस्थापकाचार्य आचार्यो भर्तृहरिः स्वकीयेन ज्ञानवैभवेनेह जगति चकास्तितमाम्, तस्य स्पष्टोल्लेखो न क्वचिदपि प्राप्यते, किन्तु तस्य ग्रन्थस्य सम्यगालोचनयैव विभावयितुं शक्यते। आचार्यपतञ्जलेरनन्तरं तत्रभवतो भर्तृहरेः प्रतिष्ठिततमत्वं दृश्यत एव, यतोहि सर्वैर्वैयाकरणैस्तस्य वचांसि प्रमाणत्वेनाङ्ग्यक्रियन्त। साक्षादाचार्यस्य परिचयो न क्वचिदपि लभ्यते तथाप्याचार्यपुण्यराजेन वाक्यदीयस्य व्याख्यात्रोदलिख्यत

---

[166] तत्रैव, पुण्यराजकृतटीका

[167] वा०प०, २/ ४८८

[168] "इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं हि मोक्षमाणानामजिह्मा राजपद्धतिः"॥ वा०प०, १/१६

[169] "यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते"॥ तत्रैव, १/२२

यत्तस्य गुरोर्नाम 'वसुरातः' इत्यासीत्। "**न तेनास्मद्गुरोस्तत्र भवतो वसुरातादन्यः**"[170] पुनश्च "**प्रणीतो गुरुणास्माकमयमागमसङ्ग्रहः**"[171] इत्यस्याः कारिकायाः पूर्वपीठिकायां विलिखति- "**अथ कदाचिद् योगतो विचार्य तत्र भगवता वसुरातगुरुणा ममायमागमः सञ्ज्ञाय वात्सल्यात् प्रणीत इति स्वरचितस्यास्य गुरुपूर्वक्रममभिधातुमाह**"[172] अर्थाद्योगबलेन कादचिद् वसुरातगुरुरचिन्तयद्यदयं व्याकरणागमो ममेति विचिन्त्य वात्सल्यभावेन व्याकरणागमं वाक्यपदीयं प्रणिणाय, प्रतिपादना तस्य यत् तस्य गुरोरेव चिन्तनमेव, पुनश्चाचार्यो भर्तृहरिः तस्माद्वसुराताभिधाजनान्न्यायमार्गं विचिन्त्य वाक्यपदीयं विरराच। प्रतिपादयति–

**"न्यायप्रस्थान् मार्गांस्तानभ्यस्य स्वं च दर्शनम्।**

**प्रणीतो गुरुणास्माकमयमागमसङ्ग्रहः"॥**[173]

अत्र अम्बाकर्तृकारो लिखति– "**अयं वाक्यपदीयरूपः काण्डत्रयात्मक आगमसङ्ग्रहो गुरुणा तत्र भवता वसुरातेन प्रणीतः**"।[174] पुनरेकं प्रमाणं विद्यते-

**"य आचार्यवसुरातेन न्यायमार्गान् विचिन्त्य सः।**

**प्रणीतो विधिवच्चायं मम व्याकरणागमः"॥**[175]

अत्र तस्यगुरोरेव परिचयः प्राप्यते। देशविषयिका जिज्ञासा तु तदवस्थितैव। आचार्यस्य कालविषयकविचारणायामाचार्यो युधिष्ठिरो मीमांसको विविधैः प्रमाणैर्निष्कर्षन् वदति- यदाचार्यस्य भर्तृहरेः कालो विक्रमात् षत्सप्तशताब्द्योः

---

170 सं०व्या०इति०, उद्धृतम्, पृ० ४०१

171

172 वा०प०, २/४८१ पृ० ५२२

173 वा०प०, २/४८२

174 तत्रैव, २/४८२ इत्यस्य टीका, पृ० ५२३

175 वा०प०, पृ० ५२९

पूर्ववर्ती स्यात्।[176] आचार्यबलदेवोपाध्यायः सप्तशताब्दीक आसीदिति स्वीकरोति। आधुनिकैतिह्यविदुषोऽनुसृत्य तस्य कालः चतुर्थशताब्दी[177] सम्भवति देशविषयकचिन्तने आचार्यबलदेवोपाध्यायः काश्मीरजश्चिन्तयति यतोहि काश्मीरीयैराचार्यैस्तस्य सम्माननत्वात्।[178] केचनाचार्या विक्रमादित्यभ्रातृभूत-त्वात्तस्य देशः, उज्जयिनीं सम्भावयन्ति। ततोऽपि देशसाधकप्रमाणानि न तथा किमपि निश्चाययन्ति।

**अधोलिखिताः तत्सम्बद्धाः कृतयः-**

1. महाभाष्यदीपिका
2. वाक्यपदीयम् (काण्डत्रयम्)
3. वाक्यपदीयवृत्तिः (प्रथमद्वितीयकाण्डयोः)
4. नीतिशतकम्
5. शृङ्गारशतकम्
6. वैराग्यशतम्
7. जैमिनीयमीमांसावृत्तिः
8. वेदान्तसूत्रवृत्तिः
9. शब्दधातुवृत्तिः
10. भट्टिकाव्यम्
11. भागवृत्तिः

एतासु प्रथमास्तिस्रस्तस्य निर्विवादत्वेन स्वीक्रियन्तेऽन्यासु रचनासु विदुषां विचारभेदो दृश्यते, तथापि यावत् किमपि स्पष्टप्रत्यायकं किमपि प्रमाणं प्राप्तं सन्न प्रमाणयति तावद्वैयाकरणशिरोमणेराचार्यस्य कृतेः स्वीकारे का क्षतिः।

---

176 "हमने मीमांसा शाबरभाष्य हिन्दी व्याख्या के आरम्भ में शास्त्रावतार मीमांसा पृष्ठ संख्या ३३-३६ के प्रसंग में सिद्ध किया है कि भर्तृहरि का काल विक्रम से न्यूनातिन्यून ६-७ शताब्दी पूर्व होना चाहिये, क्योंकि शबर स्वामी का काल विक्रम से ५ शताब्दी पूर्व है"। सं०व्या०इति०, पृ० ४१०

177 वा०प०, भूमि० पृ० ५३ चौ० कृ० अका० वा०

178 तत्रैव

**वाक्यपदीयस्य टीकाकाराः–**

| | | | |
|---|---|---|---|
| 1. | भर्तृहरिः (हरिवृषभः) | स्वोपज्ञवृत्तिः | (?) |
| 2. | वृषभदेवः | पद्धतिः | (?) |
| 3. | पुण्यराजः | प्रकाशः | (११ शताब्दी) |
| 4. | हेलाराजः | प्रकीर्णं प्रकाशश्च | (११ शताब्दी) |
| 5. | फुल्लराजः[179] | (?) | (?) |
| 6. | धर्मपालः | (?) | (?) |
| 7. | गङ्गदासः[180] | (?) | (?) |
| 8. | द्रव्येशझा | (?) | (?) |
| 9. | नारायणदत्तत्रिपाठी | (?) | (?) |

**मण्डनमिश्रः–**

दार्शनिकग्रन्थेष्वाचार्यमण्डनमिश्रस्य स्फोटसिद्धिर्विद्यते। तत्र षट्त्रिंशत् कारिकाः सन्ति। अत्यन्तं प्रौढोऽयं ग्रन्थः। आचार्यमण्डनमिश्रस्य पाण्डित्यं जगत्प्रसिद्धं विद्यते-

**"स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति।**

**द्वारस्थनीडा तरुसन्निपाते जानीहि तन्मण्डनमिश्रधाम"॥**[181]

स्फोटसिद्धेष्टीकाकार ऋषिपुत्रपरमेश्वरो विद्यते। टीकैषा मद्रासविश्वविद्यालयग्रन्थालयात् प्रकाशिता। आचार्यभरतमिश्रस्यापि स्फोटसिद्धिः त्रिवेन्द्रम् इत्यस्मादस्थानात् सप्तविंशत्युत्तरैकिनविशतिशताब्द्यां प्रकाशिता वर्तते।तत्परं स्फोटसिद्धिन्यायविचाराभिधो ग्रन्थो महामहोपाध्यायेन गणपतिशर्मणा सप्तदशोत्तरैकोनविंशतिशताब्द्यां त्रिवेन्द्रमत एव प्रकाशितः।

---

179 "इतो ग्रन्थपातसन्धानाय फुल्लराज्यकृतिर्लिख्यते"। उद्धृतम्, सं०व्या०इति०, पृ० ४४७

180 "इति (पण्डितगङ्गदा)सविरचिते सम्बन्धोद्देशः। षष्ठस्तद्धितोद्देशः समाप्तः"। तत्रैव

181 सं०व्या०इति०, उद्धृतम्, पृ० ४४९

एतस्यापि कर्तुर्नाम न प्राप्यते। एतेभ्योऽतिरिक्ताः स्फोटविषयका आचार्या सन्ति- केशवकवेः स्फोटप्रतिष्ठा, शेषकृष्णकवेः स्फोटतत्त्वम्, श्रीकृष्णभट्टस्य स्फोटचन्द्रिका, आपदेवस्य स्फोटनिरूपणम्, कुन्दभट्टस्य स्फोटवादः, इत्येतेषु ग्रन्थेषु स्फोटविषयकं गभीरचिन्तनं विद्यत एव।[182]

**आचार्यकौण्डभट्टः–**

साम्प्रतं व्याकरणदर्शने प्रसिद्धो ग्रन्थो विद्यते यद्वैयाकरणभूषणसार इति, 'सारः' इतिशब्दप्रयोगादेव प्रतिभाति यत् कस्यचिद्विशालग्रन्थस्य सारांशभूतोऽयम्, अतो वैयाकरणभूषणमेव स ग्रन्थः। कारिकासु निबद्धस्यैतस्य वैयाकरणभूषणस्य कर्तृत्वेन भट्टोजिदीक्षितो ग्रन्थारम्भे मङ्गलाचरणात् परं लिखति लेखकः-

**"फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।**

**तत्र निर्णीत एवार्थः सङ्क्षेपेण कथ्यते"॥**[183]

एतया कारिकया सञ्ज्ञायते यच्छब्दकौस्तुभानन्तरं वैयाकरणभूषणम्, ततः करिकाभागस्य व्याख्याभूतो ग्रन्थ एव वैयाकरणभूषणसारस्तत्कर्ता च आचार्यकौण्डभट्टः।

तत्रभवान् कौण्डभट्ट आत्मानं वैयाकरणभूषसारे परिचाययति यत् स भट्टोजिदीक्षितानुजस्य रङ्गोजिभट्टस्य पुत्रः शेषतनयस्य रामेश्वरापरनामधेयस्य सर्वेश्वरस्य शिष्यः काशेयको विद्यते। वैयाकरणभूषणसारस्य व्याख्याकर्तृषु हरिवल्लभ-मुन्नदेव-भैरवमिश्र-रुद्रनाथ-कृष्णमित्रादयस्सन्ति।

**वामनजयादित्यौ –**

पाणिनिकात्यायनपतञ्जल्यादीनामाचार्याणां योगदानादेव व्यवस्थिताया-मष्टाध्याय्यां व्याडिकुणादिभिराचार्यैर्बह्व्यष्टीका व्यलिख्यन्त। किन्तु तासां समेषां

---

[182] तत्रैव, पृ० ४५५

[183] वै०भू०सा०, धात्वर्थविचारः,

सर्वांशेषु न प्रत्युत कदाचिदैकदेशेऽर्धांशे इत्यादिप्रकारेण प्राप्यन्ते, ततोऽपि आचार्ययोर्वामनजयादित्ययोः काशिका नाम्नी व्याख्या सम्पूर्णा सती समुपलभते। काशिकायाः परं समासां व्याख्यानामाधारत्वेन विद्यते। काशिकाकर्तृकयो रचनाविषयकविचारे कृते सत्यष्टाध्याय्याः प्रथमपञ्चाध्यायानां कर्ता वामनस्तथा चोपान्त्यानां त्रयाणामध्यायानां रचना वामनः कृतवान्, एतस्माद्धेतोरेव काशिकाकर्तृत्वेन वामनजयादित्ययोः सयुक्तं नाम प्रसिद्धं सद्वामनजयादित्यावत्यभवल्लोके। एताभ्यां स्वकीयायां व्याख्यायामुदाहरणप्रत्युदाहरणानां विधिवद्व्याख्यानं विहितम्। काशिकायाः बह्व्यो व्याख्या बहुभिर्विद्वद्भिः कृतास्तथापि तत्र काशिकाविवरणपञ्जिका (न्यासः) तथा च आचार्यहरदत्तस्य पदमञ्जरी व्याख्या, एताभ्यां द्वाभ्यां व्याख्याभ्यामष्टाध्याय्याः सारभूतं तत्त्वमवबुध्य तत्सहकारेण व्याकरणस्य सम्यगवबोधो जायते। एतयोः कालः पञ्चाशदुत्तरषट्शतमीशातः (६५०) प्रारभ्य सप्तशतमीशवीयवर्षं यावत् स्वीक्रियते।

एतत्पश्चादष्टाध्याय्या विभाजनमाचार्यपाणिनिद्वाराविरचिताध्यायक्रम-मननुसरन्ती सती विषयात्मकं विभागं स्वीकृत्य प्राचलत्। युगेऽस्मिञ्छब्दसिद्धावेव महत्त्वमदीयत। सूत्राणां विवेचनेषु न तथा, एतस्मिन् क्रमे सर्वप्रथमः प्रयास आचार्यविमलसरस्वती कृतवान्। रूपमालां विरच्य पञ्चाशदुत्तरत्रयोदशशताब्द्याम्, ततः पञ्चदशशताब्द्यां रामचन्द्रेण प्रक्रिया कौमुदी समरच्यत। ततः प्रक्रियाख्ये युगे महत्त्वपूर्णं स्थानं बिभर्त्याचार्यो भट्टोजिदीक्षितः, यतोह्येतस्यैव काले व्याकरणस्य दर्शनसम्बन्धिग्रन्थेषु वैयाकरणभूषणसारस्तत्र भवजो भ्रातृजः कौण्डभट्टोऽरच्यत।

**भट्टोजिदीक्षितः (षोडषशताब्दीकः)–**

महाराष्ट्रप्रदेशस्थस्य ब्राह्मणस्य तत्रभवतो लक्ष्मीधरस्य पुत्र आसीद् भट्टोजिदीक्षितः। आचार्यप्रवरस्य लघुभ्रातू रङ्गोजिभट्टस्य पुत्र आसीत्। कौण्डभट्टस्तथा च प्रौढमनोरमायाश्शब्दरत्नाभिधायाष्टीकायाः कर्ता आचार्यहरिजिदीक्षितोऽस्य पौत्रोऽविद्यत। आचार्यजगन्नाथस्य प्रौढमनोरमायाः

खण्डनभूतेन 'प्रौढमनोरमाखण्डनम्' इत्यभिधायकेन ग्रन्थेन ज्ञायते यद्भट्टोजिदीक्षितस्य व्याकरणशास्त्रस्याध्ययनं नृसिंहपुत्राच्छेषकृष्णादभवत्। शब्दकौस्तुभे शेषकृष्णाय गुरुरित्यभिधानं प्रायुनग्। कलाविषयकविचारे बहूनि मतानि दृष्टिपथमवतरन्ति सन्ति विज्ञापयन्ति यदाचार्यस्य युधिष्ठिरमीमांसकस्य षोडशशताब्दीकं मतमेव साधुत्वमावहति।

आचार्यभट्टोजिदीक्षितस्य कृतिष्वष्टाध्याय्यां 'शब्दकौस्तुभः' इत्येषा वृत्तिरलिख्यत अद्यत्वे त्वेतस्या वृत्तेः प्रारम्भिकाः केचनाध्यायास्तथा च चतुर्थोऽध्यायः प्राप्यते। शब्दकौस्तुभानन्तरं भट्टोजिदीक्षितस्य रचना 'वैयाकरणसिद्धान्तकौमुदी' विद्यते यद्द्वाराऽऽचार्यो व्याकरणजगति चिरं जीवत् सदजरायतेऽमरायते च। प्रक्रियापद्धतौ वैयाकरणसिद्धान्तकौमुद्याः प्रादुर्भावानन्तरं प्रायशस्समासां व्याकरणशास्त्राध्ययनविधानां लोपप्रायो दृश्यते। अप्रायिका एव अध्येतारः सन्त्युपलब्धास्तथा यैः प्राचीना प्रणाली समनुसृयते। अष्टाध्यायीस्थानां सूत्राणां प्रकरणशो विभाजनं विधाय व्यवस्थापयदाचार्यो येनाध्येतृभ्यः सारल्यं सौकर्यं चाजायत। न केवलमेतावदेव वैयाकरणसिद्धान्तकौमुद्या व्याख्यानभूतष्टीकाग्रन्थः प्रौढमनोरमा[184] इत्यपि व्याख्यायि तेन। एतेनैव प्रामुख्येन व्याकरणशास्त्रस्य बहवो ग्रन्था अजन्यन्त तथा च व्याकरणाध्यायनस्य परम्पराऽपि नूतनत्वेन व्यकास्यत। तस्मादेव नव्यप्राच्ये द्वेसङ्ख्याके परम्परेऽवलोक्येते। आचार्यस्वपूर्ववर्तिनामाचार्याणां वामनजयादित्यहरदत्तादीनां मतान्यपि स्वग्रन्थेषु तत्र-तत्र स्थलेषु समीक्षणपुरस्सरं व्याख्यानं विदधत् सत् समलोचत। मुनित्रयवचनानि प्रमाणीकृत्य स्वसिद्धान्तान् व्यवस्थापयितुं प्रायत्यत। भट्टोजिदीक्षितस्य वेदभाष्यसारः[185] इत्याख्यो ग्रन्थोऽपि प्राकाश्यत। सायणाचार्यस्य ऋग्वेदभाष्यसारो विद्यते। एतस्य ग्रन्थस्य भूमिकायामाचार्यस्य चतुस्त्रिशत्सङ्ख्याकानां कृतीनामुल्लेखं प्राप्यते। पाणिनीयव्याकरणपरम्परायां भट्टोजिदीक्षितस्य कृतेर्वैयाकरणसिद्धान्तकौमुद्या एतावान् प्रभावो जनानां मनास्यरञ्जयद् येन सर्वे महाभाष्याध्ययनं तन्महत्त्वमपि विस्मृतप्रायाः

---

[184] "ध्यायं ध्यायं परं ब्रह्म स्मारं स्मारं गुरोर्गिरः।
सिद्धान्तकौमुदीव्याख्यां कुर्मः प्रौढमनोरमाम्"॥ प्रौ०म०, मङ्गलाचरणम्।

[185] भारतीयविद्याभवनम्, बम्बईतः

सन्तोऽवगच्छन्ति यत् सिद्धान्तकौमुदीमहाभाष्याध्ययनस्य द्वारमात्रमेव न, प्रत्युत सङ्क्षिप्तविशदसारभूतम्। तदर्थमुच्यते–

**“कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**

**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः”॥**[186]

**आचार्यस्य कृतयः-**

**धर्मशास्त्रम्-** अशौचप्रकरणम्, तिथिनिर्णयः, त्रिस्थलीसेतुश्च।

**वेदान्तः-** वेदान्ततत्त्वविवेकः, दीपनव्याख्या, अद्वैतकौस्तुभः, तत्त्वचन्द्रिका च।

**व्याकरणम्-** शब्दकौस्तुभः, वैयाकरणसिद्धान्तकौमुदी, प्रौढमनोरमा, धातुपाठनिर्णयः, लिङ्गानुशासनवृत्तिः, वैयाकरणभूषणकारिका।

**विविधविषयाः-** तन्त्राधिकारनिर्णयः, वेदभाष्यसारः, तत्त्वसिद्धान्तदीपिका, तैत्तिरीयसान्ध्यभाष्यम्।

एवम्भूतासु कृतिषु वैयाकरणसिद्धान्तकौमुद्येवाऽऽचार्यस्य नाम जगत्यस्मिन् सम्प्रसारयति तस्याः कौमुद्याष्टीकाः सन्ति। प्रौढमनोरमाऽऽचार्यद्वारा स्वयमेव व्यलेखि। ज्ञानेन्द्रसरस्वतीमहोदयस्य तत्त्वबोधिनी, प्रसिद्धस्य वैयाकरणाचार्यस्य नागेशस्य बृहच्छब्देन्दुशेखरः, लघुशब्देन्दुशेखर इति व्याख्याभूतग्रन्थद्वयम्, वासुदेवदीक्षितस्य बालमनोरमा, सभापतिशर्मोपाध्यायस्य लक्ष्मीटीका, नीलकण्ठवाजपेयिनः सुखबोधिनी, रामानन्दस्य तत्त्वदीपिका, रामकृष्णस्य रत्नाकरः, रङ्गनाथयज्वनः पूर्णिमा, कृष्णमित्रस्य रत्नार्णवः, तिरुमलद्वादशाहयाजिनः सुनोरमा इत्येताष्टीकाः प्राप्यन्त।

आचार्यभट्टोजिदीक्षितस्य शिष्यो दुर्गातनयतनयो दाक्षिणात्यो ब्राह्मणः प्रथितयशा विद्वान् वरदराजः प्रसिद्धो वर्तते। वरदराजः स्वगुरोः सिद्धान्तकौमुदीं

---

[186] व्याकरणेषूक्तिः,

बालकेभ्यः सरलयितुं सङ्क्षिप्तरूपेण लघुसिद्धन्तकौमुदीं मध्यसिद्धान्तकौमुदीञ्च विरराच।[187] पञ्चाशदुत्तरसप्तदशशब्तादीकः स स्वीक्रियते। अतः परमाचार्यस्य नागेशभट्टस्य विचारणां कुर्मः।

**आचार्यनागेशः–**

आचार्यनागेशस्य नाम को न जानातीह जगति यः खलु व्याकरणशास्त्रस्याधेता स्यात्, यतोहि नैकशास्त्रेष्वाचार्यस्य समानं पाण्डित्यमासीत्। आचार्यद्वारैव मुख्यरूपेण व्याकरणशास्त्रस्य प्रक्रियायुगं परिष्कारात्मकं शास्त्रार्थपक्षं प्रावेशयत्, प्रामुख्येन नव्यन्यायशैलीद्वारा व्याकरणशास्त्रे व्याख्याग्रन्थानां मौलिकग्रन्थानां रचना तथा च दर्शनपक्षे तयैव रीत्या। एवं हि श्रूयते यदाचार्यनागेशोऽष्टादशवारं स्वगुरोर्मुखान्महा-भाष्यस्याध्ययनं व्यधायि। व्याख्याग्रन्थानां मौलिकग्रन्थानां च रचना, परिष्कारदर्शनपक्षयोः सम्यगवस्थापयिता च। आचार्यनागेशभट्टो महाभाष्यस्य कैयटस्य प्रदीपव्याख्यायामुद्योते 'लघुमञ्जूषाम्'[188] 'शब्देन्दुशेखरम्'[189] च समुदधरत। तथैव शब्देन्दुशेखरे भाष्यप्रदीपमपि समुद्धरति 'प्लुतो नैवेति भाष्यप्रदीपे' एवं प्रकारेण प्रतिभानं जायते यच्छेखरद्वयी तथा च प्रदीपोद्योतयो रचना सममेव बभूव।

नागेशस्य परिचयविषये बहुकिमपि वृत्तं न तथोपलभ्यते। जनश्रुतिर्विद्यते यन्नागेशो महाराष्ट्रस्य ऋग्वेदीयो ब्राह्मण आसीत्। एतस्यापरमभिधानं 'नागोजिभट्ट' इत्यासीत्, 'काले' इत्युपनाम आसीत्। शब्देन्दुशेखरस्य मङ्गलाचरणेन विज्ञातं भवति, तस्य पितुर्नाम शिवभट्टो मातुर्नाम सतीदेवीत्यासीत्। तदुच्यते—

---

187 "नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान्।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम्"॥ मध्यसिद्धान्तकौमुदी, मङ्गलाचरणम्।

188 अधिकं मञ्जूषायां द्रष्टव्यम्, प्रदीपोद्योतः, ४/३/१०१

189 "शब्देन्दुशेखरे निरूपितमस्माभिः"। तत्रैव, २/१/२२ निर्णयसागरसंस्करणम्, पृ० ३६८

**"पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः।**

**शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः"॥**[190]

नागेशभट्टस्य पूर्वजा उपाध्याया इति न्यगद्यन्त। तत्रैव माङ्गलिके प्रोक्तवानाचार्यो यत्तस्याऽऽजीविकाप्रदाता राजा शृङ्गवेरपुरस्याऽऽसीत्-

**"याचकानां कल्पतरोररिकक्षहुताशनात्।**

**शृङ्गवेरपुराधीशात् रामतो लब्धजीविकः"॥**[191]

विद्वांसो विचारयन्ति यदद्यत्वे शृङ्गवेरपुरं 'सिंगरौरा' इति कथ्यते[192] लघुशब्देन्दुशेखरस्यान्तिमश्लोकेन ज्ञायते यदाचार्यस्य काचिदपि सन्ततिर्नासीत् सन्ततेरभावे स्वग्रन्थं शब्देन्दुशेखरं पुत्रं तथा च मञ्जूषां कन्यकामित्यचिन्तयत्।

**"शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका।**

**स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया"॥**[193]

एकया जनश्रुत्या विदितं भवति यत् पूर्वं स षोडशवर्षं यावदशिक्षित आसीत्, कदाचिद् विद्वत्स्वामानितः सन् सरस्वतीमुपासयामास तत्कृपयैव स आचार्यभट्टोजिदीक्षितस्य पौत्रादाचार्यहरिदीक्षिताद्व्याकरणशास्त्रमधीतवान्। 'राम-राम' इत्यभिधाद्गुरोर्न्यायशास्त्रस्य।[194]

समयोऽद्यारभ्य सार्द्धद्विशतं वर्षेभ्यः पूर्वतनीनस्य वर्तमानस्य आचार्यस्य समयो न निश्चितो वर्तते। कानिचन तथ्यान्याधृत्यैव तत्कालविषयकचिन्तनं कुर्मः। प्रथमं तावज्जयपुराधीश्वरेण महाराजजयसिंहेनैकोऽश्वमेधयज्ञोऽनुष्ठितस्तत्राचार्यं चतुर्दशोत्तरसप्तदशशताब्द्यां न्यमन्त्रयत्, किन्तु सन्न्यासाश्रमे प्रविष्टत्वात् तेन निमन्त्रं न स्व्यक्रियत। द्वितीयं भानुदत्तस्य रसमञ्जर्यां नागेशभट्टेनाटीक्यत यस्य

---

[190] लघुशब्देन्दुशेखरः, मङ्गलाचरणम्, श्लो० १

[191] तत्रैव, श्लो० २

[192] परमलघुमञ्जूषा, बड़ोदा, १९६१, भूमिका

[193] शब्देन्दुशेखरः, अन्तिमः श्लोकः

[194] "अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितात्। न्यायतन्त्रं रामरामाद् वादिरक्षोघ्नरामतः"।

हस्तलिपिः ‘इण्डिया ऑफिस लन्दन’ पुस्तकालये विद्यते तत्कालस्तु नवषट्युत्तरसप्तदश सम्वत् विद्यते, द्वादशोत्तरसप्तदशशताब्दी विद्यते। तृतीयं वैद्यनाथपायगुण्डेमहोदयस्य पुत्रो बालशर्मा यो नागेशभट्टस्य शिष्य आसीत्, स हेनरीटामसकोलब्रुकमहोदयस्य प्रेरणया प्रेरितः सन् धर्मशास्त्रसङ्ग्रहाभिधं ग्रन्थं व्यलिखत्। कोलब्रुकमहोदयो भारते त्रयशीत्युत्तरसप्तदशशताब्दीतः पञ्चदशोत्तराष्टादशशताब्दीं यावद् भारते न्यवसत्। फलत आचार्यनागेशस्य कालः सप्तदशशताब्द्या अन्तिमार्धतः प्रारभ्याष्टादशशताब्द्याः प्रारम्भकालं यावत् सम्भाव्यते। आचार्यनागेशस्य षट्चत्वारिंशद् ग्रन्थाः तन्नम्ना निर्दिश्यन्ते, किन्तु सम्प्रतिप्राप्तानां नामानि दीयन्ते-

**आचार्यनागेशस्य कृतयः–**

१.लघुशब्देन्दुशेखरः, २बृहच्छब्देन्दुशेखरः, ३.परिभाषेन्दुशेखरः, ५.वैयाकरणसिद्धान्तमञ्जूषा, ६.वैयाकरणसिद्धान्तलघुमञ्जूषा, ७.परमलघु-मञ्जूषा, ८.महाभाष्यप्रत्याख्यानसङ्ग्रहः, ९.प्रायश्चित्तेन्दुशेखरः, १०.परमार्थ-सारविवरणम्, ११.काव्यप्रकाशोद्योतः, १२.रसतरङ्गिणी, १३.रसगङ्गाधरमर्म-प्रकाशः, १४.अशौचनिर्णयः, १५.योगसूत्रवृत्तिः, १६.सापिण्ड्यनिर्णयः १७.रसमञ्जरीटीका, १८.वेदान्तसूत्रवृत्तिः, १९.सप्तदशीटीका, २०.साङ्ख्यसूत्र-वृत्तिः, २१.शब्दरत्नः, २२.रामायणस्य तिलकव्याख्या च।

पुनराचार्यस्य ग्रन्थानां व्याख्या सन्ति बहवः। दार्शनिकग्रन्थेषु मुख्यरूपेण मञ्जूषायस्त्रय्याः प्रसिद्धिर्वर्तते। वैयाकरणसिद्धान्तमञ्जूषायां दुर्बलाचार्यस्य कुञ्जिकाटीका तथा च वैद्यनाथपायगुण्डेमहोदयस्य कलाटीका विद्यते। टीकैषा बालम्भट्टस्य नाम्ना ख्यातिङ्गता। अतो वैद्यनाथपायगुण्डे महोदय एवापरनाम्ना बालम्भट्ट इति प्रतिभाति। अन्या अपि नूतनाष्टीका अटीक्यन्त। एषास्ति वैयाकरणानां परम्परा। सा च साङ्क्षिप्येनादीयत।

**अद्वैतवेदान्तस्य परम्परा–**

अस्माकं देशस्य प्रमाणभूताध्यात्मिकचिन्तनपरम्परायां प्रदीप्तमुकुटमणिरिव अद्वैतवेदान्तस्य सर्वजनीना मान्यता विद्यते। **"तत्रापौरुषायं वाक्यं वेदः"।**[195] अस्यैवापौरुषेयवाक्यानामन्तिमत्वम्। वेदानामन्तिमा भागा एव वेदान्तपदाभिधानोऽभवन्। वेदानां विभाजनं प्रामुख्येन द्विधा व्यधीयत मन्त्रब्राह्मणयोः। आपस्तम्बमते तु **"मन्त्रब्राह्मणात्मको वेदः"।**[196] अत्र सायणाचार्यो व्याख्याद्यद् मन्त्राणां तथा च ब्राह्मणग्रन्थानामेव वेदत्वम्। मन्त्राणां व्याख्यानं कुर्वता लौगाक्षिभास्करेणोक्तम्- **"प्रयोगसमवेतार्थस्मारका मन्त्राः, तेषां च तादृशार्थस्मारकत्वेनार्थवत्त्वम्"।**[197] आचार्यसायणमतेन- **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"।**[198] अतो देवविशेषमुद्दिश्य यः सूक्तविशेषः, अथवा देवविशेषस्य प्रार्थनापरोऽर्थस्य स्मारको भागो मन्त्रः। ब्राह्मणग्रन्था वेदमन्त्राणां व्याख्यानभूताः। यज्ञीयविधीनां कर्मकाण्डस्य तथा चोभयोर्मध्ये पारस्परिकसम्बन्धपुरःसरं विस्तृतं विवेचनं कृतवन्तः। ब्रह्मणस्य लक्षणं शबरस्वामिना समदीयत।[199] अतो ब्राह्मणग्रन्थानां विशालक्षेत्रम्। तस्मान्मन्त्राणां वेदैस्सह भिन्नत्वम्। यतोहि दार्शनिकप्रवृत्तीनां चूडान्तोत्कर्षस्तु वेदान्तेष्वेव लभ्यते। वेदानामन्तिमं ध्येयं कार्याकार्यविवेचनपुरस्सरं परमतत्त्वस्य प्रबोधनमतो वेदान्त इति निगद्यते। आचार्यसदानन्दयोगीन्द्रो व्याख्याति- **"वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरिकसूत्राणि"।**[200] वेदानामन्तिमा भागा उपनिषदस्तस्माद्वेदान्ता इति कथ्यन्ते। दर्शनस्यैवम्भूता पद्धतिरुत्तरमीमांसेत्यपि

---

195 अ०सं०, पृ० ४७

196 आपस्तम्बपरिभाषा,

197 अ०सं०, पृ० १४४

198 ऋग्वेदभाष्यभूमिका,

199 "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परिक्रिया पुराकल्पो व्यवधारणकल्पना।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु"। शा०भा०, २/१/३३

200 वेदान्तसारः, पृ०

कथ्यते। मीमांसादर्शनस्य पूर्वोत्तरभागयोर्विभक्तत्वादपि तदन्तिमो भागः। व्यवहारतश्चेदं स्वतन्त्रं शास्त्रं जगतः सर्वेश्वरवादस्य बोधं कारयदिह जगति चकास्तितमाम्। **"सर्वं खल्विदं ब्रह्म"**[201] एतदनुसारं सम्पूर्णमपि ब्रह्माण्डं तदन्तर्वर्ति विश्वजातं स्थावरजङ्गमात्मकं चराचरं ब्रह्मण एव स्वरूपम्। वैदिकोपनिषत्सु सन्निविष्टानां रहस्यप्रतिपादकसिद्धान्तानां बोधाकत्वादेव वेदान्तशब्दस्य सार्थाकत्वमुचितमेव। अध्यात्मविषयकगभीरचिन्तनमेवोपनिषदां प्रतिपाद्यो विषयः, संसारे श्रुतीनां चरमभूतो विषयोऽध्यात्ममेव। विषयवस्तुनो दृष्ट्या वेद ऋग्यजुस्सामाथर्वभेदाद् व्यभज्यत्। अत्र वेदाः प्रतिवेदं प्रतिभागं च क्रमशो ज्ञानकर्मोपासनानि संहिताब्राह्मणारण्यानि प्रत्याययन्ति, प्रायश आरण्यक-साहित्येषूपनिषदां गणनैतेनापि प्रमाणीभवति। यदन्तिमभागस्यैवोपनिषत्ता। उपनिषदामनेकत्वेऽपि प्रतिपाद्याविषयकैकत्वम्, विषयदृष्ट्या च ज्ञानकाण्डस्य प्राधान्यम्।

मानवस्य स्वाभाविकी स्थितिर्यत् स जिज्ञासया युक्तो भवति। जिज्ञासायाश्च विषय आध्यात्ममेव पारमार्थिकदृशा। सौभाग्याद्भारतवर्षस्य संस्कृतिरपि प्रश्नोत्तर-द्वारिकया जिज्ञासयाऽजायत। यद्यथा श्वेताश्वतरोपनिषदो मन्त्रोऽदीयते –

**"किं कारणं ब्रह्म कुतः स्म जाता जीवामः केन क्व च सम्प्रतिष्ठाः।**

**अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थायाम्"॥**[202]

एवम्प्रकारेण संसारकारणभूतस्य तत्त्वस्य प्रश्नस्य समाधानमप्यदीयत ग्रन्थकृता।

एवम्भूतानां जिज्ञासाविषयीभूतानां नैकानां प्रश्नानां समाधानं दार्शनिकरीत्या दर्शनात्मव्याख्यानेन दर्शनेष्वेवोपनिबद्धाः सन्ति। तद्यथा प्रस्तावयति उपनिषदो व्याख्यानम्-

---

[201] छान्दोग्योपनिषत्,

[202] श्वेता०उप०, म०सं०, १

**“कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।**

**संयोग एषां न त्वनात्मभावादात्माप्यनीशः सुखदुःखहेतोः”॥**[203]

एवम्प्रकारेण संसारविषयिण्यां जिज्ञासायां सम्यग्रूपेणोपनिषत्सु प्रत्यपद्यत। विविधैर्दाशनिकैः स्व-स्वयुगानुगामिन्यं चिन्तनमचिन्त्यत। तस्मिन्नेव क्रमे उपनिषदामध्यात्मविद्यापरायाः विचारधारायाः समन्वितं स्वरूपमेव वेदान्तदर्शनद्वारा अदर्शयदिह जगति। वेदेषूपनिषत्सु अव्यवस्थताध्यात्मसम्बधिचिन्तनस्य समाजे व्यवस्थितरीत्या आनीतवतां प्रयास एव वेदान्तदर्शनत्वेनागद्यत, एवम्भूताया वैदिक्या आध्यात्मिक्या विचारधाराया व्यवस्थापयितृत्वेन प्रथमं नाम तत्र भवतो महर्षिबादरायणस्य विद्यते। महर्षिबादरायणः सूत्रविधामाश्रित्य ब्रह्मसूत्राणां प्रणयनञ्चकार। एतानि ब्रह्मसूत्राण्येव वेदान्तसूत्रम्, शारीरकसूत्रम्, शारीरकमीमांसा, उत्तरमीमांसा, नामभिरप्रथ्यन्त लोके। अस्माकं चिन्तनपरम्परायां बादरायणव्यासयोरैक्यं ब्रह्मसूत्रे पञ्चाशदुत्तरपञ्चशातानां सूत्राणां सङ्कलनं विद्यते। भिक्षुसन्यासिभ्य उपादेयत्वादेतस्य भिक्षुसूत्राभिधानमपि दृश्यते। आचार्यपाणिनिना यस्य पराशरपुत्रस्य निर्देशोऽक्रियत स बादरायण[204] एव। ब्रह्मसूत्रस्य रचना काले किमपि वक्तुं न पार्यते यतोहि गीतायामुदध्रियत ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः[205] एतेन व्यज्ञायत यद्गीतायाः पूर्वतनीनां रचना विद्यते ब्रह्मसूत्रम्। महाभारतस्यैकदेशभूतवाद्गीतायाः, महाभारस्य कालः ख्रिष्टपूर्वपञ्चशताब्दी स्वीक्रियते, अतो ब्रह्मसूत्राणां कालो महाभारतात् पूर्ववर्ती स्यादेव। एतेन ख्रिष्टपूर्वपञ्चशाताब्द्याः पूर्ववर्ती एव। ब्रह्मसूत्रे भाष्याणि, टीकोपटीकाः संव्यधायिषत।

---

[203] तत्रैव, म०सं० २

[204] “पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः”। अष्टा० ४/३/१०३

[205] श्रीमद्भगवद्गीता, १३/४

**ब्रह्मसूत्रस्य प्रसिद्धभाष्यकाराः–**

| आचार्याः | भाष्याणि | वादाः | समयः |
|---|---|---|---|
| १. श्रीशङ्कराचार्यः | शाङ्करभाष्यम् | निर्विशेषाद्वैतवादः | (७८८-८२० ई०) |
| २. श्रीभास्कराचार्यः | भास्करभाष्यम् | भेदाभेदवादः | (१००० ई०) |
| ३. श्रीरामानुजाचार्यः | श्रीभाष्यम् | विशिष्टाद्वैतवादः | (११४० ई०) |
| ४. श्रीमध्वाचार्यः | पूर्णप्रज्ञभाष्यम् | द्वैतवादः | (१२३८ ई०) |
| ५. निम्बार्काचार्यः | सौरभभाष्यम् | वेदान्तपारिजातः | (१२५०ई०) |
| ६. श्रीकण्ठाचार्यः | शैवभाष्यम् | शैवविशिष्टाद्वैतवादः | (१२७० ई०) |
| ७. श्रीपतिः | श्रीकरभाष्यम् | वीरशैवविशिष्टाद्वैतवादः | (१४००ई०) |
| ८. श्रीवल्लभाचार्यः | अणुभाष्यम् | शुद्धाद्वैतवादः | (१४७९-१५४४ई०) |
| ९. विज्ञानभिक्षुः | विज्ञानामृतभाष्यम् | अविभागाद्वैतः | (१६०० ई.) |
| १०. श्रीबलदेवाचार्यः | गोविन्दभाष्यम् | अचिन्त्यभेदाभेदवादः | (१५२५ई.) |

एतेषामाचार्याणां प्रतिपादितभाष्येषु सूत्राणामधिकरणानां सङ्ख्याविषये प्रतिपादनायामपि भेदो वर्तते। स्व-स्ववादानुसारिणीं व्याख्यामेते स्व-स्वभाष्येषु कृतवन्तः। ब्रह्मसूत्रे चत्वारोऽध्यायाः सन्ति। प्रत्येकमध्याये चत्वारः पादा अपि सन्ति। समन्वयाविरोधसाधनफलाभिधायिष्वध्यायेष्वध्यात्मसम्बधिनां विषयाणां प्रतिपादनं विद्यते। ब्रह्मसूत्रस्याध्यात्मविषयकसिद्धान्तानां विषये यदि विचार्यते तदा ग्रन्थस्यादिमं सूत्रम्- "**अथातो ब्रह्मजिज्ञासा**"।[206] एवम्भूतेन सूत्रेण निसचीयत यद् ब्रह्मसूत्राणां प्रमुखविषयो ब्रह्मविचार एव, ततोऽपि सूत्राणामल्पाक्षरत्वम्, असन्दिग्धत्वम्, सारवत्त्वम्, विश्वतोमुखत्वम्, अस्तोभत्वम्, अनवद्यत्वम्,

[206] ब्रह्मसूत्रम्, १/१

विश्वतोमुखत्वञ्चास्ति। तस्मात् कारणादल्पाक्षरादिविशेषतावत्सु गभीरभावप्रतिपादकविषयाणां सन्निवेशत्वादर्थावबोधनं सारल्येनासम्भवि। अतो भाष्यविधातृभिराचार्यैः स्व-स्वमतानुसारिव्याख्यानि व्यविच्यन्त, सहैव च भाष्यस्थव्याख्यानानां श्रुत्यनुगामितां प्रापयितुं समैह्यन्त। महर्षिवशिष्ठो ब्रह्मणो विषये प्रतिपादयति यदात्मनः शरीरेण सह न कश्चिदपि सम्बन्धो विद्यते। तद्यथा-

**"नात्मा शरीरसम्बन्धो शरीरमपि नात्मनि।**

**मिथो विलक्षणावेतौ प्रकाशतमसी यथा"॥**[207]

तात्पर्यमिदं यद् ब्रह्मसूत्रानुसारं ब्रह्म देशकालाभ्यामनवच्छिन्नमनन्तं निःस्सीमं च विद्यते। सामान्यविशेषाभ्यां रहितं कूटस्थं नित्यमद्वितीयञ्चास्ति 'एकमेवाद्वितीयं ब्रह्म' निरपेक्षं स्वतन्त्रं निरुपाधि सज्जगतो मिथ्यात्वं वेदयते। उक्तं चाचार्यशङ्करेण **"ब्रह्मसत्यं जगन्मिथ्या"।**[208] ब्रह्मसूत्रशाङ्करभाष्ये प्रत्यपद्यत, तत्स्वरूपमित्थम्- **"इदं तु पारमार्थिकं कूटस्थं नित्यं व्योमवत् सर्वव्यापि सर्वक्रियारहितं नित्यतृप्तं स्वयं ज्योतिस्वभावम्"।**[209] ब्रह्मसूत्राणामध्ययनात् परं वयं निष्कर्षामो यद्बादरायणाचार्यात् पूर्वमपि विद्वद्भिर्वेदान्तत्वं समैक्ष्यत। किन्तु पूर्वतनीनामाचार्याणां काश्चन कृतय उपलब्धा न सन्ति। ततोऽपि केषाञ्चन पूर्ववर्तिनामाचार्याणां विषये विचारयामः–

**अद्वैतवेदान्तस्य केचनाचार्याः–**

महर्षिबादरायणेन ब्रह्मसूत्रस्य रचना कृता। कैश्चित् पूर्ववर्तिभिर्वेदान्तिभिर्वेदान्तशास्त्रस्य तत्त्वानां विवेचनं स्वशैल्या कृतम्। येषां चर्चा ब्रह्मसूत्रे विद्यते। आचार्यजैमिनिः पूर्वमीमांसासूत्राणि व्यरचयत्। यत्र वेदानां ब्राह्मणग्रन्थानां व्याख्यानं विद्यते। वैदिकसाहित्यस्योपनिषदां दर्शनमुत्तरमीमांसा अद्वैतवेदान्तदर्शननाम्ना वा व्यवह्रियत। बादरायणस्याद्वैतवेदान्तस्य मूलाधारत्वेन वेदब्राह्मणे

---

207 योगवार्तिकम्, ६/१/६६

208 प.द. टीका

209 ब्र०सू०, शां०भा०, १/४

स्तः। अत्र दर्शने वेदानामुपनिषदां सूक्ष्मभूतं यत् परं चिन्तनं तदेवात्र प्रास्तौत्। बादरायणाचार्यस्य पूर्ववर्तिनां नामग्राहं स्मृतवतां नामान्यत्र दीयन्ते–

**बादरिः–** वारचतुष्टयमाचार्यो बादरेर्नामोल्लेखः कृतो वर्तते। **"अनुस्मृतेः बादरिः"**[210] **"सुकृतदुष्कृते एवेति बादरिः",**[211] **"कार्यं बादरिरस्य गत्युपपत्तेः",**[212] **"अभावं बादरिराह ह्येवम्"।**[213] पूर्वमीमांसासूत्रेष्वपि वर्णनमस्त्यस्य। अतोऽनुमीयते यत् पूर्वोत्तर-मीमांसयोरस्य रचनाऽऽसीत्, किन्तु साम्प्रतं नोपलभते।

वैदिककर्मानुष्ठाने समाजस्य सर्वप्राणिभ्यः समोऽधिकार आसीदिति व्यवस्थायाः पोषक आसीत्। आचार्यजैमिनिरेतस्य मतं विश्लिष्य शूद्रान् बहिषकरोत्। बादरिरद्वैतवादमपोषयत्।

ईश्वरस्य सन्दर्भे व्याख्यत्। एतदीयं मतं यदीश्वरप्रदेशमात्रे एव विद्यते दृश्यजगति सत्त्वान्मनसः प्रदेशमात्रता, यतोहि मनसैवेश्वरो भज्यतेऽत ईश्वरस्य प्रदेशमात्रत्वम्।

छान्दोग्योपनिषदि "**य एनान् ब्रह्म गमयति**"[214] इत्यस्य व्याख्याने ब्रह्मशब्दः कार्यब्रह्मणो वाचकः। जैमिनिस्तु परब्रह्मत्वं सूचयति अत्रोचितं न प्रतिभाति यत् सर्वव्यापकं वर्तते तस्य गन्तव्यत्वं कथमिति।

ईश्वराभावापन्नस्य पुरुषस्य सङ्कल्पमात्रादेव पितृगणा उत्तिष्ठन्ते। मुक्तपुरुषाणां शरीरेन्द्रिययोः सत्ताविषये बादरिः सत्तां न स्वीकृतवान् तदैव मनसा कार्यावलोकनस्य वर्णनमत्र लभ्यते।[215]

**कार्ष्णाजिनः–** ब्रह्मसूत्रस्य 'रमणीयचरणा' इत्यत्रैतस्य विशिष्टं मतं विद्यते ब्रह्मसूत्रे[216] मीमांसा[217] सूत्रे चैतस्य वर्णनं विद्यते।

---

210 ब्र०सू०, १/२/३०

211 तत्रैव, ३/१/११

212 तत्रैव, ४/३/७

213 तत्रैव, ४/४/१०

214 छा०उ०, ४/१/५५

215 तत्रैव, ८/२/१

216 ब्र०सू०, ३/४/४४

217 मी०सू०, ४/३/१७

**आत्रेयः–** यज्ञेऽङ्गाश्रितोपासना यजमानर्त्विग्भ्यां सम्पद्यते, किन्तु प्रश्नो भवति उपासनायाः फलाधिकारी कः? तदुत्तरत्यात्रेयो यत् फलाधारी तु यजमान एव भवति- "**स्वामिनः फलश्रुतेरित्यात्रेयः**"।[218]

**आश्मरथ्यः–** अभिव्यक्तेरित्याश्मरथ्यः "**प्रतिज्ञासिद्धेर्लिङ्गमित्याश्मरथ्यः**"।[219] सर्वेश्वरो व्यापकानन्तः सन् प्रदेशमात्र एव उपलभ्यते, उपासकेभ्यः परमकृपालुः, ततोऽप्येतन्मते विज्ञानात्मपरमात्मनोर्भेदाभेदाख्यः सम्बन्धः।

**औडुलोमिः–** एतन्मते भेदाभेदयोः सत्यत्वं संसारचक्रेजीवब्रह्मणोः स्पष्टो भेदः प्रतिभाति, ततो मुक्तावस्थायामभेदस्य सत्यत्वं भेदाभेदयोर्व्याख्याताऽसौ।

**काशकृत्स्नः–** संसारे जीवरूपे परमात्मा एवावतिष्ठते जीवपरमेश्वरयोर्विकार-विकारिभावो न भवति- "**अवस्थितेरिति काशकृत्स्नः**"।[220]

**काश्यपः–** भेदवादस्य पोषकः, ब्रह्मसूत्रे तु काश्यपस्योल्लेखो न विद्यते। शाण्डिल्यभक्तिसूत्रे- "**तमैश्वर्यपरां काश्यपः परत्वात्**"[221] इत्यत्र वर्णितो भेदवादा-दयमाचार्यबादरायणस्याभेदवादाद्भिद्यत एव।

**जैमिनिः–** कर्ममीमांसकत्वेन प्रसिद्धो मीमांसासूत्राणां प्रणेता ब्रह्मसूत्रे एकादश-स्थलेषु संस्मृतः, बादरायणस्य शिष्य इत्यपि ख्यातः।

**शङ्करपूर्ववर्तिन आचार्याः–**

आचार्यबादरायणात् पूर्ववर्तिनामाचार्याणां वर्णनानन्तरं शङ्करा-चार्यात्पूर्ववर्तिनामाचार्याणां वर्णनं क्रियते- आचार्यबादरेरारभ्य प्रमुखाचार्यैरद्वैत-वेदान्तस्य तत्त्वानां चर्चा तु कृता, किन्तु व्यवस्थितसिद्धान्ताभाव एव। ततोऽद्वैतवेदान्तस्य व्यवस्थापयित्राऽऽचार्यद्वारा येषां वर्णनमक्रियत, ते चैवम्–

---

218 ब्र०सू०, ३/४/४४

219 ब्र०सू०, १/२/२९- १/४/२०

220 तत्रैव, १/४/२२

221 शा०भा०, सू० २९

**भर्तृप्रपञ्चः–** ज्ञानकर्मसमुच्चयवादिनो द्वैताद्वैतवादस्य स्थापकस्य 'औपनिषदम्मन्यः' इत्यभिधानेन शङ्कराचार्यो बृहदारण्यकभाष्ये परिहसनं करोति। भर्तृप्रपञ्चेन कठोपनिषद्बृहदार्ण्यकभाष्ययोर्व्याख्या कृता। सुरेश्वराचार्यानन्दगिरिभ्यामेतस्योपलब्धाः कृतयोऽचर्च्यन्त।

**भर्तृमित्रः–** वेदान्तविचारको विख्याताचार्यो भर्तृमित्र आसीत्। न्यायमञ्जर्यां यामुनाचार्यस्य सिद्धित्रय्यामेतस्योल्लेखः प्राप्यते।

**उपवर्षः–** उपवर्षाचार्यद्वारा ब्रह्मसूत्रे वृत्तिरेका व्यलिख्यत। एतस्या वर्णनं आचार्यशङ्करः शाङ्करभाष्ये[222] करोति। मीमांसासूत्रेऽपि वृत्तिञ्च लिलेख।

**ब्रह्मनन्दी, टङ्कः भारुचिश्च–** वैष्णवसम्प्रदायस्य ग्रन्थेषु एतेषां नामानि वेदान्ताचार्यत्वेनालाभिषत।

**द्राविडाचार्यः–** छान्दोग्योपनिषदि बृहद्भाष्यस्य कर्तुर्नाम माण्डूक्योपनिषद्भाष्ये शङ्कराचार्य आगमविद्रूपेण स्मरति।

**सुन्दरपाण्ड्यः–** आचार्यसुन्दरपाण्ड्य एकस्याः कारिकायुतवृत्ते रचनञ्चकार। शङ्कराचार्यो ब्रह्मसूत्रशाङ्करभाष्यस्य प्रथमाध्यायस्य प्रथमपादस्य चतुर्थसूत्रव्याख्याने एतद्वार्तिकग्रन्थात्त्रीन् श्लोकानुदध्रियत शैववेदान्त्यसाविति।

**गृहदेवकपर्दी–** यतीन्द्रमतदीपिकायामेतस्याचार्यस्योल्लेखः प्राप्यते।

**ब्रह्मदत्तः–** शङ्कराचार्यात्पूर्ववर्तिनोऽयं ब्रह्मसूत्रस्य भाष्यकारः। जीवस्यानित्यत्वं प्रतिपादयताऽनेन ब्रह्मणः सत्यत्वमसाधि। एतन्मते जीवजगती ब्रह्मणो भूत्वा ब्रह्मण्येव विलीयेते तथा चोपनिषदां सत्यता 'तत्त्वमसि' इत्यदिषु महावाक्येषु न प्रत्युत "**आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**"[223] इत्येवम्भूतेषु नियोगवाक्येषु विद्यते।

**आचार्यगौडपादः–**

आचार्यगौडपादस्य महत्त्वपूर्णं स्थानं विद्यते। शङ्कराचार्यस्य शिष्योपशिष्यपरम्परायामासीत्। शङ्कराचार्यस्य गुरोर्नाम गोविन्दपादाचार्य

---

222 ब्र०सू०, शा०भा०, ३/३/५३

223 भा०द०, पृ० ५२४

आसीत्, तद्गुरुश्च गौडपादाचार्यः। मयावादस्य प्रथमः प्रयोक्ता गौदपाद एव, उपनिषत्सु विद्यमानस्य ब्रह्मैकत्ववादस्याद्वैतवादे प्ररिवर्त्तनं कीर्तिस्तम्भ एव। माण्डूक्योपनिषदि गौडपादाचार्येण लिखिता कारिका आगमशास्त्रम् इति नाम्ना प्रसिद्धा। एष ग्रन्थोऽद्वैतवेदान्ते सम्प्राप्तः प्रथमो दार्शनिकग्रन्थः। कारिकोपनिबद्धेऽस्मिन् ग्रन्थे उपनिषदां सारभूतमद्वैततत्त्वमेव व्यश्लिष्यत्। गौडपपादकारिकासु जगतो वर्णनप्रसङ्गे कथ्यते यदिदं निखिलं विश्वतैजसप्राज्ञेष्वात्मनोऽनेकरूपाणि न प्रत्युताद्वैतस्यात्मनो विभिन्ना अभिव्यक्तयः। मननचिन्तननिदिध्यासनादीनामभ्यासे नष्टेऽज्ञाने स्वयमेवात्मबोधो जायत एव, अन्तश्चेतनाया जागरूकत्वे ज्ञानोदयः, ज्ञानोदये सति ज्ञानोदयविषयीभूतव्यक्तेर्दृष्टौ सम्पूर्णं जगन्मिथ्यायते द्वैतभावश्च विनश्यति. अजातिवादस्यैष सिद्धान्तः। षट्शताब्दीकोऽयमद्वैतवादस्य सिद्धान्तानां प्रतिपादक आगम-वैतथ्य-अद्वैत-अलातशान्तिप्रकरणेषु गौडपादकारिकया व्याख्याता च।

**योगवासिष्ठः–**

गौडपादकारिकाया अपि पूर्ववर्तिनी रचना योगवाशिष्ठमिति केचन विद्वांसो मन्यन्ते, किन्तु कैश्चिद्दार्शनिकैरयं गौडपादाचार्यात् परवर्तीति स्वीक्रियते। ग्रन्थेऽस्मिन्नपि कल्पनावादः, अजातिवादः, प्रत्ययवादः, इत्येवमादयः शब्दा गौडपादकारिकया शङ्कराचार्यस्य भाष्यकथनेन च साम्यमुपयायन्ति, किन्तु सम्प्रदायविशेषं न प्रत्यायति। मुनिवशिष्ठस्य मौलिकचिन्तनमत्र ग्रन्थे न्यबद्धि। बाह्यजगतोऽस्तित्वमस्वीकुर्वताऽनेन प्रत्ययवादस्यास्तित्वमभ्युपागतम्। सृष्टिरेव दृष्टिरित्येतस्य सिद्धान्तः। आचार्यशङ्करोऽस्य खण्डनं कृतवान्। सप्तशातब्दीकोऽयमङ्गयक्रियत। योगवाशिष्ठस्य दार्शनिकाः सिद्धान्ता एवम्प्रकारेण जगद् व्याख्यान्ति-

**"कास्तादृशो यासु न सन्ति दोषाः कास्ता दिशो यासु न दुःखदाहः।**

**कास्ताः प्रजा यासु न भङ्गुरत्वं कास्ताः क्रिया यासु न नाम माया"॥** [224]

अर्थात् सम्पूर्णं जगदेव अनित्यासारक्षणभङ्गुरमायादियुतमिति। मानवोपभोगविषयीभूता जागतिकाः पदार्था महारोगायन्ते बुद्बुदायन्ते च। "**भोगभवमहारोगास्तृष्णाश्च मृगतृष्णिकाः"।**[225] महर्षिवशिष्ठस्य दर्शनं याथार्थ्यं विवेकपरत्वं च बोधयदात्मैवात्मनः परं मित्रमिति प्रबोधयति। यद्यात्मनाऽऽत्मनो रक्षणं न क्रियते तदा त्वन्योपाय एव नास्ति। आत्मज्ञानेन परां शान्तिमधिगच्छति। तस्माज्जागतिकैर्जनैरात्मज्ञानाय चेष्टावद्भिर्भाव्येरन्-

**"आत्मैवात्मनो बन्धुरात्मैव रिपुरात्मनः।**

**आत्मात्मना न चेत्यातस्तदुपायोऽस्ति नेतरः"॥** [226]

संसारस्य दुःखनिवृत्तिर्ज्ञानेन सम्भवति सर्वाः प्रमदास्तथा च सम्पदो जलतरङ्गवदेव क्षणभङ्गुराः।[227] एतस्माद्धेतोरेव ज्ञानरूपिण्या नावा द्वारैव मायामूलकञ्जगतो मिथ्यात्वमवगच्छतो मोक्षं प्रति प्रयान्तु-

**"ज्ञानयुक्तिप्लवेनैव संसाराब्धिसुदुस्तरम्।**

**महाधियः समुत्तीर्णा निमेषेण रघूद्वहः"॥** [228]

इति महर्षिस्समुज्जुघोष।

**आचार्यशङ्करः–**

अनुपमप्रतिभासम्पन्नो यथार्थसत्ताविशेषज्ञोऽद्वैतवादस्य इह जगति सम्यग्रूपेण व्यवस्थापयिताविद्यामूलस्य संसारस्य नाशयिता भगवदवतारभूतो

---

[224] यो०वा०, १/२७/३०

[225] तत्रैव, १/२६/१०

[226] तत्रैव, १/२६/१०

[227] "सम्पदः प्रमदाश्चैव तरङ्गोत्सङ्गभङ्गुराः"। तत्रैव, ६०२/९३/७८

[228] तत्रैव, २/११/३६

महापुरुषः शङ्कराचार्यः प्रादुरभूत्। पृथिव्यां जायमानेभ्यश्चराचरेभ्यः स्थावरजङ्गमेभ्योऽज्ञानावृतबुद्धयो मोक्षं प्रापयितुकामेनानेन महापुरुषेण वेदविहितनैखिलिकैकत्वादिबोधकाः सिद्धान्ताः समाहृत्य समाहृत्य स्वकृतिषु व्यभाव्यन्त। आचार्यशङ्करस्य जन्म मालाबारक्षेत्रस्य केरलप्रान्तस्य 'कालडी' इत्यभिधे ग्रामे वास्तव्यस्य साधुस्वभावस्य समाहितचित्तस्य शिवकुलदेवतावतश्श्रमशीलवतो ब्राह्मणस्य नम्बुद्रेः सदने बभूव। शाङ्करदिग्विजयानुसारमेतस्य पिता शिवगुरुर्माता विशिष्टादेवी। भगवतश्शिवस्योपासनाफलभूतत्वादेवास्य नाम शङ्कर इत्यक्रियत। शैशवे गौडपादशिष्यत्वेन लब्धख्यातिकस्य गोविन्दपादद्वारा सञ्चाल्यमानायां पाठशालायां प्रविशताऽनेन ज्ञानमवापि। बाल्यादेवास्य मनसि निखिलब्रह्माण्डस्य प्रतीयमानत्वम्, जितेन्दियत्वम्, असक्तत्वम्, यथार्थसत्यान्वेषित्वभावत्व-मित्यादयो गुणा आसन्। स्वकीयेषु ग्रन्थेषु गोविन्दपादाचार्यं गुरुरूपेण स्वीकृत्य तं प्रति श्रद्धां प्राकटत्।[229]

**आचार्यशङ्करस्य रचना–**

आचार्यशङ्करेण कृतानां रचानां विषयेऽद्यापि सुनिश्चितिर्न विद्यते यत्तेन द्वित्रिंशद्वर्षात्मकेऽल्पीयसि काले किं किं व्यरचि ततोऽपि यावच्छक्यं समुपलब्धैतिह्यप्रमाणैर्विचार्यन्ते– ब्रह्मसूत्रे शाङ्करभाष्यस्य रचना तस्यानुपमाकृतिर्विद्यते। अत्र नास्ति संशयलेशः। आचार्यस्य रचना त्रिधा विभाजयितुं शक्यन्ते भाष्येषु, स्तोत्रेषु, प्रकीर्णेषु, अत्र क्रमशास्तासां कृतीनां वर्णनाप्रसङ्गे तत्रादावुपनिषद्भाष्याणां वर्णनम्, ताश्चोपनिषदः-

ईशोपनिषद्, केनोपनिषद्, कठोपनिषद्, प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डूक्योपनिषद्, तैत्तिरीयोपनिषद्, ऐतरेयोपनिषद्, छान्दोग्योपनिषद्, बृहदारण्यकोपनिषद्, श्वेताश्वतरोपनिषद्, इत्येतासूपनिषत्सु प्रामाणिकं

---

229 "यस्तं पूज्याभिपूज्यं परमगुरुरमुं पादपातैर्मतोऽस्मि", मा० का० भा०, "वेदान्तसम्प्रदायविद्भिराचार्यैः", शा०भा०, २/१/९, "तथा एवं गौडैर्द्राविडैर्नः पूज्यैरर्थैः प्रभाषितः", नै०सि०, ४/४४, "तथा सम्प्रदायविदो वदन्ति", शा०भा०, १/४/१४

भाष्यमाचार्येण व्यरचि। अथर्वशाखोपनिषदि, अथर्वशिरस्युपनिषद्यपि, नृसिंहतापनीयोपनिषदि च भाष्यं लभ्यते। गीतायामपि भाष्यं विष्णुसहस्रनाम्न्यपि भाष्यञ्चाकरोत्। आचार्यशङ्करो विश्वस्य दार्शनिकेषु श्रेष्ठतमो दार्शनिक इत्यालोचनाकर्तृभिर्व्यचार्यत।

**स्तोत्रसाहित्यम्–** विवेकचूडामणिः, दक्षिणामूर्तिस्तोत्रम्, हरिमीडेस्तोत्रम्, शिवशक्तिस्तवनम्, आनन्दलहरी, सौन्दर्यलहरी च।

**अन्यरचनाः–** आप्तवज्रसूची, आत्मबोधः, तत्त्वोपदेशः, महामुद्गरः, दशश्लोकी, अपरोक्षानुभूतिः, सनत्सुजातीयभाष्यञ्च

आचार्यशङ्करस्य प्रस्थानत्रय्या भाष्यमत्यन्तं प्रसिद्धम्। सद्दार्शनिकजगतः सम्यक्प्रकारेण नेतृत्वमावहति, ततः परवर्तिनि काले भारतभूमौ बहुभिराचार्यैराचार्यशङ्करस्यानुकरणं विधाय भाष्याणि प्रस्थानत्रय्यां संव्यधीयन्त यद्वशाद्बहूनां भाष्याणां तथा च सम्प्रदायानां तथा च दार्शनिकसाहित्यस्य समृद्धिरभवत्। आचार्यशङ्करस्य विषये एका लोकश्रुतिर्विद्यते-

**"अष्टवर्षे चतुर्वेदा द्वादशे सर्वशास्त्रवित्।**

**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्"॥** [230]

श्वेताश्वतरोपनिषदि व्याख्यात्याचार्यो यज्जीवनस्य सार्थक्यं कथमुपेयते तथा च कथम्भूतेनोपायेनऽऽत्मावबोधः स्यात्-

**"धर्मरज्ज्वा व्रजेदूर्ध्वं पापरज्ज्वा व्रजेदधः।**

**धर्मज्ञानासिना छित्वा विदेहं शान्तिमृच्छति"॥**[231]

---

[230] भा०द०, पृ० ५३४

[231] श्वेता०उ०भा०, १/१

तात्पर्यमिदं यद् धर्मरूपरज्जुद्वारा बन्धितः पुरुषोऽपरलोकगामी भवति। तथैवाधर्मरूपरज्जुद्वारा बन्धितः पुरुषोऽधोलोकगामी भवति, किन्तु धर्माधर्मरूपिरज्जुबन्धनस्योच्छेदनं ज्ञानात्मरूपासिद्वारा यदि क्रियते, तदा तु पुरुषः परां शान्तिमधिगच्छन् सक्षादवबोधपुरस्सरं मोक्षपदभाग्भवति। आचार्यशङ्करस्य सृष्टिविषयकचिन्तनं सर्वं ब्रह्मैव ब्रह्मातिरिक्तसत्तैव नास्ति जगति तद्यथा–

**"ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते।**

**अखण्डानन्दबोधाय पूर्णाय परमात्मने"॥**[232]

पुनश्चाचार्यशङ्करस्य मते स्थावरजङ्गमस्याधारभूतः संसारः, एतस्य संसारस्य निमित्तमुपादानञ्च कारणं ब्रह्मैव। वेदान्तसारे आचार्यस्य मतमेव प्रत्यपादि। यदेतस्य जगतोऽभिन्ननिमित्तोपादानकारणं ब्रह्म, लूता तन्तुन्यायेन। किन्तु वेदान्तस्य मते निखिलस्य जगत उपादानकारणं ब्रह्म न प्रत्युत मायैव इति प्रतिपाद्यति- **"प्रपञ्चस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धान्तः"।**[233] एतस्मिन् वाचस्पतिमिश्रस्य व्याख्यानं वर्तते यज्जगत उपादानकारणं ब्रह्मैव, मायायाश्च सहायिकात्वम्। "**वाचस्पतिमिश्रास्तु जीवाश्रितमायाविषयिकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानमिति माया सत्कारिमात्रम्"।**[234] आचार्यशङ्करो मायाया अनिर्वचनीयतां प्रत्यपद्यत विवेकचूडामणौ।[235] आचार्यशङ्करस्य ग्रन्थेषु माया-अविद्या-अज्ञान-अध्यास-भ्रमप्रभृतयः शब्दाः समानार्थे प्रायुज्यन्त। माया ब्रह्मणः शक्ति, मायाब्रह्मवद् याथार्थ्यं न प्रयाति शशविषाणवदयाथार्थ्यं नोपयाति परमेश्वरस्य बीजरूपा

---

[232] भा०द०, पृ० ५४८

[233] तत्रैव, पृ० ५४९

[234] सिद्धा०ले०, पृ० १

[235] "सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गापनङ्गापुभयात्मिका नो महदभुतानिर्वचनीयरूपा"॥ विवे०चू०, १११

शक्तिः माया परमेश्वराश्रिता सुप्तरूपिणी च। यस्यां चानवगतात्मानो जीवाः समटन्ति।[236] एवं प्रकारेण मायाया बहुधा वेदान्तग्रन्थेषु स्वरूपं न्यगद्यत।

उपरितनविवेचितमायायाः शक्तिद्वयं विद्येते आवरणविक्षेपनामके। आवरणशक्तिरेकं वैचित्र्यमुपस्थापयति सांसारिकेषु। आत्मनः शुद्धं सच्चिदानन्दमयत्वं स्वस्वरूपे आवृत्य प्राणिनो भ्रामयति सुबोधिनीकारः कथयति– **"सच्चिदानन्दस्य स्वरूपमावृणोतीत्यावरणशक्तिः"।**[237] मायाया आवरणशक्तिं विना मायिनोऽर्थात् परमात्मनोऽपि निष्क्रियता स्यादेव हस्तामलकस्तोत्रे सुन्दरं वर्णनमावरणशक्तेः।[238] अपरा च विक्षेपशक्तिर्यया च विधीयते मिथ्यात्वभावना। कस्यचिद्वस्तुनो यथार्थस्वरूपे कस्यचिदन्यवस्तुनोऽथार्थस्वरूपारोप एव विक्षेपः। कार्यमेतस्या निश्चयपूर्वकं भ्रमोत्पादनम्। यथा अज्ञानावृत्तायां रज्जावज्ञानं यथा सर्पभावनां जनयति तथैव माया स्वावृतात्मनि विक्षेपशक्त्या आकाशादिकं जागतिकञ्च प्रपञ्चमुद्भावयति, सुबोधिन्यामगद्यत[239] वेदान्तसारे वर्णनं विद्यते।[240] वेदान्तदर्शनस्य लक्ष्यं परमार्थस्य प्रबोधनमेव, तच्च काथञ्चिकं स्यादिति गौडपादकारिकायां व्याख्यातं विद्यते। अत्र दर्शने न तूत्पत्तिर्भवति न च विनाशः, न बद्धो न च साधको न च मुमुक्षुर्न च मुक्तिरेवम्भूता परमार्थता सर्वत्र व्याख्याताऽजातिवादसिद्धान्ते।[241]

आचार्यशङ्करो वैदिकवर्णाश्रमधर्मस्य प्रचाराय प्रसाराय च भारतवर्षस्य चतुर्दिक्षु चतुर्ण्णां मठानां स्थापनाञ्चकार। उत्तरदिशि बद्रिकाश्रमे ज्योतिषपीठम्, दक्षिणदिशि रामेश्वरक्षेत्रे शृङ्गेरीपीठम्, पूर्वदिशि पुरुषोत्तमक्षेत्रे गोवर्धनपीठम्,

---

236 "अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मयामयी महासुप्तिः स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः"। शा०भा०, १/४/३

237

238 "घनच्छन्नदिष्टं घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोहमात्मा। हस्ता०स्तो०, १०

239 "ब्रह्मादिस्थावरान्तं जगत् जलबुद्बुद्वत् नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिः"। वे०सा०, सुबोधिनीटीका

240 "शक्तिद्वयं हि मायायाः विक्षेपावृत्तिपूर्वम्। विक्षेपशक्तिः लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत्"॥ वे०सा०,

241 "न विरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्तः इत्येष परमार्थता"॥ गौ०का०, २०३२

पश्चिमदिशि द्वारिका धाम्नि शारदापीठम्, एतेषु पीठष्वध्यक्षपदेष्वभिषिक्ताः आचार्याः शङ्कराचार्यस्य प्रतिनिधिभूताः सन्तः शङ्कराचार्याभिधायिनो भवन्ति।

आचार्याच्छङ्करात् परवर्तिनामाचार्याणां महदवदानं विद्यते यैराचार्यैरेषा परम्परा पुष्पायिता पल्लवायिता च, समकालिकेषु परवर्तिषु मण्डनमिश्रो विद्यते। आचार्यशङ्करस्य शिष्यप्रशिष्यपरम्परायां बहव आचार्या अभवन् तेषु - सुरेश्वराचार्यः, पद्मपादाचार्यः, वाचस्पतिमिश्रः, सर्वज्ञातमुनिः, विमुक्तात्मा, प्रकाशात्मयतिः, श्रीहर्षः, आनन्दबोधः, चित्सुखाचार्यः, अमलानन्दः, विद्यारण्यस्वामी, प्रकाशात्मयतिः, मधुसूदनसररस्वती, ब्रह्मानन्दसरस्वती, नृसिंहाश्रमसरस्वती, अप्पयदीक्षितः, धर्मराजाध्वरीन्द्रः, सदान्दादयस्सन्ति।

समयानुगुणं समेषां दार्शनिकानां विभाजनमत्र क्रियते–

**सुरेश्वराचार्यः (८००)–**

सन्न्यासाश्रमात् पूर्ववर्ती मण्डनमिश्र एव परवर्तिनि काले सुरेश्वराचार्य इत्यभवत्, सन्यासाश्रमात् पूर्वं मण्डनमिश्र आपस्तम्बीयमण्डनकारिका, भावनाविवेकः, काशीमोक्षनय इत्येतेषां ग्रन्थानां रचनामकरोत्। सन्न्यासात् परं तैत्तिरीयश्रुतिवार्तिकम् नैष्कर्म्यसिद्धिः, इष्टसिद्धिः (स्वराज्यसिद्धिः), पञ्चीकरणवार्तिकम्, बृहदारण्यकोपनिषद्वार्तिकम्, ब्रह्मसिद्धिः, ब्रह्मसूत्रशाङ्करभाष्यवार्तिकम्, विधिवेवेकः, मानोल्लासः, लघुवार्तिकं वार्तिकसारः, वार्त्तिकसारसङ्ग्रहश्चेत्येतेषां ग्रन्थानां रचनां कृतवान्। आचार्यसुरेश्वरस्य दार्शनिकः प्रमुखः सिद्धान्त आभासवाद आसीत्।

**पद्मपादाचार्यः** (८२०)–

आचार्यपद्मपादः शङ्कराचार्यस्य प्रथमो मुख्यः शिष्य आसीत्। एतस्य जन्म दक्षिणे चोलप्रदेशेऽभवत्। शङ्कराचार्यादेवाधिगतवेदान्तः, आचार्यस्य कृतिः

पञ्चपादिका, पञ्चपादिकायां चतुष्सूत्रीशाङ्करभाष्यस्य व्याख्या विद्यते। पञ्चपादिकायां प्रकाशात्ममुनेर्विवरणटीका, विवरणे च अखण्डानन्दस्य तत्त्वदीपनटीका विद्यते। अन्याः कृतयः- आत्मनामविवेकः, प्रपञ्चसारः, सुरेश्वराचार्यकृतलघुवार्तिकटीका, अद्वैतवेदान्तसम्प्रदाये नूतनां दृष्टिं विवृतवान्, पद्मपादप्रकाशात्मयतिभ्यां प्रदत्तं दार्शनिकचिन्तनं विवरणप्रस्थाननाम्ना लभ्यते।

**वाचस्पतिमिश्रः** (८४०)–

ब्रह्मसूत्रशाङ्करभाष्यस्य भामतीटीका, ब्रह्मसिद्धौ ब्रह्मतत्त्वसमीक्षा, साङ्ख्यकारिकायां साङ्ख्यतत्त्वकौमुदी, पातञ्जलदर्शने तत्त्ववैशारदी, न्यायदर्शने न्यायवार्तिकतात्पर्यम्, पूर्वमीमांसादर्शने न्यायमूचो निबन्धः, भाट्टमते तत्त्वबिन्दुः, विधिविवेके न्यायकारिकाटीका, खण्डनकुठारः, स्मृतिसङ्ग्रहः, किन्त्वेतयोः विषये संशीतिरधुनाऽपि विद्यते। एष आचार्यः सुरेश्वराचार्यस्याभासवादात् तथा च पद्मपादप्रकाशात्मयत्योर्विवरणादन्यं नूतनमवच्छेदवादमाविषकरोत्।

**सर्वज्ञातमुनिः** (९००)–

सर्वज्ञातमुनिर्नित्यबोधाचार्यापरनामकः शृङ्गेरीमठाध्यक्ष आसीत्, सर्वज्ञातमुनेर्गुरुर्देवेश्वराचार्य आसीत्। एतस्य कृतिः सङ्क्षेपशारीरकं विद्यते। अधिष्ठानवादस्य व्याख्याताऽसावाचार्यः।

**अद्वैतानन्दबोधेन्द्रः** (११४९)–

एष काञ्चीमठस्य पीठाधीश आसीत् भूमानन्दसरस्वतेरथवा चन्द्रशेखरेन्द्र-सरस्वतेः शिष्यो वेदान्तशास्त्रस्याध्ययनञ्च रामानन्दसरस्वतेः कृतवान्। एतस्य रचना ब्रह्मविद्याभरणम्, शान्तिविवरणम्, गुरुप्रदीपः।

**आनन्दबोधभट्टारकाचार्यः** (१२ शताब्दी)–

एतस्य ग्रन्थस्य त्रयो ग्रन्थाः सन्ति- न्यायमकरन्दः, प्रमाणमाला, न्यायदीपावली, सङ्ग्रहात्मकग्रन्थः न्यायमकरन्दश्च।

**प्रकाशात्मयतिः (**द्वादशशताब्दी)–

विवरणटीकाया महत्त्वपूर्णं स्थानं विद्यते, यतोहि एतन्नाम्नैव पृथक् प्रस्थानं प्राचलत्।

**विमुक्तात्मा** (१२००)–

विमुक्तात्मना स्वकीये इष्टसिद्ध्यभिधे ग्रन्थेऽज्ञानादिप्रमुखविषयाणाम् आलोचना समक्रियत तथा च कठिनविषयाणां वैज्ञानिकविश्लेषणं कृतवान्।

**आचार्यचित्सुखः (**१२२०)–

चित्सुखाचार्यस्य काले प्रसिद्धनैयायिको गङ्गेशो न्यायदर्शनस्य प्रचारे लीन आसीत्, वैष्णावाचार्याश्चाद्वैतवेदान्तस्य खण्डनं कुर्वाणा आसन्। एवम्भूते समये आचार्यो नैयायिकादिमतं खण्डयताद्वैतमतं संस्थापयामास। आचार्यस्य कृतयः- तत्त्वप्रदीपिका, न्यायमकरन्दटीका, खण्डनखण्डखाद्यटीका च। तत्त्वप्रदीपिकैव चित्सुखीति कथ्यते।

**अमलानन्दः** (१३ शताब्दी)–

अनुभवानन्दस्य शिष्योऽमलानन्द आसीत्। अद्वैतवेदान्तस्य प्रचारकः आसीत्, वेदान्तकल्पतरुर्भामतीटीकायाम्, शास्त्रदर्पणः, पञ्चपादिकादर्पणश्चेत्यादयः।

**विद्यारण्यः** (१३५०)–

विद्यारण्यस्य पूर्वाश्रमस्य नाम माधवाचार्य आसीत्। केचन द्वितीयं नाम 'भारतीतीर्थ' इत्यपि मन्वते।[242] डॉ.वीरमणिउपाध्यायाः भारतीतीर्थमेव'पञ्चदशी' इत्यस्य लेखकं स्वीकरोति।[243] किन्तु स्वयमेव माधवाचार्यः (विद्यारण्यः) स्वकीये ग्रन्थे जैमिनीयन्यायमालायाष्टीकाया विस्तरे भारतीतीर्थमेव स्वगुरुत्वेन

---

[242] कल्याणवेदाङ्कः, पृ० ६५२, उद्धृतम्, अद्वैतवेदान्त : इतिहास तथा सिद्धान्त, पृ० १७७

[243] Lights of Vedanta, p. 111, 116, तत्रैव

स्वीकरोति। अतो भारतीतीर्थविद्यारण्ययोः भिन्नत्वमेव सम्यक् प्रतिभाति।[244] विद्यारणयस्वामिना षोडशसङ्ख्याकाः ग्रन्था व्यरच्यन्त। तेषु पञ्चदशी ग्रन्थोऽत्यन्तं प्रसिद्धः। अद्वैतवेदान्ते प्रचलितेष्वाभासवाद-प्रतिबिम्बवाद-अवच्छेदवादेषु प्रतिविम्बवादस्य आनुयायी, मायाप्रतिबिम्बितश्चेतन ईश्वरः, अविद्याप्रतिबिम्बित ईश्वरो जीवः। मायाऽविद्ययोरपि भेदं प्रभेदयति- शुद्धसत्त्वमयी माया, मलिनसत्त्वमयी अविद्या,[245] इत्येवोभयोर्भेदः।

**प्रकाशानन्दः** (१५५०-१६००)–

प्रकाशानन्दो वेदान्तसिद्धान्तमुक्तावल्यां अद्वैतवेदान्तस्य अज्ञानादिसिद्धान्तानां वैज्ञानिकं मौलिकं च विवेचनं प्रास्तौत्। अधिष्ठानवादस्य अनुगामी विद्यते। 'वेदान्तसिद्धान्तमुक्तावली।

**मधुसूदनसरस्वती** (१६००)–

आचार्यशङ्करस्य परवर्तिष्वद्वैतवेदान्तिषु मधुसूदनसरस्वत्या महत्तमं स्थानं विद्यते। एतेनाचार्येण अद्वैतवेदान्तस्य सूक्ष्मं व्यवस्थितं च विश्लेषणं व्यधीयत। कृतयः- अद्वैतसिद्धिः, अद्वैतरक्षणम्, वेदान्तकल्पलतिका, गूढार्थदीपिका, प्रस्थानभेदः, सिद्धान्तबिन्दुः, सङ्क्षेपशारीरकव्याख्या।

**ब्रह्मानन्दसरस्वती** (१७ शताब्दी)–

अद्वैतसिद्धौ ब्रह्मानन्दस्य लघुचन्द्रिका टीका विद्यते, य च ब्रह्मानन्दीति नाम्ना ख्यायते लोके। सिद्धान्तबिन्दौ न्यायरत्नावली तथा च सूत्ररत्नावली इति निबन्धग्रन्थयोः रचना कृता।

**धर्मराजाध्वरीन्द्रः** (१७ शताब्दी)–

---

244 कल्याणवेदाङ्कः, पृ० ६५२

245 पञ्चदशी, १/१६

वेदान्तपरिभाषाया लेखको धर्मराजाध्वरीन्द्रोऽद्वैतवेदान्तस्य चिन्तकेषु प्रथमो यथा वेदान्तपरिभाषायामुक्तं यद्भेदधिक्कारस्य लेखको नृसिंहाश्रम एतस्य गुरुरासीत्।[246] "वेदान्तपरिभाषा" विद्यते रचनाऽस्य। अन्येऽप्याचार्याः सन्ति यैरद्वैतवेदान्तदर्शने स्वकीयानि जीवनान्यदायिषत। एतेषु नामग्राहमुल्लिख्यन्ते–

**गङ्गापुरीभट्टारकाचार्यः** (दशमैकादशशताब्दी)– पदार्थतत्त्वविवरणम्।

**श्रीकृष्णमिश्रयतिः** (११ शताब्दी)– प्रबोधचन्दोदयः, अनेनाद्वैतस्य प्रचारः कृतः।

**श्रीहर्षमिश्रः** (१२ शताब्दी)– दार्शनिकः कविश्च महानसौ, खण्डनखण्डखाद्यम्। अत्र विरोधिनो मतं निराकुर्वन्नद्वैतवादं प्रत्यपद्यत।

**रामाद्वयाचार्यः** (१३ शताब्दी)– 'वेदान्तकौमुदी' इत्यस्य ग्रन्थस्य रचनां कृतवान्।

**शङ्करानन्दः** (१४ शताब्दी)– विद्यारण्यस्य शिक्षागुरुर्ब्रह्मसूत्रस्यटीकां ब्रह्मसूत्रदीपिकां रचिवान्, तथा चाष्टशतोत्तरशतमुपनिषदां टीकां लिखित्वाद्वैतवेदान्तस्य संस्थापनां कृतवान्, तथैव आत्मपुराणम्, इति कृतवान् अत्र श्रुतियोगसाधनादिरहस्यानि समुद्घाटितवान्।

**आनन्दगिरिः** (१५ शताब्दी)– आनन्दज्ञानापरनामकोऽयमानन्दगिरिर्वेदान्तसूत्र-भाष्ये न्यायनिर्णय इत्यभिधां टीकामटीकत। तथा च 'शङ्करदिग्विजयः' इति ग्रन्थे शङ्कराचार्यस्य जीवनवृत्तान्तं दार्शनिकसिद्धान्तान् चाववर्णत।

**अखण्डानन्दः** (१६ शताब्दी)– अखण्डानुभूतेः शिष्यः पञ्चपादिकाविवरणे 'तत्त्वदीपनम्' इति नामिकां टीकामकरोत्। भामत्यामृजुप्रकाशिका नाम्नीं टीकां कृतवान्।

**मल्लनाराध्यः** (१६ शताब्दी)– अद्वैतरत्नम्, अभेदरत्नम् चेत्येतयोः प्रकरणग्रन्थयो-रद्वैततत्त्वानि प्रत्यपद्यत, पुनरद्वैतरत्नस्य तत्त्वदीपनटीकां कृतवान्।

---

246 "यदन्तेवासिपञ्चास्पैर्निरस्ताभेदिवारणाः। तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम्"॥ वेदा०परि०, श्लो० २

**नृसिंहाश्रमः**(१६ शताब्दी)– महान् दार्शनिकोऽनेन  विवरणस्य भावप्रकाशिका टीका, तत्त्वविवेकः, अद्वैतदीपिका वैदिकसिद्धान्तसङ्ग्रहः तत्त्वबोधिनी च।

**नारायणाश्रमः** (१६ शताब्दी)– नृसिंहाश्रमस्य शिष्यः, भेदधिक्काराद्वैतदीपिकयोः भेदधिक्कारसत्क्रिया नाम्नीं टीकां कृतवान्।

**रगराजाध्वरी** (१६ शताब्दी)– प्रसिद्धस्य विदुषोऽप्पयदीक्षितस्य पिता न्यायवैशेषिकसाङ्ख्ययोः खण्डनं कृतवान्, अद्वैतविद्यामुकुरो विवरणदर्पणश्च कृती वर्तेते।

**अप्पयदीक्षितः** (१५५०-१६२२)– अयमाचार्यो नैकशास्त्राणां व्याख्याता सन् चतुरधिकशतं ग्रन्थानरचयत्। वेदान्तग्रन्थेषु न्यायरक्षामणिः, सिद्धान्तलेशः, मतसारार्थसङ्ग्रहः, न्यायमञ्जरी च प्रमुखाः।

**भट्टोजिदीक्षितः** (१६ शताब्दी)– सुप्रसिद्धो वैयाकरणस्सन्नद्वैतवेदान्तज्ञोऽपि आसीत्। तत्त्वकौस्तुभस्य वेदान्ततत्त्वविवेकस्य च रचनां कृतवान्।

**सदाशिवब्रह्मेन्द्रः** (१६ शताब्दी)– अद्वैतविद्याविलासः, बोधार्थात्मनिर्वेदः, गुरुरत्नमालिका, ब्रह्मकीर्तनतरङ्गिणी, प्रतिपाद्यता चाद्वैतवेदान्तस्य।

**नीलकण्ठसूरिः** (१६ शताब्दी)– एतेन महाभारतभावदीपटीकायाः रचना महाभारते कृतम्।

**सदानन्दयोगीन्द्रसरस्वती** (१६ शताब्दी)– वेदान्तसारस्यायं लेखकः। अस्य प्रकरणग्रन्थस्य पठनेन वेदान्तदर्शने प्रवेशो भवति। शङ्करदिग्विजयस्य कर्तृत्वेनाप्यस्य वर्णनं प्राप्यते।

**आनन्दपूर्णविद्यासागरः** (१६ शताब्दी)– खण्डनखण्डखाद्ये 'न्यायचन्द्रिका' इति टीकामकरोत्।

**नृसिंहसरस्वती** (१६ शताब्दी)– वेदान्तसारस्य 'सुबोधिनी' टीकायाः कर्ता।

**रामतीर्थः** (१७ शताब्दी पूर्वार्धः)– सङ्क्षेपशारीरकेऽन्वयार्थप्रकाशिका, उपदेश-साहस्र्यां पदनियोजनिका, वेदान्तसारे विद्वन्मनोरञ्जिनी च। तिसृषु टीकास्वद्वैतं प्रत्यपद्यत।

**आपदेवः** (१७ शताब्दी, पूर्वार्धः)– वेदान्तसारस्य बालबोधिन्याः कर्ता।

**गोविन्दानन्दः** (१७ शताब्दी)– ब्रह्मसूत्रशाङ्करभाष्यस्य रत्नप्रभा इति टीकां कृतवान्।

**रामानन्दसरस्वती** (१७ शताब्दी)– ब्रह्मसूत्रशाङ्करभाष्ये ब्रह्मामृतवर्षिणी टीका।

**काश्मीरकसदानन्दयतिः** (१७ शताब्दी)– अद्वैतब्रह्मसिद्धिनामकस्य ग्रन्थस्य प्रणयनं कृतवान्।

**रंगनाथः** (१७ शताब्दी)– ब्रह्मसूत्रस्य शाङ्करभाष्यानुसारिणीवृत्तिरित्यलिखत्। 'प्रकरणत्वात्' इति नूतनं सूत्रमकल्पयत्।

**अच्युतकृष्णानन्दतीर्थः** (१७ शताब्दी)– सिद्धान्तलेशस्योपरि टीकां 'कृष्णालकार' इति कृतवान्। तैत्तिरीयोपनिषदि शाङ्करभाष्ये 'वनमात्रा' टीकां कृतवान्।

**महादेवसरस्वती** (१८ शताब्दी)– 'तत्त्वानुसन्धानम्' विरच्य तत्र 'अद्वैतचिन्ता-कौस्तुभः' इति टीकामपि कृतवान्।

**सदाशिवेन्द्रसरस्वती** (१८ शताब्दी)– ब्रह्मसूत्रे 'ब्रह्मतत्त्वप्रकाशिका' इति टीकां कृतवान्। आत्मविद्याविलासः, कविताकल्पवल्ली, अद्वैतमञ्जरी च।

**आयन्नदीक्षितः** (१८ शताब्दी)– व्यासतात्पर्यनिर्णयः।

एकोनविंशतिशताब्द्यां प्रख्याता वेदान्तिनो रामकृष्णपरमहंसः, स्वामी विवेकानन्दः, अरविन्दघोषः, विनिबाभावे चेत्यादय आसन्। एभिरद्वैतवेदान्तस्य पारम्परिकं स्वरूपं हित्वा व्यावहारिकं नूतनञ्च स्वरूपं दत्तवन्तः। इत्येवं प्रकारेणाध्यायेऽस्मिन् व्याकरणाद्वैतवेदान्तयोर्वेदमूलकत्वं व्याख्याय सर्वाऽपि परम्परा व्याख्यायि शोधार्थिना।

## ॥ द्वितीयोऽध्यायः ॥

## ॥ व्याकरणाद्वैतवेदान्तयोः शब्दस्वरूपविमर्शः ॥

भारतीयदर्शने शब्दस्य महत्तमा सत्ता स्वीकृता विद्वद्भिः। शब्दमूलक एव सांसारिकानां संसारव्यवहारो यतः शब्देनैव मानवस्य प्रवृत्तिनिवृत्ती भवतः। यदि शब्दा न स्युस्तदात्वे तु निखिलसंसारस्यान्धकारमयत्वरूप-व्यवहारः स्याद्। अतएव व्याकरणदर्शने दार्शनिकैः शब्दतत्त्वं परमतत्त्वं शब्दब्रह्मादिभिर्नामभिर्न्यगद्यत।[1] अत्यन्तं सूक्ष्मतत्त्वं नैतिकधार्मिकमूल्यानाम-पि वर्णनं विधेयतया कथयितुं न शक्यते।[2] कालदिग्भ्यामनवच्छिन्नमद्वयं सर्वपरिकल्पातीततत्त्वं विद्यते। वेदान्तदर्शने ब्रह्मविषयिण्यो या धारणा विद्यन्ते ताः सर्वा अपि शब्दब्रह्मणा सह संयुज्यन्ते। एतस्य तत्त्वस्य विचारणायां शाब्दिकशिरोमणिभिः साक्षान्निरदिश्यद् यदेषा समेषां ब्रह्माण्डजातानां पदार्थानामपरिणामा प्रकृतिः विद्यते, नास्त्यत्र सन्देहलेशोऽपि।

यदानीन्तनेऽस्य जगतः कारणमन्विष्यन् कश्चित् प्रवर्तते तदानीन्तने सर्वान्ते तत्त्वमेकमेवोपैति तच्च तत्त्वं शब्दतत्त्वमिति नाम्ना व्याह्रियत जगति, एतेन सर्वप्रकृतित्त्वं प्रतिफलितम्, पुनश्च संसारे व्यावहारोपयोगीनि समग्रवस्त्वादीनि कुतः प्रभवन्ति कुत्र च लीयन्ते चेदस्या जिज्ञासायाः समाधानं तत्रैव समदीयत।[3] सर्वमपि निर्माणं शब्दहेतुकमर्थात् शब्देनोपादानेन हेतुना निर्माणं यस्य तच्छब्दनिर्माणमेवम्भूतेन व्याख्यानेन शब्दस्य उपादानकारणता लभ्यते। शब्देन कालाख्याशक्तीनां द्वारा शब्दतन्मात्राभ्य एव जगतो रचना विधीयते भावार्णवश्चेत एव प्रभवति

---

[1] "नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तः सन्निवेशी, प्रभवो विकाराणामाश्रयो कर्मणामधिष्ठानं सुखदुःखयोः, सर्वत्राप्रतिहतकार्यशक्तिः,घटादिनिरुद्धप्रकाशः परिगृहीतभोगक्षेत्रावधिः, सर्वमूर्तीनामपरिणामा प्रकृतिः सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासः, स्वप्नप्रबोधानुकारी, प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद्दावाग्निवच्च प्रसवोच्छेदशक्तियुक्तः, सर्वेश्वरः सर्वशक्तिः सर्वमहान्, शब्दवृषभः, तस्मिन् खलु वाग्योग्विदो विच्छिद्याहङ्कारग्रन्थीनत्यन्तविनिर्भागेन संसृज्यन्ते"। वा०प०, १/१२१, हरिवृषभवृत्तिः, पृ० ३९६

[2] "व्यवहारानुपातिभिः धर्माधर्मैः सर्वावस्थास्वनाश्रितं ब्रह्म"। वा०प०, १/१ स्वोपज्ञवृत्ति।

[3] "ब्रह्मेदं शब्दनिमाणं शब्दशक्तिनिबन्धनम्।
विवृत्तं शब्दमात्राभ्यः तास्वेव प्रविलीयते"॥ वा०प०, १/१ वृषभवृत्तिः।

एतास्वेव प्रविलीयते, स्थितौ प्रवृत्तौ निवृतौ च शब्दब्रह्मणैव विभागः क्रियतेऽतोऽन्यत् काचिदपि सत्ता न विद्यते।

सर्वत्र वेदादिशास्त्रेषु तथ्यमेतदृषिभिर्न्यगादि।[4] अत आचार्य भर्तृहरिः प्रतिजानीते शब्दब्रह्म, यतो सर्वविधाया जागतिकसृष्टेरुद्भावो जायते -

**"अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥** [5]

अतोऽस्याः कारिकाया व्याख्यानेन ज्ञायते यद्वैयाकरणशिरोमणीनां मते शब्दब्रह्मण एव सर्वविधा व्यावहारिकाः पदार्था व्यवहाराय प्रभवन्ति। अत्र शब्दब्रह्मणो लक्षणपुरस्सरं परिचाययन्नाह। शास्त्रेषु हि लक्षणद्वयी प्रसिद्धा, स्वरूपतटस्थभेदेन । द्वयोर्लक्षणयोः समन्वयोऽत्र ग्रन्थकृताऽत्र सम्यक्प्रकारेण कृतं विद्यते।

तत्रादौ किन्नाम स्वरूपलक्षणम्- इति जिज्ञासायां प्रोच्यते वेदान्तपरिभाषायाम्- **"स्वरूपमेवलक्षणमिति स्वरूपलक्षणम्। यथा सत्यादिकं[6] ब्रह्मस्वरूपलक्षणम्"[7]** एवम्भूताभिर्बहुभिः श्रुतिभिर्ब्रह्मणः स्वरूपलक्षणं वेदेषु निरदिशि। अतोऽस्यां कारिकायामपि- "**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्"[8]** पूर्वार्धभागेन स्वरूपलक्षणं व्याख्यायि, स्वरूपं वर्णयता भर्तृहरिणा प्रोक्तं ब्रह्मणः प्रथमलक्षणम्।

**तटस्थलक्षणम्-** "**तटस्थलक्षणन्तु यावल्लक्ष्यकालमनवस्थितत्त्वे सति यद्व्यावर्तकं तदेव"।[9]** तात्पर्यमिदं यद्यल्लक्षणं यावल्लक्ष्यं तिष्ठति तवाल्लक्ष्ये न स्थितं भवति तथा च स्वमन्यपदार्थानामपेक्षया भिन्नं बोधयति।

---

[4] "एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः प्रथक्त्वेनैव वर्तते"॥ वा०प०, १/२

[5] वा०प०, १/१

[6] "सत्यं ज्ञानमनन्तं ब्रह्म" तैत्ति०उ०, २/१/१ "आनन्दो ब्रह्मेति व्यजानात्"। तत्रैव, ३/६

[7] वे०परि०, पृ० १६१

[8] वा०प०, १/१

[9] तत्रैव, पृ०१६२

वाक्यपदीयब्रह्मकाण्डस्थायाः प्रथमकारिकाया उत्तरार्धेन **“विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः”** अर्थादुपसंहृतक्रमाच्छब्दब्रह्मणः संसारस्य समेऽपि पदार्थाः गो-घट-पर्वत-सरिद्-वृक्षादयो विकाररूपेण विवर्तन्ते, उत्पत्तिस्थिति-विनाशरूपाश्च विकाराः, एवम्प्रकारेण वेदान्तिनां ब्रह्मणि गम्यमानानां सर्वविधानां कारणतानां लक्षणानां च समवायोऽत्र शब्दब्रह्मणि सङ्गच्छते। तस्मादेवाचार्यदण्डिना अवादि यच्छब्दद्वारैव संसारोऽयं चकास्ति[10] ।

वेदेषूपनिषत्सु शब्दब्रह्मणः सम्यक् चर्चा विद्यते, तत्सर्वमपि प्रथमाध्यायस्य व्याकरणस्य वेदमूलकत्वप्रङ्गे व्याख्यातं विद्यते। कैवल्योपनिषदि च व्याख्यातं विद्यते यत् सर्वमेव मत्तोऽभिव्यज्यते, सर्वमपि जगन्मयि शब्दब्रह्मणि प्रतिष्ठमानं सच्चकास्ति तथैव सर्वमपि संसारजातं मय्यर्थादक्षरात्मकेऽद्वितीये शब्दब्रह्मणि विलीयते।[11] आचार्यकात्यायनस्य व्याख्यानं **“सिद्धे शब्दार्थसम्बन्धे”**[12] वार्तिकस्य विवेचनप्रसङ्गे समुपलभ्यते, अत्र **“सिद्धे शब्देऽर्थे सम्बन्धे च”**[13] अर्थाच्छब्दो नित्योऽर्थो नित्यस्तयोः सम्बन्धोऽपि नित्यः, सिद्धशब्दो नित्यपर्यायस्य वाचकः, इति कृत्वा नित्यस्य सर्वव्यवहारयोनेः सर्वविकारप्रभवस्य सर्वाश्रयस्य सर्वान्तःकरणसन्निविष्टस्यो-पसंहृतक्रमस्य जगदुपादनकारणस्य द्रव्यभूतस्य शब्दब्रह्मणो वर्णनं व्यधायि। तस्मिन्नेव प्रसङ्गे आचार्यस्य सङ्ग्रहकर्तुर्व्याडेर्ग्रन्थनाम नामग्रहमुच्चारयता भाष्यकृता समभाणि यच्छब्दो नित्य इति,[14] **“सङ्ग्रहे तावत् कार्यप्रतिद्वन्द्विभावान् मन्यामहे इति नित्यपर्यावचिनो ग्रहणम्”।**[15] महर्षिपतञ्जलेर्महाभाष्ये तद्द्वारा शब्दब्रह्मणो गभीरव्याख्यानपुरःस्सरं

---

10 इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ का०द०, १/४

11 मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम्।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम्॥ कै०उ०, १/१९

12 वार्त्तिकम्, महाभाष्यम्, १/१/१

13 महाभाष्यम्, १/१/१

14 “सङ्ग्रहे एतत् प्राधान्येन परीक्षितम्,नित्यो वा कार्यो वा। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः- यद्येव नित्यः अथापि कार्यः उभयथा लक्षणं प्रवर्त्यमिति”। महा०भा०, पस्पशा०, पृ० ३७

15 तत्रैव, महा०भा०, पस्पशा०

निसचीयत यत् परमतत्त्वं शब्दब्रह्म सर्वत्र व्याप्तं विद्यते यत्किमपि जगतीदं दृश्यते तत् सर्वं तन्मूलकमेव।

**“चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश”।।**[16]

मन्त्रस्यैतस्य व्याख्यानं दार्शनिकैराचार्यैः स्व-स्वदर्शनानुणं शाखानुगुणं च कृतम्। आचार्ययास्कस्स्वकीये निरुक्ताभिधे ग्रन्थे एतस्यैव मन्त्रस्य घटकीभूतस्य पदस्य व्याख्याने महो देवो इति पदस्य व्याख्यानं यज्ञपुरुषत्वेन करोति।[17]

व्याकरणनिकाये आचार्यपतञ्जलिरेतस्य मन्त्रस्य घटकीभूतानां पदानां व्याख्यानं व्याकरणसिद्धान्तान् परिपोषयितुं व्याकरणानुगामिनीं व्याख्यां कृत्वा द्रढयति। 'महान् देवः' शब्दब्रह्म विद्यते, तस्य चत्वारि शृङ्गा अर्थाच्चत्वारि पदानि नाम-आख्यात-उपसर्गाभिधायीनि, पादत्रितयेनात्र कालत्रयविवेचनं भूतभविष्यवर्तमानरूपम्। द्वे शीर्षेऽर्थात् तस्य स्वरूपं द्विधा, नित्यशब्दः कार्यशब्दः। सप्त हस्तासः, अर्थात् सप्त विभक्तयो भवन्ति, त्रिधा बद्धः, एतेन शब्दतत्त्वस्य त्रिधाबद्धत्वनिर्देशः, उरसश्शिरसः कण्ठादिति बन्धनविषयीभूतः। अर्थतत्त्वस्य वर्षणात् वृषभ इत्युच्यते, एतस्मादेव ध्वनेः सत्ता विद्यते।

एष महादेवः शब्दतत्त्वमेव समस्तेषु मारणधर्मवत्सु मानुषेषु समाविशत्।[18] एवम्भूतेन महता देवेन शब्दतत्त्वाख्येन परब्रह्मणा अस्माकं साक्षात्कारः स्यादेतस्मादेव व्याकरणमध्येयं भवति। साक्षात्कार एव मोक्षः। आचार्यभर्तृहरिरपि सम्यग्रूपेण महादेवस्य शब्दतत्त्वस्य विवेचनं कुर्वन्नास्ते –

---

16 ऋग्०वे०, ४/५७/३

17 “चत्वारि शृङ्गेति वेदा वा एत उक्ताः। महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आविवेश इत्येष हि मनुष्यानविशति यजमानाय।“ निरु०, पृ० ८७३-८७४

18 “चत्वारि शृङ्गाणि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः । त्रयः काला भूतभविष्यद्वर्तमानाः। द्वे शीर्षे। द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्तहस्तासोऽस्य सप्तविभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति। महो देवो मर्त्यां आविवेश। महान् देवः शब्दः मर्त्यां मारणधर्माणो मनुष्यास्तानाविवेश”। महा०भा०, पश०, पृ० २४

शब्दोच्चारयितुर्व्यक्तेराभ्यन्तरे संस्थितमात्मानमन्तर्यामिनं वा शब्दवृषभं निगदति। येन साकं सायुज्यमथवाऽभेदकामत्वमैष्यत्।[19]

शब्दात्मनो द्विधा स्वरूपममभिदधताऽनेन नित्यात्मनः कार्यात्मनश्च शब्दतत्त्वस्य व्याख्यानमकारि पुनश्च कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राहित्वेन व्याख्यातस्तथैव नित्यस्य वर्णनं सर्वकारणभूतत्वेन कृतं वर्तते।[20]अत्र व्यावहारिकशब्दस्य वर्णने कथयति यद् व्यावहारिकशब्दस्य तात्पर्यं स्थूलशब्दो नास्ति प्रत्युत प्रयोक्तैवावगन्तव्योऽन्तस्स्थितशब्दात्मैव अन्तर्यामी विद्यते। श्रुतौ सैवान्तर्यामी “महादेवः” इति शब्देन व्याख्यातं विद्यते।[21]

‘आचार्यभर्तृहरिस्तु सम्पूर्णमर्थतत्त्वमेव शब्दब्रह्मणो विवर्तत्वेन स्वीकुरुते। सर्वेषां विकाराणां प्रलयावस्थायां वर्ण-पद-वाक्य-आनुपूर्वी-मात्रादीनां राहित्यं जायते यतोहि संवर्तावस्थायां पदार्थानां पारस्परिकभेदाभावेऽनवधारणत्वादेवाव्याकृताच्छब्दब्रह्मण एव जगदाख्या विकाराः समुद्भूता भवन्ति।[22] सैव मान्यता हरिवृषभेण दृढ्यक्रियत वृत्तौ ब्रह्मेदं शब्दनिर्माणमित्यादिवचनैः।

संसारे किमपि ज्ञानं नास्ति यस्यावधारणा शब्दं विना स्यात्, तस्माच्छब्दपूर्वको व्यवहार इति सिद्धान्तो वैयाकरणानां मते सिद्धं भवति, तत्र भवान् भतृहरिः प्रत्यजानीत।[23] अतः काथञ्चित्कस्यापि ज्ञानस्यावबोधो न भवितुमर्हः शब्दं विना, तस्मात् सर्वमपि ज्ञानं शब्दस्यानुगमनमीहते। सम्पूर्णं वाङ्मयं शब्देन संसृष्टं सदेव भाषते न केवलमेतावतैव प्रत्युत शब्दब्रह्मण एवान्वीक्षिकी-त्रयी-वार्त्ताद्या विद्याः समबध्यन्त ।[24] आचार्य भरतस्तु नाट्यशास्त्रे सम्यग्रूपेण वाग्ब्रह्मणस्सर्वकारणतां निरदिशत् –

---

[19] “अपि प्रयोक्तुरात्मानं शब्दमन्तरमवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते”॥ वा०प०, १/१२१

[20] तत्रैव, स्वोपज्ञवृत्तौ, पृ० ३९४

[21] “यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद,यस्य विज्ञानशरीरं यो विज्ञानमन्तरो यमयति एष त अन्तर्याम्यमृतः”। बृ०उ०, का०शा०, ३/७/२२०

[22] “तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणा सर्वविकारप्रयस्तमये संवर्तादनाकृतात् जगदाख्याः विकाराः प्रक्रियन्ते”। वा०प०, १/१ स्वोपज्ञवृत्तिः

[23] “न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते”॥ तत्रैव, १/१२३

[24] “सा सर्वविद्या शिल्पानां कलानां चोपनिबन्धिनी। तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते”। तत्रैव, १/१२५

**“वाङ्मायनीह शास्त्राणि वाङ्निष्ठानि तथैव च।**

**तस्माद्वाचः परं नास्ति वाग्घि सर्वस्य कारणम्”॥**[25]

कारणमेतदत्र यद् विश्वस्मिन् यत्किमप्यर्थजातं विद्यते तदर्थं भाषा प्रयुज्यते। भाषां विनां जागतिक्यः प्रवृत्तिनिवृत्तयो न भविष्यन्ति, तत्र च शास्त्रविषयकाः सर्वविधाः सिद्धान्ता आचार-विचारा तद्विषयकव्यवहारा वाक्षु समुपनिबद्धाः सन्तः जगति चकासति।

एतस्मात् कारणादेव वाचोऽर्थाच्छब्दब्रह्मणः परं किमपि तत्त्वमेव न विद्यते, एतस्मादेव सर्वजगदुपादानकरणत्वमुपयाति वाक्। महाभारतेऽपि शब्दब्रह्मणो वर्णनं लभ्यते तच्चेत्थम्-

**“द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति”॥** [26]

अत्रत्यविचारणायां शब्दब्रह्मणोऽपि परां सत्तां स्वीकुरुते। आश्चर्यस्य विषयोऽयं यत् सर्वत्र वेदवेदाङ्गादिष्वेवम्भूतस्य शब्दब्रह्मणः प्रतिपादनं परसत्तात्वेन जगदुपादनकारणत्वेन सर्वप्रकृतित्वेन सर्वेश्वरत्वेन प्रवृत्तिनिवृत्तिकारणत्वेन च समाम्नातमविद्यत। तस्यैव शब्दब्रह्मणो व्याख्यानं परवर्तिभिः कैश्चिद्दार्शनिकैरपरब्रह्मत्वेन कृता, विचारणीयोऽयं विषयो यन्मायामयस्य ब्रह्मणो प्रामुख्यं प्रतिपादयन्तः शब्दब्रह्मणो गौणत्वं प्रतिपादितवन्तः, तत्रैवं स्फोरयितुं शक्यते यद् व्यासस्य ब्रह्मसूत्रव्याख्यानादेव शब्दब्रह्मणो गौणत्वमवेद्यत, अस्मादेव कारणात् परवर्तिषु दार्शनिकेष्वेवम्भूता विचारा व्यभाव्यन्त।

वैयाकरणनिकाये सर्वमान्योऽयं सिद्धान्तो यत् परात्परपरमात्मा एवास्माकं शब्दब्रह्मेति तत एव भवाब्धिरूपस्य द्वैतध्वान्तस्य निवारणं सञ्जायते मोक्षः। साम्प्रतं दृश्यमाने जगति किं कारणमस्येति चेदुद्विजते मनो यदि तदात्वे तु वैयाकरणानां साक्षादुत्तरमिदमेव –

[25] ना०शा०, १४/३

[26] महा० शा० प०, १/१२३/३०

**"सत्या विशुद्धिस्तत्रोक्ता विद्यैवेकपदागमा।**

**युक्ता प्रणवरूपेण सर्ववादाविरोधिनी"॥**[27]

अत्र जगत्कारणताया विचारे कस्यापि भारतीयस्य दर्शनस्य शब्दब्रह्मत्वस्वीकारे न काचिदपि विप्रतिपत्तिः। शब्दब्रह्मणः स्वीकाराय किमपि न कुर्वन्तु, केवलमेतस्य जगतो मूलकारणमन्विष्यन्तो भवन्तः प्रयान्तु, यत्किमपि सर्वान्ते प्राप्नुयात्, तदेव शब्दतत्त्वनाम्नाऽभिजानन्तु। अस्माकं विश्वासो यत्तस्य सर्वान्तस्य परमतत्त्वस्य शब्दब्रह्मणश्चिन्तनं कुर्वन्तस्तेन साक्षात्कारद्वारा अनिर्वचनीयं सुखमनुभविष्यन्ति।

विश्वस्यास्य कारणताया विचारे भर्तृहरिर्बहुधा बहुभिश्च कारिकाभिः प्रत्यबोधयत् तथैवाम्नायविदो विदुरित्यनेनान्येषामपि विदुषामेतदेव तदपि प्रत्यपद्यत।[28] आचार्यतुलसीदासो ब्रूते नाम्नो महत्त्वविषये श्रीगणेशः श्रीरामनाम लिखित्वा तदेव पर्यक्रामत्, एवं कृतवतस्तस्य जगति नाम संसारेऽस्मिन् विद्योतते सर्वविधेषु कार्येषु प्रथमां पूजां च लभते।[29] नाम्नो महत्त्ववर्णने एव वाल्मीकिसदृशजनः साधुरीत्या रामनाम्न उच्चारणेऽसमर्थः सन् 'मरा मरा' इत्युच्यमाने सति शनैश्शनैस्सः साक्षाद्ब्रह्मज्ञानी बभूव।[30]

भूतवता ब्रह्मज्ञानिना महर्षिणा तेन त्रिकालाबाध्यत्वस्य परमतत्त्वस्य भगवतोऽवतारभूतस्याखिलब्रह्माण्डनायकस्य सर्वबीजप्रकृतेर्निखिलप्रपञ्चैककारणस्य लीलावतारिणो मर्यादापुरुषोत्तमस्य तत्रभवतश्श्रीरामचन्द्रस्य जन्मनः पूर्वमेव तद्विषयिकां रामकथां रामायणाभिधे आर्षे महाकाव्ये संसृज्य न्यधायि, तथाभूतस्य दीनदयालस्य दयादाक्षिण्यादिगुणयुतस्य नाममात्रकीर्तनेन एतस्या वसुमत्या जना भीमभवार्णवं सन्तरन्तः मोक्षपद्भाजो भवन्ति।[31]

विशेषतोऽस्मिन् कलौ युगे जनाः साक्षाच्छब्दब्रह्मणोऽनुचिन्तनं कुर्वाणाः शब्दब्रह्मणा साक्षात्कारं विदधानाः सायुज्यपदभागिनो भवन्ति। तस्मादेतच्छब्दब्रह्म न केवलं वैयाकरणानामुपास्यश्चिन्तनविषयीभूतो वा,

---

[27] तत्रैव, १/२०

[28] "शब्दस्य परिणामोऽयमियाम्नायविदो विदुः। छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत"॥ वा० प० १/२०

[29] "महिमा जासु जान गनराऊ। प्रथम पूजियत नाम प्रभाऊ"॥ राम० च० मा० बा० का०, दोहासंख्या -२

[30] "उलटा नाम जपत जग जाना। वाल्मीकि भये ब्रह्म समाना"॥ तत्रैव

[31] "कलियुग केवल नाम अधारा। सुमिरि सुमिरि नर उतरहिं पारा"॥ तत्रैव

प्रत्युत संसारस्य साक्षरनिरक्षराणां जनानां शरणैकं परमतत्त्वं शब्दब्रह्मेति, अतो वृत्तावुक्तम्-

**"व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ।**

**सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते"॥**[32]

शब्दब्रह्मणः प्रकाशकता कथङ्कारमिति यत्रत्यस्थले भेदसंसर्गयोरभावः, भावाभावयोरभावः, क्रमाक्रमयोरभावः सत्यानृतयोरभावः, तथाभूतं शब्दब्रह्म एव विश्वात्मा कथ्यते स च विश्वात्माख्यः शब्दब्रह्म प्रकृष्टाद् विवेकादेव प्रकाशते नान्यथा। विश्वात्मनो ज्ञानं विवेकात् कथं कुत्र च तत् स्थलमित्यपि प्रतिपद्यते वृत्तिकारः—

**"अन्तर्यामी स भूतानामाराद्दूरे च दृश्यते।**

**सोऽत्यन्तमुक्तो मुमुक्षुभिरुपास्यते"॥**

अन्तर्यामिन्यर्थाद् निखिलचराचरस्य हृद्देशे विद्यमानं तच्छब्दब्रह्मरूपपरमात्मा दूरं पार्श्वे वा सन्तिष्ठते, तथा च सर्वदा निर्मुक्तं सन्मुमुक्षुभिर्मोक्षनिमित्तं शब्दब्रह्मण उपासना क्रियते।

समस्तचराचरस्य अन्तःस्थले विद्यमानं सन्निखिलं चराचरं नियमयति तस्मादन्तर्यामी निगद्यते सकलभुवनेषु व्याप्यत्वादन्तश्चारि कथ्यते।[33] एवम्भूतस्यान्तश्चारिणः परमतत्त्वस्य स्थितिरेकत्वे सत्यप्यनेकधा परिलक्ष्यते विवर्तदशायां तदुदाहरणमुखेन प्रत्याययति-

**"तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते।**

**अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम्"॥**[34]

एकस्यैव परमतत्त्वस्य चैतन्यस्य शब्दब्रह्मण एव विविधरूपेषु भासमानत्वमुपेयते तच्च कदाचिन्मानुषत्वेन पशुत्वेन पक्षित्वेन सरीसृपादित्वेन वा परिस्थितिरेषा विवर्त[35]-कारणाद्भवति, तद्यथा भूकम्पादीनामुत्पातानां

---

[32] वा० प० १/१ वृत्तिः० पृ०सं० ४३

[33] "तस्या व्यापारशक्तिर्या पृथिव्यादिश्उ तिष्ठति। नियतिः सर्वभूतानामन्तर्यामी स उच्यते"॥ वृषभवृत्तिः

[34] तत्रैव

[35] "एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः। स्वप्नविषयप्रतिभासवत्"। तत्रैव, पृ० २९

समये वारिराशीनां वार्यनेकधा तरङ्गादिष्वाभासतेऽथवा प्रज्वलत्यो वह्निशिखाः विविधाश्चकासति तथैव शब्दब्रह्मणोऽपि संस्थितिः। विवर्तदशायामविद्याशक्तेः कारणादेव बहुविधविवर्तितस्वरूपेषु शब्दब्रह्मणो दर्शनञ्जायते, तदेवं पारमार्थिकस्य वैयाकरणनिकायस्वीकृतस्य स्फोटाख्यस्य सर्वजनान्तःकरणसंस्थितस्य सर्वविधव्यवहारकारणस्य जगदुपादानभूतस्य मुमुक्षुभिरुपास्यस्य शब्दब्रह्मणस्स्वरूपं समाख्यायि।

**"वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।**

**न हि प्रकाशः प्रकाशेत् सा हि प्रत्यवमर्शिनी"॥** [36]

एवम्भूतस्य कालस्य कल्पनायाः विषयेऽपि चिन्तयन्नाचार्यो भर्तृहरिराह - त्रिधा प्रकाशो भवति योऽयं जातवेदाः, सर्वेषामन्तःसन्निवेशी, तथा च प्रकाशाप्रकाशयोः प्रकाशयिता शब्दब्रह्म एव, यदि कदाचित् तद्ब्रह्म प्रकाशं कर्तुन्नेहेत तदा द्वयोः पूर्वोक्तप्रकाशयोः प्रकाशकत्वं नङ्क्ष्यति यतोहि प्रकाशानामपि प्रकाशयिता शब्दतत्त्वाख्यं ज्योतिर्विद्यते, तस्मात् शब्दब्रह्ममूलकमेव जगतः प्रकाशः, समस्तमपि दृग्गोचरीभूतमेतन्निखिलं जगदन्धन्धन्तमसि प्रविशेत्, तस्माच्छब्दब्रह्मण एव सर्वशक्तिमत्ता।

**अद्वैतवेदान्ते पारमार्थिकशब्दस्य स्वरूप-**

अद्वैतवेदान्तदर्शनस्य मते शब्दस्य स्वरूपं तथैव विभावयितुं शक्यते यथा वैयाकरणैस्स्वस्य शब्दस्य स्वरूपं व्यधायि यद्यप्यद्वैतवादिनः केवलाद्वैतस्य विशेषाद्वैतस्य सच्चिदानन्दात्मकस्य ब्रह्ममात्रस्य समर्थकास्ततोऽपि यथाभूतैरुद्धरणैराचार्येण भर्तृहरिणा स्वकीयं मतं दृढं समस्थापि तत्र सर्वत्र वैदिकस्य वेदान्तिकस्य शब्दस्य दर्शनं भवति-

अथर्ववेदस्य भाष्ये सायणाचार्यो वक्ति- सोऽपि स्फोट इति शाब्दिकाः शब्दायन्ते तत्रेमां श्रुतिं प्रमाणयन्ति- **"ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः"।**[37] एतस्य व्याख्याने आचार्ययास्कनिरुक्ते निजगाद- **"कतमत्तदेतदक्षरम्? ओमित्येषावागिति शाकपूणि। अत्राक्षरं किम्, तदोत्तरति**

---

[36] वा०प०, १/१२५

[37] ऋग्वेद०:, १/१३४/ ३९

**ओमिति वाग् इत्येवाक्षरम्? शाकपूणिर्वदति- ऋचोऽक्षरे ऋगुपलक्षितसर्व-वेदसम्बन्धिन्यक्षरे प्रणवरूप ओङ्कार अविनाशिनी**" अर्थादृक्षूपलक्षिते वेदसम्बन्धिनि अक्षरेऽविनाशिप्रणवरूपौङ्कारे सर्वदेवानां निवासः। एतेन शब्दस्य ब्रह्माण्डस्वरूपवर्णनमत्राक्रियत।

दुर्गाचार्योऽपि विविधमस्मिन् शब्दजातमोमिति व्योम। तस्मिन् तिसृषु मात्रासु अकारोकारमकारलक्षणासु उपशान्तासु यदवशिष्यते तदक्षरं परमं व्योम। ऋगादिषु ये देवास्ते मन्त्रद्वारेणाक्षरे निषण्णास्तस्य शब्दकारणत्वात्।[38] अत्र सर्वेषामपि शब्दानां लौकिकानाम् उच्चारणविषयी-भूतानां कारणं प्रणव एव। प्रणवविषये श्रीवृषभस्य मतं विद्यते- "**प्रणवो ब्रह्म स एव विद्या**"।[39] छान्दोग्योपनिषद्यपि- "**ओमित्येतदक्षरमुद्गीथमुपासीत्**"।[40] ओमित्येतस्याक्षर स्य समुपासनायै निरदिशत्। माण्डूक्योपनिषदि तथैव निर्दिदेश- "**ओमित्येतदक्षरमिदं सर्वम्**",[41] **"ओमिति ब्रह्म"** इत्यादिषु स्थलेषु पारमार्थिकस्य शब्दस्य ब्रह्मणश्चर्चा समक्रियत।

**"शब्दब्रह्म यदेकं यच्चैतन्यं च भूतानाम्।**

**यत्परिमाणस्त्रिभुवनमखिलमिदं जयति सा वाणी"॥** [42]

तात्पर्यमिदं यदेकमात्रं शब्दब्रह्म सर्वेषु प्राणिषु चैतन्यत्वेन वर्तमानं भवति निखिलञ्जगद्यस्य परिणामस्तदेव वाक्तत्त्वं सर्वोत्कृष्टमिति भावः। तथव श्रीमद्भागवतेऽपि न्यगादि-

**"एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः।**

**मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः"॥** [43]

---

[38] उद्धृतम्, वा०प०, १/१ पृ० १६

[39] तत्रैव, पृ० १७

[40] छा०उ०

[41] मा०उ०

[42] उद्धृतम् , वा० प०, १/१

[43] श्रीमद्भा०, ११/१२/१७

सम्पूर्णजगतोजीवनभूतं शब्दब्रह्म एव ब्रह्मनाडीरूप-विवरान्मुख्यप्राणरूपे आविर्भवति तथा च घोषरूपद्वाह्यगगनगुहायां प्रविष्टं भवति, 'प्रणवः प्राणिनां प्राणो जीवनं सम्प्रतिष्ठितम्' प्रणवात्मकं मुख्यप्राणं हृदयगुहायामनाहतनादरूपेण प्रकटितं सद्वाह्याकाशेऽर्थाद्ब्रह्माण्डगुहायां तत् प्रणवात्मकं प्रणवस्वभावसूर्यरूपादव्यक्तात् सप्तस्वरात्मकघोषैः प्रतिष्ठितं भवति, उभयथापि तत् मनोमयं पश्यन्तीमध्यमात्मकं सूक्ष्मरूपं गृह्णाति ततः स्वरवर्णादिस्थूलं रूपं गृह्णाति। ऋग्वेदस्य वाक्सूक्ते वाचः परमसत्तात्वेन वर्णनं व्यधीयत-

**"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।**

**अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा"॥** [44]

एतस्मिन् सूक्ते वाचो व्याख्यानं परमशक्तित्वेन निरदिश्यत, सर्वस्य ब्रह्माण्डस्य कर्त्री वागेव तदतिरिक्तं न कस्यापि सत्ता विद्यते, जगत्कारणरूपब्रह्मणा तादात्म्यमनुभवन्ती अम्भणर्षेः पुत्री रुद्राणामेकादशानां स्वरूपे विचरति, वसुषु, आदित्येषु, विश्वेदेवेषु, च मित्रावरुणेन्दाग्नीनां च धर्त्री, तस्मात् सर्वशक्तिमत्त्वं ज्ञायतेऽत्र वाचः।[45] वाचो व्याख्यानं ब्रह्मस्वरूपे कृतं विद्यते, ब्रह्म च निस्सङ्गं निर्गुणं जगदाधरत्वेन संवर्तावस्थायां भवत्येव।

**"अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा।**

**परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव"॥** [46]

अत्र सर्वस्यापि भुवनादिकस्य सृष्ट्री वागेव विद्यते तदाचार्येण सायणेन व्याक्रियते।[47] सायणाचार्यस्य व्याख्यानेन प्रतिभाति यद्वाचस्सर्वशक्तिमत्ता

---

[44] वाक् सूक्तम्, पृ० ४१७

[45] "मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं संदृश्यते, माया च जगदाकारेण विवर्तते, तददृश्यमाया आधारत्वेन असङ्गस्यापि ब्रह्मणः उक्तस्य सर्वस्योपपत्तिः"। सायणभाष्यम्, वाक्सूक्तम्, म० १

[46] वाक्सूक्तम्० म० ८

[47] "विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणाधिष्ठिता स्वयमेव प्रवामि प्रवर्ते। वात इव। यथावातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत्। उक्तं सर्वं निगमयति। द्यावापृथिव्योरुपादनमुपलक्षणम्। एतदुपलक्षितात् सर्वस्माद् विकारजातात् परस्ताद्वर्तमाना

विद्यते कार्यात्मकस्याशेषजगत उत्पादयित्री तथा चान्येनाप्रेर्यमाणा स्वकीयया शक्त्या स्वेच्छया च प्रवाति, न केवलमेतावदेव प्रत्युत निर्विशेषरूपोदासीना कूटस्था चैतन्यब्रह्मस्वरूपा विद्यतेऽतो परा सती जगदधिष्ठानकारत्वेनोपयाति, उपादनत्वञ्च - उत्पद्यते यस्माज्जगदिति, तस्मात् शब्दस्य परा वाचः सर्वशक्तिमत्त्वमनेन समाख्यायि। उपनिषदि विद्यते यद् "**भूरिति व्याहरत्, भुवमित्यसृजत्**" इत्यादिभिः समुक्तिभिः वेदान्तसम्प्रदायबोधितशब्दतत्त्वस्य परत्वेन प्रतिपादना ब्रह्मकल्पैव, अतः पारमार्थिकशब्दतत्त्वस्य स्वरूपविचारणायां वेदान्तशास्त्रप्रतिबोधितस्य शब्दस्य स्थितिः 'वाग् वै ब्रह्म' वाण्या पराख्यायाः सर्वाधिष्ठानता, परता, निर्विशेषता, चेतनता, उदासीनता, उपादानता, सर्वकारणता च विद्यते, अतोऽत्र प्रतिपादयितुं शक्यते यत् साक्षात् ब्रह्म एव परमार्थभूतः शब्दः। **"व्याप्तिमत्त्वात्तु शब्दस्य"** इत्यनेन शब्दस्य सर्वत्र सर्वदेशकालसामान्या व्याप्तिर्न्यगद्यत। सङ्क्षेपशारीरके सर्वज्ञातमुनिरपि शब्दस्य व्यावहारिकं स्वरूपं पारमार्थिकं च तथैवाववर्णत।[48] पद्मपादाचार्यः प्रपञ्चसारतन्त्रस्य टीकायां पञ्चपदीं सप्तपदीं च वाचमचर्चयत्, तथा च सूक्ष्माया वाचः पराया अपि परता व्याख्याता, द्वितीये च सूक्ष्माया वचोऽपि सूक्ष्मतमं स्वरूपद्वयं वर्तते।[49] वागेव सम्पूर्णस्य ब्रह्माण्डस्य विवर्तने साक्षात् कारणमुपयाति।[50] वाग्वै सरिरम्[51] श्रुतौ प्रणवशब्दस्यार्थः शब्दब्रह्म एव - प्रणव एवैकस्त्रिधा व्यभज्यत इति[52] एकस्यैव प्रणवस्य त्रिधा विभाजनमकारोकामकारेषु ऋग्यजुष्-सामसु च। अत्राविवृतं ब्रह्म एव

---

सङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना म्,अहिम्ना एतावती संबभूव सर्वगगदात्मनाहं सम्भूतास्मि"। सायणभाष्यम्, पृ० ४२४

48 "प्रत्यगभावस्तवादेकोऽस्ति बुद्धौ, प्रत्यगभावः कश्चिदन्यः प्रतीचि।
प्रत्यगभावस्तत्क्यतस्तत्र चान्यो व्युत्पन्नोऽयं तत्र चात्मेति शब्दः"। उद्धृतम्, वा०प० १/१ पृ० २६

49 "अथवा सूक्ष्मा परा पश्यन्ती मध्यमा वैखरीति पङ्चपदीं वाचमाश्रित्याह- मूलाधारादिति। सप्तपद्यपि वागनेनैव सूचिता, शून्यसंवित्वसूक्ष्मादीनि सप्तपदानि"। उद्धृतम्, वा०प०, १/१ पृ० २६

50 "औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्याः।
विज्ञायते विश्वविवर्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्"॥
सङ्क्षेपशारीरकम्, श्लो०४ उद्धृतम्- वा०प० १/१ पृ० ३७

51 शत०ब्रा०, ११/१/६/१

52 वा०प०, स्वोपज्ञवृत्तिः, पृ० ५३

प्रणवशब्दाद् विविच्यते। एतदेवौङ्कार इत्युच्यते। विवर्तावस्थां प्राप्तं प्रणव एव ऋग्यजुष्-सामरूपेण विद्यमानं अनेकधा विवृत्तं भवति। अद्वैतशब्दोऽभेदार्थकः, शतपथब्रह्मणीयव्याख्यानेऽपि शब्दब्रह्मणो व्याख्यानं सम्यग् विद्यते।[53] प्राणापानादयः पञ्च प्राणाः प्राणस्य मुख्यवृत्तयो वायुरूपाः, तद्ब्रह्म प्राणिनामपि प्राणः। प्राणस्य प्राणः[54] प्राणब्रह्म, असत्, ऋषेश्च पर्यायिता, अतः प्रणवः प्राणिनामपि प्राण इत्यागमानुसारेण प्राणतत्त्वमपि प्रणवात्मकं शब्दब्रह्म एव इति। एतस्यैव सञ्ज्ञैका ऋषिर्विद्यते, प्रजापतेः ब्रह्मण एव शरीराश्रयत्वात् शरीरस्थप्राणा एव ऋषयो ये च सृष्टेश्चक्रं प्रवर्तयन्ति। प्रजापतेर्ब्रह्मणोऽपि शब्दब्रह्मापरनामधेयत्वं शास्त्रेषु प्राप्यते-

**"पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत्।**

**कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः"॥**[55]

महानात्मस्वरूपस्य ब्रह्मण उत्पत्तिर्भवति, एतदीयस्योत्पादकं तत्त्वं ब्रह्म एव तद्यथा पश्यन्तीमध्यमावैखरीणामुत्पादिका परा वाग्भवति, परा प्रकृतिरेव शब्दब्रह्म इति निगद्यते । तस्मात् सर्वत्रैव वेदान्तशास्त्रे शब्दस्य पारमार्थिकस्वरूपविचारणायां वाग्वै ब्रह्म इत्यादिभिः श्रुतिभिः शब्दतत्त्वस्य परब्रह्मरूपे एव वर्णनं तत्र व्याकरणस्य शब्दब्रह्मणस्था च वेदन्तस्य ब्रह्मणोऽभेद एव, तत्रत्ये व्याख्याने न काचिदपि विप्रतिपत्तिः।

उपरितनेन व्याख्यानेन वैयाकरणवेदान्तिनोः पारमार्थिकस्य शब्दस्य स्वरूपं व्याख्यायि, पुनश्चाग्रे शक्तेः स्वरूपं विज्ञाप्य तस्य च सम्बन्धत्वं संसाध्य कथं च शब्दशक्तीर्विना काथञ्चिकोऽपि बोधो नहि भावयितुं शक्यते तत्सर्वमत्र विचार्यते।

---

[53] "असद्वा इदमग्रासीत्। तदाहुः किं तदसदासीदिति ऋषयो वाव तेऽग्रेऽसदासीत् तदाहुः के ते ऋषयः इति प्राणा वा ऋषयः"। श०ब्रा०,

[54] बृ०आ०, ४/४/१८

[55] श्रीमद्०भा०, ३/११/३४

**शक्तेरावश्यकत्वप्रतिपादनम् –**

व्याकरणदर्शने विचारणाविषयीभूता सिद्धान्ता प्रायशो दार्शनिका येषां चिन्तनं दर्शनविषयीभूतेषु वैयाकरणैर्विरचितेषु ग्रन्थेषु विद्यन्ते। तत्रापि प्रमुखरूपेण शाब्दबोधस्य सिद्धान्तानां चर्चा विहिता वर्तते। शाब्दबोधश्च शब्दशक्तिद्वारैव सम्भवति तत्र न विद्यते कश्चिदन्योपायः। शब्दशक्तीनां शाब्दबोधे नितरामावश्यकत्वात् तेषां चर्चा क्रियते। आचार्यभर्तृहरेः कथनमिदं यच्छक्त्या विनाऽर्थावगतिर्हि न सम्भाव्यत तस्मादेव कथयति ब्रह्मकाण्डे-

**"विषयत्वमनापन्नैः शब्दैर्नाऽर्थः प्रकाश्यते।**

**न सत्तयैव तेऽर्थानामग्रहीताः प्रकाशकाः"॥**[56]

अत्राचार्यस्य वक्तव्यमिदं शब्दा यावद्विषयतां न यान्ति तावत्तैर्न बोध्यते काथञ्चिकोऽप्यर्थः। यथा शब्दानामुच्चारणे कृते सति तेषां सम्बन्धो यावच्छ्रोत्रेन्द्रियेण सह न जायते तावन्नार्थबोधो भवति। तस्मादगृहीतानां शब्दानां कारणताऽर्थबोधे न समायाति। शब्दा भवन्तु नाम किन्तु तेषामर्थावबोधो यथा श्रोत्रेन्द्रियेण सम्बन्धे सत्येव जायते। न केवलमुपलब्धिमात्रेण। एतस्माद्धेतोरेव शक्तिरूपस्य सम्बन्धस्य आवश्यकता वर्तते। यावच्छक्तिस्वरूपस्य वास्तविकं ज्ञानं न भवति तावच्छब्दैरर्थबोधो न भवितुमर्हति। शक्तिग्राहकाणि साधनानि शक्तिग्रहं कारयित्वा सम्यग्रूपेणार्थं प्रत्याययन्ति। सत्तामात्रेणैवार्थावगतिं परिहरन् शब्दानां बोधविषयत्वं प्रत्यपद्यत, बोधविषयता च शक्तिद्वारैव जायते नान्यथा।

पतञ्जलेरिदमेव कथनमनेन वचसा साध्यते- **"शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण"॥**[57] अर्थस्य प्रत्यायने कारणतभूतत्वमेव शक्तित्वम् ।[58] अत्रा

---

[56] वाक्यपदीयम्, १/५६ पृ० ८४

[57] महाभाष्यम्, १/१/६८

मञ्जूषाकारस्य विचारोऽपि तथैव- **"कस्तर्हि वृत्त्याश्रयश्शब्दःस स्फोटात्मक इति गृहाण"।** वृत्तेराश्रयीभूतः शब्द एव इति मञ्जूषायां तत्र भवता नागेशेन प्रत्यपादि।

**शब्दः सम्बन्धिनमर्थमेव प्रकाशयति --**

विश्वस्मिन् बहवस्तादृशाः शब्दाः श्रूयन्ते किन्तु श्रुतेभ्यः समेभ्यश्शब्देभ्यः तत्सम्बन्धिता एव अर्थाः प्रदीयन्ते नतु तदसम्बन्धिताः। यथा घटशब्दस्योच्चारिते सति कम्बुग्रीवादिमतः पदार्थस्यैव बोधो जायते न तु पटस्य न भवनस्य न वा घोटकस्य प्रत्युत मृन्निर्मितस्य कम्बुग्रीवादिमतः पदार्थमात्रस्य ज्ञानं जायते। एतस्मान्निश्चीयते यच्छब्दार्थावन्तरा कश्चित् सम्बन्धो विद्यते येन च तत्सम्बन्धितार्थस्यैव प्रतीतिर्जायते नान्यस्य। सम्बन्धमन्तरा सर्वं सर्वेण प्रत्याय्येत, तस्मादवश्यमेव सम्बन्धस्य स्वीकारो विधेयः, यस्माच्छब्दः सम्बन्धमहिम्नैव अर्थविशेषस्य ज्ञानं कारयति।

**शक्तिस्वरूपविमर्शः-**

एवम्प्रकारकस्य पूर्वकथितस्य सम्बन्धस्याभिधानं शब्दव्यापारो वृत्तिर्वा कथ्यते।[59] शक्लृ शक्तौ इत्यर्थकाद्धातोः **"स्त्रियां क्तिन्"**[60] इति सूत्रद्वारा क्तिन्प्रत्ययं कृत्वा साधयामः। यया अर्थबोधः कर्तुं शक्यते सा शक्तिरिति। अर्थाद् यो बोधो भवति सा शक्तिर्निगद्यते। शब्दाः शक्तिमन्तो भवन्ति प्रतिशब्दं काचिच्छक्तिर्विद्यमाना भवति विद्यमाना सती शब्देषु शक्तिश्शाब्दबोधे कारणत्वमुपयाति । अत्र कौण्डभट्टस्य भर्तृहरेश्च कथनमित्थं विद्यते– **"बोधजनकता एव शक्तिः"**[61] तथा च नव्यव्याकरणस्य प्रणेता नागेशः प्रतिपादयति यद् वृत्तित्वं नाम- **"शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपद-**

---

58 व्याकरणतन्त्रस्य काव्यशास्त्रे प्रभावः, पृ० ११७

59 वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, पृ० ३३

60 अष्टाध्यायी, ३/३/९४

61 "इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा। अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा"॥
वैयाकरणभूषणसारः,शक्तिनिर्णयः, कारिका, ३७

**पदार्थसम्बन्धत्वम्"**।[62] **"वाच्यवाचकभावरूपाशक्तिः"**।[63] शक्तेर्ग्राहकञ्च, इतरेतराऽध्यासमूलकं तादात्म्यम्।[64] शाब्दबोधस्य जनको यः पदस्य पदार्थस्य च सम्बन्धो वृत्तिपदेनोच्यते। शाब्दबोधस्य जनकयोः पदपदार्थयोमध्ये लब्धसत्ताकः सम्बन्धविशेषस्य कथनं वृत्तिपदेनोच्यते- **"वृत्तित्वं तु शाब्दबोधजनकपदपदार्थसम्बन्धत्वम्"**।[65] इति वृत्तिविषयकविचारोऽन्यविदुषां विद्यते। एतैराचार्यैः शब्दबोधजनको यः पदपदार्थयोः सम्बन्धः सैव शक्तिरिति न्यगादि।

वृत्तिस्वरूपस्य प्रतिपादनमित्थं पातञ्जले महाभाष्ये विद्यते **हलोऽनन्तराः संयोगः**[66], इति सूत्रे। तत्र हि – ग्रामशब्दोऽयं बह्वर्थोऽस्ति, शाला समुदाये वर्तते, तद्यथा ग्रामो दग्ध इति। तद्यः सारण्यके ससीमके सस्थण्डलिके वर्तते, तमभिसमीक्ष्यैतत्प्रयुज्यते - अन्तराविमौ ग्रामाविति, इत्युक्तम्।[67] अत्र अस्त्येव शाला समुदाये वर्तते इति वाक्ये वर्तते, इत्यस्य वृत्तिरित्यर्थः, लडर्थस्याविवक्षितत्वात्, वृतु धातोः प्रकृतिभूतस्यैवार्थस्य विवक्षणात्, नो चेदस्तिपदोपादानं व्यर्थं स्यात्, एवञ्च अस्ति शाला समुदाये वृत्तिर्ग्रामशब्दस्य इत्यर्थः सम्पन्नस्तस्य वाक्यस्य। अयमर्थ उद्योतकृताऽपि सङ्केतितः।[68] उपरितनेन व्याख्यानेन साध्यते यत् पदस्य पदार्थस्य च मध्ये सम्बन्धः स चात्यन्तं विलक्षणः। तद्यः सारण्यके वर्तते, तमभिसमीक्ष्य, इति प्रतिपादनेन पदज्ञानस्य पदनिष्ठवृत्तिज्ञानस्य च शाब्दबोधाय कारणं मनुते। एतत् प्रयुज्यतेऽन्तराविमौ ग्रामौ, इत्यनेनान्तराविमौ ग्रामाविति शाब्दबोधाकारं पतञ्जलिः प्रदर्शयति। एतस्मात् कारणादेव शाब्दबोधाय कार्यकारणभावस्य संकल्पना विधीयते । कस्यचिदपि कार्यस्य कारणं तु जायते

---

[62] वैयाकरणसिद्धान्तमञ्जूषा, पृ० ६

[63] परमलघुमञ्जूषा, पृ० १२

[64] तत्रैव, पृ० १३

[65] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९६

[66] अष्टाध्यायी १/१/७

[67] महाभाष्यम् नवाह्निकम्, १/१/७

[68] महाभाष्यम् प्रदीपोद्योतः, १/१/७ पृ० २३४

नहि कारणं विना कार्योत्पत्तिश्श्रूयते क्वचित्। अतो हेतोर्नागोजिभट्टस्य कथनमिदम्- "**अत एव सर्वे सर्वार्थवाचकाः न अपितु कार्यकारणभावः कल्प्यते**"।

**कार्यकारणभावस्य स्वरूपम्-**

**"तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्न-निरूपितवृत्तिविशिष्टज्ञानं हेतुः"।**[69] एतस्य विवरणमादौ जानीमहे - स चासौ धर्मश्चेति कर्मधारयसमासे कृते सति तद्धर्मः, तेन धर्मेणावच्छिन्न इति तृतीयातत्पुरुषे च कृते तद्धर्मावच्छिन्नः, तद्धर्मावच्छिन्नो विषयो यस्या इति विग्रहे बहुव्रीहिसमासे कृते सति तद्धर्मावच्छिन्नविषयिका, शाब्दबुद्धिः (शाब्दबोधः) अन्यपदार्थः। तद्धर्मावच्छिन्नविषयिका चासौ शाब्दबुद्धिश्चेति कर्मधारयः, तस्या भावस्तत्त्वम्, तेनावच्छिन्नशाब्दबोध एव। तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानम्, तद्धर्मावच्छिन्नेन निरूपिता या वृत्तिस्तया विशिष्टज्ञानमिति विवरणम्। लक्षणसमन्वयः- यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यताऽवच्छेदकः, एवं यो धर्मो यस्यावच्छेदको भवति। स तेन धर्मेणावच्छिन्नो भवति। अत्रोदाहरणाय यथा घटविषयकं ज्ञानं कार्यं तत्र घटस्यावच्छेदको घटत्वमेव नान्यत्किमपि।

घटत्वादिनाऽवच्छिन्नो घटः। तेन व येन धर्मेणावच्छिन्नविषयकशाब्द-बोधस्यापेक्षा जायते तत्र स्थले च तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः, तेन घटत्वधर्मावच्छिन्नस्य घट-विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वधर्मेणाऽवच्छिन्ना या घटनिरूपिता वृत्तिस्तद्विशिष्टज्ञानं हेतुरिति फलति।

पूर्वोक्तकारणादेव घटपदेन पटपदार्थस्य बोधो न जायते। कार्यकारणभावस्य भावस्य कल्पनां विना शाब्दबोधस्य कल्पनैवासम्भवा। केवलं कारणदले येन धर्मेणावच्छिन्नस्य यद्विषयकस्य ग्रहणं तादृश एव बोधः सञ्जायते।

---

[69] परमलघुमञ्जूषा, शक्तिनिरूपणम्, पृ० १२

**"तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात्"।**[70] निर्धारणत्वं सप्तम्या अर्थः, अत्र बहुब्रीहिसमासे कृते न गृह्यते शक्तिर्येनेत्यर्थो निष्काश्यते, शब्दप्रतिपत्तॄणां मध्ये यः प्रतिपत्ता कस्यचिच्छशब्दस्य योऽर्थः, तस्मिन्नर्थे वृत्तिं न ग्रहीतुं शक्नोति चेद्, तस्मै तदगृहीताच्छब्दार्थावगतिर्न जायत इति। **"अत एव च नहि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते इति समर्थसूत्रभाष्यं सङ्गच्छते"**।[71] यदि च गुडशब्दोच्चारणं क्रियते चेन्मधुरत्वस्य प्रकारताविशिष्टबोधो न भवति। व्यवस्थेयं "**समर्थः पदविधिः",**[72] इति सूत्रस्य भाष्यविचारद्वारा प्राप्यते। गम्यते चैवम्भूतः कार्यकारणभावः। यद्यपि गुडशब्दोच्चारणेन गुडरूपार्थप्रतीतिः, गुडरूपार्थप्रतीतौ गुडरूपार्थे वर्तमानं मधुरत्वं ज्ञायमानमस्ति, किन्तु ज्ञानविषयीभूतं तन्मधुरत्वं शब्दजन्यशाब्दबोधविषयत्वं न प्रयाति। अनुमानं व्यञ्जना वा तत्र कारणान्तरमन्वेषणीयम्।

गुडो मधुर इति गुडत्वस्यैव प्रकारत्वं गुडस्य विशेष्यत्वं च न तु मधुरत्वप्रकारको गुडविशेष्यकश्शाब्दबोधो जायते कदाचिदपि। **"यत्र तु गुडो मधुर इति वाक्यार्थे गुड इत्येकदेशः प्रयुज्यते तत्रापि मधुराभिन्नो गुड इत्येव बोधो न तु मधुरत्वप्रकारको गुडविशेष्यकः। ध्वनितञ्चेदम् अन्नेन व्यञ्जनमिति सूत्रभाष्ये"॥**[73]

**वाक्यैकदेशन्यायः-**

कदाचिच्छब्दमात्रस्याप्युच्चारणे तेन समग्रार्थस्य बोधो जायते तत्र किंकारणमिति बोधयति- **"वाक्यार्थबोधनेच्छया वाक्यैकदेशस्यापि प्रयोगः**"। न्यायोऽयं मधुराभिन्नं गुडं बोधयति, अभेदसम्बन्धद्वारा। मधुराभिन्नो गुड इत्येव। यो ह्यभेदसम्बन्धेन मधुरप्रकारकगुडविशेष्यक एव न तु प्रकारत्वावच्छेदेन मधुरत्वस्य भानं न भाव्यते। व्याख्यानमित्थमन्नेन

---

[70] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३०

[71]परमलघुमञ्जूषा शक्तिनिरूपणम्० पृ० १२

[72] अष्टाध्यायी, २०१०१

[73] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३१

व्यञ्जनमिति भाष्ये विद्यते,[74] तस्मात् कस्यचिदपि वाक्यविशेषस्यैकदेशे प्रयुक्तेऽप्यर्थबोधो जायते, अत्र काव्यप्रकाशकारस्य सम्मतिं प्रदर्शयति-

**"यथाक्रियताम् इत्यत्र कर्ता कुरु इत्यत्र कर्म।**

**प्रविश पिण्डीम् इत्यादौ गृहं भक्षय इत्यादि च"॥**[75]

यथा क्रियताम् इत्येकदेशोच्चारणेनैव मया इति सम्पूर्णबोधो जायते। कुरु इति संभाषिते सति कार्यमाक्षिप्यते। प्रविश इति निगदिते गृहं प्रविश, इति बोधो भवति। भक्षय इत्युक्ते पिण्डीं भक्षय, इति बोधो जायते। तथैव 'गुडो मधुरः' इति वाक्यार्थस्य बोधनायेच्छा यदा भवति तदा गुड इति वाक्यांशमात्रप्रयोगेऽपि मधुराभिन्नो गुड इत्येव बोधो भवति। अभेदसम्बन्धद्वारा मधुरेणाभिन्नो गुड इति न तु समवायेन। **"अन्नेन व्यञ्जनम्"** इति सूत्रस्य भाष्ये कथ्यते- **"युक्तार्थसम्प्रत्ययाच्च सामर्थ्यम्, दध्ना युक्तार्थतासम्प्रतिपत्तेः"।**[76] युक्तार्थप्रतीतिमुखेन सामर्थ्यं भवति। दधियुक्तार्थस्य सम्यक्प्रतिपत्तित्वात्। दध्ना युक्तस्योपसेकक्रियारूपपस्यार्थस्य सामर्थ्यमुपपत्स्यते। वाक्यैकदेशन्यायेन दध्ना इति पदद्वारैव दध्युपसिक्त इत्यवबुध्यते। एतेनैव दधिपदार्थस्य करणत्वेनोपसेकक्रियायामन्वयस्तथा चोपसेकक्रियायाः कर्मतयौदनेऽन्वयत्वाद् दध्योदनयोः परस्परं सामर्थ्यं ज्ञायते। एतादृशो वाक्यैकदेशन्याय "**इग्यणः सम्प्रसारणम्"**[77] इति सूत्रस्य भाष्ये पतञ्जलिना न्यगद्यत। "**एवं दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः, पदेषु पदैकदेशान्, वाक्येषु तावद् वाक्यैकदेशान् प्रविश पिण्डीमिति। पदेषु पदैकदेशान् देवदत्तो दत्तः, सत्यभामा भामा। प्रकरणत्वाद्वाक्यैकदेशन्यायोऽप्यचर्च्यत"।**[78] एवम्प्रकारकस्य व्याख्यानस्यावलोकनेन भावयितुं शक्यते यत् कार्यकारणकसिद्धान्ते शाब्दबोधाय कारणदले तद्धर्मावच्छिन्नस्य निवेशो विधेयः।

---

74 अष्टाध्यायी, २/०१/०३३

75 काव्यप्रकाशद्वितीयोल्लासः, पृ० ५६

76 महाभाष्यम्, २/२/३३, पृ० ३७७

77 अष्टाध्यायी, १०१०४५

78 महाभाष्यम्, १/१/४५, पृ० ३४९

विशेष्यविशेषणयोर्विरुद्धत्वेनान्वयो म भवतु तदर्थं कार्यकारणयोः सिद्धान्तो विद्यते।[79] अत्र व्यत्यासस्यार्थो वैपरीत्यमिति तृतीयाया वैशिष्ट्यमित्यर्थः, **"प्रकृत्यादिभ्य उपसङ्ख्यानम्",**[80] सूत्रेणानेन तृतीया, विशेष्यविशेषणयोर्भावः तस्य व्यत्यासद्वारा अर्थाद् वैपरीत्येन येन गृहीता शक्तिस्तादृशस्य। विपरीतां शक्तिं स्वीकृत्य, विपरीतशक्तिगृहीतकस्य पुरुषस्य घटप्रकारकघटत्वविशेष्यक-ज्ञानं जायते। एतादृशं ज्ञानं भ्रमकोटिकमि शास्त्रेषु गण्यते। एवम्भूतं तदभाववति तत्प्रकारकज्ञानस्यैवाप्रमात्वं प्रतिपाद्यते। यदा तु विपरीतशक्तिगृहीतकस्य पुरुषस्य तद्वति तत्प्रकारकं ज्ञानं जायते तदात्वे प्रमात्वेन तत्कथ्यते। तादृशं ज्ञानमेवानुभव इति कथ्यते। तादृशज्ञानाय वृत्तिवैशिष्ट्यं निरूप्यते।

**वृत्तेर्विशिष्टता–**

ज्ञानस्य वृत्तिद्वारैवावगतिस्सञ्जायते। तादृशं ज्ञानं वृत्तिविशिष्टमिति कथ्यते, वृत्तिविशिष्टत्वं च कथमिति प्रतिपादयति -

**"ज्ञाने वृत्तिवैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्य-स्वाश्रयपदविषयकत्वोभयसम्बन्धेन बोध्यम्"।**[81] द्वाभ्यां सम्बन्धाभ्यां वृत्तेर्वैशिष्ट्यं प्रतिपाद्यतेऽत्र। प्रथमं स्वविषयकोद्बुद्धसंस्कार-सामानाधिकरण्यसम्बन्धेन, द्वितीयं स्वाश्रयपदविषयकत्वसम्बन्धेन उभयत्र स्वपदेन वृत्तिर्गृह्यते। यस्य विशिष्टता अपेक्षिता भवति, स्वघटकपदेन तादृशस्यैव ग्रहणं क्रियते। एतस्माद्वृत्तिविषयकोद्बुद्धसंस्कारस्य सामानाधिकरण्यं ज्ञाने भवतु। सामानाधिकरण्येन उद्बुद्धसंस्कारज्ञानयोश्चैकाधिकरणत्वम्। तच्च देशकालरूपत्वम्। देशत्वेन नैयायिका आत्मानः, तथा च वैयाकरणवेदान्तिनावन्तःकरणस्य ग्रहणं कुरुतः। इत्थं ज्ञानसंस्कारौ समवायसम्बन्धेनात्मनि तथा च

---

79 "विशेष्यविशेषणभावव्यत्यासेन गृहीतशक्तिकस्य पुंसः घटपदाद् घटत्वविशिष्टबोधवारणाय तद्धर्मावच्छिन्नेति"। वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३७

80 सिद्धान्तकौमुदी, कारकप्रकरणम्, कर्तृकरणयोस्तृतीयेति सूत्रे वार्तिकसूत्रम्, पृ० १०७

81 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३७

तादात्म्यसम्बन्धेनान्तःकरणे सन्तिष्ठेते, यतोहि ज्ञानसंस्कारावन्तःकरणस्य वृत्तिरूपे भविष्यतः। अन्तःकरणस्य परिणामविशेषो वृत्तिः, अतः परिणामात्मकस्य वृत्तिविशेषस्य परिणामिनाऽन्तःकरणेन सह तादात्म्याख्यसम्बन्धः। स्वाश्रयपदविषयकत्व-सम्बन्धेऽपि स्वपदेन वृत्तिस्तदाश्रयीभूतं यत् पदमर्थाद् वृत्त्याश्रयपदविषयकज्ञानम्। द्वयोश्च फलञ्च किं स्यादिति प्रतिपादयति- एतस्मादेव नागृहीतवृत्तिकानां जनानां शाब्दबोधो जायते। तस्माद्येषु पदेषु तत्तदर्थनिरूपितवृत्तिविषयकं ज्ञानं यदि न भवति। तदा तदर्थविषयकस्य शाब्दबोधो न बुध्यते। तथा च शक्तिग्रहे सत्यपि किञ्चित्कालानन्तरं वृत्तेस्स्मरणम्। वृत्तेर्विस्मरणत्वात् तद्विषय-कोद्बुद्धसंस्कारस्याभावो जायते। तद्विषयकोद्बुद्धसंस्काराभावात् सामानाधिकरण्यस्योपपत्त्यभावे शाब्दबोधावगमनं न स्यादिति प्रथमसम्बन्धस्य निवेशनस्य फलद्वयम्। द्वितीयस्यापि फलम्- नापि तद्वाचकपदमजानतः, बोधविषयकत्वेनापेक्षितपदार्थस्य वृत्तेरुद्बुद्धसंस्कारे सत्यपि यदि तस्य वाचकस्य पदज्ञानं न जायते चेत् तदा वृत्त्याश्रयीभूतस्य पदस्याज्ञाते न शाब्दबोधः। तथा च घटपदस्य श्रावणप्रत्यक्षत्वात् यदि कस्मैचित् पुरुषाय समवायसम्बन्धेन आश्रयतया आकाशस्योपस्थितिर्भवति यद्वा स्ववाच्यघटस्य जनकतात्वेन चैत्रस्योपस्थितिर्भवति। अस्यां स्थितौ चैत्राकाशयोः शाब्दबोधो न सम्पत्स्यते। यतोहि एतयोरवस्थयोः वृत्त्याश्रयपदविषयकज्ञानाभावात्। आकाशादिवृत्तेराश्रयिभूतपदमाकाशादि-रस्त्येव किन्त्वत्र नाकाशमपितु घटपदम्, घटपदत्वात् घटस्य च आकाशनिरूपितवृत्तेरभावात्। एवम्भूतस्य व्याख्यानस्यारम्भः साक्षात्परम्परासम्बन्धावादायाकृत। यतोहि घटपदादाश्रयत्वेनोपस्थिताकाशस्य इत्यत्र समवायसम्बन्धो वृत्तिनियामकसम्बन्धः साक्षादिति कथ्यते। जनकतयोपस्थितचैत्रादिरित्यस्य परम्परासम्बन्धत्वात् साक्षात्सम्बन्धो नास्ति। घटे स्वार्थजनकतया तच्चैत्रादेः कारणता। यतोहि व्याकरणनिकाये पदवाक्ययोर्नित्यत्वात्। न पदस्य जनकता चैत्रादावपितु घटरूपस्यार्थस्यैव जनकत्वं चैत्रादौ। अत्र शङ्कोदेति यत् शब्दानामप्यनित्यत्वं प्रक्रिया पक्षमावहति इति चेत् सत्यम्, अनित्यता द्योतमाना तु दरीदृश्यते। किन्त्वत्र स्थलेऽर्थाच्छाब्दबोधस्थले

वृत्त्याश्रयपदस्यैवाभ्युपगमो विधेयः, स च स्फोटरूपशब्द एव भवितुमर्हति, यस्य नित्यता, द्रव्यता च स्वीक्रियते। अतएव मूले ग्रन्थकृता अनिगद्यत– आश्रयत्वेनोपस्थिताकाशस्य, न तु समवायसम्बन्धेनोपस्थिताकाशस्य, यतोहि द्रव्यरूपस्य शब्दस्य समवायसम्बन्धत्वाभावात्। तस्मादेव महाभाष्यकृत् कथयति- आकाशदेशः शब्दः, न तु आकाशगुणः शब्द इति। आकाशश्च वक्तुर्हृदयाकाश एव, एवम्भूते वक्तुर्हृदयाकाशे एव ध्वनिव्यङ्ग्यस्फोटस्य संयोगसम्बन्धेनाश्रयताभ्युपेया। द्रव्ययोरेव संयोग इति नियमात्। अतो हेतोरत्र पदस्य स्फोटत्वेनैव ग्रहणम्, तज्ज्ञानञ्च श्रावणप्रत्यक्षत्वेन मानसप्रत्यक्षत्वेन वा गृह्यते। स्फोटरूपस्य पदस्य श्रावणप्रत्यक्षता मानसप्रत्यक्षता वा। इत्यस्य प्रमाणत्वेन महाभाष्येऽणुदित्सूत्र इत्यस्य ब्याख्यानावसरे भणितम्- **"उच्चरितः शब्दः प्रत्यायको भवति नानुच्चारितः"।**[82]

एतदाधृत्यैव प्रत्यपादयितुं शक्यते यत् स्फोटस्य श्रावणप्रत्यक्षं मानसप्रत्यक्षं वा जायते। तस्माद्ध्वनिनोच्चारविषयीभूतस्थले स्फोटस्योक्त-प्रकारद्वयात्मकावबोधः सम्भाव्यते। स्मृत्यनुमित्योरभावे शाब्दबोधो न जायते कदाचित्। नैयायिकास्तु तत्रापि शाब्दबोधं मन्वते, किन्तु शब्दशास्त्रे **"एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति"।**[83] एतेन नियमेन पदार्थस्य वाक्यार्थस्य वा स्मृतिद्वारैव सम्भवात्, ध्वनेः सूक्ष्मोच्चारणत्वेनैव स्फोटावगतिस्सञ्जायते यत्र कुत्रापि शाब्दबोधस्य भानं भवतीति सिद्धान्तः।

### परिभाषाद्वारा शक्तिकथनम्–

अनेकैः प्रकारैः शक्तेः परिभाषा दीयन्ते, प्रायशो दार्शनिकेषु शक्तिस्वरूपविचारणायां भेदास्तु दृष्टिपथमायान्ति, ततोऽपि परिभाषाणां सूक्ष्मचिन्तनेन लक्ष्यैकता दृश्यते,कारणमिदं यत् सर्वेऽपि शब्दशक्तेर्ज्ञानं शाब्दबोधायैव मन्वते। मतस्यास्य दर्शनेषु समानत्वमेव। तस्माद्भेदे सत्यपि समेषां विदुषां मतं विद्यते यच्छब्दोऽर्थबोधायैव स्वीक्रियते। तत्र शक्तिः कः

---

[82] "अणुदित्सवर्णस्य चाऽप्रत्ययः"। महाभाष्यम्, १/१/६९

[83] वैयाकरणसिद्धान्तलघुमञ्जूषा, सरला टीका, पृ० ४५

पदार्थ इति चेदत्र दीयन्ते परिभाषाः काश्चन – सूत्रकारस्य मतमादावालोच्यते पदपदार्थयोस्तादात्म्यसम्बन्धत्वेन, सैव पदपदार्थयोः सम्बन्ध एव वृत्तिः। तथाहि "**वृद्धिरादैच्**"[84] "**अदेङ्गुणः**"[85] समानविभक्तिकनिर्देशादेव। अत एव 'नीलो घटः' इत्यत्र तादात्म्यसम्बन्धावच्छिन्नो नीलाभिन्नो घट इति बोधः,[86] तथैव तादात्म्यसम्बन्धेन वृद्धिपदविशिष्ट आदैच इति बोधः। अतस्तादात्म्यसम्बन्धत्वमेव शक्तित्वमित्यायाति। तादृशमेव व्याख्यानमाचार्यपतञ्जलिनाऽपि क्रियते- "**द्वयोरेव सामानाधिकरण्यम्, विशेषणविशेष्ययोर्वा, सञ्ज्ञासञ्ज्ञिनोर्वा, वा इति**"।[87] नागोजिभट्टस्यापि तथैव मतं विद्यते शक्तिस्वरूपप्रतिपादने उद्योतटीकायाम्- "**तादात्म्यमेव शब्दार्थयोः शक्तिरिति**"।[88] वाक्यपदीयकारेणापि तथैव समनुमोद्यते-

**"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैशब्दानां सम्बन्धो योग्यता तथा"॥** [89]

वाक्यपदीयस्य व्याख्यात्रा हरिवृषभेणापि समर्थ्यतेऽत्रविषये- (तादात्म्यमेव)[90] अत्र टीकाकारः कथयति यत् सोऽयमित्यभेदसम्बन्धप्रसिद्धेः शब्दार्थयोरर्थावग्रह-दर्शनमर्थपरिच्छेदरूपोऽर्थाकारः प्रत्ययोऽन्तःकरण-सन्निवेशिनो नादाभिव्यक्तस्य प्रवृत्तौ निमित्तम्। तथा च अर्थाकारबुद्धितः शब्दाकारा बुद्धिरुत्पद्यत इति बुद्धिविषययोरुभयोस्तादात्म्यम्, तादात्म्याच्चार्थस्य कारणता, शब्दः कार्यमिति कार्यकारणभावात्मकः सम्बन्धः प्रतिफलति। "**इन्द्रियविषयवत्तु प्रकाश्यप्रकाशकभावेन विशिष्टानां शब्दानां विशिष्टेष्वर्थेषु नित्यमकर्तृव्यापारसाध्यम्, अव्यभिचरितसाधुभावानां**

---

84 अष्टाध्यायी, १/१/१

85 तत्रैव, १/१/२

86 शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ४

87 महाभाष्यम् नवाह्निकम्, १/१/१

88 तत्रैव, प्रदीपोद्योतः, १/१/१

89 वाक्यपदीयम्, ३/३/३९

90 तत्रैव, हरिवृषभटीका, १/२४/२६

**वाचकानां शब्दानां वाच्येषु योग्यत्वम्"।**[91] शब्दार्थयोर्योग्यतालक्षणसम्बन्धस्तु प्रकाश्यप्रकाशकभावेनेन्द्रियविषयवदिति। तथाह्यानुपूर्विविशेषविशिष्टानाम-व्यभिचरितसाधुस्वभावानाम्=स्वार्थेलोकप्रसिद्धानां गवादिशब्दानां वाचकानां गवादिशब्दानां वाक्येषु जातिगुणक्रियादिविशिष्टेष्वर्थेष्वकर्तृव्यापारसाध्यम्। अत एव नित्यं योग्यत्वम्। आचार्यकौण्डभट्टोऽपि पूर्वाचार्यं भर्तृहरिमेवानुकुरुते।

**"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैश्शब्दानां सम्बन्धो योग्यता तथा"॥**[92]

चक्षुरादीनीन्द्रियाणि स्व-स्वविषयं प्रकाशयन्ति तस्य तस्येन्द्रियस्य तत्र कारणता विषयप्रकाशने समायाति यथा तथैव शब्दानामपि अर्थैस्सह तेषां तादृशी बोधकारणतैव योग्यता। एवम्प्रकारिकाया योग्यताया कथनं शक्तित्वेन कथ्यते। नागेशभट्टोऽपि परम्परामिमां कैश्चित् परिवर्तनैः सह पालयति। स समीचीनयुक्तिभिर्बोधजनकत्वस्य सम्बन्धत्वमेवासम्भावयन् शब्दार्थोभयनिष्ठं वाच्यवाचकभावलक्षणसम्बन्धं शक्तिरूपत्वेन स्वीकृत्य, उक्ततादात्म्यरूपसम्बन्धस्य तद्द्योतकत्वं सिद्धान्तयति। तद्यथा-**"शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वम्"।**[93] तात्पर्यमिदं यत् शाब्दबोधजनकज्ञानस्य विषयभूतयोः पदपदार्थयोः सम्बन्धविशेष एव वृत्तिरिति। आचार्यनागेशभट्टस्य मतम्। नैयायिकास्तु- **"शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा च अस्माच्छब्दादयमर्थो बोधव्य इति ईश्वरेच्छारूपा"।**[94] अर्थादीश्वरेच्छायाः शक्तित्वं नैयायिका संगदन्ति। तस्याश्च सम्बन्धत्वेनैव, पदस्य यो वाच्यार्थस्तेन वाच्यार्थेन यः सम्बन्ध स च शक्तिरूप इति। आचार्यान्नम्भट्टोऽप्यभिदधाति- **"अस्मात्पदादयमर्थो बोद्धव्य इतीश्वर-**

---

[91] "सोऽयमिति शब्दार्थयोः सम्बन्धप्रसिद्धेः नादाभिव्यक्तस्यान्तःकरणसन्निवेशिनः शब्दस्य प्रवृत्तौ कारणम्, अर्थादर्थबोधे कारणम्"। तत्रैव, १/२४-२६

[92] वैयाकरणभूषणसारः, शक्तिनिरूपणम्, का० ३७

[93] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ७

[94] न्यायसिद्धान्तमुक्तावली, शब्दखण्डम्, पृ० ८८

**सङ्केतः शक्तिः"।**[95] मुक्तावलीकारस्यापि तथैव मतं विद्यते। सर्गादावीश्वरेण शब्देषु सङ्केतो व्यधीयत। यदेतस्य शब्दस्य वाच्योऽयमर्थ इति, एतस्मादेव पदानि सङ्केतानन्तरमेव व्यवहारविषयत्वं यान्ति। सङ्केतपूर्वक एव व्यवहार इति न्यायदर्शनम्। यतोह्यत्र सङ्केतस्यैव शक्तिपदेन व्यवहारः। शक्तिरेवेश्वरेच्छा, इच्छामात्रं वा इति न्यायस्य विचारणा। एवम्भूतायाश्च ईश्वरेच्छायाः पदपदार्थयोः सम्बन्धत्वम्। धर्मराजाध्वरीन्द्रस्तु "**सा च शक्तिः पदार्थान्तरम्"।**[96] अस्य पदार्थान्तरस्य व्याख्यानमानन्दझा-महाशयोऽप्य-चिकीर्तत्। "**पदार्थान्तरं नामस्वतन्त्रभूता शक्तिः। न तु न्यायादिमत इव इच्छारूपा"।**[97] वेदान्तिनस्तु शक्तेर्मुख्यवृत्तित्वमेव स्वीकुर्वते। तत्र "**शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः"।**[98] मीमांसकास्तु "**शक्तिः पदार्थान्तरं सा च पदपदार्थयोः वाच्यवाचकभावनियामिका। वैशिष्ट्याख्यसम्बन्धेनार्थनिष्ठा सा शक्तिः, प्रतियोगित्वसम्बन्धेन च पदनिष्ठा"।**[99] साहित्यिकानां मते सङ्केतस्यैव शक्तित्वेन स्वीकारः। सङ्केत ईश्वरेण क्रियते, आधुनिकैर्वा वा। मम्मटाचार्यः काव्यप्रकाशे कथ्यते- "**सङ्केतितश्चतुर्विधः, जात्यादिर्जातिरेव वा"**।[100] तत्र सङ्केतित इति पदे यः क्तप्रत्ययः, स च कर्मणि विहितस्तस्मात् सङ्केतविषयः शक्य इति कथ्यते। साङ्ख्ययोगदर्शनन्तु- "**सा च शक्तिः भेदाभेदरूपा, भेदस्तु तत्रत्यः पारमार्थिकोऽभेदस्तु काल्पनिक एव"।**[101] एतेन परिभाषाविषयकव्याख्यानेन ज्ञायते यत् प्रायशः शक्तिः पदपदार्थयोः सम्बन्धत्वेन स्वीकृता विद्यते। सर्वत्रैव दर्शनेषु शक्तिः कथ्यते तत्र च कारणमिदमेव शक्तिभिर्विना बोधोऽसम्भवी। बोधाभावेऽपारलौकिक्या व्यवस्थाया व्यवहारोच्छेदप्रसङ्गोऽपि स्यादतः सर्वे साम्प्रदायिकाः

---

[95] तर्कसङ्ग्रहः, शब्दखण्डम्, पृ० २४४

[96] वेदान्तपरिभाषा, आगमपरिच्छेदः, पृ० ९८

[97] तत्रैव, पृ० ९८

[98] तत्रैव, पृ० ९८

[99] उद्धृतम्, वैयाकरणसिद्धान्तमञ्जूषा, पृ०६

[100] काव्यप्रकाशः, द्वितीयोल्लासः, पृ० ४२

[101] भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा। पृ० १९२

शक्तीरभ्युपागच्छन्ति। मुख्यं कारणमिदमेव शक्त्यभावेऽर्थज्ञानाभावस्तदभावे समग्रस्य व्यवहारस्य अन्यथानुपपत्तिरेव। तदुक्तं भर्तृहरिणा-

**“न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते”॥**[102]

अतो हेतोः शब्दार्थज्ञानाय शक्तिज्ञानमावश्यकं तज्ज्ञानेन च पदार्थबोधे सति लोकव्यवहारः सङ्गच्छते। यतोहि वैयाकरणैः शब्दज्ञानपूर्वको व्यवहारः स्वीक्रियते। तस्मात् वृत्त्याश्रयज्ञानात्पूर्वं वृत्त्यात्मिका या शक्तिस्तज्ज्ञानमपेक्षत एव।

**शक्तिसम्बन्धत्वप्रतिपादनम्–**

निखिलेऽस्मिञ्जगति ‘कृष्णो गच्छति’ इत्यादिवाक्येभ्यो कृष्णकर्तृकगमनरूपार्थसम्प्रत्ययः, हस्तिघोटकमृगादीनां शब्दानां श्रवणात् परं हस्तिघोटकमृगादिपदबोध्यपदार्थानामेवावबोधो जायते। शब्दानां विशेषार्थस्य बोधकत्वमित्येव नियमः , न सर्वोऽपि शब्दः सर्वार्थप्रत्यायने समर्थो भवति। यथा पटशब्दोच्चारिते सति पटपदार्थस्यैव बोधः सञ्जायते, न तु घटस्य मठस्य वा। तस्मान्निश्चीयते यच्छब्दार्थयोरस्ति कश्चन सम्बन्धः। तत्र भर्तृहरिः प्रतिपादयति- “**शब्देनार्थस्याभिधानेऽनादिसम्बन्धो हेतुरिति। अन्यथा सर्वं सर्वेण प्रत्याय्येतेति”।**[103] शब्दार्थयोः मध्ये यः सम्बन्धस्स नादिरेव सम्बन्धस्यैव शक्तित्वाच्छकतित्वमप्यनादित्वम्, यत्र च प्राथम्यस्य निषेधः तस्यैवानादित्वम्, आदित्वस्याभावादनादित्वं सम्बन्धस्य च नित्यत्वमपि विभाव्यते, प्रयोक्तॄणां व्यवहारेऽलब्धप्राथम्यादपि यतोहि सम्बन्धः पदपदार्थोभयधर्मवृत्तिकः। तस्यानादितत्त्वञ्च शब्दार्थमूलकत्वात्। उक्तञ्च- **“सिद्धे शब्दार्थसम्बन्धे”**[104] इति वार्तिकेन महाभाष्यकृतापि शब्दार्थसम्बन्धानां नित्यत्वं प्रत्यपादि।

---

102 वाक्यपदीयम्, १/१२३

103 तत्रैव, पदकाण्डम्, सम्बन्धसमुद्देशः, पृ० २३५

104 महाभाष्यम्, पस्पशाह्निकम्

**"नित्याः शब्दार्थसम्बन्धास्तत्राम्नाताः महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः"॥**[105]

एतया कारिकया भर्तृहरिः सम्बन्धस्य नित्यत्वमनादित्वं च प्रतिपायति तत्र पाणिनेर्पतञ्जलेश्चाप्यभिप्रायं कथयति यत्तेऽपि मन्वते सम्बन्धस्यानादित्वमनादित्वाच्च नित्यत्वम्-

**"ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपञ्च प्रतीयते।**

**शब्दैरुच्चारितैस्तेषां सम्बन्धः समवस्थितः"॥**[106]

यदा कस्यचिच्छब्दस्योचारणं क्रियते तदात्वे त्रयाणां बोधस्समकालिकत्वेन जायते। तचा किमिति लिखति शब्दस्य स्वरूपमानुपूर्वीमूलकम्, प्रवृत्तिनिवृत्तिविषयकः फलसाधानीभूतोऽर्थः। उच्चारयितुरभिप्रायोऽपि संबुध्यते। तस्माच्छब्दानां प्रयोगेण त्रयाणामर्थानामवगतिर्भवति, एवम्भूतस्य नियमस्य सर्वत्रैव प्रवृत्तिर्भवति वैयाकरणानां मते। पुनश्च भर्तृहरिर्न्यायदर्शनस्य खण्डनं विधत्ते, **"यन्न सामायिकः शब्दार्थयोः सम्बन्धः",**[107] यतोहि नैयायिकैरीश्वरेच्छारूपा, इच्छारूपा वा शक्तिः स्वीक्रियते। शक्तिरेव सङ्केतः, सङ्केतसमययोः समानार्थकत्वं यतोहि "**सामयिकः शब्दादर्थसम्प्रत्ययः"**[108] इति कणादः कथयति। समयश्च सम्बन्धरूप इति नव्यनैयायिका प्रतिपादयन्ति। यथार्थतो दर्शनेन न्यायशास्त्रे सम्बन्धस्य सत्ता एव नास्ति । तदेवोन्मार्ष्टि सम्बन्धसमुद्देशे हेलाराजः- यत् समयस्य सम्बन्धत्वमेव न सिध्यति यतोहि सम्बन्धकर्तुः पुरुषस्याभावादनादित्वमेव। स च सम्बन्धो योग्यतारूपः, कार्यकारणभावरूपो वा तदुक्तमेव– **"इन्द्रियाणां स्वविषयेषु............सम्बन्धो योग्यता तथा"॥** भर्तृहरिकौण्डभट्टाभ्यां च व्याख्यायि योग्यता। सा च योग्यता सामर्थ्यात्मिका। तस्माच्च सामर्थ्यमेव शक्तिः। एतस्मात् सम्बन्धः शक्तिरूपोऽङ्गीक्रियते।

---

105 तत्रैव, ब्रह्मकाण्डम्, का० २३

106 तत्रैव ।

107 तत्रैव, पदकाण्डम्, सम्बन्धसमुद्देशः, पृ० २३६

108 वैशेषिकसूत्रम्, ७/२/१०

एतस्माच्छाब्दिकैर्द्वैविध्यं प्रतिपाद्यते सम्बन्धस्य कार्यकारणभावो योग्यताख्यश्च। केषु स्थलेषु कार्यकारणभावाख्यः, तथा कुत्र योग्यतारूप इति स्यात् तत् प्रतिपाद्यते-

**"वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते।**

**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्"॥**[109]

वक्तुर्व्यापारोऽभिप्रायरूपः, तादृशस्याभिप्रायस्य विषयभूतो यः पदार्थः, स यदा बुद्धौ प्रकाशितो भवति, तदात्वे तु तस्मिन्नेवार्थे शब्दस्य प्रामाण्यं जायते। नार्थस्य तत्त्वनिबन्धनत्वम्, अर्थसत्यत्वप्रयुक्तत्त्वे सत्येव शब्दस्य प्रामाणिकता। एतस्मादेव प्रयोक्तुरभिप्रायेण सह शब्दार्थयोः कार्यकारणभावमूलकः सम्बन्धः, तथा च शब्दार्थयोरध्यासमूलकत्वाच्च स्वरूपेऽर्थेऽर्थक्रियाकारिणीत्याभ्यामर्थ-स्वरूपाभ्यां शब्दस्य वाच्यवाचकभावसम्बन्धः। तात्पर्यमिदं यच्छशब्दस्य आनुपूर्वीरूपं स्वरूपमर्थो वाच्यवाचकभावात्मकः सम्बन्धः त्रितयमपि बुध्यते। एतस्य त्रितयस्य बोधे भानं स्यात् तदर्थमेव तयैव रीत्या काव्यप्रकाशकारस्यापि। काव्यप्रकाशेऽन्विताभिधानवादस्य मतोपस्थापने शब्दार्थयोस्सम्बन्धं प्रमाणत्रयद्वारा निश्चाययति-

**"शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति।**

**श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥**

**अन्यथाऽनुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्।**

**अर्थापत्त्याऽवबोधेत सम्बन्धं त्रिप्रमाणकम्"॥**[110]

अत्रायमभिप्रायः- बालकः पूर्वं प्रयोजकवृद्धोच्चारितं शब्दं शृणोति, तदनन्तरं प्रयोज्यवृद्धेन क्रियमाणं घटानयनादिरूपं कार्यं दृष्ट्वा अनुमानं करोति। अयं प्रयोज्यवृद्धः प्रयोजकवृद्धोच्चारितवाक्यजन्यज्ञानवान्, तादृशचेष्टादिमत्त्वात्। एवञ्च प्रयोजकवृद्धोच्चारितवाक्ये तादृशीं वाक्यार्थ-प्रतीतिमनुमानेन निश्चित्य, तदनन्तरं वाक्यवाक्यार्थयोः सम्बन्धमर्थापत्ति-

---

[109] तत्रैव, २३७

[110] काव्यप्रकाशः, पञ्चमोल्लासः, पृ० २२२

प्रमाणेन निश्चिनुते। तथाहि यद्यस्य वाक्यस्य अनेन वाक्यार्थेन सह सम्बन्धो न स्यात्, तदा तद्वाक्येन तादृशवाक्यार्थप्रतीतिर्न स्यादिति। पश्चादवापोद्वापाभ्यां शब्दार्थयोः सम्बन्धोऽपि निश्चीयते। तस्मात् प्रमाणत्रयेण शब्दार्थयोः सम्बन्धः सिद्धः। स च सम्बन्धः शक्तिरूप इति। **"शक्तिश्च वाच्यवाचक-भावापरपर्याया"**[111] इति तादात्म्यसम्बन्धावच्छिन्ना जायते। नान्यः सम्बन्धः कश्चिदपि सम्भाव्यते शब्दार्थयोर्मध्ये। संयोगसम्बन्धमपि न भावयामः। तस्य द्रव्यमात्रवृत्तिकत्वात्, न्यायदर्शने शब्दो द्रव्यं न, वैयाकरणनयेऽपि शब्दार्थयोर्भेदाभावेन[112] संयोगस्य सर्वथाऽसम्भवात्। शब्दार्थयोरभेदं प्रतिपादयति, हिन्दी महा- कविः तुलसीदासः स्वकीयरामचरितमानसे।[113] किन्तु अभेदसम्बन्धोऽपि न सम्भवति शब्दार्थयोः, अग्निशब्दोच्चारणे सति मुखे दाहाद्यापत्ति स्यात्। पतञ्जलिस्तु तु अभेदसम्बन्धमेव एव न स्वीकरोति, अत एव **राहोः शिरः**, इत्यादीनां षष्ठ्याः सिद्धये क्षणिकभेदस्य कल्पनां करोति। सत्यभेदसम्बन्धेऽपि षष्ठीति सूत्रेण षष्ठेस्सिद्धत्वात्। तत्र क्षणिकभेदकल्पना व्यर्थैव स्यात्। एतस्मादेव वाक्यपदीये प्रतिपाद्यते–

**"अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते।**

**योगस्शब्दार्थयोस्तत्त्वमित्यतोव्यपदिश्यते"॥**[114]

तञ्च च सम्बन्धं तत्त्वविदः वृत्तिरित्याचक्षते।[115] वृत्तिरेव शक्तित्वम्। सा च वृत्तिश्च पदेन सह पदार्थस्य सम्बन्धरूपैव। **"अर्थे वर्तते शब्दो यया सम्बन्धव्यक्त्या सा वृत्तिः। वृतु वर्तने इति धातोः करणे क्तिन्। एवञ्चोक्ते सम्बन्धे वृत्तिपदस्य योगरूढिशक्तिरत्यनुकूला"।**[116] या च बोधं कारयति व्यवहारविषयागतानां शब्दानामर्थानां सैव पदपदार्थसम्बन्धविशेषा

---

111 परमलघुमञ्जूषा, पृ० १२

112 "अत एव अर्थवदधातुरप्रत्ययः प्रतिपदिकम्, इति सूत्रे अर्थी इति निर्देशो न कृतः पाणिनिना, अन्यथा शब्दार्थयोर्भेदे तु अर्थाच्चाऽसन्निहिते इत्यनेन इनि प्रत्यये सति अर्थवदिति निर्देशाऽसङ्गतिः स्यात्"।

113 "गिरा अरथ जल बीचि सम कहियत भिन्न न भिन्न, बंदउ सीताराम पद जिन्हहि परम प्रिय खिन्न"॥ रामचरितमानसः, बालकाण्डम्, दोहा, १८

114 तत्रैव, पदकाण्डम्, सम्बन्धसमुद्देशः, पृ० २४४

115 भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, पृ० १८५-१८६

116 शब्दशास्त्रीयवृत्तिविमर्शः, पृ० २

वृत्तिरित्यमन्यत। शक्तिराश्रयतासम्बन्धेन पदे तिष्ठति, तथा च निरूपकता सम्बन्धेनार्थे तिष्ठति इति वैयाकरणानां सिद्धान्तः। सा च शक्तिर्वाच्यवाचकभावाखण्डोपाधिस्वरूपा एवाभ्युपेयते। शक्तिर्वृत्तिपदेना-भिधीयमाना भवति लोके सामान्येन विशेषेण तस्या एव कथनं शक्तित्वेन जायते। उक्तञ्च- शाब्दबोधानुकूलपदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्धविशेष एव वृत्तिः। शाब्दबोधानुकूलो यः पदार्थः तादृशस्य पदार्थस्य ज्ञानं तस्य जनकः पदपदार्थयोः मध्ये लब्धसत्ताकः सम्बन्ध इति, सैव शक्तिरिति। आचार्यरामप्रसादत्रिपाठिना प्रत्याय्यते यदत्र **"पदपदार्थयोः सम्बन्धविशेषत्वमेव वृत्तिरिति"।**[117] वृत्तेरेवाभिधानं शक्तिशब्दव्यापरादिपदेन जायते। रत्नप्रभाटीकाकारोऽपि प्रतिपादयति यद्वृत्तिपदव्यवहार्यत्वम्, पदपदार्थोभयनिरूपित-सम्बन्धत्वम्। **"अयमेव सम्बन्धः शक्तिपदेनोच्यते"**[118] इति। वृत्तेर्लक्षणद्वयं प्रदर्शयति। एवं रीत्या वृत्तेः सम्बन्धत्वं प्रत्यपादि। अग्रे च तत्तच्छास्त्रमनुश्रित्य शक्तेः स्वरूपं सम्बन्धत्वञ्च प्रतिपादयिष्यते।

**"शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धत्वं वृत्तित्वम्"।**[119] शाब्दबोधजनकस्य ज्ञानस्य विषयीभूतयोः पदपदार्थयोर्मध्ये यः सम्बन्धः सैव वृत्तिद्वारा समभिधीयते। वैयाकरणाचार्याणां मध्ये नागोजिभट्टस्य कथनं विद्यते यच्छक्तिसम्बन्धयोर्भिन्नत्वमेव, तस्य मतेन च वाच्यवाचकभावात्मिका-ऽखण्डोपाधिस्वरूपाशक्तिः स्वीक्रियते। तस्याश्च शक्तेर्नियामकस्तादात्म्याख्यः सम्बन्ध एव सम्भवति। **"तद्ग्राहकश्चेतरेतराध्यासमूलकं तादात्म्यम्"।**[120] तस्मादनेन व्याख्यानेन शक्तिसम्बन्धयोर्भेदस्तु स्पष्ट एव। वैयाकरणा अपि शक्तिसम्बन्धयोरेकतां प्रतिपादयन्ति, तत्तूपचरितत्वादेव- **"तस्यापि पदनिष्ठशक्तित्युपकारकत्त्वाच्छक्तिरिति व्यवहारः"।**[121] एवं रीत्या शक्तिसम्बन्धयोरेकत्वं व्याकरणदर्शने वैयाकरणैर्व्यधीयत। सामान्यतः शक्ति

---

117 शब्दशास्त्रीयवृत्तिविमर्शः, पृ० १

118 वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविषयकविचारः, पृ० २२

119 वैयाकरणसिद्धान्तलघुमञ्जूषा, सरलाटीका, पृ० ४८

120 तत्रैव, पृ० ६०

121 तत्रैव, पृ० ६०

सम्बन्धयोरभिन्नतां मन्वते विद्वांसः। ताश्च तिस्त्रः व्याकरणदर्शने नागेशाचार्येण व्याख्याता विद्यन्ते। अभिधालक्षणाव्यञ्जनाभेदात्।

**वैयाकरणनिकाये वेदान्ते च व्यावहारिकशब्दस्य विमर्शः-**

वैयाकरणवेदान्तिभ्यां शब्दतत्त्वस्य परब्रह्मात्मकं सूक्ष्मं स्वरूपं विश्लिष्य व्यवहारविषयभूतस्य शब्दस्यापि सम्यक् प्रतिपादनं क्रियते, प्रश्नो भवति किमर्थं व्यवहारविषयीभूतस्य शब्दस्य मीमांसां मीमांस्येत्। ज्ञातायां सत्यां विचारे क्रियमाणे सति विज्ञायते यत् लौकिकस्य व्यवहारस्य सञ्चालनायार्थबोधस्स्यात्, अर्थबोधश्च शब्दैरेव सम्भवति नान्यः पन्था विद्यते। महर्षिपतञ्जलिः महाभाष्ये विमर्शपूर्वकं सम्प्रत्याययति विषयममुम्। शब्दोऽर्थस्य निमित्तं भवत्यतोऽर्थः शब्दस्य निमित्तं भवति, एवम्भूतं प्रश्नं समुत्थाप्य अर्थमेव शब्दानां निमित्तत्वेनाङ्ग्यक्रियत यतोहि अर्थस्य समवगत्यै एव शब्दस्य प्रयोगो विधीयते।[122] आचार्यपतञ्जलेरेवम्भूतं शब्दविषयकं चिन्तनमष्टाध्याय्याः **"आख्यातोपयोगे"**[123] इति सूत्रे न्यागादि, ज्ञानमेव शब्दरूपतामेति[124] आचार्यभर्तृहरिरपि प्रकारान्तरेणैवम्भूतां वार्तां प्रस्तौति, एतन्मते सूक्ष्मवाणीत्वेनान्तःकरणे संस्थितं सदान्तरो ज्ञाता स्वरूपाभिव्यक्तये शब्दत्वेन परिणमते।[125] अत्राप्येभिः ज्ञानस्यैव शब्दत्वापत्तिः प्रादर्श्यत।[126]

लौकिकव्यवहारे 'अयं गौः' 'अयं शुक्लः' एवम्प्रकारेण शब्दार्थयोरभेदेन व्यवहारो भवति, पुनरियं समस्या समापतति यदेतस्मिन् विज्ञाने प्रतिभासमानानां वस्तूनां मध्ये शब्दाभिधेयता कस्य, तदा शब्दानुशासनस्य महाभाष्यीये व्याख्याने महर्षिपतञ्जलिः समाधत्ते- यज्जाति-गुण-क्रिया-द्रव्यातिरिक्तं तत्त्वं विद्यते, कस्तर्हि शब्दः, यस्य शब्दस्योच्चारणेनार्थादुचारितप्रकाशितेन सास्नालाङ्गूलादिविशिष्टस्य

---

122 "युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात्। नार्थनिमित्तकेन नाम शब्देन भवितव्यम्, अर्थनिमित्तक एव शब्दः"। महा०भा०पस्पशा०, पृ० ६९

123 अष्टा०, १/४/२९

124 "ज्योतिर्वज्ज्ञानानि भवन्ति"। महा०भा०, १/४/२९

125 "अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः। व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते"॥ वा०प०, १/११२

126 "वायोरणूनां ज्ञानस्य शाब्दात्तिरिष्यते"।

पिण्डवतः पदार्थस्य सम्प्रत्ययो भवति।[127] शब्दस्य परिभाषाया ज्ञापनात् परमसौ शब्दस्य स्वरूपाभिधायकमपरमपि वाक्यमुदधरत्, यल्लोके अर्थस्य प्रतीतिकारिका ध्वनयोऽपि शब्दपदेनाभिधीयन्ते, शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवकः

इत्येवम्भूतो व्यहारः शब्दं कृतवते क्रियते तस्माद् ध्वनिरपि शब्दः।[128] भाष्यकर्तुरभिप्रायं स्पष्टयता नागेशेनोक्तं यल्लोकव्यवहारकर्तॄणां मधे पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रियेन्द्रियत्वेन ग्राह्यमाणो वर्णरूपो ध्वनिसमूहश्शब्दः।[129]

प्रतीतपदार्थकशब्दस्य महत्त्वमभिदधाति यद् आत्- ऐच्- टि-घु-भ- इत्यादीनां प्रतीतपदार्थकत्वं नास्ति किन्तु पशु-अपत्य-देवता-आदिशब्दाः प्रतीतपदार्थकाः शब्दाः, तस्मात् प्रतीतपदार्थकः इति पदस्याभिप्रायः ये स्पष्टार्थवन्तो भवेयुस्त एव।[130]

महाभाष्यस्य दीपिकाटीकायामाचार्यभर्तृहरिः सम्प्रत्यायति पक्षत्रयम्-

१- केचन जना मन्वते यत् ध्वनिसमूहस्य पृष्ठे निमिलिता बुद्धौ विद्यमाना विशिष्टा शक्तिरेव शब्दः, यस्मादर्थप्रतीतिः भवति।
२- द्वितीये मन्यन्ते यच्छब्दो जातिः, शब्दजातिरेव स्फोटः, वृक्षादिभिश्शब्दैवृक्षत्वादीनां जातीनां प्रतिपत्तिर्भवति।
३- तृतीये मतायन्ते तच्छक्तिद्वयी हि शब्दे, येन आत्मप्रकाशनम्, अर्थप्रकाशनं च जायते, उभाभ्यां शक्तिभ्यां शब्दस्यात्मप्रकाशनमर्थप्रकाशनं च दीपवद्भवति यथा दीपेन स्वस्वरूपं तथा च बाह्यवस्तुनोऽपि प्रकाशनं क्रियते।[131]

अत्रत्येन भर्तृहरिदर्शनेन व्यचार्यत यत् तस्यैव शब्दता विद्यते येनार्थस्य प्रतिपत्तिः स्यात्, यदि शब्दानामर्थबोधनसामर्थ्यं न क्वचित्तेन तेषाञ्च शब्दतैव

---

127 “येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः”। महा० भा० पश० पृ० सं० ११

128 “अथवा प्रतीतपदार्हको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवमिच्यते/ तस्माद्ध्वनिरेव शब्दः”। महा०भा० पस्पशा०, पृ० १२

129 “लोकव्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्दः”। तत्रैव, प्रदीपोद्योतः पृ० १२

130 व्याकरणतन्त्रस्य काव्यशास्त्रे प्रभावः० पृ० ५०

131 महा० भा० त्रिपादी टीका पृ० ४

न भवत्येव। आचार्यभर्तृहरिरपि वाक्यपदीये स्वतन्त्ररूपेण समर्थयति यच्छब्दो बुद्धिस्थभावानामभिव्यञ्जकः, आचार्य-भर्तृहरिस्स्वीकुरुते यच्छब्दः प्राणबुद्ध्योरधिष्ठितः, प्राणबुद्ध्योरभिव्यज्यमानाच्छब्दादर्थ-प्रतीतिः, शब्दो बुद्धिस्थितं भावमभिव्यनक्ति, समभिव्यज्यमानो भाव एवार्थः।[132] अर्थगत्यर्थ एव शब्दप्रयोगो व्यवहारे, तस्माच्च अर्थवति निखिले संसारे सर्वविधव्यवहाराणां सञ्चालनं शब्दैरेव, यदि शब्दाख्या परमज्योतिर्न स्यात्तदानीन्तने जागतिकव्यवहाराणां सञ्चालनाभावे निष्क्रियं सज्जगत् प्रवृत्तिनिवृत्तिविरहितं सद्राजेत, तस्मात् अर्थानां प्रवृत्तौ कारणमुयान्तश्शब्दाः संसारस्यैतदीयस्थस्य प्राणिनां प्रवृत्तिनिमित्तका निवृत्तिनिमित्तकाश्च भवन्ति। शाब्दिकानां सिद्धान्त एव सर्वविधमपि ज्ञानं शब्दैरेवावभासते,कश्चिदपि प्रत्ययो नास्तीह संसारे येन प्रत्ययेन शब्दास्यानुगमनं न क्रियते, तस्माच्छब्दपूर्वको व्यवहारो वैयाकरणानामिति सिद्धान्तः प्रतिफलति। अन्येषामपि दार्शनिकानां मतेऽपि शब्दस्य कारणतोपेयत एव, तद्विना तु बोधासम्भवि। शब्दस्य किं स्वरूपं स्यात्, ध्वनिरूपम्,वर्णरूप, पदरूप, वाक्यरूपम्, एवम्भूतेषु स्थलेषु कदाचिद्वैमत्यं भवितुमर्हति किन्तु अर्थप्रत्यायने समेषामेक्यमेव।

वेदान्तिनोऽपि शब्दस्य व्यावहारिकं स्वरूपं मन्वते यतोहि सर्वमपि शास्त्रं शब्दनिबन्धनं भवति। शब्दनिबन्धनत्वादेव वेदान्तिकैरपि शब्दस्य सत्ता व्यवहारसञ्चालनाय स्वीक्रियत एव। शब्दैर्विना शास्त्राणां रचनैव न स्यात्, शास्त्राभावे दार्शनिकचिन्तनपि न स्यात्। अतश्शास्त्राणां सत्तैव शब्दमूलिका, शब्दवद्भिश्शास्त्रैश्च समेषां दार्शनिकानां सर्वे प्रवादा अर्थमुखेन जनेभ्यः प्रदीयन्ते। निष्कर्षतो व्यवहारे शब्दानां स्वीकृतित्वस्त्येव।

व्याकरणदर्शनस्य पारमार्थिकस्य शब्दस्य व्यख्यानं पूर्वमेव विहितं ततोऽपि प्रसङ्गत्वात् विधीयते वैयाकरणपक्षः। येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।[133] एतेवम्भूतेन महाभाष्यीयेन लक्षणेन शब्दस्यार्थबोधकत्वात्, अर्थबोधकत्वं शब्द-सामान्यलक्षणम्।तस्मादेवं निसचीयत ययेन व्यवहारनिबन्धनोऽर्थप्रत्ययः स शब्दः। स चार्थप्रत्ययः कदापि वर्णैर्न जायमानो दृश्यते। तस्मादेव वाक्यपदीयकारः प्रतिजानीते—

---

[132] "तस्य प्राणे च याशक्तिर्या च बुद्धौ व्यस्थिता।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते"। वा०प०, १/११७

[133] महा० भा० पस्पशा०

अर्थस्य प्रवृत्तेस्तत्त्वानि शब्दाः एव भवन्ति, बुद्ध्यारूढा अप्यर्थाश्शब्दैर्विना न प्रकाश्यतां नोपयन्ति तेषां च शब्दानां साधुज्ञानमर्थात् तात्विकज्ञानं व्याकरणमन्तरेण न सम्भवति।[134] गोघटपटादयो जागतिकाः पदार्थाश्शब्दानामाकृतावुपनिद्धाः सन्त एव व्यवहारविषयता-मुपगन्ति।[135] तस्माद्बहुभिः प्रमाणैरभाव्यत यच्छब्दा एव अर्थं प्रत्यायने समर्थाः, यदि शब्दा न स्युः तदानीन्तने तु तदाकृतावुपनिबद्धा अर्थजातयो गोघटमठादयो व्यवहाराविषया भवेयुः। पूर्वोक्तार्थो वर्णैर्न भवितुमर्हति तथाहि शब्दनित्यत्वदिनां मते वर्णानामशुविशाशित्वान्न कारयितुं शक्यतेऽर्थबोधस्तस्माद्वर्णैरर्थावबोधाशाविरहितास्सन्तो वैयाकरणा अर्थावबोधजनने समर्थं वर्णैरतिरिक्तं शब्दं स्फोटाख्यमभिमन्यन्ते। अर्थस्फोटनहेतुतया स्फोटः, ध्वनिव्यङ्ग्यतया वा स्फोटः। एवम्भूतः स्फोट एव शब्दपदेन गृह्यते स च स्फोटो नित्यः, एकोऽखण्डश्च व्याकरणैः सिद्धान्तितः तच्च वैयाकरणानां मते पारमार्थिकशब्दस्य स्वरूपविचारणायामानादिनिधनं ब्रह्म इत्यादिभिः बहुभिःशास्त्रीय समुद्धरणैर्व्यचारि।

अत्र व्यवहारे ध्वनिभिरभिव्यक्तिस्वीकारेण स्फोटस्य सदावर्तमानतया सर्वादिकशाब्दबोधो न भवति, स्फोटाभिव्यञ्जकध्वनिष्वपि शब्दप्रयोगो भवति, तस्मान्महाभाष्यादिप्रमां सङ्गच्छते द्विधात्वे शब्दानाम्। स्फोटातिरिक्ता अपि ध्वन्यात्मिका शब्दानां प्रतिपत्तिः। ध्वनिव्यङ्ग्य एव शब्दः, ध्वनेस्तु शब्दव्यपदेशस्तादर्थ्यात्, यथा दण्डादिसंयोगद्वारा भेर्यादिषूत्पद्यमाना ध्वनयः उच्यन्ते श्रोत्रेण च गृह्यन्ते तथैवताल्वादिभिर्वायुसंयोगादुत्पद्यमाना वर्णात्मकाः शब्दा अपि ध्वनय एव श्रोत्रेण गृह्यन्ते, तस्माद् ध्वनिव्यङ्ग्यः स्फोटोऽर्थप्रत्ययवशादनुमीयमानो निरवयवः क्रमरहित एक अभ्युपगम्यते।

संसारे हि शब्दादर्थं प्रतिपद्यामहे इति व्यवहारो भवत्येव, एतेनैव व्यवहारेण स्फोटस्य सिद्धिः, वर्णानामर्थबोधहेतुत्वेनास्ति शब्दादित्येकवचनप्रयोगोपत्तिः। स्फोटस्य चाभिन्नतया भवत्येवैकत्वव्यपदेशसामञ्जस्यम्। आचार्यभर्तृहरिराह शब्दस्य विषये वाक्यपदीयेऽत्र व्याकरणसम्मतस्य शब्दस्य स्वरूपविचारणा व्यचार्यत-

---

[134] "अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्। तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते"॥ वा०प०, १/१३

[135] "यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः। तथैव लोकेविद्यानामेषा विद्यापरायणम्"॥ वा०प०, १/१५

**"द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**

**एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते"॥**[136]

यच्छब्दविदः उपादानशब्देशु द्वौ शब्दौ विदुः एकः शब्दानां निमित्तम्, अपरः अर्थे प्रयुज्यते, एवमन्वयेन वैयाकरणाः शब्दशास्त्रस्य वेत्तारो वाचकशब्देषूपादानशब्देशु वा द्वावन्यौ शब्दौ भवतः एकः शब्दानां निमित्तं यन्निमित्तं तदेव स्फोटः, द्वितीयश्च स्वरूपार्थे प्रयुज्यते।[137] तदित्थम्- प्रत्येकं वाचकः शब्दः त्रिशब्दानां समुदायो भवति, वाचकोऽथवाभिधानशब्दः, द्वितीयश्च स्वरूपार्थोऽभिधेयो वा, तृतीयश्च निमित्तशब्दः। अत्रोपादनशब्दस्य व्याख्यानं महत्त्वपूर्णं विद्यते, स्वरूपं वाह्यार्थं निमित्तञ्च शब्दं स्वात्मनि संहृतत्वादेवोपादान इत्यवबुध्यते, उपादानानुपादानयोरुपादनस्यैव ग्रहणं भवत्वेतदर्थमुपादनग्रहणम्। अत्रत्यव्याख्याने वृषभाचार्यस्य मतमिदम्- उपादानोऽथाद्वाचकः, यस्योचारणसमनन्तरमेव द्वौ शब्दौ लक्ष्येते, शब्दस्य अवधारणा स्वरूपस्य च अवधारणा,, एतयोर्द्वयोः कार्ययोर्दर्शनादेव एतद्भेदानुमानं क्रियते। एकः शब्दः प्रतिपादकस्य निमित्तमपरश्चार्थ-प्रतिपत्तेर्निमित्तम्।[138] प्रकारान्तरेण शब्दस्वरूपस्यावधारणा, अर्थस्याव-धारणा, शब्दस्वरूपस्य अर्थद्वयं शक्यते, स्फोटं पदञ्च, अर्थस्यापि द्विधात्वम्, स्वरूपार्थो बाह्यार्थश्च।

**उपादानः –**

**"उपादीयते येनार्थः, स्वरूपेऽध्यारोप्यते, तद्भावमिवापद्यते स उपादनशब्दः"।**[139] येनार्थो गृह्यते शब्दस्वरूपेऽर्थाकारसङ्क्रान्तिरूपोऽध्यारोपो वा,अर्थात् तद्रूपतायाः प्रतीतिः कार्यते, स उपादान शब्दः। प्रतिसङ्क्रान्तोऽर्थात्

---

136 तत्रैव, १/४४

137 "अर्थे प्रयुज्यते एतदर्थोऽर्थविबोधनाय प्रयुज्यते, अर्थाद्वाचकः शब्दः, एवम्भूतेन व्याख्यानेन शब्दानां द्विधात्मिति कैश्चित्"। वा०प० १/४३ पृ० २०८ , हिन्दी टीका०, डॉ०शिवशङ्कर अवस्थी

138 "प्रतिपादकस्यैकः शब्दो निमित्तम्। अपरस्तु अर्थप्रतिपत्तेः"। वा०प०, १/४३ वृत्तिः, पृ० २०९

139 तत्रैव, पृ० २०९

प्रतिबिम्बितो विद्यतेऽर्थाकारो यस्मिन्, एवम्भूतस्य शब्दस्योच्चारणं कुर्वन् प्रयोक्ता एवात्र प्रयोजकः, आपद्यते इत्यस्य णिजन्तप्रयोगत्वात्।

सङ्ग्रहाभिधे ग्रन्थे आचार्यव्याडिना न्यगद्यत विषयस्यैतस्य व्याख्यानं तत्र व्युत्पत्तिपक्षमव्युत्पत्तिपक्षञ्चादाय तत्रादावव्युत्पत्तिपक्षः- स्वरूपार्थस्य संहृतत्वादर्थस्य वाचकाः रामकृष्णादयः शब्दा उपादाना भवन्ति। अर्थस्य बोधे वाचकस्य शब्दस्य स्वरूपमेव निमित्तं भवति, स्वरूपात्मकनिमित्तस्यास्तित्वं शब्देषु विद्यमानं भवति।[140]

द्वितीये व्युत्पत्तिपक्षेऽपि गौरित्येतस्य शब्दस्य विशिष्टं गमनम्, गोजातिरूपस्यैकस्यार्थस्य समवायिस्वरूपार्थनिमित्तस्य स्वरूपेऽपेक्षितं भवति, एवम्भूता वार्ता एव सङ्ग्रहे स्पष्ट्यक्रियत। तात्पर्यमिदं यत् पूर्वपक्षे स्वरूपात्मकशब्द एव निमित्तमुत्तरपक्षे च विशिष्टस्य गमनरूपार्थस्य निमित्तत्वम्।[141]

उपादानस्य विचारेऽपरेपि पक्षाः सन्ति तत्र द्योतकत्वविचारो विधीयते। उपादानशब्दस्यार्थो द्योतक इत्येके, इति वृत्तावुपादानस्यार्थो द्योतकत्वाङ्गीकारेण सोऽयमित्यभेदव्यपदेशाद् द्वयोरभेदसम्बन्धस्योपयोगः सम्भवति। वाच्यवाचकभावसम्बन्धस्तु भेद एव, अर्थस्य प्रतिबिम्बो यत्र भवति, तादृशः शब्दः स्वाभिन्नव्यपदिश्यमानस्तथा च व्यङ्ग्यार्थस्य द्योतकः सङ्केतको वा न तु वाचकः। एतेषां मते द्वयोरपि पक्षयोरुपादानस्यार्थो द्योतक इत्येव।[142]

अपरोऽपि पक्षो विद्यते- प्रकरणेऽस्मिन्नुपादेयो ग्राह्यसमुदायो वा उपादानो यतोहि स्वरूपार्थवत्सु शब्देषु शब्दावयवा अनुपादेयाः, अतोऽत्र विभागानामर्थाद्वर्णानां पृथक्प्रतिपत्तिर्न भवति। **"अग्नेर्ढक्"** गौरित्ययमाह इत्यादिषु स्वरूपमात्रस्यावबोधो जायते, तत्र वर्णानां ग्रहणमभीष्टं न यतोहि तैर्न किमपि कार्यं संसाध्यते प्रत्ययस्योत्पतिरग्निशब्दावयवैर्न भवति।[143] तस्माद् द्वावुपादानशब्देष्विति कारिकायां प्रयुज्यमानस्याभिधानस्य- अभिधेयस्य- निमित्तशब्दस्य संहृतत्त्वादुपादान इति निगद्यते।

---

140 "एवं हि सङ्ग्रहे पठ्यते वाचक उपादानः स्वरूपवानव्युत्पत्तिपक्षे"।

141 "व्युत्पत्तिपक्षे तु अर्थावहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्मणि प्रयोजकम्"। तत्रैव, पृ० २०९

142 "उपादान इत्येके। सोऽयमितिव्यपदेशेन सम्बन्धोपयोगस्य शक्यत्वाद् इति"। तत्रैव

143 "उपादेयो वा समुदाय उपादानः। तथाहि स्वरूपपदार्थकेष्ववयवानामनुपादेयत्वाद् विभागानामप्रतिपत्तिः"॥ तत्रैव

पुनरेको निमित्तं शब्दानामित्येतस्य व्याख्याने एकः शब्दानां निमित्तं यत्र स्थितं सद्, यदाश्रयं वा स्वीकृत्य, यस्याधारेण पदं वाक्यात्मिक्यः श्रुतयः इत्येवं प्रत्याय्यम् अर्थात् सम्बोध्यमर्थं प्राप्नुवन्ति तासामधिष्ठानं निमित्तं भवति एतच्च स्फोटात्मकस्य संहृतक्रमस्य शब्दस्यातिरिक्तं किमपि नास्ति।[144] हेलाराजः सम्यक् प्रकारेण तृतीयकाण्डस्य वृत्तिसमुद्देशस्य  शब्दप्रभायां व्यस्तारयत्-

**“यो य उच्चार्यते शब्दः स स्वरूपनिबन्धनः।**

**यथा तथोपमानेषु व्यपेक्षा न निवर्तते”॥**[145]

एतस्याः कारिकाया व्याख्यानमुपस्थापयतीत्थम्।  ताल्वादिकरणेषु सन्निविष्टः क्रमयुक्तः शब्दो वाचको भवति। आचार्यद्वारा उच्चरितम् 'अन्तोदात्तमिति शब्दं पठ' वाक्येऽमिन्नग्निशब्दः वाचकः। किन्तु  यादत् स शब्द उपाधिहीनो भवति, तावत् तस्मिन् वाचकता न जायतेऽतः सः अक्रमं स्वरूपमेवोपधिं निर्माय तमेवाश्रयते। एतच्च द्वावुपादानशब्देषु इत्यत्र यदधिष्ठानमाश्रयं वा समाश्रित्य  श्रुतयः पदं वा प्रत्याय्यमर्थं  प्राप्नुवन्ति, तदेव संहृतक्रमं स्वरूपमस्याभिधेय इति भवति। स्वरूपोपरञ्जितमर्थं शब्दः कथयतीति पूर्वमेव निर्णीतम्।  तत्र स्वरूपोपरञ्जितः करणसन्निवेशी शब्दः यदा वाचको भवति तदा प्रयोगस्थः स एव शब्दः  वाच्यस्वरूपमित्युच्यते। सोऽपि यदा करणेषूपारूढो भवति तदापरस्य वाच्यस्य कल्पनं क्रियते, यः संहृतक्रमो भवति, इत्थं सर्वत्रैव शब्दस्य त्रितयत्वान्वयो जायते तत्रादौ निमित्तः द्वितीयश्च निमित्तवान्, तृतीयश्च अभिधेय इति। [146] उपादानस्य त्रितयत्वसमर्थनमनेनाभाव्यताभिधानाभिधेयनिमित्तत्वेनेति। अपरोऽर्थे प्रयुज्यते इत्येतस्य  उपादानशब्दे  विद्यमानोऽपरो शब्दोऽर्थस्य स्वरूपे प्रयुज्यतेऽर्थात् स्थानकरणादीनामभिघातैः यः पूर्वं शक्तिरूपे विद्यमान आसीत्, स अभिव्यज्यते। स च यदा श्रोतुः  कर्णयोर्विषयतां याति तदा

---

[144] यदधिष्ठाना यदुपाश्रया श्रुतय प्रत्याय्यमर्थं प्रतिपद्यन्ते तस्य निमित्तत्वम्। तत्रैव, पृ० २११

[145] वाक्यपदीयस्य शब्दप्रभावृत्तिः, तृतीयं काण्डम् ।

[146]“इह करणसन्निवेशी परिगृहीतक्रमः शब्दः वाचकोऽग्निमन्तोदात्तमधीष्वे’इति। तस्य च निरुपाधेर्वाचकताऽयोग इति स्वरूपक्रममुपाधित्वेनासावाश्रावयति। तथा च यदधिष्ठानाः श्रुतयः प्रत्याय्यमर्थमभिनिवेशन्त’ इति ब्रह्मकाण्डेऽभिहितम्। तदेव च संहृतक्रमं स्वरूपमस्याभिधेयमत्रार्थमपि स्वरूपच्छुरितं शब्दो वक्तीति निर्णीतचरम्। तर करणसन्निवेशिनः स्वरूपच्छुरितस्य  वाचकत्वे प्रयोगस्थं वाच्यं स्वरूपम्। तदपि यदा करणोपारोहि, तदाप्पपरं वाच्यं संहृतक्रमं कल्पयितव्यमिति सर्वत्र त्रितयमन्वयि, निमित्तं तद्वानभिधेयश्चेति”। तत्रैव, पृ० २११

प्रकाश्यप्रकाशकभावेन नित्यप्रत्याय्यस्य वाच्यार्थस्य वा आकारं गृहीत्वा स्थितत्वात् तदधीनत्वाच्च स्वरूपार्थे स्वरूपात्मकशब्दस्वरूपे वा प्रयुज्यते।[147] श्रीवृषभस्तु– “**करणसन्निविष्टेन प्रत्याय्यमानाद् भेदमाह- यो हि प्रत्याय्यः स प्रतिपत्तृबुद्धौ निविशते, प्रत्यायकस्तु प्रयोक्तृकरणे यदभिघाताच्छब्दनिष्पत्तिः**”।

स्थानेषु प्रयत्नात्मकेषु करणेषु सन्निविष्टः शब्दः वाचकः। द्वितीयश्च अर्थपक्षे पतितोऽर्थाद्योऽथोऽप्युच्यते, बाह्यर्थेन सहाभिन्नरूपे ज्ञेयं यत् स्वरूपं स शब्दः वाच्यः। तृतीयेऽपि शब्दार्थस्य पारस्परिकसम्बन्धज्ञानावसरेऽनुभव-विषयीभूतोऽभिन्नः। अर्थस्य प्रवृत्तौ निमित्तमेव शब्दः।

केषाञ्चनान्येषामपि वैयाकरणानां मतं विद्यते यल्लब्धानुसंहारत्वं प्राप्तः शब्दो निमित्तम्, क्रमात्मकः शब्दः प्रत्यायको भवतीत्यर्थः, अत्रलब्धानुसंहारो[148] नाम किमिति तदा लब्धानुसंहारपदम् अन्तर्निविष्टं शब्दं बोधयति, उपजनितः क्रमो यस्मिन्नेवम्भूतस्य क्रमात्मकस्य शब्दस्यापि संहृतत्वात् श्रोतृणां बुद्धिषु समाविष्टशब्दस्य प्रत्यायकत्वमिति वैयाकरणाः।[149]

अन्यत्रापि वर्णनमस्य पक्षस्य विद्यते तद्यथा- “**संसृष्टशक्तयश्च क्रमसंहारेण समाविष्टवाचां प्रयोक्तृणां शाब्दाः बुद्धौ प्रयत्नेन प्राणे करणेषु च क्रमवृत्तितामनुभूय प्रतिपतृष्वपि क्रमप्रत्यस्तमयेनैव समावेशं प्रतिपद्यन्ते**”।[150] केचन कथयन्ति यत् क्रमवाञ्छब्दोऽक्रमस्य निमित्तं भवति, कथमिति वक्त्रोच्चारितः सक्रमः शब्दः श्रोतृबुद्धौ व्यवस्थितस्याक्रमशब्दस्य प्रत्यायकस्य निमित्तम्। वक्तुः करणव्यापारेण क्रमसम्पन्नः शब्दः श्रोतृबुद्धिस्थस्याक्रमस्योपायभूतः, एतस्मिन्नेव अक्रमे बुद्धिस्थे वागात्मनि वाचकशब्दे श्रुत्यर्थशक्ती विद्येते। श्रुत्यर्थशक्तित्वं नाम प्रत्याय्यप्रत्यायकत्वम्।[151]

---

147 “कारणव्यापारात्तु प्रतिलब्धविक्रियाविशेषः शोत्रानुपाती प्रकाशकभावेन नित्यं प्रत्याय्य परतन्त्रोऽर्थेषु प्रयुज्यते”। तत्रैव

148 अनुसंहारः – उपसंहारः, प्रदीपोद्योतः।

149 “लब्धानुसंहारो निमित्तम्, उपजनैतक्रमस्तु प्रत्यायक इत्येके, तस्यापि क्रमरूपप्रत्यस्तमयेनैव प्रतिपत्तिषु प्राप्तसमावेशस्य प्रत्यायकत्वमाचक्षते”। तत्रैव, पृ० २११

150 तत्रैव, २/१९ वृत्तिः

151 “क्रमवान् अक्रमनिमित्तम्। अक्रमे तु रागात्मनि श्रुत्यर्थशक्ती संसृज्येते”। तत्रैव, पृ० २१४

**स्फोटलक्षणम्–**

स्फुट्यते ध्वनिनाऽभिव्यज्यत इति कर्मव्युत्पत्त्या स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च घञन्तः स्फोटशब्दो निष्पद्यते। तथा च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटसामान्यलक्षणमिति फलितम्। एतच्चोक्तभाष्यानुसार्येव[152] विशेषणदलस्य किं प्रयोजनमिति तदोत्तरति प्रत्यक्षेऽनुमाने चातिव्याप्तिवारणाय। विशेष्यदलाभावे तु केनचित् क्रियमाणेन चुटचुटादिध्वनिनाऽभिव्यज्यते इतोऽपसर्तव्यमित्यर्थविशेषेति प्रसङ्गः स्यात्। ध्वनिपदेनाभिव्यक्त-ध्वनिग्रहणं यद्युच्यते तथा च चुटचुटादिव्यक्ते नास्ति दोषः, तस्याव्यक्तध्वनिबोध्यत्वादिति, तथापि ध्वनिप्रकाशे ध्वनिजन्यश्रावण-साक्षात्कारविषये ध्वनावतिप्रसक्तिः स्यात्, लौकिकप्रत्यक्षावच्छिन्नं तादात्म्येन विषयस्य कारणतेति नियमेन ध्वनिप्रत्यक्षं प्रतिध्वनेरपि कारणत्वस्वीकारात्। लक्षणे बोधजनकता स्वरूपयोग्यतैवास्ते तेन च घटपदश्रवणे ततोऽर्थबोधाभावेऽपि नाव्याप्तिः।

शब्दादर्थं प्रतिपद्यामहे, इत्याद्यनुभवैस्तस्य अर्थप्रत्यायकत्वस्य वृत्याश्रयत्वस्य वान्यथानुपपत्त्या नित्यः घटपदादिरूपः एकः स्फोटः कल्प्यते, किञ्च सूत्रं विना पुष्पमालाप्रतीत्यभाववत् परस्परविलक्षणवर्णमालायामेकं निमित्तं विना नानाव्यक्त्युच्चारणेऽपि घट इत्येकं पदमिति इत्येकपद-प्रतीत्यभावप्रसङ्गात्, तादृशाभिन्नप्रतीतिनिमित्ततया एकः स्फोतः स्वीक्रियतेऽकामेनापि।

नागेशभट्टो ब्रूते कस्तर्हि शब्दः - स च वृत्त्याश्रयः स्फोटात्मक इति गृहाण। वृत्तीनामाश्रयीभूतः स्फोटाख्यः शब्द एव स्वीक्रियते।

**स्फोटस्यवर्णव्यञ्जकत्वसमर्थनम्–**

वर्णवाचकत्वे संभावितो दोषः स्फोटस्य यद्यभिव्यञ्जकत्वं स्वीक्रियते तदा नास्ति कश्चिद्दोषः। अतो ध्वनिभिरभिव्यज्यमानः श्रोतृवक्तृबुद्धिदेशस्थः स्फोट इत्यर्थः फलति। तथाहि एकस्यैव स्फोटस्य घटेत्यादिप्रत्येकध्वनीनां द्वारा ध्वन्यते। एवम्भूतायां स्वीकृतौ सत्यां प्रथमवर्णः स्फोटमस्फुटं व्यनक्ति, द्वितीयो वर्णः स्फुटतरं व्यनक्ति, तृतीयश्च वर्णः स्फुटतममित्येवं रीत्या प्रत्येक वर्णस्य व्यञ्जकत्वस्वीकारपक्षे नास्ति दोषः। आचार्यभर्तृहरिः स्वकीये वाक्यपदीयाभिधे ग्रन्थे प्रतिपादयति-

---

152 व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः, पृ० १८५०

**"प्रत्येकं व्यञ्जका वर्णाः भिन्ना वाक्यपदेषु ये।**

**तेषामत्यन्तभेदेऽपि संकीर्णा इव शक्तयः"॥**[153]

कारिकाघटकस्य सङ्कीर्णा इत्यस्य पदस्य एककार्यकारित्वरूपोऽर्थः सञ्ज्ञेयः। सर्वदर्शनकारो माधवाचार्योऽपि एवम्भूतान् विचारान् समस्पष्टयत। मञ्जूषाकारो नागेशोऽपि स्पष्टयति तथाहि स च यद्यपि एकोऽखण्ड एकैकवर्णेनाप्यभिव्यज्यते, तथापि अन्त्यवर्णाभिव्यक्तो बोधहेतुरतो नैकवर्णाभिव्यक्त्युत्तरमर्थप्रत्ययः।[154]

**सूत्रकर्तुरपि सम्मतिः –**

आचार्यपतञ्जलेर्व्याख्यानेन पतञ्जलेः पक्षस्तु साक्षात्पोषयत्येव स्फोटवादम्। तद्यथा येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अत्र स्फोटाख्यस्य शब्दस्य स्फुट्यतेऽभिव्यज्यते वैखरीरूपध्वनिभिरिति स्फोटः, स्फुटत्यर्थोऽस्माद्वा इति समसाधयदेव।

एष पन्थाः न केवलं महाभाष्यकृतैव समपुष्यत प्रत्युत आचार्यपाणिनिना सम्मानितः, प्रतिपदिकसञ्ज्ञाविधायकसूत्रे "**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**"।[155] स्फोटवादानभ्युपगमेऽर्थवदुद्देशेन प्रातिपदिक-सञ्ज्ञाविधानानुपपत्तिः, स्फोटस्य नित्यत्वाभावे अर्थविषयिका बोध-जनकत्वरूपा शक्तिराश्रस्य नित्यस्फोटस्याभावे कुत्र तिष्ठेत्, तस्मात् तस्यानुपपत्त्या स्फोटस्य नित्य एकः स्वीक्रियते। तथैव **"युष्मदस्मद्भ्यां ङसोऽश्"**[156] सूत्रेऽस्मिन् शिदादेशविधानस्य सामर्थ्यवशादपि आचार्यपाणिनेः स्फोटवादो नितरां सम्मति विभाति। पूर्वोक्तेन शित्करणेन चेदं सञ्ज्ञाप्यते-

---

153 वा०प०, १/९१

154 लघुमञ्जूषा शक्त्याश्रयत्वनिरूपणम्, पृ० १५१

155 अष्टा०, १/२/४५

156 अष्टा०, ७/१/२७

**“सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।**

**एकदेशविकारे हि नित्यत्वं नोपपद्यते”॥**[157]

इति ज्ञापनमिदं स्फोटवादस्यास्वीकारे नोपपद्यते तस्मादाचार्यपाणिनेः सम्मतः स्फोटवादः स्वयमेव सिद्धत्वं समायाति। “**अवङ् स्फोटायनस्य”**[158] इति सूत्रस्य व्याख्यानेनापि ज्ञायते यत् स्फोटस्य चर्चा स्फोटायनाचार्येण पूर्वमेव व्यभावि तमेवोद्धरता पाणिनिनाऽपि स्फोटस्य पक्षो दृढीकृतः।

**वार्तिककारस्य साहमत्यम्–**

“**सिद्धे शब्दार्थसम्बन्धे**”[159] इत्यस्य सूत्रस्य व्याख्याने शब्दनित्यत्वकथनपरं स्वकीयं वार्तिकं समुद्धृत्य स्फोटवादस्य पक्षं दृढयति, आचार्यकात्यानोऽस्मिन् सूत्रे शब्दपदेन स्फोटस्यैव ग्रहणं करोति न च ध्वनेः, तस्मात् स्फोटातिरिक्तस्यान्यस्य व कस्यचिन्नास्त्यभिव्यक्तिः। अतस्सिद्धे शब्दार्थसम्बन्धे इत्यत्र सिद्धत्वरूपो नित्यत्वो बोध्यो भवति।

**“स्वं रूपं शब्दस्याशब्दसञ्ज्ञा”**[160] सूत्रेऽस्मिञ्छब्देनार्थस्य असम्भवात् तद्वाचिनससञ्ज्ञा-प्रतिषेधार्थं स्वरूपवचनम् “**नवाशब्दपूर्वको ह्यर्थे सम्प्रत्ययः तस्मादर्थनिर्वृत्तिः”**[161] इति द्वयोर्वातिकयोरुपन्यासं कुर्वन् स्फोटवादं सम्यगुरर्यक्रियत। अन्यथा स्फोटाभिन्नस्य शब्दस्य अनभिमतत्वे तत्रार्थबोधस्य असंम्भवत्वात् पूर्वोक्तयोर्वार्तिकयोरनुथानमेव भवेत्। एवम्भूतया शैल्या बहुत्र स्थानेषु स्फोटवादस्य सम्पोषणं प्रतिभाति।

**स्फोटस्वरूपस्य समर्थने मतान्तराणि-**

आचार्यभतृहरेः वाक्यपदीयेन ज्ञायते यद् वार्ताक्षौदुम्बरायणाभ्यां स्फोटवादस्या-नुगामित्वमेव, तद्यथा-

---

157 महाभाष्यम्।

158 अष्टा०, ६/१/१२३

159 महाभाष्यम्, पस्पशाह्निकम्।

160 तत्रैव, १/१/६८

161 महाभाष्यम् ।

**"वाक्यस्य बुद्धौ नित्यत्वमर्थयोगञ्च लौकिकम्।**

**दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ"॥**[162]

यद्यपि कारुकायमस्यां वाक्यस्फोटस्यैव चर्चा विद्यते तथापि सामान्यस्य स्फोटवादस्य बोधनमपि जायत एव, विशेषे सामान्यव्यातेरक्षतत्वात्, घटितबुद्धौ घटकस्य ज्ञानं कारणतामुपयाति।

निरुक्तग्रन्थे यास्काचार्येणापि शब्दस्य व्यापकत्वमुरर्यक्रियत, तथा च स्फोटाख्यस्य शब्दस्य समर्थनञ्चक्रे। **"व्याप्तिमत्वात्तु शब्दस्य"।**[163] शब्दानां नित्यत्वास्वीकात्तु शब्दस्य व्यापकत्वमेव न स्यादतस्तस्य वचनसङ्गतिस्तदैवावगंस्यते यदा शब्दस्य नित्यत्वं विभुत्वं च स्यात्, विभुत्वव्याख्यानपरेणैव शब्देन सर्वव्यापकत्वं सम्भविष्यति। ब्रह्मसूत्रशाङ्कर-भाष्येऽपि देवताख्याधिकरणे स्फोटवादस्य पोषणमकरोत्। **"तथाहि-वर्णानामुत्पन्नविनष्टतया तेभ्यो देवानां सृष्टिरनुपपन्ना स्यादिति नित्यस्फोटस्वीकारः कार्यः, अनित्यत्वाभ्युपगमे शक्त्याऽभावे ततोऽर्थबोध एव न स्यादित्येतत् सर्वं परामृश्य स्फोटात्मकनित्यशब्दात् द्वैतात्मकमिदं सर्वं जगत् प्रभवतीति तत्र प्रतिपादितं श्रीमच्छङ्करभगवत्पादैः"।**[164] योगभाष्यविवरणेऽपि यथा शोवकोद्वाहनादि-अनेकसाध्यमेकस्यापि विकल्पे न सम्पद्यते तथैवार्थस्य प्रतिपादनमपि अनेकसाध्यत्वादन्यतमेन वर्णानाम-शक्यमिति पदस्यैवभिव्यञ्जका वर्णा इति स्थितमित्युक्तम्[165]

## स्फोटो विभुरिति प्रतिपादनम्-

स्फोटस्य नित्यत्वं विभुत्वं च विद्यते पूर्वमीमांसादर्शने वाक्यस्फोटस्य कल्पना तु न विद्यते ततोऽपि वर्णस्फोटस्तु विद्यत एव, वर्णस्फोटस्य नित्यत्वं विभुत्वञ्चाङ्ग्यक्रियत।तयैव रीत्या वैयाकरणैरपि साध्येत; सत्वान्तरे च

---

162 वा०प०, २/३४८

163 निरुक्तम्, प्रथमोऽध्यायः

164 ब्र०सू०, १/३९-२८

165 यो०सू०भा०, पृ० २७-३८

यौगपद्यात् इति सूत्रव्याचक्षाणेन श्लोकवार्तिककारेण नानादेशावगम्यत्वात् युगपद्युक्तबुद्धिभिरित्याद्युक्तम्।[166] एतेनोपरितनवर्णनेन निर्णयः क्रियते यदेकस्यैव शब्दस्य विभिन्नेषु देशेषु युगपदुपलम्भेन वर्णात्मकस्य शब्दस्य विभित्वं प्रसिद्ध्यति, तथा चाग्रे प्रागुक्तविभुत्वे आकाशवच्चास्य चास्य नित्यत्वमिति कथनेनापि वर्णानां नित्यत्वं विभुत्वञ्च सिद्ध्यतः तेन च वर्णात्मकस्य स्फोटस्य सिद्धिः भवत्येव।

**महाभाष्यकारस्याप्यनुमोदनम्-**

आचार्येण भर्तृहरिणा शब्दस्य जैनदर्शनरीत्या शब्दस्याणुपरिणाम इति समसाधि तेनाणुपरिणामवाञ्छब्द इति ज्ञातं भवति तथापि नित्यत्वविरहितस्यानित्यस्य ध्वन्यात्मकस्य शब्दस्य तद्बोध्यते न तु स्फोटात्मनः। स्फोटस्य तु विभुता नित्यता चाववबुध्यते। पातञ्जलमहाभाष्ये प्रत्यपादि- एक इन्द्रो नैकस्मिन् क्रतुशते आहूतो युगपत् सर्वत्र भवति।[167] एवम्भूतेन व्याख्यानेनात्र 'इन्द्रः' इति पदमिन्द्र इत्यर्थम्'[168] 'आहूत' इति प्रादुर्भूत इत्यर्थकम्।[169] विभुत्वेन विना एकस्यैवेन्द्रशब्दस्य बहुत्राभिव्यञ्जनं न सम्भवति, एतेन विभुत्वस्यैकस्त्वस्य च साध्वी सिद्धिः भवति, नित्यता च विभुताऽनुगतैव।

सङ्ग्रहस्योद्धरणपुरस्सरमाचार्यपतञ्जलिनापि समदधान्नित्यत्वम्, सङ्ग्रहे तावत् कार्यप्रतिद्वन्दिभावान्मन्यामहे, नित्यपर्यायवाचिनो ग्रहणम्[170] इति। अत्रापि तदेव, अनपयोपजनविकारिणो वर्णा भवेयुः कूटस्थाविचालिनो[171] वेति भाष्यकारो नित्यतां समपादयत्।

---

166 श्लो०वा०, ६/१०

167 महा०भा० ,१/२/६४

168 महा०भा०उ०, १/२/६४

169 तत्रैव

170 महा०भा०पस्पशा०

171 महा०भा०, १/१/४५

**वैयाकरणैः स्फोटस्य दार्ढ्यप्रतिपादना–**

शब्दस्यानित्यत्वस्वीकृतवतां मध्येऽनन्तवर्णानां तद्ध्वंशप्रागभाव-कल्पनम्। पदादीनां बोधकतायाः सिद्धये तत्प्रयोजकसंस्कारस्य स्मृतेः स्वीकारेण महद्गौरवं समापतति, तथैव मीमांसकानां मते विभुत्वस्य नित्यत्वस्य च स्वीकारे यद्यपि अनन्तवर्णतद्ध्वंशप्रागभावकल्पनया वर्णानामनित्यत्वाद्यपेक्षया लघुतैव- ततोऽपि स्वराणां नवानां व्यञ्जनानां त्रयस्त्रिंशत् सङ्ख्याकानां विसर्गादीनां नित्यानां स्वीकारे तदभिव्यञ्जकध्वनीनां क्रमेणाभिव्यक्तिमता प्रत्येकं वर्णेन अर्थस्याबोधात् सम्पूर्णस्योच्चारणानन्तरं बोधस्य दर्शनात् संहत्यकारितोपपत्तये तत्प्रयोजकभावनाख्यसंस्कारस्मृतिकल्पने च गौरवात्।

सर्वानुभूतपदवाक्यादीनां मिथ्याकल्पनस्यानुचितत्त्वाच्च तन्मतं चिन्त्यम्। तस्माद् अत्वकत्वत्वादिरूपा ध्वनयः एव अर्थस्य प्रत्यायकं ध्वनिस्वरूपरूषितं कालत्रयाबाधितं शब्दब्रह्मैव व्यञ्जयन्ति, तदेव शब्दब्रह्म इति।

**स्फोटस्वरूपभेदकथनम् –**

शब्दानां त्रैध्यं वैयाकरणानां सिद्धान्तेऽभ्युपेयते तेषु तावद् अनुपहितः प्रथमः परापद-व्यपदेश्यः, ध्वन्युपहितस्तद्व्यङ्ग्यः स्फोटपदाभिधेयो द्वितीयः, उपाधिभूतो व्यञ्जकस्तृतीयः।

तत्रादौ प्रथमोऽनादिनिधनोऽक्षरो नित्यो निरवधिः, द्वितीयः सावधिः सोपाधिकोऽनित्यः सन् लोके विशिष्टज्ञास्य प्रयोजकः व्यवहाराणां हेतुश्च। एष च उपाधेर्नाशे सत्येव नाशवान्, तृतीयस्त्वनित्य एव। तत्र मूलभूतपराख्यदृष्ट्या तस्य विवर्तभूतस्य स्फोटस्य चिद्रूपविशेष्यांशमादाय शब्दे नित्यत्वं व्यपदिश्यते।

स स्फोटः प्राधान्येन व्याख्यात्मक एकश्च ततोऽपि सर्वशब्दशक्तिव्युत्पानाय वर्ण-पद-जाति-व्यक्ति-खण्ड-अखण्डभेदेन अष्टौ स्फोटा भवन्ति वाक्यस्फोटस्य व्युत्पदनायै एवैते परे स्फोटाः स्व्यक्रियन्त। एतत्सर्वं मञ्जूषात्रय्यां तथा च वैयाकरणभूषणसारादिग्रन्थेषु प्रत्यपद्यत।

वाक्यस्फोट इति निष्कर्षः तिष्ठतीति मे मतिरिति वैयाकरणानां तत्र भवतां भर्तृहर्यादीनां सिद्धान्ता विराजन्ते।

**स्फोटस्याभिव्यञ्जनत्वविमर्शः –**

आचार्यपतञ्जलिः प्रतिपादयन् द्वैध्यं स्फोटस्य स्वरूपं विचारयति। तत्र प्रथमस्तावद् येनोच्चारितेन सम्प्रत्ययो[172] भवति, सम्प्रत्ययश्च यथा 'घटः' इत्युच्चार्यमाणे सति कम्बुग्रीवादिमतः पदार्थस्यैवाभिव्यक्तिर्जायते ततोऽतिरिच्य नान्यस्य कस्यचित् पदार्थस्य।

द्वितीयश्च प्रतीतपदार्थकस्य लोके ध्वनिरिति लक्षणस्य क्रियमाणत्वाद् ध्वनेर्व्यञ्जकत्वं निरदिशत्। एवम्भूतस्य ध्वनेः स्फोटाभिव्यञ्जनस्य हेतुत्वं स्वीक्रियते, अतः 'ध्वनिः शब्दगुणः'[173] इति प्रतिपादयता पतञ्जलिना ध्वनेः स्फोटरूपस्य शब्दस्य समभिव्यञ्जनेः हेतुतां निरधरत्। गुणपदस्य व्यञ्जकत्वेनोपकरक इत्यर्थःकैय्यटेन प्रदीपे कृतो वर्तते।

एवम्भूतो ध्वनिरेव मध्यमावैखरीभ्यां प्रतिपाद्यते। तथाभूतस्य ध्वनेः किं स्वरूपं कश्चास्य विशेष इति जिज्ञासायां निगद्यते- व्याकरणनिकाये चतसृणां वाचां स्वीकारो विद्यते, तत्रादौ समेषां प्राणवतां मूलाधारे स्थिता तत्रत्येन पवनेनाभिव्यज्यमाना स्पन्दादिभी रहिताशब्दाब्रह्मरूपा नित्या या वाक् सा पराभिधेया भवति।

एषा चानुपहितचैतन्यमेव, ततो नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यज्यमाना मनोगोचरीभूता वाक् पश्यन्तीपदेन कथ्यते। एवम्भूतं द्विविधमपि वाग्ब्रह्म योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय-विषयमुच्यते।

ततो हृदयपर्यन्तमागता तेन वायुनाऽभिव्यज्यमाना वाचकस्य स्फोटस्याऽभिव्यञ्जिका स्वमात्रश्रोतव्या, जपादौ बुद्ध्या निर्ग्राह्या या वाक् सा मध्यामेति निगद्यते। तत्पश्चान्मुखपर्यन्तमागच्छता तेन वायुना मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिज्यमाना परकर्णेनापि ग्रहणयोग्या या वाग् सा वैखर्यभ्यधीयत। वाणीनां स्वरूपं सास्मर्यते।

---

172 महा०भा०पस्पशा०

173 महा०भा०, १/१/६९

स्फोटाख्यस्य शब्दस्याभिव्यक्तिः मध्यमया वैखर्या च क्रियते, अन्यतरेण वा विकल्पे, किन्तूभयोरथान्मध्यमावैखर्योरस्ति व्यञ्जकतेति महाभाष्यीयम्मतम्, तस्मादौच्यत- **"श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः प्रयोगेणा-भिज्वलितः आकाशदेशः शब्दः"**[174] इति।

तत्र प्रयोगेण इति प्रतीके प्रयुज्यत इति प्रयोगे। ध्वनिः, तेन च ध्वनिद्वारा अभिव्यक्त इत्यर्थः प्रदीपोद्योतकारः कृतवान्। तस्माच्च वैखरीरूपध्वनेरेव सङ्केतो भवति यतोहि मध्यमायाः प्रयोगराहित्यात्, बुद्धिनिर्ग्राह्य इत्यनेन मध्यमाया अपि ग्राहकत्वमर्थाद्व्यञ्जकत्वं लभ्यते।

**"ग्राह्यग्रहणयोः सिद्धा योग्यता नियता तथा।**

**व्यङ्ग्यव्यञ्जकभावेन भावेन स धर्मः स्फोटनादयोः"॥** [175]

एवम्भूतः क्रम एव भर्तृहरिकैय्यटभट्टोजिदीक्षितनागेशादयः स्वी-कुर्वन्ति।

**प्रकारान्तरेण स्फोटस्य व्यञ्जकत्वनिर्णयः—**

स्फुटत्यर्थो यस्मात्, स्वयमेव वा स्फुट्यते वा इति द्वितीयव्युत्पत्तिद्वारा यत्किञ्चित्- जन्य-अभिव्यक्तिविषयीभूतः एव स्फोटपदेन कथ्यते इति तस्य स्फोटस्य अभिव्यक्तेर्जनकः कः? इत्येवम्भूतायां जिज्ञासायां सत्यां वैखरी वाक् तस्याभिव्यञ्जिका मध्यमा वा, आहोस्विदुभयमपि शुद्धस्य शब्दब्रह्मणो व्यवहारातीततया न तस्य वाचकता, किन्तु ध्वनिरूपैरुपाधिविशेषैरभि-व्यज्यमानः चेतन आत्मा एव वाचकः स्फोट इति।

तदेव श्रीमता नागेशेन प्रत्यपादि परमलघुमञ्जूषायाम्- मध्यमायां यो नादांशस्तस्यैव स्फोटात्मनो वाचकत्वेनाक्षतिरिति अत्र पङ्क्तेर्व्याख्याने नादांशश्चेतनः, इति रत्नप्रभाकारः। यतोहि चिदचिन्मिश्रो विन्द्वन्शो नाद[176]

---

[174] महा०भा०, पा०सू०, १

[175] वा०प०, १/१००

[176] वै०ल०म०, स्फोटः

इत्युक्तं लघुमञ्जूषायाम्  एवम्प्रकारेण तत्तदुपाधिभिन्नचितः एव स्फोटरूपेण ग्रहणं नागेशस्याभिमत्यमपि सङ्गच्छते। एतस्मादेव कारणाद् वैखरीरूपस्य मध्यमारूपस्य वा ध्वनेः स्फोटस्य व्यञ्जकत्वरूपोपाधिरूपे स्वीकारो भवति, प्रतिपादितश्चैतद्भाष्यकारेण पूर्वमेव, श्रोत्रोपलब्धिबुद्धिनिर्ग्राह्यः प्रयोगेणा-भिज्वलित आकाशदेशः शब्दः। पूर्वोक्ता या उक्तिस्तद्द्वारा मध्यमावैखर्योरुभयोर्नादयोर्वाचकता स्फुटमागाच्छति। वैखर्याः प्रयोगाविषये मानसचिन्तनभूतस्थले केवलं मध्यमैव व्यञ्जकतामेति इति ज्ञेयम्।एवम्भूतं व्याख्यानमेव भर्तृहरेः कैय्यटस्य भट्टोजिदीक्षितस्य च अनुभूयते। वाक्यपदीयकारस्य च मतमेवं विद्यते-

**"प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।**

**शब्दस्योर्ध्वमभिव्यक्तेः वृत्तिभेदे तु वैकृताः"॥** [177]

**"ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते"॥**[178]

तथैवैतास्वेव कारिकासु सङ्ग्रहकारस्यापि मतं वृत्तौ वाक्यपदीये मिलति-

**"शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**

**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते"॥**[179]

तथैव **तपरस्तत्कालस्य** इति सूत्रस्य भाष्ये प्रदीपग्रन्थेऽपि स्फोटरूपस्य शब्दस्य अभिव्यञ्जनक्षमः प्राकृतध्वनिरेव विद्यते नान्यत्। उपरितनेन पूर्वोक्तेन व्याख्यानेन प्रत्यपत शोधार्थिना यद् वृत्त्यात्मकस्य स्फोटाख्यस्य ध्वनिनाभिव्यक्तस्यार्थप्रकाशकस्य शब्दस्यैव वृत्तिमत्ता।

**शाब्दिकनयेऽभिधाविचारः-**

वृत्तिमत्त्वञ्चार्थवत्त्वम्, तच्च कथं किञ्च तस्य स्वरूपमिति प्रतिपादयद्भिर्बहुभिराचार्यैः शाब्दैकैस्तदितरैरपि– "**वृत्तिश्च पदेन सह पदार्थस्य**

---

[177] वा०प०, १/७७

[178] तत्रैव, १/७९

[179] तत्रैव, १/७८

**सम्बन्धः"।**[180] सा च शक्तिः व्यापारादिपदाभिधेयतामायाति। शाब्द-बोधौपयिकपदपदार्थसम्बन्धो वृत्तिरेवेत्यभ्यधीयत। एवम्भूतायाश्च वृत्तेः स्वरूपं शब्दिकैरथ च शब्दिकातिरिक्तैराचार्यैरपि न्यगद्यत्। तत्र परिभाषासु तल्लक्षेषु वा विभेदो दरीदृश्यते किन्तु समासामपि वृत्तिसामान्यानां कार्यं विविधप्रकारकं शास्त्रज्ञानाय तत्तत्प्रकारकार्थबोधविषयकजनकत्वमेव।

**शब्दविषयकविचारः-**

प्रत्यक्षमनुमानमुपमानं च यथा प्रमाणत्वेनाभ्युपेयन्ते तथैव शाब्दबोधे शब्दस्यपि प्रमाणत्वमिति। आनन्दवर्धनाचार्यो ध्वन्यालोके प्रथमोद्योते व्याख्यद्यत् – वाक्यार्थावधारणायां शब्दानामेव हेतुता, तैर्विना न गम्यते काथञ्चिकोऽप्यर्थः। शब्दस्य च प्रामाण्याय बहूनि कारणानि सन्ति यैर्द्वारा शब्दस्य प्रमाणत्वं प्रमाणीभवति-

**"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता"॥**[181]

**"इदं पुण्यं इदं पापमित्येतस्मिन् पदद्वये।**

**आचण्डालं मनुष्याणामलपं शास्त्रप्रयोजनम्"॥**[182]

**"हस्तस्पर्शादिवान्धेन विषमे पथि धावता।**

**अनुमानप्रधानेन विनिपातो न दुर्लभः"॥** [183]

भाषाशास्त्रशिरोमणीनां तत्र भवतां वैयाकरणानां हृदयभूतं तत्त्वं शब्द एव। महाभाष्यकारः प्रतिपादयति- **"शब्दप्रमाणका वयम्, यच्छब्दाह तदस्माकं प्रमाणम्"**[184] इति भाष्याच्च शब्दस्यैव परमहेतुता सर्वत्र न शब्दमन्तरा अन्यस्य कस्यचिद्वस्तुनः स्वीकार्यत्वम्। आचार्यपाणिनिरपि अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रयन्निदमेवासूचयत्। अत्र

---

[180] मुक्तावली, शब्दखण्डम् ।

[181] ऋग्वेदभाष्यभूमिका, पृ० १

[182] वा०प०, १/४०

[183] वा०प०, १/४२

[184] महा०भा०, पस्पशा०

सूत्रघटकस्यार्थवदित्यस्य व्याख्यानेऽर्थवत्पदेन 'अर्थविषयकबोधजनकत्वम्' इत्येव विवक्ष्य्यते बोधपदाच्च शाब्दबोध एव अभिमतो भवति प्रत्यासन्नवाल्लाघवत्वाच्च शब्दप्रमाणेन विना एवम्भूतं व्याख्यानं न कर्तुं शक्यते।

शब्दानामेव प्रामाण्यं स्व्यक्रियत पाणिन्यष्टाध्याय्यां तदशिष्यं सञ्ज्ञाप्रमाणत्वादिति सूत्रस्य व्याख्याने। कात्यानस्यापि तथैवाभिमत्यं हृदयभूतं शब्दतत्त्वमेव तथाहि 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः, क्रियते।

महत्यन्धकारे विभ्रान्तस्य कस्यचिदपि पुरुषस्य प्रकाशादीनामभावे शब्दैरेव सम्बोधनं क्रियते, तदेव वाक्यपदीये निगदितम्-

**"इति कर्तव्यता लोके सर्वाशब्दव्यपाश्रया।**

**अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु"॥**[185]

**"भावानामनुमानेन प्रसिद्धिरतिदुर्लभा।**

**ज्ञाने स्वाभाविकेनार्थः शास्त्रैः कोऽपि न वेद्यते॥**[186]

भाष्यकारो व्याचख्यौ ह्रस्वसम्प्रत्यादिति चेत् उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति नतु सम्प्रतीयमानः।[187] एतेन सुष्टमायाति यदुच्चारणविषयीभूतस्य शब्दस्यैव हेतुता भवति अतस्मादेव सिद्धान्तः उचारितः सन्नेवार्थं प्रत्यायति शब्दः, नानुच्चार्माणः। आचार्यनागेशेनापि एवम्भूतस्य शब्दस्य समर्थनं क्रियते। उदाहरणमुखेन प्रतिपाद्यते यत्- गन्धस्य सुखादिजनकता सम्भवति घ्राणेन्द्रियेण गृह्यमाणे सत्येव, तस्य च गन्धस्य घ्राणग्राह्यगुणत्वादेव, न गन्धस्यानेन केनचिदिन्द्रियेण ग्रहणं तदभावे च सुखादिजनकत्वाभाव एव। तथैव महतो घण्टादिशब्दस्य कर्णपीडाजनकता

---

185 वा०प०, १/१२९

186 वा०प०, १/३२

187 महा०भा०

श्रुतस्यैव न तु स्मृतस्य, तथैव पदानां बोधजनकता श्रुतानामर्थाच्छ्रावणप्रत्यक्ष-विषयीभूतानामेव, न तु यथाकथञ्चित् प्रतिपादितानाम्।

**शब्दप्रमाणे व्यापारविषकविमर्शणम्-**

शब्दः प्रमाणमिति प्रायशो दार्शनिकैरमन्यत। तदात्वे सति कि प्रमायाः करणं प्रमाणं भवति, करणं च व्यापारो भवति तदाऽत्र किं स्वरूपं व्यापारस्य तत् प्रतिपाद्यते—

पदनिष्ठवृत्तिज्ञानजन्यपदार्थज्ञानमेव तत्स्वरूपम्। तस्य पदप्रत्यक्षजन्यत्वे सति तज्जन्यशाब्दधीजनकत्वेन व्यापार-लक्षणाक्रान्तत्वात्।[188] एतच्चाचार्यपतञ्जलिः व्याख्यत् स्वकीये महाभाष्ये- "नेत्याह सर्वथाऽवरकालैवेति। वर्णानामुपदेशस्तवात्, उपदेशोत्तरकाला इत्सञ्ज्ञा, इत्सञ्ज्ञोत्तरकालः **"आदिरन्त्येन सहेता" इति प्रत्याहारः, प्रत्याहारोत्तरकाला सवर्णसञ्ज्ञा, सवर्णसञ्ज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्यय इति। सा एषा उपदेशोत्तरकाला अवरकाला सती वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यते इत्येतन्न"**[189] इत्युक्त्या आचार्यनागेशभट्टोऽपि व्याख्यानमस्य करोत्येम् "अवरकाला" अर्थाद् वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वादिति भावः, इत्युक्त्या।[190]

उपरितनेन व्याख्यानेन भाष्यकारस्तथा च नागेशभट्टः प्रतिपदयतः पदार्थज्ञानस्यैव हेतुता न तु पदनिष्ठवृत्तिज्ञानजन्यस्य तथापि वृत्तिज्ञानस्यापि हेतुताया अनुपदमेव वक्ष्यमाणतया प्रत्यासत्त्या अतिप्रसङ्गादिदोषवारकतया च तादृशस्यैव पदार्थज्ञानस्य तत्त्वमिचितम्। गाम्भीर्येण विचारे क्रियमाणे सति इतो भाष्यादपि ईदृशस्यैव पदार्थज्ञानस्य व्यापारत्वमवगम्यते।

भर्तृहरिरपि एतद्व्यापरात्वं तादृशे पदार्थज्ञानमेव किन्तु तज्ज्ञानं स्मरणरूपम्, नानुभवरूपम्।

**"संयोगो विप्रयोगश्च....................विशेषस्मृतिहेतवः"॥**[191] अत्र कारिकाघटस्य विशेष-स्मृतिहेतव इत्यस्य तात्पर्यं पदार्थविशेषस्य स्मृतिः

---

188 पाणिनीयव्याकरणे प्रमाणसमीक्षा, पृ० २०३

189 महा०भा, १/१/६७

190 तत्रैव, प्र०उ० टीका

191 वा०प० २/३१७-३१८

संयोगविप्रयोगादिभिः संस्कारोद्बोधेन जनिता सती शाब्दबोधं जनयति, अत्र व्यापारविधया पदार्थस्य स्मृतिरूपमेव ज्ञानं स्वीकृतम्।[192]

### व्याकरणे वृत्तिस्वरूपम्-

वैयाकारणैर्पदनिष्ठाया वृत्तेः स्वीकार्यत्वात् केयमिति वृत्तिरिति- तदोच्यते- शब्दबोधानुकूलपदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्ध-विशेषः वृत्तिः।[193]

### अद्वैतवेदान्ते शब्दशक्तिः –

पौर्वात्यदर्शनेषु प्रायशः प्रत्येकं सम्प्रदाये शाब्दबोधो दृष्टिपथमायाति। स्व-स्वसम्प्रदायमनुसृत्य भाषाशास्त्रिणः वाक्यार्थबोधाय नियमान् निर्मितवन्तः । तथा चाद्वैतवेदान्तदर्शने शब्दशक्तीनां विवेचनं विधीयते। तथा चात्रवेदान्तपरिभाषा, वेदान्तसारम्, पञ्चदशीं शाङ्करभाष्यम्, अद्वैतसिद्धिरित्यादीन् ग्रन्थानाधृत्य शब्दशक्तिविषयक-विचारोऽभिधीयते।

### सौन्दर्यलहरी-

**"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि। अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति"॥**[194] अर्थाद् यथा शिवः शक्त्या युक्तः सन् शक्त इत्युच्यते, शक्तत्वे एव तस्य जगन्निर्माणकारणत्वमर्थात्, जगतः सृष्टौ केवलं व्रह्ममात्रं न कारणतामुपैति प्रत्युत शक्तिकारणादेव ब्रह्मणः कारणता जगतः निर्माणे भवति, शक्तिं विना शिवस्य स्पन्दनमत्रमपि न भवतुमर्हति। इति शङ्कराचार्यः।

तस्मात् सशक्तिकस्यैव भगवतो जगन्निर्मानकारणक्षमत्वम्।

---

192 पा०व्या०, प्र०स०, पृ० २०३

193 तत्रैव, पृ० २०६

194 सौ०ल०, श्लो०१

**"अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि।**

**यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैव न संशयः"॥** [195]

शिष्य उवाच –

**"पदार्थमेव जानामि नाद्यापि भगवन्स्फुटम्।**

**अहः ब्रह्मेति वाक्यर्थं प्रतिपद्ये कथं वद"॥**[196]

एतस्याः कारिकायाः व्याख्याने आचार्य शङ्करः कथयति यदहं ब्रह्म इत्याकारकं वाक्यार्थं कथं जानामि, तदानीं प्रतिपादयति यत् पदार्थज्ञानस्यार्वाचीनकाले वाक्यार्थज्ञानस्य असम्भवात्, तावत् पदार्थज्ञानमेव दृढीक्रियताम्, इत्येवम्भूतोऽर्थोवबुध्यते, तस्मात् सिद्धं भवति यत् पदार्थबोधं विना वाक्यार्हस्यावगतिर्न जायते, पदार्थश्च अभिधाव्यापारं विना सम्भवति, यतोहि पदार्थ द्वारक एव वाक्यार्थो भवति।

गुरुरुवाच-

**"सत्यमाह भवानत्र विज्ञानं नैव विद्यते।**

**हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह"॥** [197]

अस्या कारिकायाः व्याख्याने आचार्यशङ्करो वदति- पूर्वोक्तकारिकायां पदार्थस्य वाक्यार्थस्य च अन्वयव्यतिरेकभावः, तस्मात् कारणात् तत्त्वं पदार्थयोर्निरूपणाय प्रसिद्धानुवादेनाप्रसिद्धं निरूपणीयं भवति इति न्यायेन प्रसिद्धस्य त्वमर्थस्यनिरूपणं करोति, अन्तःकरणतद्वृत्तिसाक्षीचैतन्यविग्रहः, आनन्दरूपः सत्यः सन्किं नात्मानं प्रतिपद्यते[198]

त्वं पदार्थस्य प्रकारान्तरेणापि आचार्यशङ्करः वर्णनं कुरुते,

**"यः साक्षिलक्षणो बोधस्त्वं पदार्थः स उच्यते।**

**साक्षित्वमपि बोद्धव्यमविकारितयात्मनः"॥**

---

[195] तत्रैव

[196] तत्रैव, १०९

[197] तत्रैव, १/१०

[198] तत्रैव, १/११

अत्र त्वं पदार्थः साक्षिलक्षणो बोध एव, साक्षित्वस्य च पुनर्बोधोऽविकारिणोऽऽत्मन एव बोद्धव्यमिति। अत्र बहुविधाभिर्युक्तिभिर्ग्रन्थकारस्त्वं पदार्थस्य बोधमकायत्, ततः तत्पदार्थस्य बोधायोपक्रमते-

**"त्वमर्थमेवं निश्चित्य तदर्थं चिन्तयेत् पुनः।**

**अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन वा"॥**

त्वमर्थमेवं निश्चित्यार्थादन्तःकरणवृत्तीत्यादिपूर्वोक्तत्वंपदार्थस्य वाक्यार्थप्रतिपादकस्य श्रवणमनननिदिध्यासनादिभिः त्वं पदार्थं निःसंशयं ज्ञात्वा तदर्थस्य चिन्तनं कुर्मः। तस्मात् तत्पदार्थः तु वाक्यैर्न बोध्यते, उक्तं हि उपनिषत्सु **"यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह"**[199]**, "यद्वाचा नाभ्युदितं येन वागुद्यते"**[200] अर्थाद्वाङ्मनोभ्यामगोचरस्य ब्रह्मणः सत्यं ज्ञानमनन्त ब्रह्म, आनन्दो ब्रह्म, इत्यादिस्वरूपस्य ज्ञानं वाच्यत्वाभावेन लक्षणया जहदजहदैव सम्भवति। तच्च किम्स्वरूपं ब्रह्मेति अग्रिमायां कारिकायां न्यगद्यत।

**"निरस्ताशेषसंसारदोषोऽस्थूलादि।**

**लक्षणः अदृश्यत्वादिगुणकः पराकृततमोमलः"॥**

एतदनन्तरं तत्पदार्थस्य स्वरूपं साक्षादबिधत्, श्रुति सम्मतम्, श्रुतिसम्मतस्य ब्रह्मणः बोधोऽभिधया शब्दशक्त्या न जायते, तदर्थं चा लक्षणाभेदस्य जगदजहदित्यस्यैव आश्रयोऽनीयत, विद्वद्भिः। अत्र पर्यन्तं तत्त्वंपदार्थयोः सम्यक्प्रकारेण चिन्तनं कृत्वा वाक्यार्थं बोधयति

**"तत्त्वं पदार्थौ निर्णीतौ वाक्यार्थश्चिन्त्यतेऽधुना।**

**तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः"॥** [201]

तत्त्वमिति, संसृष्टविशिष्टतादात्म्यवाक्यार्थेषु मध्ये निश्चितमर्थमाह तादात्म्यमत्र, वाक्ये च तादात्म्यमेव निश्चितत्त्वमिति कुतः तन्निरूपयति-

---

199 तैत्तिरीयारण्यकम्, ३/८/४

200 केनोपनिषद्, १/५

201 तत्रैव, ३/३७

**“संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतम्”॥** [202]

महावाक्यस्य बोधोऽखण्डार्थैकरसत्वेन जायते, वेदान्तदर्शने तत्त्वमसीति वाक्ये च नीलोत्पलमिति वाक्यवन्मुख्यार्थस्य स्वीकारेण विशेष्यविशेषणरूपसंसर्गवान् वाक्यार्थः अन्यतरविशिष्टः वा वाक्यार्थः इष्टो न भवति, यतोहि अत्र प्रमाणान्तरविरोधाभावान्मुख्यार्थयोः वाक्यार्थः सङ्गच्छते एकवस्तु निष्ठत्वादुभयोः तस्मान्न विरोधः, किन्तु तत्वमर्थस्य बोधायैवं युक्तिर्न सभवति प्रमाणान्तरैर्विरोधात्। तदर्थपरोक्षत्वादिविशिष्टस्य चैतन्यस्य तवमर्थस्यापरोक्षत्वादिविशिष्टस्य चैतन्यस्य वा अन्योन्यभेदव्यावर्तकतया विशेष्यविशेषणभाव-संसर्गस्य अथवा विशिष्टैकस्य वाक्यर्थत्वस्य स्वीकरणे च प्रत्यक्षादिप्रमाणैः सह साक्षाद् विरोधस्य सत्त्वात् उभयोर्वाच्यार्थयोरेक्यता स सम्भवति, एतस्मादेव कारणाद् ‘अहं ब्रह्मास्मि’ इति अनुभववाक्यस्यापि बोधस्तया रीत्या न जायते, अशेषतो विरुद्धत्वात्, विशेष्यविशेषण-भावाख्यस्य संसर्गस्य निर्विकल्पके आत्मन्यसम्भवात्। अतः संसर्गविशिष्टयोर्वाक्यार्थयोर्विरोधः, विरोधत्वाच्च न सम्मतिरेवम्भूतस्य वाक्यार्थस्य। किञ्च तदर्थस्वीकारे एतासां श्रुतीनां वाक्यार्थो न सङ्गच्छेत।

**“भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे”॥**[203]

**“स वा अयमात्मा ब्रह्म”,**[204] **“ब्रह्मवेद ब्रह्मैव भवति”**[205] **“तरति शोकमात्मवित्”।**[206] अतः श्रुतीनामुपपत्तिः न स्यात्, तस्मात् कारणादेतासां विचारणायां पूर्वोक्तौ द्वावपि संसर्गवादविशिष्टवादाख्यौ पक्षौ विद्वद्भ्यो न रुच्येते प्रत्युत विरुद्धांसपरित्यागपुरःसरम् अविरुद्धवस्तुतादात्म्यरूपवाक्यार्थः सम्मतो भवति, अत आह अखण्डैकरसत्वेन। अखण्डैकरसत्वञ्च नाम **“अहं**

---

[202] तत्रैव, ४/३८

[203] मु०उप०, २/२/८

[204] बृ०उ०, ४/४/८

[205] मु०उ०, ३/२/९

[206] छा०उ०, ७/३

**ब्रह्मास्मि ब्रह्मैवाहमस्मीति व्यतिहारेणाखण्डैकरसवस्तुत्वप्रतिपत्तिः"।**[207] अत्र च वाक्यार्थस्य बोधो यदा अभिधया भवति तदानीमेव संबन्धस्य विरुद्धस्य च भिन्न-भिन्नधर्मावच्छिन्नस्य तत्त्वं पदार्थस्य बोधे सति निखिलं विरुद्धांशं परित्यज्य अविरुद्धस्य अखण्डैकरसस्य परमानन्दस्य परब्रह्मणो बोधो जायते, तर्हि विरुद्धांशस्य बोधो साक्षादभिध्या बोध्यतेऽतोऽभिधा शब्दशक्तिरचर्च्यत।

**गीतायाः शाङ्करभाष्ये शङ्काराचार्यस्य विचारः-**

गीतायाः शाङ्करभाष्ये उक्तम्- अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्य इत्यर्थः। ननु आगमेन आत्मा परिछिद्यते प्रत्यक्षादिना च पूर्वम्, न आत्मनः स्वतः सिद्धत्त्वात्। सिद्धे हि आत्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणं भवति। नहि पूर्वम् इत्थमहमिति आत्मानमप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते, न हि आत्मा नाम कदाचिदप्रसिद्धो भवति, शास्त्रं तु अन्त्यं प्रमाणं अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वम् आत्मनः प्रतिपद्यते न तु अज्ञातार्थज्ञापकत्वेन, तथा च श्रुतिः 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' इति, अन्तवन्त इमे देहा इत्यस्य शोलोकस्य शाङ्करभाष्ये।[208]

**"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**

**वेदवादरता पार्थ नान्यदस्तीति वादिनः"॥**[209]

**"यामिमां वक्ष्यमाणा पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां वाचः वाक्यलक्षणां प्रवदन्ति,, के अविपश्चितः अमेधसः अविवेकिनः इत्यर्थः"।**[210]

---

207 वाक्यवृत्ति०टीका०, पृ० ४१

208 गी०शा०भा०, अ०२०, पृ० २१

209 तत्रैव, २/४३

210 तत्रैव, शाङ्करभाष्यम्।

**सिद्धान्तबिन्दौ वाच्यार्थमुखेनाभिधाविचारः-**

अत्र पदार्थस्य चर्चा सिद्धान्तबिन्दौ- तस्य च आत्मतत्त्वस्य "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादिवेदान्तवाक्यमेव प्रमापकम्, वाक्यं च पदार्थज्ञानद्वारेणैव बोधकमिति तत्त्वं पदार्थयोः प्रकृतवाक्यार्थानुकूलयोः अन्यतोऽसिद्धत्वात्, तावपि शास्त्रेणैव प्रमातव्यौ, यूपहवनीयादिपदार्थवत्।[211]

तात्पर्यमिदं यत् "**तत्त्वमसि", "अहं ब्रह्मास्मि"** इत्येवम्भूतानि महावाक्यानि एव याथार्थ्यं बोधयन्ति, यतोहि वाक्यार्थज्ञाने पदार्थज्ञानं कारणं भवति, तस्मात् पदार्थबोधं विना वाक्यार्थबोधो न सम्भवति, पदार्थबोधश्च अभिधया शब्दशक्त्या विना न गम्यते, तस्मादभिधैव कारणमुपयाति पदार्थबोधे, ततः एव पदार्थबोधः कारणमुपयाति वाक्यार्थबोधे, किन्तु महावाक्यार्थबोधे लैकिकप्रमाणानि न साधकत्वमुपयान्ति तस्माच्छास्त्रेणैव सम्पाद्यमानानि भवन्ति यूपावाहनीयादिपदार्थवत्, यूपावाहनीयपदास्य चर्चा अत्र प्रसङ्गत्वात्-

**"यूपे पशुं बध्नाति"** इति श्रुतौ पशुबन्धनस्य आधाररूपेण यूपस्य विनियोगः कृतः वर्तते, यूपपदार्थस्य सिद्धिर्लौकिकैः प्रमाणैर्न किन्तु यूपं तक्षति यूपमष्टीकरोति इति शास्त्रेणैव अष्टकोणवान् यूपः इति सिध्यति, तथैव "**आहवनीये जुहोति"** श्रुतावस्यां होमस्याधारभूतमाहवनीयमिति, आहवनीयपदार्थस्यापि सिद्धिः लौकिकैः प्रमाणैर्न जायते, किन्तु नक्तं गार्हपत्यमादधाति दिवाहवनीयम्, इति श्रुत्यैव दिने आधानस्याधारः अग्निराहवनीयमितुच्यते, इति निचिनुते शास्त्रम्।

ततश्च "**यतो वा इमानि भूतानि जायन्ते"**[212], इत्यादिसृष्ट्यादिश्रुतयः तत्पदवाच्यस्यार्थस्य समर्पिकाः। तात्पर्यमिदं यद् 'यतो वा इमानि भूतानि जायन्ते' इत्यादयः श्रुतयो वाच्यार्थं प्रकाशन्ति, वाच्यार्थोऽभिधाव्यापारमन्तरा न सम्भवत्येव तस्माद् अभिधायाश्चर्चा सिद्धान्तबिन्दौ प्रत्यपादयद् ग्रन्थकारः।

---

[211] "ज्ञानं न भवति, वाक्यार्थस्य ज्ञानं पदार्थज्ञानस्य नियमतः अपेक्षां करोति, नतु पदार्थस्य अस्तित्वस्यापेक्श्ःआं करोति,, अन्यथा भीमः दुर्योधनं हतवान्, एतस्य वाक्यस्यार्थो न भवितुमर्हति, यतोहि भीमदुर्योधनयोः पदार्थयोः सत्ता वाक्य्थज्ञानकाले नास्ति"। सि०बि०, पृ० ६

[212] तै०उ०, ३/१/१

**"सत्यं ज्ञानमनन्तं ब्रह्म"**[213] इत्यादयस्तु लक्ष्यार्थस्य। 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादयः श्रुतयस्तु तत्पदस्य लक्ष्यार्थस्य प्रकाशिका भवन्ति। अत्र च लक्षणायाः चर्चा कृता ग्रन्थकारेण।

**"स्वप्नान्तं च बुद्धान्तं च"**[214] इत्यादाः जाग्रतस्वप्नसुषुप्त्यादिश्रुतयः त्वंपदवाच्यार्थस्य समर्पिकाः, **"न दृष्टेः दृष्टारं पश्येः"**[215] इत्यादयस्तु लक्ष्यार्थस्य तेन प्रथमवान्तरवाक्येभो अनुभूतयोः शुद्धयोर्जीवब्रह्मणोः तत्त्वमस्यादिवाक्ये मुख्यार्थान्वयानुपपत्त्या लक्षणया निर्विकल्पक-स्मरणोपपत्तिः। महावाक्येषु मुख्यार्थस्य स्वीकारे सति विरोधो जायते, तस्मान्मुख्यार्थान्यथानुपपत्त्या तत्र लक्षणा आश्रीयते, मुख्यार्थः शक्त्या बोधितः पदार्थ एव, अतः अभिधा विद्यत एव।

तत्त्वमसि महावाक्येऽस्मिन् त्वंपदवाच्यार्थः जीवः, यतोहि उद्दालकः श्वेतकेतुं संबोध्य त्वम् इति पदमुक्तवान्, जीवस्य स्वरूपं जाग्रतादि अवस्थावान्, अवस्थावत एव सम्बोधनं भवैतुं शक्नोति, अतस्त्वं शब्दार्थो जीव एव,

'तत्त्वमसि' इति महावाक्ये तत्वंपदार्थयोरभेदेनान्वयो प्रतीयते, स च अभेदः तत्वंपदयोः वाच्यार्थयोर्न सम्भवति, यतोहि जाग्रतादि -अवस्थावतो जीवजगतोरुत्पत्ति-स्थिति-प्रलयाणां कर्ता न भवितुमर्हति, अतएव शब्दप्रमाणात् पूर्वमनुभूतस्य शुद्धचैतन्यस्य संस्कारद्वारास्मरणत्वाच्छुद्धचैतन्ये शक्यार्थस्य सम्बन्धत्वाल्लक्षणया शुद्धचैतन्यं गृहीतं भवति।

तत्त्वम्पदयोर्वाच्यार्थे भेदस्यावभासमानत्वात् पौनरुक्तिदोषो नास्ति, उभयोः पदयोर्लक्ष्यार्थस्यैकत्वात्, अखण्डार्थत्वमपि, निर्विकल्पकवाक्यार्थस्य अनुकूलपदजन्या पदार्थोपस्थितिरपि वाक्यजन्यनिर्विकल्पक-ज्ञानवन्निर्विकल्पिका भवति, अत्र नास्ति कश्चिदपि विरोधः, कारणमिदं यद् यथा सविकलपकस्य वाक्यार्थस्य ज्ञाने सविकल्पकपदार्थस्योपस्थितिः

---

[213] तत्रैव, २/१/१

[214] बृ०उ०४/३/१८

[215] तत्त्रैव ३/४/२

साधनातामुपैति तथैव निर्विकल्पकवाक्यार्थज्ञाने निर्विकल्पकपदार्थोपस्थितिः कारणतां याति।[216]

**"ननु तर्हि वेदान्तवाक्येभ्यः एव पदार्थोपस्थितौ वाक्यार्थबोधे च सति तस्य स्वतः एव प्रामाण्यात्तेनाज्ञानतत्कार्यनिवृत्त्युपपत्तौ किं विचारणा, इति सत्यम्"।**[217] अत्र शङ्कते यद् यदि वेदान्तस्य महावक्यैरेव पदार्थस्योपस्थितिर्वाक्यार्थबोधश्च जायते तथा य ज्ञायमानः पदार्थबोधः स्वत एव प्रमाणं भवति, तेनैव अज्ञानस्य अज्ञानजन्यकार्यस्य द्वैतप्रपञ्चस्य निवृत्तिः सेत्स्यति किं तत्र विचारेण। एवम्भूतायां परिस्थितौ दशश्लोकीरचनाया वैयर्थ्यापत्तिः स्यात्, तत् समाधत्ते ग्रन्थकारः सत्यमुक्तं भवता यद्यपि महावाक्यानां स्वतः प्रामाण्यात् तैश्च साक्षादेव निर्विकल्पकमात्मज्ञानं जन्यते तथापि आत्मसाक्षात्कारवादिनां विवादाज्जायमानेभ्यः संशयरूपप्रतिबन्धेभ्यो मन्दबुद्धिजनानामज्ञानस्य नाशं न कर्तुं पारयन्ति साक्षान्महावाक्यानि, विचारणायां कृतायां सत्यां संशयात्मकस्य सन्देहस्य निवृत्तौ सत्यां निर्बाधरूपेणाज्ञानं निवृत्तं भवति, अतएव सन्देहस्य बीजरूपप्रतिवादिनां विवादापसारणायैव महावाक्यार्थानां विचारः क्रियते।

वाक्यार्थानां बोधायैव शब्दशक्तीनामावश्यकता भवत्येव अत्र वाक्यार्थबोधस्य चर्चा विद्यते वाक्यार्थस्य च सत्त्वादेव शक्तिरपि विद्यते, प्रत्यासत्त्या सा च शक्तिरभिधैव, तदानेमेवाभिधया बोधिते पदार्थे मुख्यार्थस्य बाधितत्त्वाल्लक्षणा समाश्रीयते।

**अपरोक्षानुभूतौ-**

अपरोक्षानुभूतौ शङ्कराचार्येण भाषाया विषये विचारः कृतः विद्यते-

**"यस्माद्वाचो निवर्तन्तेऽप्राप्य मनसा सह। यन्मौनं योगिभिर्गम्यं तद्भवेद् सर्वदा बुधः"॥**[218]

---

216 तत्रैव, वाच्यार्थभेदावभासान्न पौनरुक्त्यम्, लक्ष्यस्य चार्थस्यैकत्वादखण्डार्थता, पदजन्यस्मरणस्य निर्विकल्पकवाक्यार्थानुकूलस्य निविकल्पकत्वमनुभवदेवाविरुद्धम्, सविकल्पकवाक्यार्थस्य बोधे च सविकल्पकपदार्थोपस्थितिरङ्गम्, निर्विकल्पकवाक्यार्थबोधे च निर्विकल्पकपदार्थोपस्थितिरङ्गम्, सिद्धान्तबुन्दुः पे० १०- ११

217 तत्रैव, पृ० १२

218 अपरो०अ०, श्लो० १०७

अर्थात् वैखरीभूताया वाचः सत्ता नास्ति तत्र मनसा सहैता वाचं ब्रह्मणो बोधयित्र्यो न जायते प्रत्युत प्रतिनिवर्तन्ते। तच्च ब्रह्म योगिभिर्मौनमेवानुभूते।

**"वाचो यस्मान्निवर्ततन्ते तद्वक्तुं केन शक्यते।**

**प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः॥**

**इति वा तद्भवेन्मौनं सतां सहजसञ्ज्ञितम्।**

**गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः"॥** [219]

सर्वत्रैव भाषाया निषेधो विद्यते भाषया च तस्य ब्रह्मणः प्रप्तिरेव न सम्भवा। यतोहि यदि वाचो यतो ब्रह्मणोऽभिधाने प्रत्यायने वा असमर्था भवन्ति तत् केन कथमपि वा न प्रतिपादयितुं शक्यते। तच्च मौनमाश्रित्यैव योगिभिरनुभूयमानं सत् स्वजातं सकलं निरस्तसमस्ततमोरहितं सविनैव भासा सर्वमिदं जगच्चकासयति। बालानां कृते गिरा अर्थाद् वाचा तस्य निर्देशः क्रियते।

**"अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम्"**[220] अर्थाच्छुद्धं ज्ञानं वाचा न भावयितुं शक्यते।

**ब्रह्मसूत्रशाङ्करभाष्ये शास्त्रस्य विचारः-**

**"शास्त्रयोनित्वात्"**। एतस्य सूत्रस्य व्याख्यानं कुर्वता शङ्कराचार्येण उक्तम्, यद् ब्रह्मणो विचारणायां शास्त्रस्य किमस्थानमिति तदा व्याख्याति महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानेषूपवृंहितस्य प्रदीपवत् सर्वावस्था द्योतिनः सर्वकल्पस्य योनिः कारणं ब्रह्म, अर्थात् प्रदीपो यथा प्रकाशितः सन् सर्वणि वस्तूनि प्रकाशयति तथैव स्वयंप्रकाशितं सज्जगतः प्रकाशाप्रकाशयोः प्रकाशयितृ ऋग्वेदादिभूतविविधशास्त्रात्मकविदस्थानभूतस्य कारणं सच्च चकासच्चकासयति यतोहि सर्वज्ञादन्यतो न सम्भवत्येव विद्यास्थानभूतानां शास्त्राणां कर्तृत्वम्, तथा च श्रुतौ कथ्यते- **"महतो भूतस्य निःश्वसितमेतत्,**

---

219 तत्रैव, १०७-१०८

220 तत्रैव, १३६

**ऋग्वेदो यजुर्वेदः सम्वेदोऽथर्ववेदः"।**[221] अतः शात्रस्य योनिः शास्त्रयोनिरिति, सर्वशास्त्राणां कारणाभूतं तत्त्वमिति ब्रह्म।

अपरोऽपि विग्रहः क्रियते तच्च यथा- "**ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपधिगमे"**[222] अर्थात् ब्रह्मणो निरूपणं शास्त्राणि कुर्वन्ति प्रत्यायन्ति तस्य स्वरूपं बोधयन्ति तात्पर्यमिदं यच्छास्त्रेभ्य एव ब्रह्मणो जगज्जन्मादिकारणता अवबुध्यतेऽर्थाज्जगतः कारणं ब्रह्म इत्यर्थ "यतो वा इमानि भूतानि जायन्ते" इत्यादिकम्।

**गीतायां भाषायाः स्थितिः-**

**"शास्त्रं तु अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकेन प्रमाणत्वम् आत्मनः प्रतिपद्यते न तु अज्ञातर्थज्ञापकत्वेन"।**[223] तात्पर्यमिदं यच्छास्त्रस्य कार्यम् अज्ञानस्य आत्मसम्बन्धिनोऽज्ञानस्य नाशः, अज्ञानतत्कार्यस्य निखिलप्रपञ्चस्य नाशः इत्येव, ततश्च आय्मनो बोधः न तु भाषया ब्रह्मणो बोधो जायते।

शङ्कराचार्यो वक्ति यच्छोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रम् अव्यवसायिनां जनानां प्रमाणजनितविवेकबुद्धिरहितानां बुद्धिर्नास्ति तेषां कृते-

**"यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**

**वेदवादरताः पार्थ नान्यदस्तीति वादिनः"॥** [224]

अत्र वाचो व्याख्यानं कुर्वन् शङ्कराचार्यः प्रतिपादति- याम् इमां वक्ष्यमाणा पुष्पितां पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति। के अविपश्चितः अर्थादमेधसः, अविवेकिनः। अत्र भाषाया वाक्यलक्षणायाः पारमार्थिकता नास्त्येव भाषया वाक्यलक्षणया

---

[221] बृ०उ०, २/४/१०

[222] ब्र०सू०, १/१/३ पृ० ४३

[223] गी०शा०भा०, अ० २० पृ० ३१

[224] तत्रैव, अ० २० पृ० ५१

यावान् अर्थः, दीयते स च शक्त्या अभिधाद्ययैव तस्माच्च वाक्यस्य व्याख्यानं कर्तुं शक्यते यदि वाक्यलक्षणा वागस्ति चेद्, आकांक्षायोग्यतासन्निधि-तत्पर्यमतां पदानां समूह एव वाक्यम्, वाक्यैरथोऽभिव्यज्यते, स च वाक्यर्थः पदद्वारक एव, वाक्यर्थज्ञानात् पूर्वं पदार्थज्ञानस्य आवश्यकता तु भवत्येव, पदार्थज्ञानं च शक्तिद्वारैव ज्ञायते सा च शक्तिरभिधेत्यादिरूपा, अतोऽभिधा च साक्षात् सङ्केतितार्थस्य बोधिका।

**वेदस्य च परमार्थबोधकत्वं विद्यते-**

अत्र कर्मणामुत्पत्तिर्वैदैरभ्यधीयत वेदाश्च कर्मप्रतिपादनपराः, ब्रह्मपदाभिधेयत्वं वेदानां प्रसिद्धम्, ब्रह्म वेदो, वेद उद्भवः कारणं प्रकाशको यस्य, एवं बहुब्रीहौ सति कर्म ब्रह्मोद्भवमित्येव विद्धि अर्थाद् विजानीहि। किं पुनर्ब्रह्म इति जिज्ञासायम्- वेदाख्यम् अक्षरसमुद्भवं अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवम्, ब्रह्म वेद इत्यर्थः, यस्मात् साक्षात् परमात्माख्याद् अक्षरात् पुरुषनिश्वासवत् समुद्भूतम्, ब्रह्म तस्मात् सर्वार्थप्रकाशकत्वात् सर्वगतम्, सर्वगतमपि सन्नित्यं यज्ञविधिप्रधानत्वाद् यज्ञे प्रतिष्ठितम्।

**"कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्"॥**[225]

अत्रापि शङ्काराचार्यः प्रतिपादितुमीहे यद् भाषायामुपनिबधानां वेदानां समुत्पत्तिस्थलमेव परमात्मा अक्षरब्रह्म इति तस्माद् भाषया तथा भूतस्य ब्रह्मणो बोधः साक्षात्कारो वा न जायते प्रत्युत ब्रह्मसाक्षात्कारे बाधाभूतस्य अज्ञानस्य तज्जन्यस्य मिथ्यात्वस्य नाश एव विधीयते।

225 गी०शा०भा०, अ०३, पृ० ९२

**अक्षरब्रह्मण एव परमार्थता–**

**"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते"।** एतस्य श्लोकस्य व्याख्यानं कुर्वाणः शङ्करः ब्रूते- अक्षरतत्त्वस्यैव परब्रह्मत्वं नान्यस्य, अक्षरञ्च नक्षरतीति अक्षरं परमात्मा, तच्च चास्य अक्षरतत्त्वस्य प्रशाशने एव सर्वं विद्यते ब्रह्माण्डम्, 'एतस्य वा अक्षरस्य प्रशाने गार्गि' ओम् इत्येकाक्षरं ब्रह्म इतिपरेणविशेषणाद् अग्रहणम्, परमम् इति च निरतिशये ब्रह्मणि अक्षरे उपपन्नतरं विशेषणम्। तस्यैव ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः, स्वो भावः स्वभावः अध्यात्ममुच्यते। आत्मानमर्थाद्देहम् अधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्मम्, उच्यतेऽर्थाद् अध्यात्मशब्देनाभिधीयते।

**अक्षरब्रह्मणः प्रतिपादनं प्रकारान्तरेण–**

अविनाशि अक्षरं वेदार्थज्ञा वदन्ति सर्वविशेषस्य निवर्तकेन वदन्ति 'अस्थूलम्' 'अनणु' इत्यादि, तादृशस्य पदस्य वर्णनमोङ्कारत्वेन कृतमस्ति शास्त्रेषु 'स यो ह वै तद्भगवन् मनुष्येषु प्रयाणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयति' तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभ्यध्यायीत स सामभिरुन्नीयते ब्रह्मलोकम्' इत्यादिना वचनेन सर्वे वेदा यत्पदमानमन्ति। तपांसि सर्वाणि च यद्वद् वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्, इत्यादिभिर्वचनैः परस्य ब्रह्मणो वाचकरूपेण, प्रतिमावत् प्रतीकरूपेण, परब्रह्मप्रतिपत्तिसाधनत्वेन मन्द-मध्यमबुद्धीनां विवक्षितस्योङ्कारस्योपासनं कालान्तरे मुक्तिफलमुक्तं यत्, तदेवेहापि, यदक्षरं वेदविदो वदन्युत्युपन्यस्य परब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्यौङ्कारस्य कालान्तरमुक्तिफलम् उपासनं योगधारणासहितं वक्तव्यम्।

**विवेकचूडामणौ कथ्यते-**

**"शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यावधारणम्।**

**सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते"॥** [226]

व्याकरणादिशास्त्राणां व्यङ्ग्यमुखेन निन्दनं क्रियते-

**"वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम्।**

**वैदुष्यं विदुषां तद्भुक्तये न मुक्तये"॥**[227]

शब्दानामाडम्बरमुखेन धारासम्पातेन समाजोन्मुखमानीतानां शास्त्रविषयकव्याख्यानानां प्रदर्शनं तु विदुषां कृते वैदुष्यप्रदर्शनाय भवितुं शक्यन्ते, न च तथाभूतेन प्रौढेन व्याख्यानेन मुक्तिः भवितुमर्हति, तस्मान्मुक्तये एतत्सर्वं परिहृत्य परमतत्त्वस्य परमात्मनश्चिन्तनमेव शरणम्म्, तदैवाग्रिमायां कारिकायां सारतत्त्वस्य जगत्कारणभूतस्य तत्त्वस्य चिन्तनाय निरदिशत्।

**"शब्दजालं महारण्यं चित्तभ्रमणकारकम्।**

**अतः प्रयत्नात् ज्ञातव्यं तत्त्वज्ञात्तत्त्वमात्मनः"॥**[228]

**सङ्क्षेपशारीरकेऽभिधाविचारः-**

अत्रापि महावाक्यार्थस्य विचारणायाम् अखण्डार्थस्य निरूपणे तत्त्वं पदार्थयोः मुख्यार्थयोर्विरोधादनन्वयस्तदाह संक्षेपशारीरके-

**"सत्यं यदाह गुरुमान्यदि वाक्यगम्यं, संसर्गरूपमिह वेदशिरः स्वभीष्टम्।**

**अस्त्येवतत्र पदयोरुभयोर्विरोधः, पारोक्ष्यसद्वयविरोधकृतस्तदानीम्"॥**[229]

अत्र गुरुशिष्ययोः संवादकालिका चर्चा विद्यते तस्यां दशायां गुरुप्रतिपादयति यद् यदि मुख्यार्थः स्वीक्रियते तदानीन्तने तत्त्वं

---

226 वि०चू, श्लो० २६

227 वि०चू०, ६०

228 वि०चू० श्लो०६०-६२

229 सं शा० १/१४५

पदयोर्मुख्यार्थस्य समन्वयो न सम्भवति, मुख्यार्थश्च, पदानां शक्तिवृत्त्या मुख्यार्थेषु वृत्तिः।[230]

महावाक्यार्थबोधे भेदः संसर्गो वा वाक्यार्थ इत्युक्तं पूर्वकाण्डे इति कथमेवमिति चेत्तत्राह-

अत्र पूर्वमीमांसकानां मतं दूषयति ग्रन्थकारः- तेषां पूर्वमीमांसकानां वाक्यस्य लक्षणं विद्यते- अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति, अत्र व्यक्तिपदार्थपक्षे गौरित्यस्य संसर्गस्य पदार्थान्तर्गतत्वाच्छुक्लो गौः, कृष्णोऽश्वः, इत्यादिषु व्यवच्छेदमात्रमर्थः, आकृतिपक्षस्य स्वीकारेण स्वरूपेणोकतयोः शुक्लत्वस्य गोत्वस्य च अनुरञ्जनात्मकः संसर्गो वाक्यार्थैरिति कुमारिलभट्टादिभिरुक्तम्। किन्तु तेषां भाट्टप्रभृतीनां मतमत्र न रोचते वेदान्तिभ्यो यतोऽद्वितीये वस्तुनि निष्प्रतियोगिकभेदसंसर्गादेरसम्भवात् तद्वर्जितं तत्त्वमर्थयोरत्यन्तभेदमेव वाक्यार्थं भाष्यकारादय इच्छन्ति, महान्त इत्यनेन तन्मतानभियुक्ता भास्कारादयो निरस्यन्ते [231] तात्पर्यमिदं यत् संसर्गवाक्यार्थस्य विशिष्टवाक्यार्थस्य चात्र विरोधाद् अखण्डैकरसानुभूतं वाक्यार्थं एव स्वीकुर्वन्ति, अत्र संसर्गवाक्ये विशिष्टवादे वा पदेभ्यः पदार्थाः पदार्थेभ्यश्च वाक्यार्थो दीयते तथाभूतस्य प्राप्तस्य च वाक्यार्थस्य अभेदान्वये साक्षाद्विरोधान्न स्वीक्रियते।

**संक्षेपशारीरककारः प्रतिपादयति-**

अत्राचार्येण वाग्देवताया नमस्कृतिर्विधीतये-

**"औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्या। विज्ञायते विश्वविवर्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्"**॥[232]

---

230 "गुरुमानिति सुशिक्षितः इत्यर्थः । यद्वा निखिलसंशयच्छेदिगुरुमत्त्वेन प्रोत्साहयति संसर्गवाक्यार्थत्वे ह्यत्र प्रागुक्तो विरोधःस्यान्नासङ्गवादी क्रियते इत्यर्थः अस्त्येव तत्र वाच्ययोरभेदे"। सु०टीका० सं०शा०, पृ० १४९

231 "यत्कर्मकाण्डनिपुणैरुदितं पुरस्ताद्वाक्यार्थलक्षणमदः पुनरत्र नेष्टम्। भेदादिवर्जितमखण्डमुशन्ति यस्माच्छ्रीबादरायणमातानुता महान्तः"। सं०शा०, १४६

232 सं शा०, श्लो० ४

श्लोकेऽस्मिन् वाचं नमस्यन्नपि तस्याः पराकाष्ठां न न स्वीकुरुते, आचार्यस्य प्रतिपादनाविषया वाग् वर्तते किन्तु तस्य व्याख्यानमित्थं करोति, अत्र हेतोरिति प्रकृतिपञ्चमी विश्वविवर्तस्य अतत्त्वतोऽन्यथाभावस्य हेतुभूताद्ब्रह्मणः सकाशादुत्पन्ना तां त्रयीरूपां वाचं नमामि[233], तथा च श्रुतिद्वारा एतस्य पक्षस्य पोषणं करोति 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः...' इत्यादिश्रुतेः[234] महावाक्यार्थस्य विचारणां सत्यां मुख्यार्थस्य विरोधं करोति तथा चावदत्[235]

**मुख्यार्थवतीं वृत्तिं तत्त्वमदिवाक्यस्य प्रतिपादनेऽसमर्था इति प्रतिपादयति-**

भेदश्रुतिः कल्पितमेव- **"भेदमालम्ब्य मुख्यार्थवती भविश्यति अतत्परा तत्परवाक्य-भङ्गस्त्वितो याति विना निमित्तम्"॥** [236]

अत्र मुख्याया अर्थात् अभिधायाः शब्दशक्तेः प्रवृत्तिर्न भवति, महावाक्यार्थस्य बोधनाय यतोह्यभिधायाः स्वीकारे कृते सति तत्र साक्षात् सङ्केतितत्वावाच्च सोपाधिकस्य तत्त्वमस्यादिपदार्थस्य जाते वेदान्तशास्त्रसम्मतस्याखण्डवाक्यस्य विरोधः स्यादत आह, निरुपाधिकस्याखण्डैकरसस्य तस्य प्रमात्मनो बोधो मुख्यया वृत्त्या न सम्भवति।

**निर्गुणसगुणवाक्ययोर्निर्गुणवाक्यस्य बलीयस्त्वम्-**

**"न खलु निर्गुणवस्तुपरं वचः, सगुणवाक्यविरोधिनिमित्तः। स्वविषयादपसारयितुं बलादतिबलिष्ठपदान्वयमिष्यते"॥**[237] तात्पर्यमेतस्य यन्निर्गुणवाक्यं त्वत्यन्तं बलिष्ठमन्योप-जीवित्वाभावात्सगुणवाक्यं तु तदपेक्षया दुर्बलं निर्गुणवाक्यशेषभूतसृष्ट्यादिवाक्य-सिद्धसर्वात्मब्रह्मस्वरूपानुवादेन तद्विषयोपासनाविधिपरत्त्वात् तत उपजीवकेन दुर्बलेनोपजीव्यं सबलं न बाधमर्हति इत्येषा अक्षरयोजना, अतिबलिष्ठपदान्वयं निर्गुणवस्तुपरं वचः

---

233 तत्रैव, सु०टी० पृ० १३

234 बृ०उ०, २/४/१०

235 "सोऽयं नयमसाविति पौरुषेये वाक्ये तथा व्यतिहृतेऽत्र विशेषहेतुः, पूर्वापरत्वमिति शक्यमिदं न वक्तुं मुख्यत्वलाक्षणिकते प्रतिशब्दवृत्त्योः"॥ सं शा०, १/१६५

236 तत्रैव, २/२८८

237 तत्रैव, २/२९०

सगुणवाक्यविरोधनिमित्ततो न खलु स्वविषयादूलादपसारयितुमिष्यत इति भावः।

**सदत्पादार्थधीर्जनस्यैव महावाक्यार्थबोधः –**

अत्रापि मुख्यां वृत्तिं निरस्यति- "**पदार्थबोधेन कृतार्थता न ते मतिः परोक्षा हि पदार्थगोचरा**"। [238]

अतो महावाक्यनिबन्धनैव धीरबोधविच्छेदकरी भवष्यति। आचार्यस्य कथनमिदं विद्यते यत् पदार्थबोधमात्रकस्य ते मच्छिष्यस्य अखण्डार्थबोधस्त्वान्न भविष्यति यावत्त अखण्डाकाराकाराधीर्न समुदेति, समुदितायां तस्यां च सत्यां भवतः सोपाधिका धीर्नष्टा सती भवतो भेदबुद्धिरपि नंक्ष्यति, तदैव तत्त्वमादिकस्य ज्ञानं भविष्यति॥ आचार्यकथनिदमपि यन् महावाक्यं विना संसारेऽस्मिन् कश्चिदपि पुरुषोऽद्वैततत्त्वस्य ज्ञानं कर्तुं न शक्नोति, पदार्थस्य अवबोधामात्रादेव मुक्तिर्न सम्भवत्येव, "**पदार्थावगमस्य परोक्षत्वात् अपरोक्षसंसारनिवर्तकत्वा-संभवात् ततो न मुक्तिसिद्धिरित्यर्थः**"।[239] यदि महावाक्यानामर्थबोधा मुख्यया वृत्त्या न सम्भवन्ति तर्हि किमर्थं तेषां प्रतिपादना विद्यत इति वदति-

**"पदार्थबोधं परिहृत्य वाक्यं न शक्तमात्मानुभवावसानम्।**

**धियं समानेतुमपेक्षितत्त्वातः स यत्नेन निरूपितोऽभूत्"॥**[240]

वाक्यस्य पूर्णानुभवाभासना तदैव सम्भवति यदा च पदर्थबोधो भवतु पदार्थबोधं विना महावाक्यानामखण्डैकरसस्वरूपोऽखण्डार्थो न गम्यते, अतस्तत्रापेक्षितत्वात् तस्योपयोगिता विद्यत एव। कोऽसौ च पदार्थस्य च ज्ञानं वाक्यार्थज्ञाने हेतुरिति प्रतिपादयितुमुपक्रमते-

**"तच्छब्दादवगतमद्वितीयमासीत्, प्रत्यक्त्वं समधिगतं त्वमित्यनेन।**

**प्रत्यक्त्वं न खलु विना द्वितीयमेवं, नाद्वैतं भवितुमलं विना प्रतीचा"॥**[241]

---

238 तत्रैव, २/२९४

239 तत्रैव, २/३०३

240 तत्रैव, २/३०४

पदार्थशोधनैनैव तत्त्वं पदयोरर्थं जानन्ति मुमुक्षवः, पदार्थशोधनं विना सक्षात् संभवत्येव न हि महावाक्यस्याखण्डार्थः।

**शास्त्रस्य प्रयोजनम् –**

**"शास्त्रं प्रवृत्तिषु निवृत्तिषु तुल्यरूपं साधारणस्य पुरुषस्य पुराभ्यधायि।**

**अस्योच्यते सकलकर्मनिवृत्तिभाजः सर्वं निवृत्तिविषयं श्रवणादिशास्त्रम्"॥**[242]

आचार्यमते शास्त्रं द्विधा प्रवृत्तिनिवृत्तिविषयभेदेन साधारणानां जनानामर्थाद्रागिणां कृते पूर्वतन्तेऽर्थाज्जैमिनिना पूर्वमीमांसायां प्रत्यपादि किन्तु बादरायणाचार्यस्य शास्त्रमिदं ब्रह्मसूत्रसमुद्भूतं वेदान्तस्तु विरक्तानां सन्यासिनां प्रवित्तिवर्जनपुरस्सरं केवलं निवृत्तिविषयवद् विद्यते। प्रवृत्तिमदप्रवृत्तिमच्च किं स्वरूपं शास्त्रमित्यपि विविनक्ति-

**"यमस्वरूपा सकला निवृत्तिस्तथा प्रवृत्तिर्नियमस्वरूपा।**

**निवर्तकादत्र यमप्रसिद्धिः प्रवर्तकात्स्यान्नियमप्रसिद्धिः"॥**[243]

निवृत्तिरपि द्विधा बाह्यान्तरभेदात्, अत्राभिधाया वर्णनं मुख्यार्थद्वारेणाभिधत्ते-

**"यद्वस्तु सद्वयतयाऽवगतः स्वशब्दात्तस्याद्वयत्वमवगन्तुमशक्यमेव।**

**यद्वस्तु च व्यवहितं प्रतिपादितं तत्प्रत्यक्तया न जनः प्रतिपत्तुमीशः"॥**[244]

पदार्थसंसर्गस्य वाक्येनबोधनाद् बुद्ध्यादिद्वैतविशिष्टस्यापरोक्ष-प्रत्यग्रूपस्य त्वमहमादिपदार्थस्य परोक्षवाचितत्पदार्थभूताद्वयवैशिष्ट्यबोधन-मशक्यं विरोधात्, व्यवहितं परोक्षं प्रत्यक्तयाऽऽत्मभेदेन पदार्थयोश्च सद्वयत्वपारोक्ष्ययोस्त्यागे वाक्यार्थस्यैवानुपपत्ति स्यातिति।

पुनरत्रपदार्थबोधः कथं जायतामित्यपि प्रतिपादयतीन्द्रियोदारणमुखेन यथा कश्चिदपि पदार्थं चक्षुर्विषयीभूतः सन् तेन च संयुक्तं भवति तदा स्वयमेव

---

[241] तत्रैव, २/३०५

[242] तत्रैव, १/७२

[243] तत्रैव, १/८५

[244] तत्रैव, १/९६

बोधस्तस्य पदार्थस्य समापतति, स्वसामर्थ्यमात्रेणैव, तथैव यैश्शब्दस्यापि अर्थः प्रकशितः स्यादिति चेन्न, पदस्य च बोधस्तु शक्त्यैव भवति, तच्च पूरणशक्तिरन्वयप्रयोजकरूपवत्ता तद्युक्तमबधितान्वयरूपो वा, अबाधितान्वये सत्येव साक्षात्संकेतितस्यार्थस्य व्यवहिताभावरूपस्य प्रकाशनं जायते, तदेव वाक्यविषये आकाङ्क्षासन्निधियोग्यतादिभिसमन्वितेऽनवये एव सम्भवति। अत्र च पदपदार्थयोः बोधः किस्वरूपः, इत्यादिकमभिधाशक्तिमुखेन प्रतिपादयति।[245]

**भाषया नाखण्डार्थवस्तुप्रतिपत्तिः –**

**"नाखण्डवस्तुविषया वचसः प्रवृत्तिः लोकेऽपिदृष्टिपथमापतिता कदाचित्।**

**नानापदार्थघटनाविषयत्वहेतोर्दूरेत्यता श्रुतिशिरोवचनेषु तस्याः"॥** [246]

भाषाविषयकचिन्तने वेदान्तशास्त्रे महावाक्यस्याखण्डार्थबोधो वाचा न सम्भवत्येव, अखण्डवस्तुविषयकचिन्तने वचसः प्रवृत्तिर्नास्त्येव वाक्यानां नानापदार्थसंसर्गविषयत्वात् सोऽयमित्यादेश्च विवादपदस्य दृष्टत्त्वात्, श्रुतिवाक्येषु न वाण्याः प्रवृत्तिः।

**वेदान्ते वाक्यस्य लक्षणम्-**

वाक्यस्य स्वरूपं विचार्यतेऽत्र तच्च वाक्यं किस्वरूपं भवतीति विचारयति-

**"किञ्चक्रियापदमपेक्ष्य पदानि वाक्यभावेन सम्यगिह सङ्गतिमाप्नुवन्ति।**

**नात्र क्रियापदमपेक्षितमामनन्ति वाक्यं कुतो भवति वेदशिरस्तदानीम्"॥** [247]

सर्वत्रापि क्रियायामन्वयो भवति पदानां तदैव तेषां वाक्यत्वं सम्भवति, यतोहि क्रियां विना पदानां संगतिर्न सम्भवति, किन्तु वेदान्तशास्त्रे न तथा वेदान्तिनः क्रियापदमपेक्षितं न आमनन्ति तदा तु वेदान्ते वाक्यं कुतः? उत्तरति यत् 'तत्वमसि' इत्यादिवाक्येषु 'असि' इत्यादिपदानां प्रयोगे सत्यपि तेषामनावश्यकत्वात्।

---

245 "आकङ्क्षितं भवति पूरणशक्तियुक्तं यत्सन्निधौ पठितमस्य हि संगतिः स्यात्। नाकाङ्क्षयैव न तु सनिधिनेव वा स्यात्। संबन्धिता हि विरहय्यपदार्थशक्तिम्"। तत्रैव, १/९७

246 तत्रैव, १/१०३

247 तत्रैव, १/१०८

**लौकिकस्य वाक्यस्य वेदान्तवाक्यैः सह भेदः कथम् –**

यदि क्रियाद्वारकानां वाक्यत्वं न चेत् पदसमूहत्वेनैव बोधकत्वंस्यादिति चेत् न पदानामर्थस्मारकत्वेन अननुभावकत्वात्

**"नापूर्वमर्थमुपलम्भयितुं पदानां सामर्थ्यमस्ति परिहृत्य तु वाक्यभावम्।**

**स्वर्थस्मृर्तिं हि जनयन्ति पदानि लोके, विज्ञातसंगतितया न तु कार्यमन्यत्"॥**[248]

अपूर्वार्थस्य बोधनासामर्थ्याद् वेदान्ते तथाविधस्य वाक्यस्य कार्यं न विद्यते यतोहि लोके पदानि स्वसम्बद्धान्येवार्थं जनयन्ति, तस्य च लोके व्यहारे उपयोगः, किन्तु अखण्डार्थप्रतिपानेऽयुक्तत्वम्।

**मुख्यपदार्थस्य वर्णनं तस्य च विरोधो वेदान्तशास्त्रे –**

**"सोऽयं पुमानिति हि मुख्यपदार्थयुक्तवाक्यार्थबुद्धिजननस्य न वाक्यमेतत्। ईशीत वाच्यशबलस्थपदद्वयेन संसृष्टबुद्धिजनने पदयो-र्विरोधात्"॥**[249]

लौकिकेन वाक्येन तावदुदाहरति- सोऽयं पुमान् इत्यादिवाक्यजातं मुख्यपदार्थयुक्तवाक्यार्थद्धिजननस्य नेशीत स्ववाच्यपदार्हसंसर्गरूपवाक्यार्थं बोधयितुं न शक्नुयात्, अतीतवर्तमानयोर्देशकालयोर्विरोधात् तद्विशिष्टपदार्थयोः तद्विरुद्धत्वेन संसर्गेण वाक्यार्थस्य विरोधो भवति। तस्माल्लक्षणाया आश्रयो नीयते।

मुख्यया वृत्त्या न सम्भवति एवब्रह्मणि प्रवृत्तिः तच्च कथमिति कारणमुखेन प्रतिपादयति

**"षष्ठीजातिगुणक्रियादिरहिते सर्वस्य विज्ञातरि। प्रत्यक्षे परिवजिताखिलजगद्वैतप्रपञ्चे दृशौ। संत्यक्तव्यवधानके परमके पदे विष्णोः पदे शाश्वते। त्वय्यज्ञानविनिर्मिता न हि गिरो मुख्यप्रवृत्तिक्षमा"॥**[250]

---

248 तत्रैव, १/१०९

249 तत्रैव, १/१४९

250 तत्रैव, १/२३९

यत्राभिधायाः प्रवृत्तिर्भवति तत्र जातिगुणक्रियायदृच्छानां प्रवृत्तिर्भवत्येव, अतस्त्वयि निर्विशेषे ब्रह्मणि तत्वमादिवाण्यर्न मुख्य-वृत्तिसमर्थाः, कस्मात् षष्ठी सम्बन्धः, सम्बन्धनिमित्तिकाः समासास्तद्धिताः जातिनिमित्ता गवादयः शब्दा गुणनिमित्ताश्च शुक्लादयः क्रियानिमित्ताः पाचकादयः, स्वरूपनिमित्तानां डित्थडवित्थानां बोधो जायते, किन्तु ब्रह्मणि सम्बधनिमित्तकानां शब्दानाम् अनभिधानात्, जातिगुणक्रियास्वरूपादिनिमित्तक-शब्दानामप्यभावः। गिरो वस्तुनि अर्थात् परब्रह्मणि सम्बन्धं न कर्तुं शक्नुवन्ति तस्माच्छब्दानामप्रवृत्तत्वान्न तत्र शक्तिग्रहः, शक्तिग्रहाभावाच्च न तत्र मुख्याया वृत्तेः प्रवृत्तिः, तस्माच्च मुख्यार्थ एव न प्रवर्तते पारमार्थिकतत्त्वस्य प्रतिपादने।

**वाचकपदम्-**

सामान्यतः प्रथममेष पदार्थपिण्डो वाच्योऽस्यवाचकमिदं पदपिण्डरूपम्, इत्याकलय्य पुनरेषविशेषतोऽपि शब्दार्थसंगतिमवैति जनस्तटस्थः।

**"पदवृत्तिसमन्वायावुभौ प्रतिपाद्यौ प्रथमे हि लक्षणे।**

**तदवन्तरवाक्यवर्त्मना पदवृत्तिः प्रथमं प्रकीर्तिता"॥**

प्रथमलक्षणे समन्वाध्याये पदवृत्तिस्तत्वं पदयोः स्वार्थे वृत्तिः समन्वयो नाम तयोरेव पदयोर्वाक्यतामापन्नयोरखण्डे ब्रह्मात्मनि पर्यवसानमेतौ पदवृत्तिसमन्वयावुभौ प्रथमाध्याये प्रतिपाद्यौ न समन्वयमात्रप्रतिपाद्यस्तस्मादवान्तरवाक्यवर्मना पदार्थमात्रविषय-वाक्यगतिप्रकारेण प्रथमं पदवृत्तिः प्रकीर्तिता, पदार्थज्ञानपूर्वकत्वात् वाक्यार्थज्ञानस्य पदार्थपरवाक्यविचारो युक्त एव।

**पञ्चप्रकियायां शब्दवृत्तिः–**

शब्दस्यवृत्तयः शब्दवृत्तयः वृत्तिश्च नाम सम्बन्धः, स च सम्बन्धः शाब्दबोधोपयिकः पदपदार्थयोस्संयोजकः, यद्वारैव शब्दोऽर्थं प्रत्याययति, शक्त्याख्येन सम्बन्धेन यद्धर्मावच्छिन्नस्य शाब्दबोधस्य आवश्यकता भवति तद्धर्मावच्छिन्नस्यैव शब्दस्य ग्रहणमपि कारणदले गृह्यते, अतः शक्त्याख्यस्य सम्बन्धस्य सत्त्वादेव शब्दा सम्बन्धितार्थं प्रत्याययन्ति, प्रत्यायितेऽर्थे सत्येव जनानां क्वचित् प्रवृत्तिनिवृत्ती भवतः, तदर्थज्ञानं विना न सम्भवत्येव

प्रवृत्तिर्निवृत्तिर्वा। भारतीयेऽखिले प्राचीनवाङ्मये भाषा संस्कृतमेव, अन्यस्यां वा भाषायामपि शब्दाः स्वसम्बन्धितार्थमेव बोधयन्ति, यथा पट इत्युच्चार्यमाणे सति पटत्वावच्छिन्नस्य पटस्यैव बोधो जायते 'घट' इत्युच्चार्यमाणे सति घटत्वावच्छिन्नस्य प्रथुबुध्नोदराकृतिमतो घटस्यैव बोधो जायते न तु पटशब्दोच्चारणेन पटत्वाच्छिन्नस्य पटस्य, घटशब्दोच्चारणेन तदसम्बधिनां पदार्थानां वा बोधः, तस्मान्निसचीयत यच्छब्दाः स्वसम्बन्धितमर्थमेव बोधयन्ति, तच्च सम्बन्धितार्थप्रकाशकत्वं शक्तिरूपेण सम्बन्धेनैव आयाति अतश्शाब्दबोधे भाषाया दैनदिनव्यवहारे व शब्दानामर्थबोधाय सम्बन्धस्यावश्यकत्वाद्।

**शब्दवृत्तीनां प्रयोजनम्-**

वेदान्तदर्शने पञ्चप्रक्रियायां सर्वज्ञातमुनिर्विचारयति किम्प्रयोजनाः शब्दशक्तयः, इति जिज्ञासायाम्- वेदार्थज्ञाननैर्मल्यसिद्धये। वेदार्थानां ज्ञानं भवतु तद्द्वारा च जनानां सांसारिकाणां हृदयानि निर्मलत्वं यान्तु, स्व-स्वजीवनस्य अभीष्टं ससाधयन्तो मोक्षपदभाजो भवन्वित्येतदर्थः।

**शब्दशक्तयः-**

सर्वज्ञातमुनिना तिस्रः शब्दस्य शक्तयः स्वयक्रियन्त प्रसिद्धिर्लक्षणा गुणवृत्तिश्च। तत्र प्रसिद्धिपदेन मुख्या अर्थादभिधावृत्तिर्बोध्यते, वृद्धव्यवहारद्वारा शक्तिग्रहो भवति यस्मिन्नर्थे यस्य शब्दस्य स शब्दस्तस्य अर्थस्य वाचकतामुपैति अष्टविधशक्तिग्राहकसाधनेषु वृद्धव्यवहारस्यैव मुख्यत्वम्,वृद्धानां व्यहारद्वारा कस्यचित् शब्दस्य कश्मिंश्चिदर्थविशेषे गृहीतशक्तिकस्य शक्तिः जायते।[251] यथा केनचित् प्रयोक्त्रा 'गाम् आनय' इत्युच्चारिते सति सास्नादिमतो गोपदार्थस्य कस्याश्चिदाकृतिविशेषस्य आनयनं भवति यतोहि सास्नादिमति पदार्थे एव तस्य गोशब्दस्य शक्तिगृहीता भवति लोके।

---

251 "यस्यार्थस्य वाचकत्वेन वृद्धव्यवहारे यः शब्दो गृहीतशक्तिको भवति तस्य तेनैव प्रयोजकेन तत्रैवार्थे वृत्तिः मुख्यावृत्तिरित्यभिधीयते"। प०प्र०, शब्दवृत्तिविवेकप्रकरणम्।

**भाषायाः प्रयोजनम् –**

भाषया साक्षाद् ब्रह्म बोध्यते चेद्, तन्न सम्भवति एव तर्हि भाषायाः का कारणता ब्रह्मणि तदाह ग्रन्थकारः, शास्त्रस्य कार्यं प्रत्यगात्मनि ब्रह्मणि वा अविद्याकृतो यो मिथ्या अध्यारोपो ब्रह्मज्ञाने बाधकानि धर्मान्तराणि तेषामविद्यजनितान्नां धर्माणां नाश एव भाषया विधीयते तदन्यन्न किमपि, न च भाषा प्रत्यगात्मानं कर्मीकरोति, अर्थाद्बोधविषयमानयति। औच्यत चोपनिषत्सु "यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह" इत्यादीनि बहूनि वाक्यानि समदायिषत।[252] सर्वज्ञातमुनिस्तु प्रतिपादयति यद् गौणी वृत्तिर्लक्षणा वृत्तिश्च प्रत्यगात्मनि सङ्गच्छेते परवर्तिषु वेदान्तिषु नव्यवेदान्तिनस्तत्र भवतो वेदान्तपरिभाषाकारस्य ग्रन्थ आदाय शक्तिपदार्थस्य विचारो यतोहि वेदान्तदर्शने शक्तिपृथक्पदार्थत्वेन स्वीक्रियते-

वेदान्तपरिभाषायामागमपरिच्छेदे शब्दशक्तीनां चर्चामाचार्यधर्मराजाध्वरीन्द्रः करोतीत्थम्। **"अथागमो निरूप्यते। यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। वाक्यजन्यज्ञाने च आकाङ्क्षायोग्यताऽऽसत्तयस्तात्पर्यज्ञानञ्चेति चत्वारि कारणानि"।**[253] अत्र आगमप्रमाणस्य प्राथम्येन विचारः – आ सम्यग् गम्यते ज्ञायतेऽर्थोऽनेन, इत्यागमो वाक्यविशेषः।[254] तस्यैव एव प्रमाणत्वम्। अत्रैतस्य तात्पर्यमिदं यद् यस्य वाक्यस्य तात्पर्यस्य विषयरूपः संसर्गोऽन्यप्रमाणैर्न बाधितो जायते, तदैवम्प्रकारकं वाक्यं प्रमाणत्वेन सम्बुध्यते। एवम्भूतस्य वाक्यस्य प्रमाणान्तरेणाबाधितत्त्वमेव विद्यते। यतोहि वाक्यार्थज्ञाने पदार्थज्ञानं कारणं जायते। वाक्यार्थावबोधाय चत्वारि सहकारीण कारणानि दार्शनिकैः स्वीक्रियन्ते। तानि च- आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यम्, इति विद्यन्ते। एवम्भूतानां शाब्दबोधकारणकतत्त्वानां सहायतयैव वाक्यार्थबोधो विधातुं

---

252 "शास्त्रं हि प्रत्यगात्मनि अविद्याध्यारोपितमतद्धर्मं निवर्तयत्येव केवलम्, न तु तं कर्मीकरोति"। तत्रैव, पृ० २

253 वेदान्तपरिभाषा, आगमपरिच्छेदः, पृ० १८७

254 तत्रैव, विवरणटीका

शक्यते तस्माच्च वाक्यार्थवाबोधाय पादार्थबोधस्यावश्यकत्वात् पदार्थस्यानुचिन्तनं विधेयम्। यतोहि सिद्धान्तो विद्यते पदजन्यपदार्थोपस्थितिरेव शाब्दबोधे कारणता। पदार्थविभाजनं चेत्थम्- शक्यो लक्ष्यश्च। यः पदार्थः शक्तिद्वारा प्रबोध्यते, स पदार्थः शक्त्याऽवबोधितः सन् शक्य इत्युच्यते। तथैव यः पदार्थो लक्षणा द्वारा बोधितो भवति, सोऽर्थो लक्ष्यार्थ इति निगद्यते। एवं प्रकारेण वृत्तिभेदात् पदार्थानाभेदः दृश्यते। यद्यपि वृत्तेरुपविभागत्वेन गौणी, केवललक्षणा, लक्षितलक्षणा, इत्येते सन्ति। तेषां चोपविभागानां व्याख्यानं करिष्यते यथावसरम्। अत्रोपभोदाः द्वयोरेवान्तर्भवतः- **"पदार्थश्च द्विविधः- शक्यो लक्ष्यश्च"।**[255]

वेदान्तिनस्तु पदार्थानां द्वैविध्यमेव मन्वते तथैव समर्थयन्ति। पदं द्विविधं चित् पदार्थोऽपि द्विविध एव स्वीक्रियते। शक्यार्थः, शक्त्योपस्थापितार्थो नाम शक्तिवृत्त्या पदं यमर्थं द्योतयति सोऽर्थः, शक्यपदार्थ इति भण्यते। शक्तिरेवाभिधा इत्युच्यते। तदाह मूले- **"शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः"।**[256] पदनिष्ठशक्तिवृत्तेर्विषयः शक्यार्थ इति निगद्यते। अतो हेतोः शब्दार्थयोर्निरूपणं शक्तिवृत्तावाध्रियते। प्रभाकरद्वारा सिद्धार्थेषु पदानां शक्तिर्न स्वीकृता प्रत्युत कार्यान्वितेष्वेव पदेषु शक्तिः स्वीकृता। सः कथयति यत् 'घटमानय' अत्रानयनरूपकार्येण सम्बद्धं घटं पुरुषो यदा पश्यति। तदैव स घटपदे शक्तिं ग्रहीतुं शक्नोति इति न साधु, यतोह्यानय पदस्य स्वार्थे शक्तिग्रहो एव न सेत्स्यति। अत्र घटपदस्यान्वयानयनक्रियया सह भवति किन्त्वानयनक्रियाया न कस्याञ्चिदपि क्रियायामन्वयोऽतः समेषां पदानां स्व-स्वार्थेषु वृत्तिः। तथाभूता मुख्यवृत्तिरेव शक्तिरिति कथ्यते। यथा- घटपदस्य **"प्रथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे शक्तिः"।**[257] कम्बुग्रीवादिमद्व्यक्तेरेवावगमो जायते। वेदान्तदर्शने शक्तिरतिरिक्तपदार्थत्वेन स्वीक्रियते।

---

[255] तत्रैव, पृ० ९९

[256] तत्रैव, पृ० ९८

[257] तत्रैव, पृ० ९८

**न्यायदर्शनस्य शक्तिखण्डनाय शक्तिपदार्थस्य प्रतिपादनम् –**

न्यायमतनिरासाय **"सा च शक्तिः पदार्थान्तरम्"।**[258] अस्माकमवेदान्तदर्शने शक्तिरतिरिक्तपदार्थत्वेन मन्यते। तस्माच्च प्राचीनानामाचार्याणां मते ईश्वरेच्छायाः सम्बन्धत्वाभावत्वम्। यस्मान्मनुष्येच्छया नदीनगरादीनां नामानि विधीयन्ते। तत्रेश्वरेच्छायाः प्रवृत्तेरेवासम्भवात्। नव्यनैयायिकानामपि 'इच्छामात्रम्' शक्तिरित्यपि न सङ्गच्छते । तत्रायां हेतुर्विद्यते यन्मनुष्यो घटादिपदेच्छया पटादिपदान्युच्चारयेदिति। तदा तादृशेषु स्थलेष्वपि ईश्वरेच्छायाः सत्त्वात् घटस्य पटपदेऽपि शक्तिः स्वीकार्या। एतस्माच्च महती विषमता स्यात्। तस्माच्छक्तिपदार्थस्य पृथग्रूपेण सत्ता विद्यते। तादृशशक्तिपदार्थः पदार्थबोधनसामार्थ्यरूपवान् पदनिष्ठवृत्तिरूपमात्रको नास्ति। कथं तर्हि सा च संसारे सर्वस्मिन् स्थानेषु कार्योत्पत्त्यनुकूला शक्तिरेव (कार्योत्पत्तिकरणस्य योग्यता) पदार्थत्वेन पतिपाद्यते। अतः पदनिष्ठार्थबोधरूपकार्यजनकत्वं शक्तित्वमद्वैतवेदान्तदर्शने पृथक्पदार्थरूपेण साध्यते। **"सा च शक्तिः पदार्थाऽन्तरम्"।**[259] अर्थापत्तिद्वारा बोध्यते शक्तेः पृथक्त्वम्, अत्रैकेनोदाहरणेन बोध्यते अग्निरेव दाहे समर्थो विद्यते, किन्तु चन्द्रकान्तमणिसान्निध्यं यदि भवति तर्हि दाहो न जायते। अतः मणिसान्निध्यादग्नेः दाहशक्तिरनश्यदिति कल्प्यत एव। तस्मादेवम्भूतो नश्यमानः शक्तिरूपपदार्थोऽन्यपदार्थानामपेक्षया विलक्षणतया पृथक्त्वेनैव विद्यते। यदि कथ्यते यत् प्रतिबन्धकस्याभावः कार्यमात्रं प्रति कारणं भवति। तदात्र मणिरूपप्रतिबन्धकपदार्थस्य विद्यमानत्वात् प्रतिबन्धकाभावरूपकारणमेव नास्ति। तस्मादेवात्र दाहात्मकं कार्यं न जायते। अतः कथ्यते यद्यग्नौ दाहानुकूला शक्तिर्नाभविष्यत्तदा तदग्नौ दाहकत्वमपि नाभविष्यत्। जले दाहानुकूलशक्तेरभावात् जलन्न ज्वलयति। नैयायिकैः केषुचित् स्थलेषु शक्तिपदार्थसत्त्वे प्रतिबन्धकाभावः स्वीक्रियते। किन्तु कस्यचिदप्यभावे कथञ्चिदपि प्रकारस्य भावपदार्थस्योत्पत्तिरद्यावधि न श्रूयते नापि दृश्यते। चन्द्रकान्तमणिरूपप्रतिबन्धके सति वह्नौ न दाहकता क्वचिदपि। तथाभूते प्रतिबन्धकाभावे सति ज्वलयतीत्यर्थः। एवमुक्त्वा नैयायिकाः कृशानौ दाहाऽनुकूलशक्तेः सद्भावं न स्वीकुर्वन्तः प्रतिबन्धकाभावमेव दाहस्य

[258] सं० शा०, पृ० ९८

[259] तत्रैव, पृ० ८८

कारणमित्यभ्युपगच्छन्ति। तस्मान्न नैयायिकरीतिस्साध्वी, तस्मादद्वैत-वेदान्तस्य विचार एव श्रेष्ठ इति वेदान्तस्यानुगामिनः। **"सिद्धान्ते कारणेषु कार्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात्"।**[260] एवम्भूतायाः शक्तेस्सत्त्वादेव मृत्तिकाया घटोत्पत्तिर्नन तु पटोत्पत्तिः, यतोहि कारणेषु सर्वत्र स्व-स्वकार्यकरणस्य शक्तिर्विद्यमाना भवति, तस्मादेव तन्तुभिश्च न घटः प्रत्युत पट एव तन्तुषु च घटोत्पादिकायाः शक्तेरभाव एव। **"परास्य शक्तिः विविधैव श्रूयते"।**[261] श्रुतिवाक्यमत्र प्रतिपादयति यत् परमात्मनोऽनेकप्रकारिका शक्तयश्श्रूयन्ते। स्मृत्याऽपि प्रतिपाद्यते- **"शक्तयः सर्वभावानामचिन्त्या ज्ञानगोचराः"।**[262] सर्वपदार्थेषु ज्ञानमात्रेण संज्ञेयाश्शक्तयोऽन्तर्भवन्ति। एवम्भूतेनोपरितनेन व्याख्यानेन शक्तिरतिरिक्तपदार्थत्वेनासाध्यत। तथा च पदनिष्ठशक्तेर्ज्ञानमनुमानप्रमाणद्वारा संजायते।

**कार्येणनुमानत्वं शक्तेः –**

कथं च पदनिष्ठायाश्शक्तेरनुमानं क्रियतेऽस्यातिरिक्तत्त्वसाधने किं कारणम्। तद्वदति– पूर्वोक्तायाः शक्ते तत्तत्पदेन जन्यं पदार्थज्ञानरूपकार्येणानुमीयते। **"सा च तत्तत्पदजन्यपदार्थज्ञानकार्यानुमेया भवति। तादृशशक्तिविषयत्वं शक्यत्वम्"।**[263] तस्मात्पदार्थज्ञानरूपं कार्यं दृष्ट्वैव शतेर्ज्ञानं क्रियते तादृशस्य ज्ञानस्य साधकत्वमनुमानेनैव जायते। विवरणटीकाकारश्चानुमानमिथं प्रतिपादयति- पदार्थज्ञानम्पदनिष्ठस्वबोधा-नुकूलशक्तिपूर्वकम्, यतोहि तादृशपदार्थज्ञानं पदजन्यपदार्थज्ञानरूपकार्यत्वात्, यथा- घटरूपपदार्थज्ञानं घटपदस्य कम्बुग्रीवादिमति पदार्थे विद्यमानशक्ति-युक्तः।[264] अत्रत्येन व्याख्यानेन सिद्धं भवति यदनुमानप्रमाणमेव पृथग्रूपेणातिरिक्तं शक्तिपदार्थं साधयति, तथाभूतायाः शक्तेर्जायमानस्य

---

[260] तत्रैव, पृ० ८८

[261] तत्रैव, विवरणटीका, पृ० ८८

[262] तत्रैव, विवरणटीका, पृ० ८८

[263] तत्रैव, मूले, पृ० १००

[264] "पदार्थज्ञानं पदनिष्ठस्वाऽनुकूलशक्तिपूर्वकं पदजन्यपदार्थज्ञानरूपकार्यत्वात् घटरूपपदाऽर्थज्ञानकार्य-वदिति"। तत्रैव, विवरणटीका, पृ० २१२

ज्ञानस्य यो विषयः स पदार्थः । शक्तितः पदस्य पदार्थे शक्यता। पदार्थे एवम्भूतायाः शक्तेः विषयता एव शक्यता। यथा घटपदोच्चारणे सति घटत्वरूपोऽर्थ एव बुध्यतेऽतो घटपदस्य शक्त्या जायमाने ज्ञाने घटत्वमिति विषयः। अतः घटत्वं घटपदस्य शक्यमर्थाद् शक्यत्वं घटनिष्ठम्। **"तच्च जातेरेव न व्यक्तेः, व्यक्तीनामानन्त्येन गुरुत्वात्। कथं तर्हि गवादिपदाद् व्यक्तिभानमिति चेत् जातेर्व्यक्तिसमानसंवेद्यत्वादिति"।**[265] शक्यत्वं जातेर्व्यक्तेर्वा इति प्रतिपादयति धर्मराजाध्वरीन्द्रः । नैयायिकास्तु जात्याकृतिव्यक्तिविशिष्टस्य पदशक्यत्वं स्वीकुर्वन्ति। दीधित्यनुयायिनस्तु व्यक्तेरेव। वैयाकरणैस्तु चतुष्टयीशब्दानां प्रवृत्तिर्जातिगुणक्रियायदृच्छाभेदेन। धर्मराजाध्वरीन्द्रमते तु जातावेव शक्तिः।[266] जातिरत्रानुगतो धर्मः। स च परैर्जातिशब्देन व्यवह्रियते। पुनर्यदि शङ्क्यते केनचित् यज्जातेः खण्डनं प्रत्यक्षपरिच्छेदे कृतमस्ति तथा चात्र जातेः शक्यत्वं व्यवस्थाप्यते? इति चेन्न। तत्रेदमवगम्यम्- पूर्वं जातेर्निरसनं न कृतम्, किन्तु जातेः पृथक्पदार्थतायाः निरसनं तथा च लक्षणादिकस्य निरसनं कृतम्। तत्र नित्यत्वसत्वांशयोरेव निरासः। अनेकानुगतत्वस्य सद्भाव एव साधित इष्टत्वात्।

सकलगोव्यक्तिष्वनुगतो गोत्वरूपो धर्मस्तु स्वीकृत एवेति न परस्परविरुद्धता। अतो वेदान्तेशास्त्रे सर्वत्र जातिपदेनानुगतधर्म एव स्वीकर्तव्य इति। एवञ्च मीमांसका अनेकशक्तिकल्पनाप्रसङ्गाद् व्यक्तौ जातिविशिष्टव्यक्तौ वा शक्तिं न स्वीकुर्वते। तेन गवान्तरबोधापत्तेर्वा गवि शक्तिरिति मतं प्रत्युक्तं भवति। अन्यच्च व्यक्तिशक्तिवादेऽनेक-कार्यकारणभावकल्पनाप्रसङ्गेन गौरवं भवति। जातौ शक्तिस्वीकारे तु गौरवापत्तिर्न जायते। अतः आकृतिशक्तिवाद एवोचितः। अत्राकृति-र्जातित्वेनाऽभ्युपगम्या। तस्माज्जातौ शक्तिस्वीकारे आनन्त्यव्यभिचार-दोषावपसृयेते। अत्र पुनर्जिज्ञास्यते यज्जातौ शक्तिसत्त्वादेककालावच्छेदेन सकलगोव्यक्तीनामानयनस्यासम्भवात्। जातेर्व्यक्तिसमानसंवित्संवेद्यत्वादिति युक्त्यैव व्यक्तिभानं भवति। अर्थाज्जातेर्व्यक्तिसमानसंवित्संवेद्यत्वेन जातिभाषकसामग्र्यैव व्यक्तेरपि भानमित्यन्ये मन्यन्ते।[267] व्यक्तेस्समाना संवित्

---

265 तत्रैव, मूले, पृ० २१०

266 तत्रैव, पृ०२१५

267 तत्रैव, प्रकाशटीका, पृ० २११

व्यक्तिसमानसंवित् तया संवेद्या व्यक्तिसमानसंवेद्या तस्याः भावः तस्मात् बोध्यते व्यक्तिरपि। यया संविद्-व्यक्त्या घटवृत्तिर्घटत्वं गृह्यते। तयैव घटस्यापि ग्रहणं भवति। जाति- व्यक्त्योरभेदाऽभ्युपगमान्न सामग्र्यन्तरस्यावश्यकता भवतीति।

अतः परं प्राभाराणां विचारः- गुरुमते तु जातिव्यक्त्योश्च च शक्तिः । सा जातौ ज्ञाता कारणम्। व्यक्तौ तु स्वरूपेण विद्यमाना कारणतां याति। तथा च व्यक्तिरित्यत्र स्वरूपेण विद्यमानैव शक्तिस्तदुपस्थितौ हेतुः। तेन व्यक्तेरपि शक्यता शब्दबोध्यता चोपपद्यते। तथा चोक्तम्- "**तत्त्वप्रदीपिकायाम्- आकृतेः शब्दार्थत्वेऽपि तस्या एव शब्दार्थत्वमिति नियमानङ्गीकारात्**"।[268] ज्ञायमानया शक्त्या जात्युपस्थितिदशायां स्वरूपेण वर्तमानया शक्त्या व्यक्त्युपस्थितेरुपपत्तौ सत्यां व्यक्तिशक्तिज्ञानं तदुपस्थितौ नापेक्षितं भवति। "**यद्वा गवादिपदानां व्यक्तौ शक्तिस्वरूपसती न तु ज्ञाता हेतुः। जातौ तु ज्ञाता**"।[269] प्रभाकरेणोभयत्र शक्तिर्मन्यते स्वरूपज्ञातभेदात्,

"**न व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात्**"।[270] अस्य विसङ्गतेरुत्तरं ददाति। "**जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिमत्त्वज्ञानं विना व्यक्तिधीर्विलम्बाभावाच्च**"।[271] अत्रेदं बोध्यते जातिशक्तिज्ञानेन जातिज्ञानं भवति। जतिज्ञाने जाते सत्येव तदभिन्नत्वेनैव व्यक्तेर्ज्ञानं सञ्जायते। स्वरूपेण वर्तमानव्यक्तिशक्तेरावश्यकतया विनापि व्यक्तेर्भानं बिलम्बराहित्येनैव भवतीति संपश्यामः। ईदृशस्यानुभवस्य संलापो विधातुं न शक्यते। अतः कारणद्वयस्वीकारस्यापत्तिर्न जायते। उपरितनविचारे नैयायिकसम्मतिर्दीयते केचन नैयायिकाः केषुचित् स्थलेषु स्वरूपसतीशक्तिः, तथा चान्यत्र केषुचित् स्थलेषु ज्ञातशक्तेः कारणतामवगच्छन्ति।[272] एवं रीत्या प्रतिभाति यन्मतमिदं नैयायिका अपि स्वीकृतवन्तः। पदेऽन्वये च शक्तेः सत्त्वात्, तत्रान्वयबोधाय

---

268 तत्रैव, पृ० २११

269 तत्रैव, पृ० २१५

270 तत्रैव, पृ० २१५

271 तत्रैव, पृ० २१५

272 "अत एव न्यायमतेऽप्यन्वये शक्तिः स्वरूपसतीति सिद्धान्तः"। पृ० २१५

स्वरूपसती शक्तिः हेतुः। तथा च पदजन्यज्ञानाय शक्तेर्ज्ञातसत्ताया एव कारणता जायते ।

**“अतः परं ग्रन्थकृत् भाट्टमतमनुसृत्य स्वाभीष्टशक्यत्वमुपपद्यते- अथवा व्यक्तेर्लक्षणयावगमः। यथा नीलो घटः, इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा, तथा जातिवाचकस्य तद्विशिष्टे लक्षणा”।**[273] अत्रत्यव्यवस्थां कथयति यत् प्रभाकरोक्तौ व्यक्तौ स्वरूपसती शक्तिः हेतुः। तत्र शक्यत्ववारणाय ज्ञायमान इति विशेषणं दत्तम्। एतावतापि शक्तिद्वयकल्पनारूपो दोषो दुषितं भवति। एतस्मादेव कारणाद् भाट्टोक्तव्यवस्थापनस्य श्रेष्ठता। धर्मराजाध्वरीन्द्रोऽपि एतस्या व्यवस्थाया समर्थनं करोति- सा चेत्थम्भूता, नीलशब्दो गुणस्य वाचक इति। किन्तु नीलपदवाच्यं यत्तच्च घटद्रव्यं न कदापि निगद्यते। अत्रेदं कारणं यदा वयं ‘नीलो घटः’ इत्युच्चारयामः, तदात्वे नीलशब्दस्य यो वाच्यार्थस्तस्याग्रहदशायां नीलशब्दस्य नीलगुणयुक्तरूपार्थे लक्षणा विधीयते। तदानीं ‘नीलो घटः’ इत्यस्य नीलगुणयुक्तः (नीलगुणविशिष्टो घट इत्यर्थः) विभाव्यते।

एकनीलपदद्वारा नीलगुणस्तद्विशिष्टो घटः। इत्यर्थद्वयोः प्रतीतिर्भवति। ततोऽपि पदेनैकेन ‘नीलगुणस्तद्विशिष्टो’ घट इति द्वयोरर्थयोः सम्प्रत्ययाय न नीलपदस्य शक्तिः कैश्चिदवबुध्यते। किन्तु लक्षणावृत्तिद्वारैव नीलपदं नीलगुणविशिष्टार्थस्य बोधं कारयति। तस्मादेव नीलपदस्य नीलगुणविशिष्टरूपार्थे वृत्तिः।

शक्तिद्वारा नीलपदार्थो नीलगुणमवबोधयति। नीलविशिष्टार्थरूप-बोधकत्वं लक्ष्यत्वमिति लक्षणा बोधयति। तथैवात्रापि घटत्वजातिवाचकघटपदस्य घटत्वजातिविशिष्ट-व्यक्तिरूपार्थे वृत्तिर्लक्षणया बोध्यते। यथा गुणवाचकस्य गुणविशिष्टे लक्षणा। तथैव जातिवाचकस्य जातिविशिष्टरूपार्थे व्यक्तौ लक्षणा। तदैवावबोधस्य सम्भावना जायते। अन्यथा शक्त्या तु जातिमात्रस्यैवावबोधेन व्यक्तेर्भानमेव न स्यात्।

तस्माल्लक्षणाद्वारैव व्यक्त्यवबोधनं स्यादेतदर्थं लक्षणासाहायता श्रेष्ठा। उपरितनेन व्याख्यानेन जातावेव शक्तिरिति सिद्धान्तो व्यवस्थापि। एवमेव

---

[273] तत्रैव, पृ० २१९

धर्मराजाध्वरीन्द्रस्यापि मतं विद्यते। तस्माच्च जातौ शक्तिरिति पश्चाच्च व्यक्तेरवगमो लक्षणाद्वारा जायतामिति।

पूर्वोक्तरीत्या न काचिदपि बाधा व्यक्तिबोधने समायाति। जातौ लक्षणायाः स्वीकारे सति न कश्चिदप्यवरोधः। अतः पदानां जातावेव शक्तिरिति सिद्धान्तः।

**व्याकरणदर्शने शब्दशक्तिः-**

शक्तेः सामान्यस्वरूपमस्माभिः पूर्वमेव प्रत्यपादि अत्र साक्षादेव शक्तिविशेषं विचारयन्तः तेषां वेषये चर्चां कुर्मः। शब्दानां शक्तिरेवार्थबोधजनने कारणातां याति, अर्थप्रत्यायकानां सर्वविधानां साधनानां सार्थकता शब्दतत्त्वस्य संस्थितावेव संभवति। वैयाकरणैराचार्यैः समुच्चारितैः शब्दैरेवार्थस्यावगतिरङ्ग्यक्रियत। तथा च शब्दानां स्वरूपतः कारणता न प्रत्युत उचारितानामेव कारणत्वमिति व्याख्यत्। महाभाष्यकारो वदति, उच्चरित एव प्रत्यायको न तु सम्प्रतीयमानः।

ब्रह्माण्डस्य सर्वविधा अपि व्यवहारास्तत्तदर्थानां प्रत्यायनाय शब्दानेव समाश्रयन्ते, यदि शब्दा न स्युस्तदात्वे तु कथमपि न व्यवहारोऽसम्भवी।[274] तस्मादन्वयव्यतिरेकभावेन ज्ञायते शब्दाः सन्त्यतोऽर्थविषयको व्यवहारः, शब्दानामभावेऽर्थविषयको व्यवहाराभावः, अतः सांसारिको व्यवहारो नश्येत्, तस्माच्च शब्दानां कारणत्वं सर्वप्रास्थानिकैरभ्युपागम्यताविरोधेन।

आचार्यदण्डी तु स्पष्टैश्शब्दैरकथयत यदि शब्दात्मिका ज्योतिरेनं संसारं न प्रकाशयेत् तदा तु कृत्स्नमिदं चराचरमन्धन्तमसि प्रविशेत्, यतोहि समेषां चराचराणां भाषा भवति यद्वारा तैः पारस्परिको व्यवहारो नैर्बाधेन सञ्चाल्यते।[275]

एवम्म्भूतेनोपरितनेन व्याख्यानेन निसचीयत यद्व्याकरणसम्प्रदाये सर्वविधोऽपि व्यवहारः शब्दज्ञानपूर्वक एव।

---

274 "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमुवज्ञानं सर्वं शब्देन भाषते"॥ वा०प०, १/१२३

275 "इदमन्धन्तमः कृत्स्नं जायेत्त भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"॥ का०द०, १/४

**सङ्केतादिनाऽपि बोधः –**

हस्ताद्याङ्गिकैर्विविधैस्सङ्केतैरपि व्यवहारः प्रावर्तत लोके तस्माद्धस्तादिद्वारा सङ्केतितव्यापाराणामपि अर्थबोधकारणता समाश्रीयत एव, तच्च यथा नाटकादिषु साम्प्रतिकयुगे चलचित्रादिषु च। एवम्भूतं व्याख्यातं सङ्केतादिद्वारा जन्यं ज्ञानं न समेभ्यः प्रत्युत प्रशिक्षितेभ्यः एव जनेभ्यः, सामान्यजनेषु तथाभूतानां साङ्केतिकव्यवहाराणामसम्भवात्, साम्प्रतं विविधप्रतीकान्यपि निरमीयन्त लोकेन, तथा च तेषां प्रतीकानां तत्तद्बोधितार्थविशेषे जनानां प्रत्यायनाय विविधाः प्रकाल्पाः समायुज्यन्ते, समायुज्यमानेषु तेषु सामान्येषु जनेषु तत्तत्प्रतीकावच्छिन्नस्य शब्दार्थस्यार्थः सङ्केत्य प्रत्याय्यते, तत्तत्प्रतीकबोधावच्छिन्नाः सन्तो जना व्यवहारं निर्वाहयन्तो निर्वहन्ति, उदाहरणस्वरूपं साम्प्रतं भारतसर्वकारेण राजमार्गस्य व्यावस्थाया निर्बाधत्वेन सञ्चालनाय राजमार्गपरिवहनविभागाय चिह्नानि निरमीयन्त, तथैव, सर्वविधेषु विभागेषु तत्तद्विभागसम्बन्धानि प्रतीकान्यर्थं प्रत्याययन्ति, सर्वान्ते चैवमेव निगद्यते यद् असन्दिग्धार्थस्याव्यभिचारिणश्च बोधाय शब्दानामवश्यकता तु भवति एव। कदाचिदेवमपि दृश्यते यद्रहसि मौनभावेन पुस्तकमधीयतां जनानां बोधऽपि जायते, तत्रैवं युक्तिर्दीयते मौने सत्यधिगमनस्य जायमानत्वेन सूक्ष्ममुच्चारणं जायमानं भवतीति कल्प्यते तच्च प्रौढमनोरमायाः शब्दरत्ने न्यगादि- **"न चोच्चरितस्यैव प्रत्यायकत्वे रहसि पुस्तकमीक्षमाणस्य बोधानापत्तिरिति वाच्यम्, तत्रापि पुस्तकद्रष्टुः स्वीयसूक्ष्मोच्चारणसत्त्वात्"।**[276] तस्माल्लिपीनामप्यर्थबोधकत्वं सूक्ष्मोच्चारणे सत्येव सम्भवति नान्यथा। अभिनयेष्वपि बोधत्वसम्भवो यदि चेत्तत्र तत्तदभिनयसम्बन्धिशब्दस्य स्मरणम्। एतदेवाचार्यहरिणा निरदिश्यत-

**"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**

**यथार्थजातयः सर्वा शब्दाकृतिनिन्बन्धनाः"॥**[277]

---

[276] प्रौ०म०श०र०, इको यणचि, पृ० १२६

[277] वा०प०, १/१३,१/१५ इत्यनयोः कारिकयोः पूर्वार्द्धः।

**वृत्तित्वशक्तित्वप्रतिपादनम्-**

तस्मादुपरितनेन सर्वविधेन व्याख्यानेन संसाधितं भवति यच्छब्दा एवार्थं प्रत्याययन्ति, शब्दाश्च स्व-स्वसम्बन्धितं विशेषमर्थमेव बोधयन्ति, न केनचिच्छब्दसामान्येन किमप्यर्थजातं बुध्यते तत्र चा कारणमिदमेव कयाचित् स्वाभाविकया शक्त्या एव शब्दा अर्थविशेषं बोधयन्ति। सम्बन्धव्यापारादिपदव्यपदेश्या हि वृत्तिः। वृत्तिश्च शाब्दबोधौपयिका पदपदार्थयोः मध्ये सम्बन्धविशेषा भवति। वृत्तित्वं च तस्य सामान्यं नाम, विशेषेण तस्या अभिधानं शक्तिलक्षणाव्यञ्जना इति जायते, अतो वृत्तित्वापेक्षया शक्त्यभिधानता च वैशेष्यात्।

**शक्तिसद्भावेऽप्यर्थाभावस्य कारणानि –**

कुत्रचिन्नैवम्भूतानि स्थलानि भवन्ति यत्र च शक्तिषु सत्स्वपि शाब्दबोधो न भवति, तानि कारणानि प्रतीतिविघातककारणत्वेन न्यगद्यन्त ‘स्त्रियाम्’ इति सूत्रस्य महाभाभाष्ये आचार्येण पतञ्जलिना, प्रतीतिविघतत्त्वं च नाम- बोधोपयोगिषु सर्वेषु कारणेषु सत्सु कयाचित् व्यवधान-भूतकारणोपस्थित्या बोधाभावत्वम्।

प्रतीतिविघातककारणानि महाभाष्ये– अतिसन्निकर्षोऽतिविप्रकर्षश्च मूर्त्यन्तरव्यवधानमेव च। प्रमादावरणैन्द्रियदौर्बल्यमेव च। भाष्यकारस्य वचोभिः “**षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति- अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्त्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति**”।[278] एतानि कारणानि सन्ति सन्ति न प्रतीतिं जनयन्ति, तस्मात् परं शाब्दिकस्तत्रभवान् भर्तृहरिराह-

**“विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते।**

**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः”॥**[279]

---

[278] म०भा०, ४/१३

[279] वा०प०, १/५६

कारणान्यैतानि साङ्ख्यकारिकायामेवमेव व्यचार्यन्त।[280]

## भर्तृहरिमते शब्दव्यापारविमर्शः—

शब्दानामर्थवाचकत्वं लोके प्रसिद्धम्, वाचकत्वं च केनचिद्व्यापारेणावच्छिन्नं भवति, व्यापारश्चशक्तिव्यापारादिपदद्वारा कथ्यते लोके। व्याकरणस्य दर्शनत्वप्रतिष्ठापकस्याचार्यस्य मतम्।

**"विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः।**

**अर्थाभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते"॥**[281]

विनियोगरहिताः शब्दा अर्थाभिधानं न कुर्वन्ति, सैव विनियोगोऽभिधाव्यापारत्वेन ज्ञायते स चाभिधाव्यापारः शब्दार्थयोस्सम्बन्धरूपः, सैव सम्बन्धमुखेन विनियोजितानामर्थानां ज्ञानं कारयति न विनितोगाभाववताम्। अत्र रघुनाथशर्मणो व्याख्या- **"सा चाभिधा प्रतिभातो भिन्नाभिन्ना वेति पक्षद्वयम्"।**[282] अभिधा प्रतिभात्वेन विचार्यते, सा च प्रतिभा च विनियोगोक्तिपदाभ्यामभिधेयमाना वाग्धर्मः, अनुसन्धानं चाभिसन्धानपदेन समभिधीयमानं मनोधर्मः। प्रणिधानपदेन चक्षुषो धर्म उच्यते। तदुक्तम्- **"उक्तिः करणविन्यासो न विना शब्दभावनाम्"।**[283] अत्रोक्तिर्विनियोगः, करणविन्यासः प्रणिधानम्। शब्दभावना अनुसन्धानमभिसन्धानञ्च। तत्राभिधाप्रतिभयोर्भेदपक्षे शब्दस्य स्वार्थप्रतिपादनयोग्यतारूपाभिधा शब्दस्य स्वार्थाभिधानपूर्विकां विनियोगरूपामुक्तिपदाभिधेयां प्रतिभां द्वारीकृत्यैव शब्दार्थस्य प्रकाशिका।

तस्माच्छब्दद्वारा यद्युक्तिर्न द्वारीक्रियते तदार्थप्रकाशकत्वमेव न सिद्ध्यतीति। अभिधानपदेन शब्दस्य ग्रहणम्। तस्माच्छब्दार्थयोर्य सम्बन्धः, स च शब्दार्थप्रतिपादको योग्यतारूपाः। **"अतः शब्दस्य स्वार्थाभिधाने**

---

280 "अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्यात् व्यवधानादभिभवात् समानाभिहारात्"॥ सां०का० ६

281 वा०प०, २/२९९

282 तत्रैव, अ०क०टी०, पृ० ४६१

283 तत्रैव, १/१२२, उद्धृतम्, वाक्यपदीयद्वितीयकाण्डेऽम्बाकर्त्र्याम्, पृ० ४६१

**योग्यतारूपोऽभिधेति पदेनोच्चार्यमाणो सम्बन्धविशेष उक्तिद्वारैव प्रतिनियतस्वार्थविषयकं बोधं जनयतीत्याहुः"।**[284] तदाह् कौण्डभट्टः-

**"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा"॥**[285]

तामेव योग्यतां कौण्डभट्टो योग्यतारूपेण व्याख्याति।

## वाक्यपदीयस्थाभिधास्वरूपम् –

वाक्यपदीयकारेणैकैवाभिधा नाम्नी शक्तिर्मन्यते तस्य मते काचिदन्या शक्तिर्न विद्यते प्रतिपद्यते स्वरूपमभिधायाः।

**"श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते।**

**तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम्"॥**[286]

वाक्यपदीयकारोऽभिधामेव मुख्यात्वेन व्याख्याति, तया अभिधया प्रत्यायितो मुख्यार्थः। मुख्यार्थदायकश्च शब्दः तस्यैव मुख्याभिधानता। मुख्यता च कथमिति यदा केनचित् वक्त्रा शब्दः समुच्चार्यते। तदा तदुच्चारणात् परं यदि श्रोत्रा उच्चरितशब्दस्यार्थं व्यवधानेन विना साक्षाच्छ्रवणेन शृणोति। तदा स शब्दो मुख्यार्थदायक इत्युच्यते।

**"स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते"।**[287]

### शब्दैकानेकदर्शनयोर्भेदस्य विमर्शः –

द्वयोर्मूलं तु भाष्यकारस्य वचनमेव प्रत्यर्थं शब्दाभिनिवेश इति । **"सरूपाणामेकशेष एकविभक्तौ**[288] **इति सूत्रे प्रत्यर्थशब्दाभिनिवेशात् नैकेनानेकस्याभिधानम्"।**[289] इति वार्तिके भाष्यकारो ब्रवीति यत् प्रत्यर्थं शब्दा अभिनिविशन्ते। किमिदं प्रत्यर्थम्। अर्थमर्थं प्रति प्रत्यर्थमिति

---

[284] तत्रैव, पृ० ४६१

[285] वा०प०, एतस्या एव कारिकाया व्याख्यानं कौण्डभट्टोऽपि कुरुते। वैयाकरणभूषणसारे शक्तिनिरूपणे।

[286] तत्रैव, २/२७८

[287] काव्यप्रकाश ः,. द्वितीयोऽल्लासः, सूत्रम् ११

[288] महाभाष्यम्, १/२/२६

[289] तत्रैव, वार्तिकम्, १/२/२६

शब्दनिवेशात्। एतस्मात् कारणात् नैकेन शब्देनानेकस्याभिधानं प्राप्नोति।[290] लोके दृश्यते यदेकस्य शब्दस्यानेकेऽर्था न बुद्धिपथमारोहन्ति प्रत्युतैकैवार्थोऽवबुध्यते। तत्र च "प्रत्यर्थं शब्दाभिनिवेशः" इत्यस्य व्याख्यानमर्थमर्थं प्रतीति व्युत्पत्तिमाश्रित्यानेकशब्ददर्शने भाष्यवचनमेव प्रमाणत्वेनाभ्युपेयते। वृत्तावेकत्वभानस्यौत्सर्गिकत्वात्, अर्थाद्यावन्तोऽर्थाः स्युस्तावद्भ्यस्तदपेक्षितसङ्ख्यायामेव शब्दानां प्रयोगस्स्यादित्यनेकशब्द-दर्शनम्। 'सरूपाणामि'ति सूत्रमेव प्रमाणम्।

**शब्दैकत्वप्रतिपादनम् –**

व्याकरणदर्शने मुख्यरूपेण व्यहारस्य प्रधानता भवति, तामाश्रित्यैव स्वाभिमतं प्रकाशयन्ति। तद्यथा- एकमाहुरनेकार्थं शब्दमन्ये परीक्षका इति कारिकया प्रत्यपद्यत। उदाहरणार्थमेकस्यैव गोशब्दस्य गोक्षितीन्द्रिस्वर्गबाणाद्यनेकार्थवाचकता। तस्माद् भाष्यकृद्व्याख्यानम्-अर्थावर्थौ प्रति, अर्थान् अर्थान् प्रति, क्रियते। एतस्मादेकशब्ददर्शनस्य प्रामाणिकतैव।

अत्र शङ्का भवति यदेकशब्दः कथं भिन्नार्थान् बोधयति, पदभेदेऽर्थस्य भेदः जायते। सयगेवकिन्त्वत्र न तथा समाधानं ददाति। नात्र विद्यते दोषस्तथापि -तस्यैकस्य सार्वार्थ्यं निमित्तादीनां भेदानुरोधेनैव पृथक् क्रियते। पदरूपस्य निमित्तस्यैक्येऽप्यर्थप्रकरणादिरूपस्य निमित्तान्तरस्य भेदात्, **"एकस्यापि तस्य गवादिपदस्य सार्वार्थ्यम्=सर्वार्थवाचकत्वम्, सर्वार्थवाचकत्वं नामानेकार्थविषयकबोधजनकत्वम्। भिद्यते- अभिन्नमपि भिन्नत्वेन प्रतीयते। यत्तु कारणभेदे कार्यभेद इति तदपि समाधीयते- तत्तदर्थविषयकबोधत्वरूपस्य कार्यतावच्छेदकस्यार्थभेदेन भेदेऽपि गोपदत्वादिरूपस्य कारणतावच्छेदक-स्यैक्येन तदवच्छिन्नस्य तादृशबोधजनकत्वस्यैकगवादिपदनिष्ठैकत्वेऽपि**

---

[290] तत्रैव, १/२/२६

**निमित्तान्तरसहकारेण भिन्नार्थबोधजननाद् भिन्नार्थबोधं प्रति गवादिपदस्य कारणत्वभेदमानम्"।**[291] एवं प्रकारेण दर्शनैकपक्षो गम्यते शब्दानाम्।

शब्दस्योपचारे प्रकारैकश्शब्दः निमित्तं प्रसिद्ध्यप्रसिद्धिविषयकं निमित्तमादाय प्रवर्तते- **"प्रसिद्धेऽर्थे सास्नादिमत्यनारोपितगोत्ववति शक्त्या प्रयुज्यमानो यो गोशब्दप्रसिद्धिनिबन्धनो मुख्यः। जाड्यादिगुणवत्वेन सादृश्याद् गोत्वमारोप्य आरोपितगोत्ववति वाहीकादावप्रसिद्धया शक्त्या लक्षणया वा प्रयुज्यमानो गोशब्दोऽप्रसिद्धिनिबन्धनो गौणः। स च शब्दोपचारप्रसिद्ध्यप्रसिद्धिरूपनिमित्तभेदेऽप्येक एव। एकस्यैव गोशब्दस्यैकस्मिन्नेवार्थे आरोपितत्वानारोपितत्वेऽनादृत्य गोत्ववति प्रयुज्यमानत्वात्"।**[292] अर्थोपचारो नामार्थविषयकव्यवहारः, स च यथा गौरिति शब्दस्यानुपूर्वीरूपोऽपरश्चार्थो गोत्वादिरूपः सास्नादिमत्पदार्थो वा।

एककालावच्छेदेनैकेन शब्देन न सर्वार्था बुध्यन्ते तत्रत्यकारणानि कानीति दर्शयति-

**"यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठते।**

**अर्थप्रकरणाभ्यां योगाच्छब्दान्तरेण वा"॥**[293]

एकस्मिन् काले सर्वार्थवाचकतामपहाय शब्दो निमित्तभेदेषु विद्यमानेषु क्रमशः सर्वार्थव्यञ्जने व्यवस्थितो जायते। तस्मान्न सर्वार्थानां प्रतीतिरेकस्मिन् काले न जायमाना दृश्यते। तेषां च च निमित्तभेदानां कथनम्- अर्थः, स च प्रयोजनाभिधः। प्रकरणञ्च वक्तृश्रोतृबुद्धिस्थत्वम्। शब्दान्तरसन्निधानम्। एतेषां यदा स्थितिस्तदा यद्विषयकनिमित्तं तद्विषयक एवार्थप्रकाशकत्वम्। उदाहरणं भावयामः। **अर्थस्य-** 'गौः पालनीया दुग्धाय' दुग्धरूप- प्रयोजनात् प्रतीयमाना धेनुरूपमुख्यगोपदार्थस्यैव प्रतीतिः। 'गौः भर्तव्यो' गृहकर्मसिद्धये, अत्र गृहकर्मसिद्धिरूपप्रयोजनादेव वाहीकरूपगौणपदार्थप्रतीतिः। **प्रकरणस्य–** 'गौस्तिष्ठति' 'गौर्गच्छति' इत्यादौ

---

291 तत्रैव, अम्बाकर्त्री टीका, पृ० ३२८

292 तत्रैव, अम्बाकर्त्री टीका, पृ० ३३०

293 वाक्यपदीयम्, २/२५१

यथायथं मुख्यस्य गौणस्य वा गोपदार्थस्य बोधः। **शब्दान्तरसन्निधानस्य-** 'गौर्दुह्यते' इत्यत्र धेनुरूपमुख्यगोपदार्थस्य प्रत्यायनम्। 'गां पाठय' इत्यत्र गौणपदार्थस्य।[294]।

**एकैव शक्तिरिति दृढताया प्रतिपादनम्-**

वाक्यपदीयकारस्य कारिकयां न्यगदच्छक्त्यैकवादस्तस्याभिप्रायो विद्यते यदभिधातिरिक्तायाश्शक्तेरभाव एव। यया शक्त्या गोपदार्थस्तयैव शक्त्या वाहीकपदार्थस्यापि बोधो भाव्यते नात्राव्यवस्थाप्रसङ्गस्तदाह-

**"यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।**

**तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः"॥**[295]

यथा गोत्वजात्यभिधानपुरस्सरं येन गोशब्देन सास्नादिमान् पिण्डोऽभिधीयतेऽर्थादभिधावृत्त्या बोध्यते, तथा स एव गोशब्दस्तयैव वृत्त्या अभेदेन स्वरूपभेदेऽप्यभिधात्वेनैकया, वाहीकेऽपि वाहीकार्थाभिधानेऽपि, व्यवस्थितः, व्यवस्थात्रार्थभेदे चापि शब्दैक्यरूपो नियमस्तां प्राप्त इति। एतेनात्र शब्दैकदर्शनम्, शक्तिस्वरूपभेदेऽप्यभिधात्वेन –एकैव चाभिधा वृत्तिः नास्ति लक्षणा नाम शुद्धा गौणी वा वृत्त्यन्तरम्।[296] एवम्प्रकारकव्याख्यानेन प्रतिभाति यन्नास्त्यन्या काचिद्वृत्तिस्तेन चाभिधैव समर्थ्यते। तस्माद्भर्तृहरिर्न मनुते लक्षणाम्, मुख्ये गौणए च कारणता- प्रसिध्यप्रसिद्ध्यप्रसिद्धिविषयिका। प्रसिद्धौ सत्यां सास्नादिमान् मुख्यो गोपदार्थः प्रतीयते। अप्रसिद्धिदशायां च वाहीकपदार्थावबोध इति, नात्र कश्चिद्विरोधः।

एतस्मात् प्रसिद्ध्यप्रसिद्धिकृता गौणमुख्यार्थव्यवस्था।[297]

---

294 वाक्यपदीयम्, २/२५१, अम्बाकर्त्री टीका, पृ० ३३१

295 वाक्यपदीयम्, २/२५२

296 तत्रैव, अम्बाकर्त्री टीका, पृ० ३३२

297 "सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।

प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपवर्ण्यते"॥ वाक्यपदीयम्, २/२५३

**अर्थोपचारविचारः–**

अन्ये केचन वदन्ति तन्निमित्तमादायैव गवि वाहीकव्यवहारो जायते| तच्च निमित्तम्- जाड्यादिगुणरूपं साधारणधर्ममुपादाय गोत्वस्याहार्यारोप-मूलक आध्यासिक-तादात्म्यरूपः सम्बन्ध इष्यते। पदजन्यप्रतीतिविशेष्यभूतो योऽर्थः, तस्यैवार्थस्य वैपरीत्येन भिन्नार्था प्रतीतिर्भवति। सा च आक्षेपपदान्तरसमभिव्याहारादिना जायते।

शब्दस्वरूपोपचारमभिधत्ते- यथा जाड्यादिगुणरूपनिमित्तकृतारोपाद् गोत्वं स्वतो गवि वाहीके च मुख्ये गौणे चार्थे आध्यासिकेन, अनाध्यासिकेन वा तादात्म्येन सम्बध्यते। तत्र अर्थमात्रस्य वैपरीत्यं भवति, अर्थो नाम पदजन्यप्रतिपत्तिविशेष्यभूतार्थः, एतादृशस्यार्थस्यैव वैपरीत्येन भानम्। शब्दस्वरूपात्मके प्रवृत्तिनिमित्ते विशेषणे सति स्थितिरर्थाद् वाच्यत्वसम्बन्धेन गवादिशब्दस्य सत्ता, उभयत्रापि गौणे मुख्ये चार्थे स्थिरा भवति।[298] इत्येतत्प्रकारेण एकशब्ददर्शनपक्षस्य वृहद् व्याख्यानमक्रियत यथाभर्तृहरि इति। तच्च अभिधामाश्रीत्यैव प्राचलत्।

**शब्दानैक्यपक्षविमर्शः–**

भेदवादिनां शब्दानैकपक्षः। तन्मते गौणार्थमुख्यार्थयोर्ब्नैव**ते "ह्यर्थभेदाच्छब्दभेदं मन्यन्ते"।**[299] यतोहि शब्दस्यार्थेन सह यः सम्बन्धः स तु आध्यासिक एव। तद्यथा– एक एव गोशब्दो यदि सास्नादिमता पदार्थेन सह सम्बद्धीभूय तस्यार्थं बोधयति। एतस्मात् परं कथं तेनैव क्षित्यादिरूपार्थाः दीयन्ते। अर्थभेदत्वात्, शब्दभेदः कल्प्यते। अतः शब्दानामानैक्यादसिध्यदनेकशब्ददर्शनम्। एवम्भूतोऽस्ति शब्दानां भेदाऽभेदस्वभाव इति।

महाभाष्ये भेदाभेदपक्षविषयकं व्याख्यानं लभ्यते।

---

298 "तथा स्वरूपं शब्दानां सर्वार्थेष्वनुषज्यते। अर्थमात्रं विपर्यस्तं स्वरूपे तु स्थितिः स्थिरा"॥ तत्रैव, २/२५६

299 वाक्यपदीयम्, २/२५७, पुण्यराजः, पृ० ३३५

**शब्दभेददर्शने वेदस्यानुमोदनम्-**

एकशब्ददर्शननेकशब्ददर्शनं वेदनानमोदितं विद्यते सयुक्तिकविचारद्वारा तदत्र विचार्यते-

**"सामिधेन्यन्तरं चैवमावृत्तावनुषज्यते।**

**मन्त्राश्च विनियोगेन लभन्ते भेदसमूहवत्"॥**[300]

आवृत्तौ क्रियमाणायां सत्यामपि या सामिधेन्येकाधिकमावृत्यते, तस्या अन्यत्वमेव प्रतिपाद्यते, समिन्धनार्था ऋचां सञ्ज्ञा सामिधेनीति कथ्यते। अग्निराधीयते स्वकर्मकाधानेन समिध्यते प्रदीप्यते याभिस्ता सामिधेन्यः[301] समिध् शब्दादाधाने षेण्यण् प्रत्ययः। **"समिधामादाने षेण्यण्"**[302] **"एवञ्चावृत्या सप्तदश पञ्चदश वा सामिधेन्यो भवन्तीति स्थितम्"।**[303] अत्र तथा प्रथमायास्त्रिरुच्चारणं ततोऽन्तिमायास्त्रिरुच्चारणम्, असकृदुच्चरितानां तासामन्यतैव नैकत्वमिति शब्दभेदवादिभिः प्रतिपाद्यत एव वेदमन्त्राणामन्यत्वप्रतिपादनाय ।

अन्यथा सामिधेनीसञ्ज्ञकमन्त्राणामन्यत्वमेव न स्यात्, तदा सप्तदश पञ्चदश वा सामिधेन्य भवन्तीति वचनमेव व्याहन्येत्। किन्त्वग्न्याधानकाले तु प्रथमान्तिमयोर्मन्त्रयोस्त्रिकृत्व उच्चारणे सति भवति तथा। एतस्मात् कारणात् भिन्नस्वरूपता सामिधेनीमन्त्राणां बुध्यते। एवम्भूताभिन्नस्वरूपताप्यनेकशब्द-दर्शनपक्षस्य साधिका। न केवलमेतावदेव समानानुपूर्वीकमन्त्राणां विनियोगभेदेनोह्यत्वेन च मन्त्रभेदो भवतीति दृष्टम्- आनुपूर्वीभेदाभावेऽपि विनियोगभेदेन मन्त्रभेदो यथा बौधायनगृह्यसूत्रे।

उपनयनप्रकरणे– तत्सवितुर्वरेण्यम्, इत्येतं पच्छोऽर्धर्चशस्ततः समस्ताम्, इति। अत्र हि गायत्रीमन्त्रस्य ब्रह्मचारिणं प्रत्याचार्यकर्तृके उपदेशे विनियोगः। तत्रैव विवाहप्रकरणेऽस्यैव मन्त्रस्य जायापतिकर्तृके हुतशेषप्राशने

---

300 तत्रैव, २/२५८

301 तत्रैव, अम्बाकर्त्री टीका, पृ० ३३७

302 महाभाष्यवार्तिकम्, ४/३/१२०

303 वाक्यपदीयम्, पुण्यराजः, पृ० ३३७

विनियोगः। अपरेणाग्निमुभौ जायापती प्रश्नीयाताम्, तत्सवितुर्वरेण्यमिति। बौधायन गृह्यसूत्रे एव 'तत्सवितुर्वरेण्यमिति सद्यः पात्रमादाय ब्रह्मपात्रेण योजयेत्' इति पात्रद्वयसंयोजनेऽस्य मन्त्रस्य विनियोगः। ऊहे च विनियोगभेदेन न भेदः किन्तु तदेकदेशभेदेन भेद इति प्रकृतियागे 'अग्नये त्वा जुष्टं निर्वपामि' इति मन्त्रः तद्विकृतौ सौर्ययागे तु 'सूर्याय त्वा जुष्टं निर्वपामि' इत्यत्र पदमात्रभेदः। अतः विनियोगभेदेनोहेन च भेदो भाव्यते यथामन्त्राणां तथैव शब्दानामपि समानानुपूर्वीकत्वेऽपि तत्र असकृदुच्चारणेन भिन्नकालप्रयोगेन भिन्नदेशप्रयोगेन च शब्दानामनेकपक्षः समार्थ्यत। पुनरत्र शङ्कोदीयमाना भवति यत् यदि विनियोगभेदेन, ऊहभेदेन च मन्त्राणामन्यत्वं तर्हि वेदे तु एकस्यैव मन्त्रस्य पाठो दृश्यते तस्य अनेकत्रविनियुज्यमानत्वात्, वेदत्वं तु समेषामिति तदुत्तरति-

**"तान्याम्नायन्तराण्येव पठ्यते कश्चिदेव तु।**

**अनर्थकानां पाठो वा शेषत्वन्यः प्रतीयते"॥**[304]

उपलक्षणत्वेन वेदे मन्त्रा जगदुरिति।

तस्माद्वेदे पठितानां मन्त्राणामुपलक्षणत्वं बोध्यते। स्वबोधकत्वे सति स्वेतरबोधकत्वमुपलक्षणं बोध्यम्। अतः एकस्यैव मन्त्रस्य असकृदुच्चारणे सति वेदत्वं तथा चोहमन्त्राणामपि विकृतियागेषु पदमात्रभेदे सति तेषामपि वेदत्वं बोध्यत एव। । भर्तृहरिरुपसंहरति-

अर्थभेदाच्छब्दभेदे सति गौणार्थस्यान्यत्वम्, मुख्यार्थस्यापि। किन्त्वानुपूर्वीसाम्याच्छब्दयोरभेदारोपे मुख्यार्थस्य प्रसिद्धत्वात् मुख्यार्थमेवाभिधत्ते गौणार्थो चाप्रसिद्धो भवति, तस्याप्रसिद्धत्वात् गौणार्थवाचक लक्षक इत्युच्यते। वस्तुतः द्वयोरपि गोशब्दयोः स्व-स्वार्थवाचकता। तत्र वाचकत्वलक्षकत्वव्यवहारे शब्दोपचार एव आनुपूर्वीसाम्यमूलकोऽभेदारोपः गौणमुख्ययोः शब्दयोः। एवं

---

[304] वाक्यपदीयम्, २/२५९

शब्दैकदर्शनस्यानेकशब्ददर्शनस्य च व्याख्यानं भर्तृहरिणा न्यगद्यत। तथा च शब्दैक्यानैक्यदर्शनपक्षयोराश्रयणं कृत्वा अभिधाशब्दशक्तेर्व्याख्यानं व्यधीयत।

अत्र पूर्वं यथा भर्तृहरिणा न्यगादि यच्छब्देनार्थस्याभिधानं विनियोगपूर्वक एव भवति। विनियोग एव उक्तिपदाभिधेयो भवति। तथा च विनियोग एव अभिधापदवाच्य इति पूर्वतने व्याख्याने प्रादर्शि ग्रन्थकृता। अभेदपक्षे तु प्रतिभा एव सम्बन्धत्वमाप्नुवन् शब्दार्थं जनयति। किन्तु भेदपक्षे तु शब्देनार्थस्य वाचकता वक्तृसम्बन्धिप्रणिधानमपेक्ष्यैव जायमाना दृश्यते। तदानीं यदि वक्तृसम्बन्धिप्रणिधाने एव शब्देनार्थोऽभिव्यज्यते तदा तु शब्दार्थयोरनित्यत्वमेव स्यात्, अत्र पुण्यराजः- **"यदमी शब्दा वक्तृविनियोगमुखप्रेक्षणसम्बन्धा। हन्तैवं वादिना भवता विभूषितैव वैयाकरणधुरा"।**[305] इति कृत्वोपहसति विपरीतया लक्षणया अर्थाच्छब्दार्थयोरनित्यतामाशङ्क्य भवता वैयाकरणपरिपाटी प्रदूषिता, तत्प्रतिपादयति-

**"यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते ।**

**तथाभिसंहितः शब्दो भवत्यर्थस्य वाचकः"॥**[306]

पूर्वोक्ता या समस्या शब्दार्थयोरनित्यत्वविषये समुत्थापिता सैवं योग्यतारूपं सम्बन्धमादाय निराक्रियते भर्तृहरिणा। यथा चक्षुषोः वस्तूनि दर्शयितुं स्वाभाविकी योग्यता भवति। तथापि वस्तुनो दर्शनं न सर्वदा भवति। वस्तुदर्शनं तु तदैव सम्भवति यदानीन्तने मनसः संयोगो भवति चक्षुरिन्द्रियेण सह। अन्यथा चक्षुषोः स्वाभाविकयोग्यताया विद्यमानत्वात् सार्वकालिकमेव वस्तुदर्शनं स्यात्। अत्र चक्षुष्ट्वञ्चोपलक्षणम्- तच्चान्येद्रियाणामपि बोधकं भवति। अत इन्द्रियवच्छब्देष्वपि स्वाभाविकी योग्यता भवत्यर्थसम्प्रत्यायनाय तथापि वक्तृसम्बन्ध्यभिधानस्यावश्यकता तु भवत्येव सत्यनुसन्धाने सति शब्दैर्निश्चितोऽर्थोऽवधार्यते। अभिधातुरभिसन्धानञ्च प्रतिभारूपम्, तेन गोचरीकृतशब्दस्तत्तदर्थस्य वाचको भवति। अत एव पुण्यराजेन कथ्यते यत्- **"वाक्यानि स्व-स्वव्यापारे प्रतिनियतस्वार्थभाञ्जि भवन्त्यभिधेयार्थं**

---

305 वाक्यपदीयम्, पुण्यराजः, पृ० ४६२

306 तत्रैव, २/४००

**प्रकाशयन्त्यभिधाख्यं स्वव्यापारं पुरस्कृत्यार्थप्रकाशनं कुर्वन्तीति बोध्यम्"।**[307] तात्पर्यमिदं यत् वाक्यानि स्वशक्त्या विशेषार्थं प्रकाशयन्ति, यदा वाक्यानि स्वकं वाच्यार्थं प्रकाशयितुमिच्छन्ति, तदानीन्तन एव कालेऽभिधानाम्नीं शक्तिमाश्रयन्ति।

अनयैवाभिधयार्थबोधो जायते। शक्तिरियमभिधा वक्त्रा प्रयुज्यमानसम्बन्धस्यानुसन्धानाधीना भवति। अत एव गौणरूपेण सम्बन्ध इति कथ्यते। यदा सम्बन्धस्यैकत्वं स्वीक्रियते तदा वक्तुर्हृदये विद्यमाना प्रतिभा एव सम्बन्धरूपतामापन्ना शब्दस्य स्वरूपं गृह्णाति। तस्यां दशायां सम्बन्धोक्त्योः भिन्नता न भवति। अत एव यथा प्रणिधानम्, एकाग्रतया नेत्रयोः शक्तिसमन्वयो भवति, तद्वदेव उक्तिरर्थात् कण्ठताल्वादिभिः शब्दोच्चारणं शब्दस्य भावनां विना न जायते। सम्बन्धोत्पादकः शब्दस्यायं व्यापार एवाभिधाशक्तेः सम्बन्ध इत्युच्यते अयमेव उच्चारणेन शब्दस्य स्वरूपमवाप्याभिधेति निगद्यते।[308] भर्तृहरिणा शब्दार्थयोर्यो वाच्यवाचभावलक्षणः सम्बन्धः स अभिधाख्यया शक्त्या नियन्त्रितो भवतीत्यभ्युपगतः। लोके तु शब्दार्थयोः सम्बन्धो नित्य इति शास्त्रेऽपि महाभाष्यकृता **"सिद्धे शब्दार्थसम्बन्धे"** इति वार्तिकेन तद्भाष्येण च स्वीकारितमेव।

**अनेकशब्दलभ्यत्वमभिधायाः–**

पूर्वप्रतिपादितानां विनियोगाभिसन्धानोक्तिद्वाराभिधाख्यानां व्यापाराणां व्याख्यानं करोति, यतोहि भिन्नभिन्नप्रवृत्तिनिमित्तिपदचतुष्टय-प्रतिपाद्यस्य पदार्थचतुष्कस्य परस्परभिन्नस्य वाक्येन वाक्यार्थबोधे जननीये यादृशोपयोगः प्रतिपाद्यते, तादृशस्य लोके ख्यातिरेव नास्तीति गम्यते। किन्तु वाक्यपदीयकृदेकस्मिन्नेवार्थे प्रत्यपीपदत-

---

[307] तत्रैव, पुण्यराजः, पृ० ४६२

[308] व्याकरणतन्त्रस्य काव्यशास्त्रे प्रभावः, पृ० १२०

**"विनियोगादृते शब्दो न भवति स्वार्थस्य प्रकाशकः।**

**अभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते"।**[309]

एतत्यस्याः कारिकाया व्याख्यानावसरे शब्दव्यापारचर्चायां पुण्यराजीयटीकामम्बाकर्तृटीकाञ्चाधृत्य व्याख्या कृता विद्यते। तस्मात् सम्बन्धनियामिका शक्तिरिति **"अभिधानियमस्तस्मादभिधानाभिधेययो-रिति"**[310] कारिकाव्याख्याने पुण्यराजो वक्ति यच्छब्दार्थयोर्वाच्यवाचकभाव-लक्षणस्य सम्बन्धस्य नियामकोऽभिधाव्यापार इति **"नापूर्वमात्रमभिहित-मिति"।**[311] अस्य तात्पर्यञ्चेत्थम्- न अभिधा व्यापारस्यापूर्वत्वम्, अभिधैव विनियोग उक्तिरभिसन्धानमिति पदत्रयेण कथ्यत इति। न पदचतुष्टयाभिधेयस्याभिधाख्यस्य शब्दव्यापारस्याप्रसिद्धस्य प्रतिपादनमत्रेति ज्ञेयम्।

**शक्तिद्वारा सम्बन्धनियमनत्वविचारः –**

**"क्रियाव्यवेतः सम्बन्धो दृष्टः करणकर्मणोः।**

**नियमस्तस्मादभिधानाभिधेययोः"॥**[312]

करिका लौकिकोदाहरणं प्रबोधयति । तद्यथा- 'अयःशलाका' भवन्ति ताश्च परस्परं सम्बन्धविरहिता भवन्ति किन्तु यदा भवनादीनां निर्मीयन्ते, तदा निर्माणकाले समूहरूपेण तासामुपयोगो जायते। स च प्रक्रियाविशेषामाधृत्यैव भवति। तद्वदेव कारकाणि षट्सङ्ख्याकानि सन्त्यपि वाक्यप्रयोगदशायां क्रियां माध्यमीकृत्य सम्बन्धयुक्तानि भवन्तीति दृश्यते। अतः परस्परमसम्बन्धानामपि कारकाणां सम्बन्धः क्रियाद्वारको जायते, स चेत्थम्- 'रामेण बाणेन हतो बाली' इत्यत्र कर्तृकरणयोः हननक्रियायामन्वयो भवति, अन्वयश्च  कर्मत्वेन बालिनस्तथा च करणत्वेन बाणस्य भवति तस्माद्रामेण बाणेन हतो बाली इत्यत्र सामानाधिकरण्यसम्बन्ध उपपद्यते। स च क्रियाद्वारैव नान्यथेति दृष्टत्वात्।

---

309 वाक्यपदीयम्, २/३९९

310 तत्रैव, २/४०१ इत्यस्योत्तरार्धः।

311 तत्रैव, पुण्यराजः, पृ० ४६३

312 तत्रैव, २/४०१

तद्वदेव अभिधानाभिधेययोरपि सम्बन्धोऽभिधानियम इति न्यगद्यत। अत्राभिधानं नाम शब्दोऽभिधेयश्चार्थ इति।

**“तथैवाभिधानाभिधेययोर्वाच्यवाचकभावलक्षणः सम्बन्धोऽभिधाख्येन शब्दव्यापारेण नियम्यते”।**[313] एतस्यैव व्याख्यानकाले रघुनाथशर्मा निगदति- **“तस्मात् प्रकृतेऽभिधानाभिधेययोरपि करणकर्मणोः सम्बन्धे वाच्यवाचकभावलक्षणेऽभिधारूपः शब्दव्यापारो नियमः । नियमश्च नियम्यतेऽनेनेति व्युत्पत्त्या नियमसाधनं भवति। अभिधानाभिधेययोर्वाच्य-वाचकभावलक्षणः सम्बन्धोऽभिधाख्येन शब्दव्यापारेण नियम्यत इति यावत्”।**[314] एवं सम्बन्धं शक्तिर्नियमयति। वाच्यवाचकभावरूपश्च सम्बन्धः शब्दार्थयोर्मध्ये भवति।

**अभिधयाऽर्थप्रतिपादनप्रकारः –**

**“बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु।**

**यत्प्रयोक्ताभिसन्धत्ते शब्दस्तत्रावतिष्ठते”॥**[315]

एतेन कथ्यते यदेकश्शब्दो बहूनर्थान् प्रददाति। यद्यथा गोशब्देनानेकेऽर्थाः, 'गावो दृश्यन्तामि'त्यादौ सर्वेषु चार्थेषु दर्शनादिरूपैकार्थक्रियाकारिषु सन्निहितेषु सत्सु, अतो नार्थक्रियाभेदेनापि शब्दस्यैकस्मिन्नर्थेऽवस्थितिर्सम्भाव्यते, तदा प्रयोक्ता तत्र यादृशमर्थ-रूपमभिसन्धत्तेऽर्थादभिसन्धानेन विनियोगेनाभिधाविषयीकरोति, तस्मिन्नेवा-भिसन्धानविषयभूते विनियोगविषयभूते वा अभिधाविषयीक्रियमाणेऽर्थे शब्दस्य वाचकत्वमवतिष्ठते। **“तत्रार्थरूपमभिसन्धत्तेऽभिसन्धानेन विनियोगेनाभिधा विषयीकरोति। तत्रैवार्थं वाचकत्वेन शब्दोऽवतिष्ठते, नान्यत्रेति स्फुटमेव परिदृष्टम्”।**[316] **“एकशब्देन गोशब्देन प्रतिपाद्या अनेके गवादयोऽर्था भवन्ति किन्तु सजातीयत्वादेकमेवार्थमभिदधति। अत एव प्रयोक्ता येन शब्देन यस्यार्थस्याभिधाशक्तिद्वारा सम्बन्धं करोति तस्यैवार्थस्य**

---

[313] तत्रैव, पुण्यराजः, पृ० ४६३

[314] तत्रैव, अम्बाकर्त्री टीका, पृ० ४६३

[315] तत्रैव, २/४०२

[316] तत्रैव, पुण्यराजः, पृ० ४६४

**वाचको भवति स शब्दो नान्यस्य"।**[317] भर्तृहरिणाभिधायाः सत्ता पार्थक्येन स्वीकृता, तामपि वैदिकोदाहरणैः प्रतिपादयति। यतोहि वैदिकेष्वपि शब्देष्वभिधया नियमनं क्रियते।

तस्मादेव स्वकीयव्यापारेणाभिधाख्येन तत्तदर्थप्रतिपादकाः सन्तस्तत्तदर्थनिष्ठा भवन्तीति गम्यते। अतः स्फुट्यते यदभिधैव प्रतिभा इत्यपलापो न कर्तुं शक्यते। **"स्वरूपबोधाय प्रयुक्तानां शब्दानामभिधया शक्त्या समन्वयकारणादनेकार्थस्य प्रतिपादकाः सन्तः शब्दास्तत्तदर्थेषु नियमिता भवन्ति, इत्थं स्पष्टीकृतं यदभिधाशक्तिरर्थात् पार्थक्यं भजते"।**[318]

एवं प्रकारेणार्थभेदेऽपि शब्दैकत्वमेवेत्यभिसन्धाननिमित्तकाभिधारूप-व्यापारभेदसमाश्रयणेन शब्दस्य प्रतिनियततत्तदर्थाभिधानं समुपापद्यत। अस्मिन्नेकशब्ददर्शने शब्दानां तत्तदर्थनियामकता अर्थप्रकरणादिभिर्न सम्भवत्येव। तेषां शब्दव्यापाराभिधाभेदयोर्ज्ञापकत्वात्। अत्र दर्शने तयोरभावात्, अत एव अर्थप्रकरणादीनां व्याख्यानकाले विशेषस्मृतिहेतव इत्यनेन विशेषार्थस्मारकत्वरूपं ज्ञापकत्वमेवार्थप्रकरणादीनाम्। अतः परमार्थभेदेन शब्दभेदं समाश्रित्यैषां प्रकरणादिभिरेव तत्तदर्थप्रकाशकत्वमिति कथ्यते।

**अर्थभेच्छब्दानैक्य–**

अर्थभेदादपि शब्दानामनेकता सञ्जायते तद्यथा दीयते-

**"तेषामत्यन्तनानात्वं नानात्वव्यवहारिणः।**

**अक्षादीनामिव प्राहुरेकजातिसमन्वयात्"॥**[319]

अत्र भर्तृहरिणा शब्दानां नानात्वमाधृत्याभिधा व्यधीयत। यतोहि भेदवादिभिराचार्यैः शब्दानामनेकता स्वीक्रियते। अर्थभेदाच्छब्दभेदमिति नानात्वव्यवहरद्भिरेकजातिद्वारा समन्वयस्तेषां सादृश्यरूपो भवति। एकजातिसमन्वयो नाम, एकानुपूर्वीरूपधर्मसम्बन्धात्। यथा अक्षादीनां

[317] व्याकरणतन्त्रस्य काव्यशास्त्रे प्रभावः, पृ० १२१

[318] व्याकरणतन्त्रे काव्य शास्त्रस्य प्रभावः, पृ० १२१

[319] वाक्यपदीयम्, २/४०५

शब्दानां स्थितिर्भिन्नत्वेनैव प्रतीयते कथमिति चेदत्र- 'अक्षा भज्यन्ताम्', 'अक्षा भुज्यन्ताम्', 'अक्षा दीव्यन्ताम्'। इत्यादिषूदाहरणेषु रथ्यमाषपाशवाचकत्वेन भिन्नार्थका एव। भिन्नार्थत्वमादाय आनुपूर्वीसाम्यादभेदेन प्रतीयमानानामक्षादिशब्दानामिव नानार्थकानां शब्दानामानुपूर्वीसमवता-मभेदेन प्रतीयमानानामपि वाच्यभेदादत्यन्तानेक्यञ्जायते।

**"यथाऽक्षादय शब्दाः भिन्ना एव स्थिताः।**

**सादृश्यात्त्वभेदेनैव प्रतीयन्त इति भावः"॥**[320]

शब्दानां नानात्वस्वीकरणं क्रियतेऽर्थभेदात्तेन किं स्यादित्याकाङ्क्षा भवतीति प्रदर्शयति –

**"सञ्ज्ञानमर्थप्रकरणादिभिः। न जात्वर्थान्तरे वृत्तिरन्यार्थानां कथञ्चन"॥**[321]

अत्रेदमवगम्यं शब्दानां नानात्वमर्थभेदादेव भवति, तथाभूतस्य नानाऽर्थकत्वस्य प्रमात्मकं ज्ञानमर्थप्रकरणादिभिरभिधानियामकसाधनैरेव जायते। कस्य शब्दस्य कस्मिन् स्थले कथम्भूतोऽर्थः स्यादिति? एकस्य शब्दस्यैकस्मिन् स्थाने योऽर्थो गृहीतस्तस्यैव शब्दस्य तद्भिन्नेऽर्थे तदतिरिक्तस्थले प्रयोगो न भवितुमर्हति। अन्यार्थकस्य शब्दस्यान्यस्मिन्नर्थे वृत्तिरसम्भवा। यतोह्यन्यार्थकानाम्= एकत्रान्यार्थवृत्तित्वेन प्रतीयमानानां शब्दानाम्, अर्थान्तरे= तस्मादन्यस्मिन्नर्थे, वृत्ति= तस्मादन्यार्थाभिधानरूपा प्रवृत्तिः, शब्दैकत्वे कथमप्यर्थाज्जातुचिदपि न सम्भवति। तथाहि वैधर्म्यमेव भेदो भेदहेतुर्वाभ्युपेयते। अतोऽर्थभेदेन भिन्नाभिधारूपधर्माभ्युपगम शब्दभेदाभ्युपगम आवश्यक इति भावः।

अतो हेतोरर्थभेदाच्छब्दभेदोऽभ्युपेयत एव। अस्यां परिस्थितावुच्चारणातिरिक्तम्, अभिसन्धानोक्त्यभिधानमभावेऽपि शब्दस्य विशेषार्थे नियमितत्वादर्थस्य नियन्त्रणं भवति। प्रत्येकं शब्दः प्रत्यर्थं न बोधयत्यपितु भिन्नशक्तिकत्वात् स प्रतिनियतार्थे व्यवस्थितो भवति। प्रसिध्यप्रसिद्धिवशादेव गौणमुख्ययोर्व्यवस्थापनं क्रियते।

---

[320] तत्रैव, पुण्यराजः, पृ० ४६७

[321] तत्रैव, २/४०७

**शब्दार्थनियामकसाधनानि –**

भर्तृहरिर्बह्वर्थबोधकशब्दानामर्थनियमनाय संसर्गादिविविधसाधनान्युदलिखत्।एस्मिन् प्रसङ्गे शङ्कोदेति यदर्थभेदाच्छब्दभेदं स्वीकृत्य शब्दः प्रत्येकमर्थे व्यवस्थापितः, तर्ह्याचार्यैः किमर्थं अर्थनियमनायैतेषां साधनानामावश्यकताऽनुभूयते। पुण्यराजेनोत्तर्यतेऽत्र नानात्वपक्षे स्वभावतो भिन्नेषु समानानुपूर्वीकेषु शब्देषु स्वरूपस्य एकत्वादर्थस्य व्यावर्तनस्याभावत्वात् रूपसाम्यस्य स्थितावपि संसर्गादिसाधनैर्विशिष्टार्थस्य नियमनं क्रियते। एकत्वपक्षेऽपि विभिन्नार्थानां प्रतिपादने शब्दस्यानेकाः शक्तयो भवन्ति। शब्देषु श्रुतिसाम्यादानुपूर्वीसाम्याद्वा न कोऽपि भेदो प्रतीयते अस्यां स्थितौ शब्दादविशेषस्य निर्णये संसर्गादिसाधनानामाश्रयणं क्रियत एव।[322] ते च सन्ति शब्दार्थावच्छेदहेतवः संसर्गादय इति-

**"संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।**

**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**

**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"॥**[323]

उपरितनेन व्याख्यानेन संसर्गादयः शब्दार्थविषयकसन्देहनिराकरणद्वारा निश्चितार्थनिर्णयहेतुत्वात् विशेषस्यार्थस्य निर्णायका भवन्तीति बोद्धव्यम्।

**"भेदपक्षेऽपि सारूप्याद्भिन्नार्थाः प्रतिपत्तिषु।**

**नियता यान्त्यभिव्यक्तिं शब्दाः प्रकरणादिभिः"॥**[324]

शब्दभेददर्शनेऽपि प्रतिपत्तॄणां कृते प्रतिपत्तिविषयीभूतभिन्नार्थबोधका अपि शब्दा भिन्नत्वेनप्रतीयमानार्थवाचका, समानानुपूर्वीकत्वादभिन्ना इव

---

[322] "तत्र नानात्वपक्षे स्वभावभिन्नेषु तुल्यश्रुतिषु रूपभेदानवच्छिन्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छेदः क्रियते। एकत्वपक्षे त्वर्थाभिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यमात्रादलब्धविभागासु तथैव संसर्गादिभिरर्थनिर्णयः क्रियत इत्युभयत्रापि प्रकरणादय शब्दार्थनिर्णयनिपुणा इति तदुपन्यासः कथ्यते"। तत्रैव, पुण्यराजः, पृ० ३८३

[323] वाक्यपदीयम्, २/३१५-३१६

[324] तत्रैव, २०३१७

प्रतीयमानाः प्रागुक्तस्वरूपैः प्रकरणादिभिर्नियता अवच्छिन्नाः सन्त अर्थाभिव्यक्तावुपयोगं यान्ति। कुत्रचिदपि न प्रकरणादिकं विना शब्दार्थनिर्णयो बोध्यः। एतदतिरिक्तमपि वैयाकरणैर्वाक्यव्याख्यानेऽपि मुख्यार्थनियामकत्वेन स्वीक्रियेते। तद्यथा-

**"वाक्यात् प्रकरणादर्थादौचित्याद् देशकालतः।**

**शब्दार्था प्रविभज्यन्ते न रूपादेव केवलाः"॥**[325]

कटं करोति' 'भीष्ममुदारं दर्शनीयम्' अस्मिन् वाक्ये कटस्य 'करोति' क्रियया सह सम्बन्धत्वात् भीष्मशब्दस्यार्थः भीष्मादिगुणान्वितः कटः, न तु भीष्मपितामह इति। एवम्प्रकारकस्यार्थस्यावबोधे वाक्यमेव कारणत्वमुपैति। तथा च पतञ्जलिना व्याख्यानेन सन्देहस्थले निर्णयाय प्रत्यबुध्यन्त। **"व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः"॥**[326] "सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकव्याख्यानावसरे सिद्धपदार्थस्य विचारणावसरे प्रत्यपद्यत।अत्र निष्कर्षत्वेन वक्तुं शक्यते यदेकशब्ददर्शनानेकशब्ददर्शनयोः पक्षयोराश्रयणं कृत्वाऽभिधाया उपयोगानुपयोगौ स्पष्टीकृत्य मुख्यार्थप्रतिपादकस्य शब्दस्वरूपस्यापि व्याख्यानञ्चकार भर्तृहरिः।

अर्थप्रकरणानपेक्षं यस्य शब्दस्योच्चारणे सति यादृशः प्रसिद्धोऽर्थः प्रतीयते तस्य मुख्यार्थता। एतादृशशब्दस्य प्रवृत्तिनिमित्तमस्य शब्दस्य स्वरूपमात्रं भवति। निष्कर्षतो भर्तृहरिणाऽभिधा तादृशव्यापारत्वेन स्वीक्रियते, यद्वशाच्छब्दोऽर्थस्य वाचकतामुपैति। अभिधया साक्षाच्छब्दादर्थस्य बोधो भवति, अर्थबोधे चान्यस्य कस्यचिदपि प्रयत्नस्यापेक्षा न भवति। अयमभिधाख्यः शब्दव्यापारो मुख्यो व्यापकश्च वर्तते। अत एवाभिधया प्रतिपादितार्थो मुख्यार्थ इति कथ्यते। भर्तृहरिः शब्दार्थयोः सम्बन्धनियामकत्वेनाभिधा समीमनत।

---

[325] तत्रैव,/ २/३१४

[326] महाभाष्यम्, पस्पशाह्निकम्, पृ० ८१

**नागेशस्य शक्तिस्वरूपम् –**

तत्रभवता नागेशभट्टेन व्याकरणदर्शने महत्प्रयासेन शाब्दबोधादिसिद्धान्ता समस्थाप्यन्त। एतस्मादेव शाब्दबोधे शब्दशक्तीनामुपयोगिता जायते। तदुच्यते- **"शाब्दबोधे वृत्तिग्रहजन्योपस्थितिर्हेतुरिति सिद्धान्तः"।**[327] एतस्मादेवैतासां व्याख्यानमकारि। वृत्तिरेव शक्तिपदेनाभिधीयत इति व्यज्ञाप्यत। सा च वृत्तिः? केति प्रश्ने सति नागेशो निगदति- वैयाकरणसिद्धान्तमञ्जूषायां **"शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वम्"।**[328] **"सा च वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यञ्जना च"।**[329] इत्थं नागेशेन तिस्रोऽपि शब्दस्य शक्तय अङ्ग्यक्रियन्त। यथार्थत्तो शाब्दिकानां सम्प्रदायेयेऽभिधात्वेनैकैव शक्तिरुरर्यक्रियत। लक्षणाव्यञ्जने न स्वीक्रियेत इति ख्यातिः। ततोऽपि नागेशभट्टेन लक्षणाव्यञ्जने स्वीक्रियेताम्। वस्तुतस्तु नागेशस्य "**सा च वृत्तिस्त्रिधा"** इत्यस्य व्याख्यां कुर्वद्भिर्विद्वद्भिर्न्यगद्यत, यत्तेन परमताभिप्रायमवबुद्ध्यैव लक्षणायाः प्रयोगो विहित इति व्याख्यानं परमलघुमञ्जूषायां तथा मञ्जूषाद्वय्यां च अवधार्यते, एवमेव वैयाकरणसिद्धान्तमञ्जूषायां व्यञ्जनाया खण्डनत्वात्तत्र अभिधालक्षणे स्वीक्रियेतेति। एवं रीत्या नागेशभट्टस्य समग्रव्याख्यानेन प्रतिभाति यत् तेन तिसृणां वृत्तीनां स्वीकारोऽकारि। "**अत्र तार्किका अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा इदं पदमिदमर्थं बोधयत्वित्याकारा वेश्वरेच्छा शक्तिः लाघवात्। सैव सङ्केतः सम्बन्धः"।**[330] नैयायिकैरीश्वरेच्छा रूपा शक्तिः स्वीक्रियते सा च पदप्रकारिकाऽर्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका वा इत्येवं रूपा, इति पूर्वमेव प्रास्ताविकेऽस्माभिरगादि।

सा च शक्तिः पदेऽर्थे बोधे च भवति विषयता सम्बन्धेन। इच्छायाः सविषयकत्वादिच्छाया विषयाः पद-अर्थ-जन्यजनकभावसंसर्ग-बोधाश्चत्वारो भवन्ति। तस्माद्यदि विषयतासम्बन्धेनेश्वरेच्छावत्त्वं वाचकत्वं तदा चतुर्षु

---

327 वैयाकरणसिद्धान्तमञ्जूषा, पृ० ६

328 तत्रैव, पृ० ६

329 तत्रैव, पृ० ६

330 परमलघुमञ्जूषा, पृ० १०

वाचकत्वस्य लक्षणप्रवृत्तिः, पदे तु वाचकत्वमिष्यते किन्त्वन्यत्र त्रिष्वतिव्याप्यते। एवमेव विषयतासम्बन्धेनेश्वरेच्छावत्त्वं वाच्यत्वमिति, स्वीक्रियमाणे सत्यर्थमात्रे मतत्वादन्यत्र त्रिष्वप्रसक्तिः।

एवम्भूतायाः समस्यायाः समाधानमेवं रीत्या क्रियते। बोधनिष्ठजन्यतानिरूपितजनकतावत्त्वेन रूपेण यो ईश्वरेच्छाया विषयः सैव वाचकः, तथा बोधविषयत्वेन रूपेण यो ईश्वरेच्छाया विषयः स वाच्य इति व्याख्यायमाने सति प्रतिपादितासङ्गतेर्निरासो भवति। **"यद्यपि प्रथमं शक्तिग्रहो वाक्ये एव, तथापि अवापोद्वापाभ्यां शास्त्रकृतकल्पिताभ्यां तत्तत्पदे शक्तिग्रह इति बोध्यम्"।**[331] व्याकरणदर्शने तु प्रथमं वाक्ये शक्तिग्रहस्य मुख्यता, यतोहि वाक्यस्फोटस्यैव शक्तेराश्रयत्वात्।

न्यायदर्शने तु वाक्ये शक्तिग्रहो न मन्यते गौरवदोषभयात्। लोकव्यवहारे तु वाक्योच्चारणेनैव प्रथमतोऽर्थबोधो जायतेऽत वाक्य एव शक्तिरिति समाश्रीयते। अपरेण प्रकारेणेश्वरेच्छां वक्ति। **"एतच्छब्दजन्यार्थबोधविषयकेश्वरज्ञानमेव शक्तिरित्येश्वरीयबोधाकारः। तादृशबोधविषयको बोध एव सेति नैयायिकाः"।**[332]

**नैयायिकैः प्रतिपादितस्य मतस्यास्वीकारः –**

तत्र भवतो नागेशस्य नैयायिकोक्तेच्छारूपः सम्बन्धो न साधुरिति शब्दार्थयोराश्रयतायाः नियामकत्वाभावात्। तस्त मते सम्बन्धस्य स्वरूपम्- **"सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति, द्विष्ठत्वे सति, आश्रयतया विशिष्टबुद्धिनियामक, इत्यभियुक्तव्यवहारात्। यथा घटवद्भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नः द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च"।**[333] इत्याकारकसम्बन्धस्य स्वरूपमुक्त्वा तेनेच्छारूपशक्तेः खण्डनं कृतम्, यतोहि यदानीन्तनेच्छायाः सम्बन्धत्वं सिध्येत् तदैव शक्तित्वं स्यात्, सम्बन्धश्चाधाराधेयभाव-नियामकत्वेन दृष्टः, प्रकृते च

---

331 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ४६

332 तत्रैव, ४६

333 परमलघुमञ्जूषा, पृ० १९

इच्छीयविषयताश्रयबोधनिष्ठजन्यता-निरूपितजनकताख्यविषयतासम्बन्धेन 'अयमर्थ इच्छावान्' 'अयं शब्दो वा इच्छावान्' इति व्यवहारस्यादर्शनात् तस्या इच्छायाः सम्बन्धत्वं न सम्भवत्येव, सम्बन्धत्वाभावाच्छक्तित्वं स्वयमेवापस्तम्। बोधजनकतारूपाऽपि न सम्भाव्यते-प्राचीनवैयाकरणै-र्बोधजनकता शक्तिरिति स्वीकुर्वन्ति, तदपि न समीचीनम्, बोधजनकतायाः पदपदार्थयोर्विद्यमानत्वेऽपि विशिष्टबुद्धिनियामकत्वाभावात्। यतोहि बोधजनकतासम्बन्धेन पदं पदार्थवदिति, पदं पदार्थेन विशिष्टं बोधजनकतासम्बन्धेनेति बुद्धिर्न भवति। तदाह- **"इच्छायाजनकत्वस्य वोभयवृत्तित्वाभावः। इच्छाबोधीयविषयतायामिच्छाश्रयतानियामक-त्वाभावात्"।**[334] ज्ञाने तादात्म्यसम्बन्धेन विषयस्य कारणता तथा च समवायसम्बन्धेन कर्तुर्देवदत्तादेः कारणतायाः सत्त्वात्विषयकर्त्रोः परस्परं विशिष्टबुद्धेरभावः। एवं रीत्या अर्थपदयोरपि पारस्परिकसम्बन्धो नोपपद्यते।

**सङ्केतवर्णनपूर्वकनैयायिकमतनिरासः –**

यन्नैयायिककैरीश्वरेच्छा शक्तिरिति सैव सङ्केतः सम्बन्ध इति प्रत्यपादि, तदपि न साधुः, यतोहि शक्तिसङ्केतयोरैक्यमित्यनुभवद्वारा न सिद्ध्यति। **"अयमेतच्छक्यः अत्रास्य शक्तिः"।** सङ्केतस्य शक्तिग्राहकत्वेन मुख्यशक्तित्वाभावात्, अयमर्थ एतत् पदस्य शक्यः, अत्रार्थादस्मिन्नर्थेऽस्य पदस्य शक्तिरित्याकारकसङ्केतस्य शक्त्यपेक्षाभिन्नत्वरूपेण प्रसिद्धत्वात्। सङ्केतो यदि शक्तिरूपः स्यात्तदाऽत्र घटकतया शक्तिनिवेशो न स्यात्, स्वरूपस्य स्वघटकत्वाभावात्। **"उक्तेश्वरसङ्केत एव शक्तिरिति तु न युक्तम्, अयमेतच्छक्योऽत्रास्य शक्तिरित्यस्य सङ्केतस्यानापत्तेः। ईदृशेश्वरसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याप्यनुमानात्"।**[335]

---

[334] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ५०

[335] तत्रैव, पृ० १००

**नागेशस्य शक्तिस्वरूपविचारः –**

नैयायिकाभिमतशक्तेर्निरासानन्तरं तैरुच्यते- "**तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया**"।[336] अन्यः सम्बन्धः सम्बन्धान्तरः, वाच्यवाचकभावोऽपरपर्यायो यस्य, एवमभिमतं नागेशस्य। स चाखण्डोपाधिस्वरूपा। अर्थाद्वाच्यवाचकपदव्यपदेश्यो निरुक्तेच्छादिभिन्नः पदपदार्थयोः सम्बन्धः शक्तिः। तत्र वाचकत्वं वाच्यत्वञ्च न क्रमेण बोधजनकत्वरूपं बोधविषयत्वरूपञ्च किन्त्वखण्डोपाधिस्वरूपं पदार्थान्तरमेव। एवं रीत्या पदविशिष्टपदार्थः पदार्थविशिष्टं पदम्, एवम्प्रकारिका विशिष्टाबुद्धिरसिद्ध्यत्, वाच्यवाचकभावरूपायाः शक्तेः, अखण्डोपाधिरूपता स्वीक्रियते। तस्याः वाच्यवाचकभावरूपायाः शक्तेर्ग्राहकञ्च तादात्म्याख्यः सम्बन्धो भवति। "**तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम्**"।[337] वाच्यवाचकभावरूपा शक्तिस्तादात्म्यसम्बन्धेन ज्ञाप्यते। तादात्म्यञ्चेतरेतराध्यासमूलकं भवति। इतरेतराध्यासो मूलं ज्ञापकं यस्य तत्। अन्यस्मिन्नन्यधर्मावभासोऽध्यासः। एतन्मूलकमेव तादात्म्यम्।

तस्मात् पदे पदार्थे च या वाच्यवाचकभावरूपा शक्तिः स्वीक्रियते, तद्ग्राहकं तादात्म्यं भवति। एतेन निश्चीयते यद्वाच्यवाचकभावरूपायाः शक्तेः ज्ञानमेव शाब्दबोधे कारणत्वमुपैति, न तु स्वरूपमात्रेण। अतोऽग्नेर्दाहकता शक्तिर्दाहं प्रति स्वरूपेण कारणतामुपैति तथैव वाच्यवाचकभावशक्तिः स्वरूपमात्रेणैवार्थं न प्रत्याययिष्यति। "**तच्च सङ्केतः, तस्यापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः**"।[338] तादात्म्यस्य च सङ्केतरूपता कथ्यते। सङ्केतश्चाभिप्रायविशेषेणेच्छाविशेषेण वा कथ्यते। स च सङ्केतः शक्तेर्ज्ञापको भवति।

तद्वदेव तादात्म्यमपि शक्तेर्ग्राहकत्वात् सङ्केतपदेन व्यवह्रियते। अतः सङ्केततादात्म्ययोरैक्यमिति। तादात्म्यमपि पदे विद्यमाना या शक्तिस्तस्याः प्रकाशकत्वाच्छक्तिपदेनापि व्यवह्रियते। यदेवं तर्हि तादाम्यमेव शक्तिरूपः

---

336 तत्रैव, पृ० ६०

337 तत्रैव, पृ० ६०

338 तत्रैव, ।

सम्बन्ध इति स्वीकुर्यात्? तादात्म्यस्य सम्बन्धत्वाभावत्, अतो न सम्बन्धत्वमस्य। यतोहि भेदसमानाधिकरणाभेदरूपत्वात् तस्मिन् सम्बन्धपदव्यवहार्यत्वं न सम्भाव्यते। अस्याभ्यान्तरे वर्तमानभेदाभेदयोः सम्बन्धत्वधर्मस्य दर्शनाभावत्वात्। **"न च तादात्म्यघटकभेदाभेदस्य वा सम्बन्धत्वं कुत्रापि दृष्टम्"।**[339] 'नीलो घट' इत्यादौ सम्बन्धपदार्थघटक-सम्बन्धिभिन्नत्वाभावादभेदस्यापि सम्बन्धत्वं नास्ति। सङ्केतस्य च पातञ्जलभाष्येण समर्थनं करोति। **"सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो, योऽर्थः स शब्द इति"।**[340] व्यासभाष्ये सङ्केत इतरेतराध्यासमूलकतादात्म्यपदेनोच्यते। तस्माच्छक्तेर्ग्राहकसङ्केतः पदपदार्थयोरितरेतराध्यासरूपः, तच्चेतरस्मिन् इतरस्यार्थाच्छब्देऽर्थस्यार्थे च शब्दस्य योऽध्यासः (तादात्म्यस्य मिथ्याज्ञानम्) तस्य सङ्केतो निरूपकः। इतरेतराध्यासो रूप्यतेऽनेनेति व्युत्पत्त्येतरेतराध्यासस्य रूपः (निरूपकः) तादात्म्यरूपः सङ्केतः। ज्ञानञ्च स्वविषयेण निरूपितं भवति, विषयश्च ज्ञानस्य निरूपकं भवति, अतोऽध्यासस्य निरूपकं तादात्म्यमिति। तादात्म्यस्य तु वास्तविकत्वं नापितु इतरेतराध्यासवशादितरेतराध्यासमूलकमिति कथ्यते।

अनेनैवाध्यासेन तादात्म्यस्य प्रकाशनं जायते। स्मृत्यात्मक इति पदेन ज्ञातस्यैव सङ्केतस्य शक्तिप्रकाशकता दृश्यते। **"किञ्च पाणिन्यादिस्मार्त-सङ्केतस्यैववाचकतानियामकत्वं न त्वाधुनिकसङ्केतस्येत्यपि दर्शितम्"।**[341] एतेन पाणिन्यादिमहर्षीणां यस्य स्मृतिरूपसङ्केतस्तस्यैव वाचकतारूपशक्तेर्नियामकत्वम्, न त्वाधुनिकसङ्केतस्य। **"एवञ्चाधुनिक-सङ्केतस्थले द्वादशेऽह्नि क्रियमाणानामस्थले च लक्षणा"।**[342] शब्दकौस्तुभे पदपदार्थयोर्बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति।

अर्थाद्दीक्षितमतेन पदपदार्थयोर्बोध्यबोधकभावस्य नियामिका शक्तिरेव सैव सम्बन्ध इति। शक्तिसम्बन्धयोरैक्यमिति प्रतिपद्यते। तन्न,

---

339 वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, पृ० २४

340 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ६५

341 तत्रैव, पृ० ६५

342 तत्रैव, पृ० ६५

यतोहि शक्तेर्भिन्न एव सम्बन्ध शक्तेः कार्यजनकत्वनियामकत्वेन दृष्टः। **“शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात्”।**[343] उदाहरणमुखेन प्रत्यायति- दीपगतप्रकाशत्वशक्तेः कार्यजनकत्वे दीपवस्तुनोः प्रकाशकत्वशक्त्यतिरिक्तसंयोगादि -सम्बन्धसत्त्वे एव वस्तुनः प्रकाशकता, नान्यथा सम्भवति, तस्मात् सिद्ध्यत्येव पार्थक्यं शक्तिसम्बन्धयोः, अतः सामर्थ्यरूपायाः शक्तेर्विद्यमानत्वेऽपि सम्बन्धद्वारैव तत्कार्यक्षमत्वम्। तदाह नागेशः- दीपादिगतप्रकाशकत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। तदुक्तं हरिणा-

**“उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।**

**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः”॥**[344]

उपकार्योपकारकयोरर्थादुपकार्यो नामार्थः, उपकारको नाम शब्दः, तयो यत्र उपकारस्वभावः सम्बन्धो भवति तत्र शक्तिनिरूपकतादात्म्यादि-सम्बन्धानामनुमितिः कार्या।

तयोः सम्बन्धं विना तत्रोपकारस्यासम्भवात्। एवमेव वाच्य-वाचकस्थले वाच्यवाचकभावात्मिका शक्तिर्वाच्यार्थबोधनेऽर्थोपस्थापने तदैव क्षमा स्यात्, यदि तदर्थेन सह तत्पदस्य सम्बन्धो भवेत्। स च सम्बन्धः पूर्वदर्शितो भेदाभेदघटिततादात्म्यलक्षण एव, अन्यस्य त्वत्रासम्भवात्।। अत्रस्थशक्त्यरिक्तः कश्चन सम्बन्धोऽवश्यं मन्तव्यो न तु शक्त्यात्मकः सः। अत एव शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण इति निगदितम्। गुणानां रूपरसादीनां द्रव्याश्रितत्वनियामकः सः स्वीकृत एव समवायात्मकः, पदार्थविभागकृद्भिः।

प्रकृते दर्शितकारिकाघटकोपकारः शक्त्याख्यः पदनिष्ठः। अतः तादात्म्यलक्षणो धर्मोऽवश्यमस्ति पदे। स एव शक्त्युपकारकः, शक्तेरपि शक्तिः कार्योपधायकत्वसम्पादयित्रीति प्रतिपिपादयिषितं नागेशेन। सैवम्भूतः सम्बन्धः पदे वाक्ये च। “**तदाह न्यायभाष्यकारः- समयज्ञानार्थं चेदं**

---

343 तत्रैव, पृ० ८०

344 तत्रैव, पृ० ८०

**पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणम्, वाक्यलक्षणाया वाचोऽर्थलक्षणमिति"।**[345] अत्र वाक्यलक्षणाया वाच इति कथनेन हि पदेष्विव वाक्येष्वपि ऐश्वरसमय इति स्पष्टमेवोक्तम्। आकाङ्क्षादीनामपि वाक्यार्थनिर्णायकत्वात् तेऽपि वाक्यसङ्केतग्राहकाः। अयञ्चेश्वरसङ्केतो व्याकरणशास्त्रद्वारा व्युत्पादितशब्दानां कृत एव, न चापशब्देभ्य इति न्यायभाष्यकारस्य मतम्। पूर्वोक्तेन सिद्धान्तेन प्रतीयते यत् पदेषु यथा शक्तिस्तथैव वाक्येष्वपि शक्तिर्भवतीति, यैरप्युच्यते वाक्यस्फोटे न शक्तिरिति नैयायिकास्ते परास्ताः। अर्थान्न्यायभाष्यव्याख्यानेन वाक्येष्वपि ईश्वरकृतसङ्केतरूपा शक्तिरभ्युपगम्यते।

**शब्दार्थयोरध्यासप्रतिपादनम्–**

"**परस्मिन् पूर्वदृष्टावभासोऽध्यास",**[346] "**अतस्मिंस्तद्बुद्धिरध्या**सः", इति शाङ्करभाष्यमनुसृत्यान्यस्मिन् पूर्वज्ञातान्यधर्मस्य ज्ञानमध्यासः, यथा शुक्तिकायां रजतस्य तादात्म्याध्यासः। अध्यास एव मिथ्याज्ञानं भ्रमपदेन वोच्यते। प्रकृतप्रसङ्गे शब्देऽर्थस्यार्थे च शब्दस्य तादात्म्याध्यासोऽर्थाद् मिथ्याज्ञानं जायते। वस्तुतस्तु एतेषु पार्थक्यं विद्यते, तादात्म्यं नास्त्येव। तस्मादेव कारणादध्यासस्य विषया भवन्ति, यद्यपि मूले परारूपे शब्दे वास्तविकं तादात्म्यं वर्तते। तथापि व्यवहारदृशा मध्यमावैखरीवाचोः शब्दानां लौकिकैर्घटादिभिरर्थैः सह तादात्म्याध्यासो विधीयते। "**कः शब्द? कोऽर्थः? इति प्रश्ने सति 'घट' इत्ययं शब्दः घट इत्ययमर्थः"।**[347] इत्येकाकारस्योत्तरस्य दर्शनाच्छब्दार्थयोरध्याससिद्धिः। तथा च घट इति शब्दश्रवणानन्तरं किंविषयकं ज्ञानमिति जिज्ञासायां घट इत्याकारकमेव ज्ञानमुत्तर्यते, इति व्यवहाराच्छब्दज्ञानयोरपि तादात्म्याध्यासः। यतोहि 'घट' इति शब्दः, 'घट' इत्यर्थ' इत्यादिवाक्येषु इतिशब्दः शब्दस्वरूपपरतया तात्पर्यं ग्राहयति, अतः घट इत्याकारकं ज्ञानम्, अत्रेतिशब्दस्य सत्त्वात् घटशब्दशब्दस्वरूपपरक इति,

---

345 तत्रैव, पृ० ८५

346 शाङ्करभाष्यम्।

347 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ८५

अतः ज्ञानेन सह शब्दस्य तादात्म्याध्यासः। "**अत एव पदं श्रुतम्, अथार्थं श्रृणु, अर्थं वदतीत्यादिव्यवहारो भवति**"।[348] शब्दार्थयोस्तादात्म्याध्यासविषये लोकवृत्तं कथयति शब्दोच्चारिते सति कथयति 'अर्थं श्रृणु' अर्थमभिधत्ते, इत्यादिव्यवहारस्तदैव सम्भवति। यदा तादात्म्याध्यासोऽवबुध्यतेऽन्यथा शब्दस्यैव श्रवणं कथनं वा सम्भाव्यते नार्थस्यासम्भवात्। तद्वदेव शास्त्रमुद्धरति- शब्दार्थयोरिततेतराध्यासत्वादेव 'ओमित्येकाक्षरं ब्रह्म' इति श्रुतिवाक्ये तथा च "**वृद्धिरादैच्**"[349] इति स्मृतिवाक्येऽपि शब्दार्थयोः सामानाधिकरण्येन प्रयोगः सङ्गच्छते।[350] सामानाधिकरण्येन प्रयोग समानमधिकरणं यस्य तस्य भावः सामानाधिकरण्यमत्राधिकरण-शब्दस्यार्थपरकता विद्यते। तस्मादेव शब्दार्थयोः समानार्थबोधकत्वमिति। द्वयोरेव सामानाधिकरण्यं भवति- सञ्ज्ञासञ्ज्ञिनोर्विशेषणविशेष्ययोर्वा, प्रथमस्योदाहरणम्, आदैच् पदाभिन्ना वृद्धिः, आदैजिति सञ्ज्ञी, वृद्धिरिति सञ्ज्ञा, द्वितीयस्य तु 'नीलो घट' इति। आदैच्पदाभिधेयैः 'आ' 'ऐ' 'औ' इत्येभिः सह तादात्म्याध्यासादेव वृद्धिरादैचोः समानार्थबोधकत्वरूपसामानाधि-करण्यमुपपद्यते।

**तादात्म्यस्वरूपम्–**

"**तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्**"।[351] शब्दार्थयोर्वास्तविकभेदे सत्यपि यत्र शब्दार्थयोरभेदात्मिका प्रतीतिस्तत्र तादात्म्यमिति। अर्थाद्भेदेऽभेदस्यारोपः क्रियते। तादात्म्यस्य भेदेऽभेदे च समानरूपेण विद्यमानत्वात् भेदाभेदयोर्न पारस्परिकविरोधः। भेदाभेदयोर्मध्ये यदा भेदविवक्षा तदा "**अस्यार्थस्य वाचकः, उञः प्रगृह्यम्, तस्य वाचकः प्रणवः इत्यादौ षष्ठी**"[352] सिद्ध्यति। **अभेदस्य तत्त्वविवक्षया तु प्रथमा**

---

348 तत्रैव, पृ० ८५

349 अष्टाध्यायी, १/१/१

350 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ८५

351 तत्रैव, पृ० ८८

352 तत्रैव, पृ०८८

**भवति"।**[353] अतः शब्दार्थयोः पारस्परिकाध्यासमूलकतादात्म्यात् 'श्लोकमशृणोत्' 'अथार्थं वदती'त्यादय व्यवहारा दृश्यन्ते। यत्र च शब्दार्थयोरत्यन्तभेदस्तत्र नाध्यासो यथा घटे पटे अत्यन्ताभेदेऽपि अध्यासमूलकं तादात्म्यं न भवति। तद्यथा घटो घटः।

**ईश्वरकृताध्यासवर्णनम्-**

**"अयमध्यास आदिव्यवहारकृदीश्वरकृत एव। एतच्च स्थितोऽस्य वाचकस्य वाच्येन सह सम्बन्धः। सङ्केतस्तूक्तरूप ईश्वरीयस्य स्थितमेवार्थमभिनयति। यथावस्थितयोः पितापुत्रयोः सम्बन्धः सङ्केतेनैवावद्योत्यते 'अयमस्य पिता' 'अयमस्य पुत्र' इत्यादिना पातञ्जलभाष्ये एव स्पष्टत्वात्"।**[354] नागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायां शब्दार्थयोरध्यासमूलकतादात्म्यता वाक्यपदीयस्य कतिपयकारिकाभिः साधितम्।[355] "**इन्द्रियाणां स्वविषयेषु...............योग्यता तथा**"[356] इत्यस्या व्याख्याने नागेशः कथयति चक्षुरादीन्द्रियाणां रूपादिविषयकज्ञानस्य जनने पुरुषप्रयत्नरहिता अनादिर्योग्यता भवति, सा च योग्यता "**तज्जनकता-वच्छेदकधर्मवत्त्वरूपा, तथा शब्दानामर्थे अनादिः सम्बन्ध एव योग्यता, तद्बोधजनकतावच्छेदकधर्मः"।**[357] इन्द्रियेषु बोधजनकता भवति, बोधजनकताया अवच्छेदको धर्मश्चक्षुष्ट्वादितत्तदिन्द्रियेषु स्वीक्रियते, इन्द्रियवदेव स्व-स्वार्थेष्वनादिः सम्बन्धः शब्दानां योग्यता एव, योग्यताऽपि पूर्ववदेव बोधजनकतावच्छेदकधर्मत्वरूपा। घटादयः शब्दाः कम्बुग्रीवादिमदर्थस्य बोधका अतः तेषु घटादिषु बोधजनकता, तस्या अवच्छेदको धर्मः घटत्वादिर्मन्यते। अर्थात् तत्तदर्थविषयको यो बोधस्तस्य जनकताया अवच्छेदको धर्मविशेषः।

---

353 तत्रैव, पृ० ८८

354 तत्रैव, पृ० ८८

355 वाक्यपदीयम्, ३/३/२९, ३/३/३१, ३३, ३७

356 वैयाकरणभूषणसारः, शक्तिनिरूपणम्, का० १

357 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ०सं०९०

स च धर्मो वाच्यवाचकभावरूपः सम्बन्धः। **"ध्रियते तिष्ठति वर्तते यः स धर्मः"**[358] **"वृत्तिमत्त्वं धर्मवत्त्वम्",** इत्यस्यैव फलितार्थः। यत्र यो वर्तते स तस्य धर्मः। यथा द्रव्ये जातिगुणकर्माणि तिष्ठन्ति, तथैव शब्देष्वपि बोधजनकतावच्छेदकधर्मयोग्यतारूपसम्बन्धस्य विद्यमानत्वात्। उक्तलक्षणेन सम्बन्धस्यापि शब्दे वर्तमानत्वात् शब्दस्य धर्म इति कथ्यते। सम्बन्धशब्दे योग्यतां प्रति बोधजनकतावच्छेदकधर्मरूपयोग्यता, तेन निरूपितो तादात्म्यलक्षणसम्बन्धो स एव योग्यता, तथाभूता योग्यता स्वाभाविकी एव भवति।तेन कृत्रिमत्वं निरस्यते योग्यताख्यसम्बन्धस्य।

**"अनादिवृद्धव्यवहारपरम्परापरपर्यायाऽस्मदादिसमयगृहीतोक्तेश्वरसमयान्निश्चीयते"।**[359] मातृपुत्रयोर्जन्यजनकभावरूपसम्बन्धस्य निश्चयो लोकव्यवहारेण जायते। प्राचीनानां बोधजनकत्वमेव योग्यता इति दोषामावहति। एतज्जननेऽयं योग्य इति व्यवहारस्य सत्त्वादेव जनकतारूपयोग्यता न सिद्ध्यति। प्रत्युतोत्पत्तौ स्वरूपयोग्यताऽपि योग्यता भवति। शब्दस्यार्थेन सह सम्बन्धे सति प्रत्ययहेतुता शब्दे भवति, यद्यपि भर्तृहरिणा तत्राध्यासशब्दस्य प्रयोगो न कृतस्तथापि नागेशः प्रथमकारिकामनुसृत्य तादात्म्यमध्यासमूलकं स्वीकर्तुं प्रयासरतो वर्तते।

**"ज्ञानं प्रयोक्तुरर्थश्च स्वरूपञ्च प्रतीयते।**
**शब्दैरुच्चारितैस्तेषां सम्बन्धः समवस्थितः"॥**[360]

इति कारिकायां शब्दार्थज्ञानानामध्यासस्य उपपत्तिः प्रादर्श्यत।

कैयटेनापि शब्देऽर्थस्य तथा चार्थे प्रत्ययस्याध्याससम्बन्धः स्वीकृतो यश्चाभेदरूपेण प्रतीयते।[361] कैयटवचनस्य व्याख्यां कुर्वता नागेशेनाध्यासस्तादात्म्यरूपाध्यास एव स्वीकृतः। **तादात्म्याध्यासोऽत्र**

---

[358] नव्यन्यायभाषा प्रदीपः, पृ० २१

[359] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ९०

[360] तत्रैव, ३/३/१

[361] "शब्दस्वरूपमर्थेऽध्यस्याऽयं डित्थ इति सञ्ज्ञासञ्ज्ञिसम्बन्धः क्रियते। ततः शब्दस्वरूपसङ्गाद्यथा डित्थशब्दस्यार्थे प्रयोगस्तथैव शब्दस्वरूपेऽर्थेऽध्यस्यते प्रत्यय इत्यर्थः"। महाभाष्यम्, ५/१/११९

**बोध्यः।**[362] नागेशस्याध्यासमूलकतादात्म्यावधारणायां प्रथमं पातञ्जलयोगभाष्यं तदनु हेलाराजस्ततः कैयटेति निधर्तुं शक्यते[363] एवं प्रकारेण तादात्म्यस्य वर्णनमक्रियत, अयं सास्नादिमान् पदार्थो गौरिति, लोकव्यवहारे सिद्ध्यति, अतः शब्दार्थयोरुक्ततादाम्यादेव तथाभूतार्थो स्वीक्रियते।

एवम्भूतस्य तादात्म्यस्य स्वीकारे सति वह्निशब्दोच्चारिते सति मुखे दाहकत्वापत्तिः। मधुशब्दोच्चारिते सति माधुर्यापत्तिस्तत् सर्वं निराकृतम्, भेदस्य वास्तविकत्वादभेदस्य चारोपितत्वाद्।

**बौद्धार्थस्वरूपम् –**

वस्तुतस्तु बौद्धस्यार्थस्यैव वाच्यत्वम्, पदस्यापि स्फोटरूपता, तस्माद् द्वयोरपि बुद्धिस्थत्वादेव तादात्म्यम्, अतः बुद्धिस्थयोः शब्दार्थयोस्तादात्म्यादेव बौद्धे वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात्। यतोहि वह्नेर्बुद्धौ न प्रवेशः, योगसूत्रेण प्रमाणीकरोति- **"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"।**[364] शब्दज्ञानमात्रेण वस्तुशून्योऽर्थाद् बाह्यार्थरहितः सन् विशेषेण कल्प्यते, अर्थाद्बुद्धिपरिकल्पितः। शब्दार्थयोर्बुद्ध्यर्थकत्वमादायैव वन्ध्यासुतादीनां बुद्धिपरिकल्पितं वन्ध्यासुतवाच्यार्थं स्वीकृत्यैवार्थवत्त्वात् प्रातिपदिकसञ्ज्ञा विधीयते, प्रातिपदिकत्वादेव तादृशपदानां साधुत्वं स्वाद्युत्पत्तौ सत्यामेव जायते- **"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः। कूर्मक्षीरचये स्नातः शशश्रृङ्गधनुर्धरः"॥**[365] शब्दार्थयोस्तादात्म्यादेव पुरोवर्तिडित्थं पश्यतो नामजिज्ञासया कोऽयमिति प्रश्ने डित्थोऽयमित्युत्तरे सन्निहितदेशपिण्डमुद्दिश्य डित्थशब्दविधेयता प्रतीतिः सङ्गच्छते।

प्रश्नोत्तरयोरुभयोः सामानाधिकरण्येन प्रयोगः सङ्गच्छते। अस्यायमर्थो भवति, अस्यार्थस्येदं पदं भवति इत्यादिस्थलेषु भेदसम्बन्धः

---

362 महाभाष्यम्, प्रदीपोद्योतः, ५/१/११९

363 नागेशभट्टस्य व्याकरणदर्शनचिन्तनम्, वृत्तिनिरूपणम्, पृ० ६३

364 योगसूत्रम्, १/९

365 परमलघुमञ्जूषा, पृ० २९

षष्ठीविभक्तेरनुपपत्त्या शब्दार्थयोः स्वाभाविको भेदसम्बन्धः स्वीक्रियते। तथा स्वाभाविकयोगाङ्गीकाराच्च। अत्र चकारेण बौद्धशब्दार्थयोः वास्तविकतादात्म्यसमुच्चयो भवति। शब्दार्थयोर्बुद्धिदेशस्थत्वमभेदपक्षमादाय व्याख्यायितः। एवम्भूतेन बौद्धपदार्थव्याख्यानेन मध्वादिशब्दानामुच्चारणेन मुखे माधुर्यादिरसापत्तिरेव न, तथा च वह्न्यादिशब्दानामुच्चारणेन मुखे दाहकत्वाद्यापत्तिरपि न। इत्येवं बौद्धपदार्थस्य सिद्धिः।

**सङ्केतस्य पर्यायत्वम् –**

समयः सङ्केत आप्तोपदेशो वृद्धव्यवहारः, इत्येतैरेतत् पर्यायत्वमधिगम्यते। "**समयः सङ्केत इति चाप्तोपदेशवृद्धव्यवहारपर्यायौ**"।[366] अत्र न्यायभाष्यमेव प्रमाणम्, "**सामयिकः शब्दादर्थप्रत्ययः**",[367] अत्र कस्तावत् समयः पदार्थ इति विचिकित्सायाम्, अस्य शब्दस्यायमर्थसमुदायो वाच्यः, अस्यार्थस्यायं वाचक इति नियोगरूपः। तथास्माच्छब्दादयमर्थो बोद्धव्य इति नियोगरूपः समयशब्दस्यार्थ इति समाधत्ते। नियोगस्तु आप्तोपदेश एव। "**सामयिकशब्दादर्थप्रत्यय इति कणादसूत्रव्याख्यातृभिश्च नकुलदंष्ट्रा स्पृष्टा या काचिदौषिः सा सर्पविषहन्त्री, इत्याप्तोपदेशस्यैव समयत्वमुक्तम्**"। एवं रीत्या आप्तोपदेशद्वारकमेव तदोषधेः ज्ञानम्। पातञ्जलदर्शनेऽपि पदार्थोऽयं घटादिरनेन घटपदेन बोध्य इत्याकारकः सिद्धान्तः।

**शक्तिसङ्केतयोरभेदः**

यथा च नैयायिकैः पदप्रकारिकार्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका, एवम्भूतो द्विविधेश्वरसङ्केतः सैव शक्तिरिति बाढं नेदं मतम्, यतोहि "**अयमेतच्छक्यः अत्रास्य शक्तिः**"।[368] अयमर्थोऽस्य पदस्य वाचकः, अस्मिन्नर्थेऽस्य पदस्य शक्तिः। इत्थं सङ्केतस्य शक्तिरूपे व्याख्यानं नोचितम्। यतोहि द्वयोः सङ्केतयोर्घटकतया शक्तिरपि प्रविष्टा शक्तिः सङ्केतस्य विषयभूता, शक्तिरूपे सङ्केते शक्तेर्विषयत्वाभावादात्माश्रयदोषप्रसङ्गात्। यदि च कैश्चिदिदं कथ्यते यदेवं प्रकारकसङ्केतो न भवत्येव तदपि न

[366] वैयकरणसिद्धान्तलघुमञ्जूषा, पृ० १००

[367] न्यायभाष्यम्, ७/२/२०

[368] परमलघुमञ्जूषा, पृ० २५

समीचीनम्। प्राथमिकरूपेण स ईश्वरीयः सङ्केत आसीत्, तस्मादेव परम्परामनुसरन् व्यवह्रियमाणोऽद्यापि अधिगम्यते। तदुच्यते नागेशेन- **"ईदृशेश्वरसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याप्यनुमानात्"।**[369] तस्माद्यत्र कुत्रापि सङ्केते शक्तिपदव्यवहार्यत्वं तत्र लाक्षणिकमेवेति बोध्यम्। अत एव न्यायवाचस्पत्ये उक्तम्- **"सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः, तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत् सङ्केत इति"।**[370] योगवाचस्पत्येऽपि सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसङ्केतस्तु प्रकाशकः।

अतः शक्तिसङ्केतयोर्भेदत्वात् सर्वत्र सङ्केतः शक्तिरूपसम्बन्धस्य प्रकाशकत्वेनेष्टः। अतः सङ्केतादीनां पर्यायवाचकतां प्रदर्श्य शक्तिसङ्केतयोर्भेदवर्णनपुरस्सरं सङ्केतेनैव वाच्यवाचकभावशक्तेः प्रकाशकत्वम्।

**तादात्म्यसम्बन्धस्य त्रिप्रकारकत्वं भावति –**

आचार्यनागेशेन तादात्म्यसम्बन्धस्य त्रैध्यमवगम्यते, तादात्म्यसम्बन्धो ज्ञापकं यत्र स वाच्यवाचकभावरूप इति। सैव शक्तिरूपत्वेनावबुध्यते। तच्छक्तेः विषयीभूतार्थाः, अर्थानां नानात्वादेव तत्तदर्थैः सह तादात्म्यमापन्नानां शब्दानामपि भेदः- **"तादात्म्यमूलकस्य सम्बन्धत्वे अर्थभेदात्तादात्म्यापन्नशब्देषु भेदौचित्येनार्थभेदाच्छब्दभेद इत्युपद्यते"।**[371] एवम्भूते तादात्म्ये सन्देहो जायते यत् 'सरूपाणामेकशेष एकविभक्तावि'[372]ति सूत्रे भाष्यकारेणोक्तम्- एकशब्दोऽयं नार्थः, अर्थादक्षाः, मासाः, पादा एतेषामेकत्वेऽप्येते नानार्थेषु प्रयुज्यन्ते। तद्यथा- अक्षशब्दस्य त्रयोऽर्था विभीतकाक्षः, शकटाक्षः, देवनाक्षः। अस्य भाष्यस्य सङ्गतये वक्ति नागेशो यदेतादृशेषु स्थलेषु "**समानाकरत्वमात्रेण तु एकोऽयं शब्दो नानार्थः, इति**

---

369 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ९९

370 परमलघुमञ्जूषा, पृ० २५

371 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ११५

372 अष्टाध्यायी, १/२/२६

**व्यवहारः"।**[373] समानाकरत्वमात्रमित्यस्य व्याख्यानमानुपूर्व्या ऐक्यमात्रेण शब्दस्य एकत्वव्यवहारान्न क्षतिः। तादात्म्यस्य निरूपकाश्रयभेदाभ्यां भेद इत्येके, यतोहि तादात्म्यस्य निरूपकोऽर्थो भवति, शब्दश्चाश्रयो भवति। अर्थनिरूपिततादात्म्यं शब्दे भवति। अतोऽर्थभेदाच्छब्दभेदः, शब्दार्थयोर्भेदात्तादात्म्यभेद इत्येकः पक्षः। द्वितीयः पक्षः- "**अन्ये त्वेकत्रैवाम्रफले रूपरसगन्धादीनां भिन्नानां तादात्म्यवदेकत्रैव शब्देऽनेकार्थनिरूपितानि भिन्नानि तादात्म्यानीत्याहुः"।**[374] अस्मिन् पक्षे तादात्म्याश्रयीभूत-शब्दस्यैकत्वेऽर्थनिरूपकभेदात् तादात्म्ये भेदं स्वीकृत्यार्थभेदस्तादात्म्यभेदः शब्दैकत्वञ्च प्रतिपाद्यते। तद्यथा लौकिकोदाहरणेन प्रदर्श्यते- एकस्मिन्नेवाम्रफले रूपम्, रसः गन्धाः, भिन्नपदार्थाः, अतो हेतोर्भिन्नपदार्थकत्वाद् भिन्नानि तादात्म्यान्यपि, तानि चानेकार्थनिरूपिततादात्म्यान्येकस्मिन्नेवाम्रफले। तद्वदेव एकस्मिन्नेव शब्देऽनेकार्थनिरूपितान्यनेकानि तादात्म्यान्यपि भवन्तीति, अत्रानेकार्थता, तादात्म्यानेक्यम्, शब्दैक्यञ्च, द्वितीयो पक्षः। तृतीयः पक्षः- "**परे तु निरूपक-भेदेऽपि तादात्ममेकमेवेति शक्त्यैकत्वमेवेत्याहुः"।**[375] निरूपकाणामर्थानां भेदेऽपि अर्थनिरूपिततादात्म्यस्यैक्यमेव तादात्म्यैकत्वाच्च वाच्यवाचक-भावशक्तेरपि एकता, तदाश्रयत्वाच्छब्दस्याप्यैक्यम्। पक्षेऽस्मिन्नर्थभेदः, तादात्म्यैक्यम्, शब्दैक्यम्, इति फलति। 'हलोऽनन्तराः संयोगः'[376] इति सूत्रस्य भाष्यं कृतवता पतञ्जलिना तादात्म्यस्यैते पक्षा असूच्यन्त। अतः परं तादात्म्यभेदनिरूपणपुरस्सरं नागेशः प्रतिपादयति। सङ्केतानां नानात्वात् सर्वत्र तादात्म्यमूलकवाच्यवाचकभावसम्बन्धस्यैव ज्ञानं भवति। सङ्केतत्वरूपेणापितु सम्बन्धत्वेनैव। तादृशमेव ज्ञानं शाब्दबोधे कारणत्वमुपयाति। तादात्म्यस्य च सम्बन्धेनैव यदा ज्ञानञ्जायते तत्सम्बन्धात्मकञ्ज्ञानमेव शाब्दबोधाय साधनत्वमुपैति। "**सर्वजातीयैः**

---

373 तत्रैव, पृ० ११५

374 तत्रैव, पृ० ११५

375 तत्रैव, पृ० ११६

376 महाभाष्यम्, १/१/७

**सङ्केतैरस्य सम्बन्धत्वेनैव ज्ञानं तदेव च बोधसाधनमिति बोध्यम्"।**[377] इति तादात्म्यस्य निरूपणम्।

### तादात्म्यभेदाच्छब्दार्थयोर्भेदः –

तादात्म्यमूलकस्य वाच्यवाचकभावापरपर्यायस्य शक्तित्वेऽर्थभेदात् तत्तादात्म्यापन्नशब्देषु भेदौचित्येनार्थभेदाच्छब्दभेद इत्युपपद्यते। समानाकारत्वमात्रेण तु एकोऽयं शब्दो नानार्थ इति व्यवहारः। शक्तिमिति रूपकार्थशक्त्याश्रयशब्दोभयभेदात् तादात्म्यभेदः शब्दभेदश्च। तदुक्तं न्यायकुसुमाञ्जलौ- "**शक्तिभेदो न चाभिन्नः स्वभावो दुरितक्रमः।**[378] **अर्थपदयोस्तादात्म्यात्तत्तदर्थ-तादात्म्यापन्नः शब्दो भिन्न इति हेतोरर्थभेदाच्छब्दभेद इति व्यवहारः। समानाकारमात्रेण तु, एकोऽयं शब्दो बह्वर्थव्यवहारः"।**[379]

### अपभ्रंशेषु शक्तिसद्भावविमर्शः –

व्याकरणदर्शनेऽपभ्रंशे शक्त्युद्भावः न जानीमः । तत्र हेतुद्वयं दीयते- १-**व्यवहारस्य दर्शनम्।** २-**पूर्वजन्मानुभूतशक्तेः स्मरणम्।** पूर्वोक्तवाच्यवाचकभावलक्षणा शक्तिर्यथा साधुशब्देषु भवति तद्वदेवापभ्रंशेष्वपि। यतोहि शक्तिज्ञापकेषु शिरोमणिभूतव्यवहार उभयत्र समानरूपतां भजते। व्यवहारस्य दर्शनेन च पूर्वजन्मानुभूतशक्तेः स्मरणं भवति। अत एव बालानां स्तन्यपाने जन्मसमये प्रवृत्तिर्भवति, अन्यथेष्टसाधनत्वज्ञानाभावेन तत्र प्रवृत्तिर्न स्यात्, तथैव तिरश्चामपि विषये।

### मीमांसकनैयायिकानां निरसनविचारः–

यत्तु तार्किकाः- असाधुशब्देन साधुस्मरणद्वाराऽर्थबोध इत्याहुः। तात्पर्यमिदं यदेतैर्न स्वीक्रियते अपभ्रंशेषु शक्तिः। बोधश्च असाधुशब्दश्रवणानन्तरं तद्वाचकसाधुशब्दस्य स्मरणे सत्येवार्थावगतिः। एतन्मतस्य खण्डनं करोति। "**साधुस्मरणं विनापि बोधानुभवात्।**

---

377 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ११६

378 न्यायकुसुमाञ्जलिः, १/७

379 परमलघुमञ्जूषा, पृ० ३१

**तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च"।**[380] तथाप्यसाधुवाचकसाधुशब्दस्य ज्ञानाभावेऽपि बोधो भवत्येव। अतोऽसाधुशब्देभ्यः साधूनां स्मरणं भवति, तत्पश्चादेवार्थबोध इति न समाकलनीयम्। तथा चासाधुषु शक्तिभ्रमाद्बोधो भवति इत्यपि न वाच्यम्? यस्मिन् ज्ञाने उत्तरकाले बाधो दृश्यते तत्रैव भ्रमः स्वीक्रियते तद्वति तदभावप्रकारकज्ञानस्यैव भ्रमत्वात्। गगर्यादिशब्दनां श्रवणानन्तरम्, इमे गगर्यादिशब्दा वाचकत्वाभाववन्त इति ज्ञानं न कस्यापि जायते। तत्र सन्देहरहितस्य ज्ञानस्य सत्तायां कश्चिदपि बाधकं विना भ्रम एव न। अतोऽत्र भ्रमस्य वक्तुमशक्यत्वम्। अत एव असाधूनामपि बोधकत्वेन शक्तत्वादेव स्त्रीशूद्रबालादीनां संस्कृतज्ञानरहितजनानामर्थविषयके सन्देहे उत्पन्ने सति, तदपभ्रंशेन साधुशब्दानामपभ्रंशशब्देनार्थनिर्णयो क्रियते। संस्कृतज्ञेन व्यवहारकाले संस्कृतशब्दाञ्छ्रुत्वा अज्ञा स्त्रियो बालाश्च संशयग्रस्ता भवन्ति। तदा तेषामपभ्रंशशब्दोच्चारणेनार्थविषयकसंशयो दूरीभवति। यद्यसाधवो वाचका न स्युस्तदा तैरर्थबोधाजनकत्वेन सन्देहनिराकरणं न स्यात्। साध्वसाधुशब्देभ्योऽर्थसम्प्रतिपत्तिस्समैव न तत्र किञ्चिदपि वैशिष्ट्यमर्थबोधे।

**"अत एव समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः"।**[381] एवं रीत्या साधुशब्दानामुच्चारणेन धर्मस्य प्राप्तिर्भवति। वस्तुतस्तु साधुशब्देषु यथा वाचकता भवति तथैवासाधुशब्देष्वपि। किन्तु साधुशब्दभाष्यमाणैर्जनैर्धर्मस्य प्राप्तिः क्रियते। एवं रीत्या नैयायिकमीमांसकयोः खण्डनमक्रियत।

**आर्यम्लेच्छाधिकरणविमर्शः–**

अत एव स्त्रीशूद्रबालानां प्रयुक्ते साधौ अर्थसंशये सति तदपभ्रंशेन निर्णयो भवति। तात्पर्यमार्यम्लेच्छाधिकरणस्येदम्- तत्र हि यद्यपि आर्या यवशब्दं दीर्घशूके प्रयुञ्जते तमेव बुध्यन्ते। म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते तमेव च बुध्यन्ते। **"तथाप्यार्यप्रसिद्धेर्बलवत्त्वात् वेदे दीर्घशूकपरतैवेति सिद्धान्तितम्"।**[382] प्रमाणानां सम्बद्धार्थबोधकत्वेन तेषामपि अर्थेन सह सम्बन्ध आवश्यकः। अत

---

380 तत्रैव, पृ० ३३

381 महाभाष्यम्, पस्पशाह्निकम्, पृ० ९९

382 परमलघुमञ्जूषा, पृ० ३३

एव गौरित्यस्य शब्दस्यार्थे बहव 'गावी', 'गोणी', 'गोपा', 'गोपोतलिका', इत्यादयोऽपभ्रंशा वर्तन्त इत्यर्थकं गौः, इत्यस्य शब्दस्य गाव्यादयोऽपभ्रंशा इति भाष्यमाञ्जस्येन सङ्गच्छते। भ्रमात्मकज्ञानेन न किमपि साध्यतेऽतस्तत्रार्यम्लेच्छप्रसिद्ध्योः कस्याः बलवत्त्वमिति विचारासङ्गतिः स्पष्टैव। यत्र द्वयोर्वस्तुसाधकता तत्रैव बलाबलविचारः। नैयायिकमते प्रियङ्गुबोधो भ्रमजन्योऽस्मात् कारणात्तत्र न विचारावसर एव। निष्कर्षतोऽपभ्रंशेषु शक्तिः स्वीक्रियत एव। किन्तु सत्यामपि शक्तौ तेषु साधुत्वं नानुभूयते।

**साधुत्वप्रतिपादनम्–**

"**साधुत्वं कैमर्थ्यमिति। साधुत्वं तु नापभ्रंशानां शिष्टैर्धर्मबुद्ध्या तदप्रयोगात्**"।[383] यदा शिष्टा धर्ममुद्दिश्य शब्दानां प्रयोगमीहन्ते तदानीं ते साधुशब्दान् एव प्रयुञ्जते। यतोहि साधुशब्दप्रयोगेणैव धर्मस्य प्राप्तिर्भवति। अपभ्रंशानां तु धर्मोद्देशपूर्विका प्रयुक्तिर्न क्रियते शिष्टैः। शङ्क्यते यदसाधुत्वे सत्यर्थबोधो न स्यात्, यतोह्यसाधुत्वमर्थबोधकस्य प्रतिबन्धक इति चेन्न पार्यते वक्तुम्, असाधुत्वस्य विद्यमानतायामपि बोधस्य दर्शनान्न तस्य प्रतिबन्धकता। अर्थावबोधे सति न कश्चन विशेषः। वैशिष्ट्यन्तु धर्माधर्ममात्रविषयकः। "**साधुत्वञ्च व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठ पुण्यजनकतावच्छेदको जातिविशेषः**"।[384] व्याकरणशास्त्रेण व्यङ्ग्योऽर्थविशिष्टः शब्दसत्ताकः पुण्यजनकताया अवच्छेदको जातिविशेषरूपो धर्म एव साधुत्वेन गृह्यते। अयमेवाभिप्रायो महाभाष्ये पतञ्जलिना **एकः पूर्वपरयोः**[385] इति सूत्रस्य भाष्ये प्रत्यपादि- "**एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति**"।[386] तात्पर्यमिदं यदेक एव शब्दो सम्यग्रूपेणार्थाच्छास्त्र-प्रक्रियया परिष्कृतः सन् शिक्षाशास्त्रीयरीत्योच्चारितः इहामुत्र सकलाभीष्टकामनानां सम्पूरको भवति। "**साधुत्वञ्च व्याकरणान्वाख्येयत्वं**

---

[383] वैयकरणसिद्धान्तलघुमञ्जूषा, पृ० १३९

[384] तत्रैव, पृ० १३९

[385] अष्टाध्यायी, ६/१/९४

[386] महाभाष्यम्, ६/१/८४

**पुण्यजनकतावच्छेदकधर्मवत्त्वम्"।**[387] एवम्भूतं साधुत्वस्यानुमापकता कथं स्यादिति विचिकित्सायां नागेशेनोच्यते यत् साधुत्वस्य मानं व्यञ्जकं वा शिष्टपुरुषैः कृता प्रयोगाः, कोशाः, व्याकरणम्, निरुक्तम् इत्यादिनाऽनुमाप्यं भवति। साधुत्वस्य बोधकमद्यत्वे व्याकरणमेव विद्यते तच्च पाणिनिमुनिविरचितमेव नान्यदिति महाभाष्ये प्रतिपादितम्। "**एवञ्च पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्द-प्रयोगाद्धर्म इति बोध्यम्"।**[388] अतः वाचकत्वं तु साधावसाधावपि समानमेव जायते। किन्तु पुण्यजनकतावच्छेदकधर्मवत्ता साधुमात्रप्रयोग एवाधिगम्यते तथा चासाधुषु व्याकरणशास्त्रस्य विषयता न भवति। तद्भिन्ने तु पापजनकतावच्छेदकधर्मवत्ता गम्यते। एवं व्याकरणस्य साधुत्वं व्यक्रियत।

**शक्तिभेदविचारः–**

सा च पूर्वोक्ता वाच्यवाचकभावापरपर्यायरूपा या शक्तिस्तस्यास्त्रैध्यमवबुध्यते। नागेशेन स्वीकृतभेदाः- "**शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च। रूढिः- शास्त्रकृतकल्पितावयवार्थाप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे सा तदर्थनिरूपिता रूढिः। यथा मणि नूपुरादौ"।**[389] शब्दार्थकभौवादिकमन्-धातोरौणादिके इन् प्रत्यये सति मणिरिति सिद्ध्यति। तथैव 'णू स्तुतौ' इति धातोः नुवनं नूरिति "**सम्पदादिभ्यः क्विप्"**[390] इत्यनेन क्विपि सति क्विपः सर्वापहारिलोपे सति स्वादिकार्ये नूरित्यस्य सिद्धिः। 'पुर अग्रगमने' इत्यस्माद्धातोः "**इगुपधज्ञापीकिरः कः"**[391] इत्यनेन 'क'प्रत्यये कृते सति 'पुर' इति। नुवः पुरो नूपुरः। एताभ्यां शब्दाभ्यां शब्दकर्तृरूपार्थः, स्तुतिसम्बन्ध्यग्रगमनकर्ता वा न बोध्यतेऽपितु मणिर्नामरत्नविशेषः, नूपुरश्चाभूषणविशेषः, बोध्यम्। प्रकृतिप्रत्ययोरवयवार्थत्वमपहाय समुदायार्थविशिष्टोऽवबुध्यत।

---

387 परमलघुमञ्जूषा, पृ० ३३

388 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १४४

389 तत्रैव,पृ० १७६

390 अष्टाध्यायीवार्तिकम्, ३७२

391 अष्टाध्यायी,३/१/१३५

**योगशक्तिस्वरूपम्-**

**"शास्त्रकृतकल्पितावयवार्थमात्रबोधे योगशक्तिः। यथा पाचकादौ"।**[392] अत्र पच्धातोरर्थो विक्लित्त्यनुकूलव्यापारः, आश्रयश्च ण्वुल्प्रत्ययस्यार्थः। एवं रीत्या विक्लित्त्यनुकूलो यो व्यापारस्तदाश्रयः पाचकः। **"अश्वगन्धापदमोषधिविशेषबोधे रूढम्। अश्वसम्बन्धवत्तया वाजिशालाबोधे यौगिकम्। इदं यौगिकरूढमित्युच्यते"।** ननु पङ्कजादिपदात् कुमुदादीनां बोधो न स्यात् तदर्थं रूढेः प्रतिबन्धकत्वस्वीकारात्, अश्वगन्धाशब्दात् कथमश्वशालायाः बोध इति चेन्न। सति प्रकरणादिके योगार्थबोधस्वीकारात्, **"रूढिर्योगापहारिणीत्यस्य"**[393] प्रकारणाद्यभावे स्वीकारात्। रूढेर्बलवत्त्वे बीजं त्ववयवार्थानुसन्धानमूलक–यौगिकार्थापेक्षया रूढ्यर्थस्य प्रथमोपस्थिततत्वमेव। तथा च यस्मिन् स्थले यौगिकार्थस्य प्रथमोपस्थिततत्वं तत्र यौगिकार्थस्यैवबलवत्त्वम्। तथा 'वाजिभ्यो वाजिनम्' इत्यत्र प्रकरणादिना विश्वेदेवानां प्रथमोपस्थिततत्वात् वाजमन्नमामिक्षारूपमस्ति येषाम्, इति योगात् बोधो न वाजिनोऽश्वस्य। **"यत्र मण्डपपदादिभ्यो मण्डपानकर्त्रादेः रूढ्यर्थमण्डपादिगुणवत्त्वेन बोधः, तत्र प्रथमप्रतीतरूढिविषयमुख्यार्थत्यागेन, योगात् रूढिपूर्वकलक्षणाया बलवत्त्वेन लक्षणयैव बोधः"।**[394] चैत्रो मण्डपोऽभवत्, अत्र रूढिमूलिकाया लक्षणाया बलवत्त्वाल्लक्षणयैव बोधः। स च मण्डपो यो गृहविशेषः तत्सादृश्येन इति। गुणसदृशगुणवत्त्वज्ञान-प्रयोज्यारोप-विषयीभूतगृहत्वेन बोधः।

**योगरूढिवर्णनम्–**

**"यत्र शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितं समुदाय-बोधकत्वं सा योगरूढिः।यथा पङ्कजादिपदे"।**[395] तत्र पङ्कजनिकर्तृपद्ममिति बोधात्, अस्मिन् पदे पङ्कजनिकर्तृत्वमित्यंशस्य बोधो योगशक्त्या, तथा च

---

[392] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १७६

[393] तत्रैव, पृ० १७६

[394] तत्रैव, पृ० १७७

[395] तत्रैव, पृ० ११७

विशेष्यभूतस्य पद्मनो बोधः रूढिशक्त्या भवति। पद्मनो बोधोऽनुपपत्तिसन्धानं सम्बन्धप्रतिसन्धानं विनैव भवति, तस्मान्न लक्षणावसरः। क्वचिच्च तात्पर्यग्राहकवशात् केवलयोगार्थस्य बोधः, यथा कह्लारकैरवमुखेष्वपि पङ्कजेषु, अत्र पङ्कजपदं योगार्थस्यावबोधकम्। क्वचिच्च तात्पर्यग्राहकवशात् केवलरूढ्यर्थस्य बोधः, भूमौ पङ्कजमुत्पन्नम्, अत्र रूढ्यर्थः पद्मरूपो बोध्यते। एवम्भूतं व्याख्यानमर्थात् तात्पर्यवशादेव, यथावसरं क्वचिद्योगार्थस्य क्वचिच्च रूढ्यर्थस्य ग्रहणं भवतीति, "**अर्हादगोपुच्छसङ्ख्यायां ठक्**"[396] इति सूत्रस्य भाष्ये प्रतिपादितम्। एवं रीत्या शब्दशक्तिविवरणं तद्भेदाश्च नागेशमनुसृत्य व्याख्याताः। एवम्भेदवती त्रिप्रकारिका शक्तिर्नियम्यते नानार्थकेषु शब्देषु, संयोगादयश्च तन्नियन्त्रका भवन्तीति, भर्तृहरिमते शब्दशक्तिव्याख्यानकाले प्रादर्श्यन्त।

**"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**

**अर्थप्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥**

**सामर्थ्यमौचिती देशः कालः व्यक्तिः स्वरादयः।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः"॥**[397]

एभिरेव चतुर्दशसङ्ख्याकैः संयोगादिभिर्नानाऽर्थवतां शब्दानां शक्तिः तत्तद्विशेषार्थेषु नियन्त्र्यते। समेषामेतेषामुदाहरणानि भर्तृहरेर्व्याख्यानेऽदीयन्त।

---

396 अष्टाध्यायी, ५/१/१९

397 वाक्यपदीयम्, ३/३१५-३१६, उद्धृतम्, वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १८१

# ॥ तृतीयोऽध्यायः ॥

## ॥ व्याकरणाद्वैतवेदान्तयोर्लक्षणाविमर्शः ॥

पूर्वस्मिन्नध्यायेऽस्माभिः शब्दस्वरूपस्य तथा च शक्तित्वेनाभिधायाः स्वरूपं संव्यचारि। अध्यायेऽस्मिन् सम्यक्प्रकारेणास्माभिर्लक्षणायाः स्वरूपं विचारयिष्यते। यतोहि लाक्षणिकार्थं विना वेदान्तशास्त्रे न सम्भवत्येव महावाक्यानां विचारणा। तदर्थं प्रायशः समेष्वपि ग्रन्थेषु लक्षणाऽमीमनत, तद्वारा च महावाक्यानामर्थबोधो व्यभाव्यताद्वैत-वेदान्तिभिर्विद्वद्भिः। तच्च सर्वं कथं सम्भवति, तथा च तस्याः शब्दशक्तेः का आवश्यकता, इत्यादिकं सर्वं विविच्यतेऽत्राध्याये।

**"किमर्थं न साक्षाल्लक्षणया कर्तुं शक्यते**

**वर्णनमात्मनस्तत्प्रतिपाद्यतेऽत्र कारणम्॥**

**षष्ठीक्रियाजातिरूढयः शब्दहेतवः**

**नात्मन्यन्यतमोऽमीषां तेनात्मा नाभिधीयते"**॥[1]

लक्षणयैव बोधो भवति नाभिधयाऽभिधीयते तत्प्रतिपाद्यते ग्रन्थकारः- शब्दस्य प्रवृत्तिर्लोके तदैव सञ्जायते यदा तत्र कस्मिंश्चिद्वस्तुनि सम्बन्धः, गुणः, क्रिया, रूढिर्वा भवति। एतेषु चतुर्ष्वेकस्य सत्येव तत्राभिधानत्वमायात्यभिधया, आत्मा च एभिर्पूर्वोक्तैर्विरहितः सन् राजते यतोह्यात्मन्यसङ्गत्वं तस्माच्च सम्बन्धाभावः, निर्गुणत्वाच्च गुणाभावः, क्रियाभावत्वाच्च निष्क्रियः, रूढेरभाववानपि, अतः साक्षाच्छब्दमुखेना-भिधावता शब्देन आत्मनः प्रतिपादनाऽशक्यैव। अतो नाभिधा प्रवर्तते।

अत्रैकया शङ्कया जायते यद्यदि शब्दो वाच्यवाचकभावमुखेन सम्बन्धपुरस्सरमात्मनि न प्रवर्तते। तदात्वे तु **"अहं ब्रह्मास्मी"**ति एवम्प्रकारकं ज्ञानं कया रीत्या जायते तत्समाधत्ते-

**"असत्ये वर्त्मनि स्थित्वा निरुपायमुपेयते।**

**आत्मत्वकारणाद्विद्मो गुणवृत्या विवोधिताः"**॥[2]

---

[1] नै०सि०, पृ० १३६, श्लो० १०३

एतस्य तात्पर्यं बोधयता ग्रन्थकारेण परामृश्यत यत् समारोपिते मार्गे स्थित्वा (शबलात्मनो वाचकशब्दादेव) निरुपायस्य साक्षादुपास्यरहितस्य आत्मतत्त्वस्य प्राप्तिर्जायते। यथा च शाखाग्रेण चन्द्रमसो ज्ञानम्, रेखाभिश्च सत्यवर्णानां ज्ञानम्। तथैवारोपितमार्गेणैव समेषां स्वयंप्रकाशस्वरूप आत्मा विद्यते। तस्य च ज्ञानं लक्षणयैव वृत्त्या जायते नान्यथा।

**वाक्यवृत्तौ लक्षणाविचारः-**

**"तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ।**

**लक्ष्यौ तत्त्वं पदार्थौ द्वावुपादाय प्रवर्तते"॥**[3]

तत्त्वमस्यादिवाक्यस्यैकत्वं तादात्म्यप्रतिपादनार्थं लक्ष्यावर्थाल्लक्षणा-विषयौ द्वौ तत्त्वं पदार्थावद्वयानन्दप्रत्यग्बोधावुपादायैकत्वयोगत्वेन प्रवर्तेते। उभयोरेकलक्षणत्वादेव, तस्मादुभयोः परोक्षत्वप्रत्यक्त्ववाक्यार्थयोरनर्हत्वादेव वाच्यार्थयोः परित्यागाल्लक्ष्यावुपादायैव अद्वयानन्दस्य ज्ञानं भवितुमर्हति, तस्मादेव प्रतिपाद्यते गुरुरुवाच –

**"हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने।**

**यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात्"॥**[4]

किमर्थं लक्षणा तदेत्थं प्रतिपाद्यते- वाच्यार्थस्यार्थाद् मुख्यार्थस्य परिग्रहे सति वाक्यार्थस्याशेषतो विरुद्धत्वात् महावाक्यार्थो न सङ्गच्छते। तस्मादेव हित्वा अर्थाद् परित्यज्य उभयोस्तत्त्वमस्यादिपदयोर्वाच्यार्थं विशिष्टात्मकं तात्पर्यानुपपत्त्याऽन्वयानुपपत्त्या वा लक्षणाया आश्रयो नीयत। येन च महावाक्यानामुपपत्तिः स्यात्।

**"आलम्बनतयाभाति योऽस्मत्प्रत्ययशब्दयोः।**

**अन्तःकरणसन्निबोधः स त्वंपदाभिधः"॥**[5]

कश्चोभयोर्मुख्यार्थः येन चा महावाक्यार्थस्य प्रतिपादने लक्षणाया आवश्यकता जायते। मुख्यार्थस्य विरोधात् स च मुख्यार्थः— अलम्बनत्वं नाम

---

[2] तत्रैव, पृ० १३६, श्लो० १०४

[3] वा०वृ०, ४२

[4] तत्रैव, ४/४३

[5] तत्रैव, ४/४४

विषयत्वम्, तस्मात् विषयतया अन्तःकरणस्य संनिबोधोऽन्तःकरणावच्छिन्नस्य बोधस्य त्वंपदेनाभिधानत्वम्, जीवस्य त्वम्पदेनाभिधानत्वम्, जीवो हि वाच्यस्त्वम्पदस्य।

**"मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः।**

**पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः"॥**[6]

अत्र जगत्कारणभूतस्य सर्वज्ञत्वसर्वेश्वरत्वादिगुणकस्य पारोक्ष्यादिविशिष्टस्य सत्याद्यात्मकस्य अपरिच्छिन्नज्ञानानन्दस्वरूपस्य मुक्तलक्षणस्य तत्पदाभिधस्य ईश्वरस्य कथनमत्र विद्यते, मायया समुपहितत्वादेवास्य परोक्षता, सर्वजगदधिष्ठानत्वेन च पूर्णत्वम्, उपरितनोक्ताभ्यां कारिकाभ्यां तत्त्वं पदयोः वाच्यार्थं प्रतिपाद्य अभेदार्थप्रतिपादने चाशेषतो विरोधाल्लक्षणां प्रतिपादयितुमीहे-

**लक्षणा प्रवर्तनम्-**

**"प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता।**

**विरुध्यते यतस्तस्माल्लक्षणा सम्प्रवर्तते"॥**[7]

मायोपाधिकस्य सर्वज्ञत्वादिविशिष्टस्य कार्योपाधिकस्याल्पज्ञत्वादि-विशिष्टस्य अखण्डार्थावबोधेऽशेषतो विरुद्धत्वाच्च लक्षणायाः प्रवृत्तिर्जायते-

**"मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे।**

**मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते"॥**[8]

शक्त्या जायमानस्य बोधस्य वाच्यार्थस्य प्रत्यक्षादिप्रमाणै सह विरोधादेव मुख्यार्थेन अविनाभूता या अर्थान्तरप्रतीतिः, सा लक्षणा कथ्यते , अत्र च प्रतीति हेतुभूता शब्दप्रवृत्तिरर्थाल्लभ्यते।

---

[6] तत्रैव, ४/४५

[7] तत्रैव, ४/४६

[8] तत्रैव, ४/४७

**लक्षणायाः त्रिधात्वम् –**

सा च त्रिविधा, जहदजहज्जहदजहद्भेदात्। एतासु **"गङ्गायां घोषः प्रतिवसति"** इत्यत्र गङ्गायां घोषवासानुपपत्तेः गङ्गाशब्दस्य मुख्यार्थं प्रवाहं परित्यज्य तदविनाभूतेऽर्थान्तरे वर्तमानत्वं जहल्लक्षणा। **"श्वेतो धावति"** श्वेतगुणास्य धावनक्रियया सहान्वनुपपत्तौ श्वेतशब्दस्य मुख्यार्थमपरित्यज्य तदाश्रये पिण्डविशेषे लक्षणायाः सत्त्वादेव श्वेतोऽश्वो धावतीति साध्यते। **"सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्म"** इति कथिते सति लोके ज्ञानानन्दादीनां धर्मत्वेन प्रसिद्धत्वात् तेषां च ब्रह्मत्वानुपपत्तौ च सत्यां सविषयकानां ज्ञानादीनां गुणत्वेन ब्रह्मत्वानुपपत्तौ च निर्विषयकस्य ज्ञानानन्दादेरात्मरूपत्वेन गुणत्वाभावात् सत्यज्ञानानन्दादिशब्दस्य मुख्यार्थमपरित्यज्य तत्स्वरूपत्वेऽपि तदाश्रयत्वप्रतीयमाने ब्रह्मवस्तुनि सत्यज्ञानानन्दस्वरूपं वस्तु ब्रह्म, तत्र च सत्यज्ञानान्दादिशब्दस्य वर्तमानता अजहल्लक्षणा।

सोऽयं देवदत्तः इति कथिते सति तत्काल-तद्देशविशिष्टस्य देवदत्तस्य एतत्काल-एतद्देशविशिष्टस्य देवदत्तस्य इत्युभयोरेकत्वस्य अनुपपत्तौ सत्यां विरुद्धांशं परित्यज्य देवदत्तमात्रांशे शब्दस्य वर्तमानता भागत्यागलक्षणाऽभ्यधीयत भागत्यगस्यैवापरं नाम जहदजहल्लक्षणा विद्यते। एतद्वदेव तत् त्वमसि महावाक्येऽपि भागत्यागलक्षणा सङ्गच्छते।

**तत्त्वं पदे लक्षणा—**

**"तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।**

**सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा"॥[९]**

यथा 'सोऽयं देवदत्तः' इत्यत्र लक्षणा भागत्यागाख्यया बोधोऽखण्डार्थो विरोधराहित्येन सम्भवति तथैव 'तत्त्वमसि' महावाक्यस्य बोधाय युक्तिराश्रीयते तत्त्वं पदयोः मुख्यार्थस्य परिग्रहे परोक्षस्य प्रत्यक्त्वाभावादपरिच्छिन्नत्वेन पूर्णस्य द्वितीयत्वाभावाच्च वाक्यार्थयोः एकत्र

[९] तत्रैव, ४/४८

लक्ष्येऽसम्भवात्, तत्त्वं पदयोः परोक्षत्वादिसद्वितीयत्वादिविशिष्टांशं परित्यज्य क्रमात् पूर्णानन्दे प्रत्यग्बोधे च प्रवर्तते।

**सिद्धान्तबिन्दौ लक्षणा-**

अत्र महावाक्यस्य विचारणायां सत्यां कथयते यन्निर्विकल्पकस्य बोधस्योपलब्धिर्जायते **"तेन प्रथममवान्तरवाक्येभ्योऽनुभूतयोः शुद्धजीवब्रह्मणोस्तत्त्वमस्यादिवाक्ये मुख्यार्थान्वयानुपपत्त्या लक्षणया निर्विकल्पकस्मरणोपपत्तिः"**।[10] महावाक्यस्य च अखण्डार्थबोधाय प्रतिपादयति लक्षणां तद्विना न सम्भाव्यतेऽखण्डैकरसः। आभासवादस्य पक्षं स्वीकृत्य ग्रन्थकारो जहल्लक्षणायाश्चर्चां करोति – **"अस्मिंश्च पक्षे तत्त्वमादिपदे जहल्लक्षणैव, साभासस्योपाधेर्वाच्यार्थस्य हानात्, आभासस्यापि जडाजडविलक्षणत्वेनानिर्वचनीयत्वात्, तदुक्तं संक्षेपशारीरके – साभासज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाहं शब्दोऽहङ्कारवाची भवति तु जहतीलक्षणा तत्र पक्षे"**॥[11] आशयोऽयं विद्यते वस्तुतत्त्वस्य चिदात्मनो वाच्यवाचकादिव्यवहारैरतीतत्वादव्यवहार्यत्वम्, साभासस्याज्ञानादावेव व्यवहार्यत्वात् तस्मिन्नेव शब्दस्य वाच्यता सिद्धयति। अत एव साभासस्याज्ञानस्य अहङ्कारस्य च शब्दवाच्यता। तयोरुभयोरधिष्ठानत्वादुभयत्रानुगततत्सम्बन्धिनि चिदात्मनि ब्रह्मशब्दाहंशब्दौ च लक्षणया प्रवर्तेते, 'साभासज्ञानवाची यदि भवति' अत्र यदि भवति इत्यनेन अरुचिः सूचिता भवति तत्कारणमिदमेव यत् यद्यपि शुद्धचिदात्मा स्वरूपेणाव्यवहार्यः, तथाप्यज्ञानाहङ्काराभ्यां व्यवहर्तुं शक्यते।

एतस्यां दशायां केवलं शुद्धः चिदात्मा यद्यपि ब्रह्मादिशब्दानां वाच्यं न भवितुमर्हति। तथाप्युपाधिगतचिदाभासविशिष्टचिदात्मा ब्रह्मादिशब्दवाच्य एव। अतो जहल्लक्षणा न, तस्माद् वाच्यस्यैकदेशभूतस्योपाध्यंशस्य चिदाभासांशस्य त्यागाद् वाच्यस्यैकदेशभूतस्य चिदंशस्यात्यागाज्जहदजहल्लक्षणैव।

---

10 सि०बि० पृ० ७

11 तत्रैव पृ० ७५

**जहदजहल्लक्षणा-**

**"अथवा चिदाभासाविविक्तचैतन्यमपि तत्त्वमादिपदवाच्यम्। तेन वाच्यैकदेशस्यात्यागादस्मिन् पक्षे जहदजहल्लक्षणैवेति न कोऽपि दोषः। अयमेव पक्ष आभासवाद इति गीयते"।**[12] तात्पर्यमिदं यच्चिदाभासेनाविविक्तं चैतन्यमपि तत्त्वंपदस्य वाच्यम्। एतस्य वाच्यस्य एकदेशस्यात्यागात् पक्षेऽस्मिन् जहदजहल्लक्षणैव विद्यते नात्र कोऽपि दोषः। एवम्भूतः पक्ष एव आभासवाद इति गीयते।

**सङ्क्षेपशारीरके लक्षणाविचारः-**

अत्रापि ग्रन्थे आचार्यो महावाक्यस्य विचारणायामेव विचारयति शब्दशक्तिं लक्षणाम्- मुख्यार्थस्याशेषस्य स्वीकारे तत्र साक्षाद् प्रत्यक्षादिप्रमाणैः सह विरोधाल्लौकिकवाक्यमुदाहरन् प्रदर्शयति-

**"सोऽयपुमानिति मुख्यपदार्थयुक्तवाक्यार्थबुद्धिजननस्य न वाक्यमेतत्।**

**ईशीत वाच्यशबलस्थपदद्वयेन संसृष्टबुद्धिजनने पदयोर्विरोधात्"॥**[13]

विरोधमपि प्रतिपादयति यन्मुख्यया वृत्त्या न जायत एव तस्माच्च किमाचरणीयं तदपि प्रतिपद्यते 'सोऽयं देवदत्तः' इति लौकिकवाक्ये तत्कालतद्देशादिवैशिष्ट्ययुते बोधे सत्त्यखण्डार्थबोधे बाधात्।

**"एतद्धि सोऽयमिति वाक्यमखण्डनिष्ठं वक्तव्यमत्र गतिरस्ति न काचिदन्या।**

**तद्देशतत्कालमनुकृष्य स इत्यनेन नायं पदार्थमुपढौकयते हि नैतत्**"।।[14]

'सोऽयं देवदत्तः' इत्यत्र वाक्येऽखण्डार्थोऽखिलविशेष्यविशेषणादिभी रहितो देवदत्तपदार्थमात्रस्य बोधो भवति स च बोधः कयाचिल्लक्षणया अतिरिक्तं न जायते। एतन्निश्चित्यैव 'सोऽयं पुमान्' इत्यत्र वाक्यमखण्डमेकरसं वस्तुमात्रनिष्ठमित्येव वक्तव्यत्वान्नान्या गतिराश्रीयते। यौ तौ परोक्षौ देशकालौ यस्य तद्देशकालविशिष्टमतीतदेशकालावच्छिन्नः पुरुष इति परित्यज्यैव पुरुषमात्रस्य बोधः। तथैव एतत्पदस्यापि तथैव विशिष्टांशस्य परित्यागात्

---

[12] तत्रैव पृ० ७८

[13] सं शा० १/१४१

[14] तत्रैव १/१५०

पुरुषमात्रत्वम्। एवम्भूतया रीत्यैव तत्त्वमसीति वाक्येऽपि द्रष्टव्यम्, तदुदाहरति-

**"एवं सतीदमपि तत्त्वमसीतिवाक्यमाश्रित्य**

**लाक्षणिकवृत्तिमखण्डनिष्ठम्।**

**सोऽयं पुमानिति यथा वचनं तथास्तु**

**नो चेत् समो हि तदलाबुनिमज्जनोक्त्या"॥**[15]

'सोऽयं पुमान्' मुख्यार्थयोः स्वीकृते सति अन्वय एव न सम्भवति, अन्वयस्यासम्भवाल्लक्षणया यदा लोकेऽखण्डार्थनिष्ठत्वं दृश्यते। तथैव तयैव रीत्या लक्षणया 'तत्त्वमसी'ति महावाक्यस्याप्यखण्डार्थबोधः सम्भवति नान्या गतिरिति प्रत्यपद्यत। लोके सर्वमेव वाक्यं संसर्गादिनिष्ठं भवति यदि कश्चिन्नियमो न भवति, अस्तित्वं तु सुगमम्, तथास्वीकारेऽत्रापि पूर्वोक्तरीत्या विरुद्धार्थतया वाक्यस्य प्रामाण्यप्रसङ्गबाधमाह, अलाबुर्निमज्जति यथा प्रत्यक्षविरोधान्न स्वार्थे प्रमाणं तथैव प्रत्यगात्मनो ब्रह्मबोधकत्वमपि वाक्यं संसारित्वानुभवविरोधात् स्वार्थबोधकं सदप्रमाणं स्यात्। अतो न मुख्यार्थं सङ्गच्छते प्रत्युत लक्षणयैव लक्ष्यार्थोऽखण्डः।

**लक्षणा त्रिधा-**

जहदजहज्जहदजहद्भेदात्, जहदजहद्भ्यामखण्डार्थोऽविरुद्धो न गम्यते तस्माच्च जहदजहदा लक्षणयैव गम्यते, तदाह-

**"शब्दस्य लाक्षणिकवृत्तिरपि त्रिधैषा,**

**काचिज्जहाति न जहाति च वाच्यमन्या।**

**भागं जहाति न जहाति भागमन्या,**

**सोऽयं त्रिधा भवति लाक्षणिकप्रकारः"॥**[16]

---

[15] तत्रैव १/५१

[16] तत्रैव १/१५४

स्वयंप्रकाशमानस्य सिद्धस्य ब्रह्मणः तत्र पदानां लक्षणा वृत्तिरुपपद्यते, लक्षणा च त्रिधा तत्र त्रिविधभेदवत्यां च लक्षणायां कतमा स्यात्तस्माद्भेदं प्रदर्शन्नाह- काचिद्वाच्यं जहात्यर्थात् स्ववाच्यमशेशतः परित्यज्य तत्सम्बन्धिन्यर्थान्तरे वृत्तिर्जहल्लक्षणा, अन्या चाजहल्लक्षणा स्वकीयं वाच्यार्थमशेषतोऽपरित्यज्यान्यस्मिन्नर्थे वृत्तिरित्यजहल्लक्षणा। तृतीयां च व्याख्याति जहदजहल्लक्षणाम्- एषा लक्षणा स्ववाच्यार्थभागमेकदेशं जहाति न जहाति च भागान्तरमित्येवं प्रकारिका स्वार्थस्यैकदेशे वर्तमाना वृत्तिर्जहदजहल्लक्षणा। एवंप्रकारेण लोके वेदे च सर्वत्र त्रिधा लाक्षणिकी प्रवृत्तिर्भवति। उदाहरणमुखेन प्रस्तौति-

**"गङ्गापदं हि निजमर्थमपास्य तीरे,**

**यद्वर्तते भवति सा जहती प्रसिद्धा।**

**शोणः स्थितो बहिरितीह तु,**

**लक्षणायामादाय शोणिमगुणं तुरगे प्रवृत्तिः"॥**[17]

अत्रापि **'गङ्गायां घोषः'** इत्यस्य गङ्गापदं स्वशक्यार्थं प्रवाहरूपं परित्यज्य सत्सम्बन्धिनि तीरे प्रवर्तते तस्मादेव जहतीलक्षणाऽत्र सङ्गच्छते। तथैव **'शोणो धावति'** एतस्मिन्नप्युदाहरणे शोणगुणस्य धावनासम्भवाद् अन्वयानुपपत्तौ च सत्यां वाक्यार्थविरोधपरिहाराय स्वार्थं शोणगुणमपरित्य तदाश्रयिणि पदार्थे प्रवर्तते लक्षणा, सा चैवम्भूता लक्षणा अजहल्लक्षणा कथ्यते। किन्तूभयोर्लक्षणयोः प्रवृत्तिः 'तत्त्वमसी'ति वाक्ये न सञ्जायते। कथमिति जहत्या तु कस्यचित् पदार्थस्य त्यागात् तत्सम्बन्धिनि पदार्थान्तरे वृत्तिः, तथैवाजहत्यामपि स्वपदार्थमपरित्यज्य कस्मिंश्चिद् बहिर्भूते पदार्थे वृत्तिर्भवति, तदत्र न सम्भवत्येव तस्मादुभयोरनुपयोगादत्र जहदजहल्लक्षणाया आश्रयणं विधीयते।

**जहदजहत उदाहरणम्-**

**"सोऽयं पुमानिति वचस्युभयप्रकारा देशादिभागपरिवर्जनतः प्रसिद्धा।**

**पुंसश्च केवलमुपपत्तितया पदाभ्यामेवं त्रिधा भवति लाक्षणिकी प्रवित्तिः"॥**[18]

---

[17] तत्रैव १/१५५

पूर्वोक्तयोर्लक्षणयोरसम्भवादेवात्र प्रकारान्तरेण विद्वद्भिरन्या लक्षणा समाश्रीयत। सा च जहदजहदाख्या, तेन **'सोऽयं पुमान्'** इत्यादिषु तद्देशतत्कालयोर्विद्धयोरंशयोः परित्यागपुरस्सरं पुरुषमात्रमेव बोधयति, तथैव तत्वमसीति वाक्येऽपि परोक्षत्वापरोक्षत्वयोर्विशिष्टांशयोः अशेषतो विरुद्धयोरशंयोः परित्यागपुरस्सरं चिन्मात्रमेवबोधयति अत्रत्यां लक्षणायां वाक्यार्थस्य कश्चिदंशो त्यज्यते कश्चिच्च परिह्रियते एवं स्वरूपवती लक्षणा जहदजहन्नाम्ना बोध्यते।

**गौणीवृत्तिः-**

गुणादागता गौणीगुणकृतसादृश्यमादाय यत्र विरोधो परिहृयते सा लक्षणा गौणीति निगद्यते यथा 'सिंहो माणवकः' इत्यत्र सिंहे शौर्यक्रौर्यादयो गुणा सन्ति, तेषां शौर्यक्रौर्यादीनां माणवकेऽपि सत्वादुभयोश्च सादृश्याद् गौणीलक्षणा क्रियते, नो चेत् सिंहे माणवके च कथं सादृश्यं स्यात् सिंहस्तु साक्षात् पशुर्माणवकश्च साक्षाद् ब्राह्मणः कथमुभयोस्सम्याभावात् वाक्यार्थोऽविरुद्धो जायेत।

तत्र ग्रन्थकार उदाहरणमुखेन प्रस्तौति—

**"प्रत्यक्त्वादिगुणान्वयेन यदि वा गौण्यस्ति वृत्तिस्तयोः,**

**'ब्रह्माहं' पदयोः परेतरदृशोर्मुख्ये विरोधो यतः।**

**मुख्यार्थानुपपत्तिहेतुकतया गौण्यस्ति वृत्तिर्यतो,**

**लोके माणवको विश्ववासुरसौ सिंहः पुमानिति"॥**[19]

'अहं ब्रह्मास्मि' इत्यनुभववाक्यार्थस्य बोधाय सक्षाल्लोके विरोधान्न सम्भवत्येवोभयोरैक्यम्, तस्माद् ब्रह्माहंपदयोर्मुख्यार्थविरोधाज्जीवपरयोः विषये गौणी वा भवतु। कथमिति चेदेव प्रत्यक्त्वं सूक्ष्मत्वादिकं हि स्वरूपमपि गुणत्वेनोपचर्य तद्योगेनाहं शब्दः परदृशि वर्तते। उदाहरति- अग्निशब्द इव पैङ्गल्ययोगान्माणवके ब्रह्मशब्दोऽपि आत्मत्वचित्वादिसादृश्यात् सुखादिसाक्षिणीतीयमपि प्रौढिगौंण्या वृत्तेरुपमारूपत्वाद् **'अहमिव ब्रह्म'**

---

18 तत्रैव, १/१५६

19 तत्रैव१/१७०

ब्रह्मेवाहमित्यभिन्ने भेदगर्भोपमाऽविरोधादिति ध्येयम्। यदा प्रत्यक्त्वाद्यात्मन्येव मुख्यमपि बुद्धावुपचार्यते तदाहमादिपदस्याहंकारादौ मुख्यास्यात्मादावुपचारः। यथा सिंहस्य सिंहाग्निपदयोः साक्षात्सिंहाग्नौ च मुख्ययोः पुंसोरुपचारस्तद्वाविद्धि।

**लक्षणागुणवृत्त्योः भेदः—**

**"गुणतो गुणवृत्तिरिष्यते ह्यपरा लाक्षणिकी तु सङ्गतेः।**

**इति भेदकमस्ति लक्षणा गुणवृत्त्योरिति वेदवादिनः"॥**[20]

'सिंहो माणवकः' इत्यादिषूदाहरणेषु सिंहादिपदस्य स्वशक्यसम्बन्धानपेक्षतल्लक्षित-गुणयोगनिमित्ता सत्सदृशे गौणी वृत्तिः, तेन सिंहव्यक्तौ सिंहनामके पुरुषे नातिव्याप्तिः गौण्या वृत्तेरसम्बन्धिन्यपि सदृश एव च दर्शनात्, मुख्यार्थगतसदृशगुणतो योगात् परवाचकशब्दस्य परत्र गुणवृत्तिरिष्यते। लाक्षणिकीवृत्तिस्तथा परा अन्या सा सङ्गतेर्मुख्यार्थसम्बन्धमात्रान्न तद्गुणयोगात्, शब्दस्य मुख्यार्थगुणयोगादन्यत्र वृत्तिर्गुणवृत्तिः। मुख्यार्थसम्बन्धादन्यत्र वृत्तिर्लक्षणा वृत्तिरित्युभयोर्विभागः। एवम्भूतो विभागः प्राचीनैरुक्तः।

**पञ्चदशीग्रन्थे लक्षणाविचारः-**

अत्र पञ्चदशीकारः परापरब्रह्मणोरेकतायां किं साधनं स्यात् तत्प्रतिपादयति तच्च कथं सम्भवतीति व्यनक्ति भागत्यागलक्षणया-

**"परापरात्मनोरेवं युक्त्या सम्भावितैकता।**

**तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते"॥**[21]

अत्र कः परात्मा अपरश्चापरात्मा उभयत्र साक्षाद्भेदस्य सत्त्वादुभयोरैक्यं न सम्भवति, तत्रैभिरेका युक्त्यङ्ग्यक्रियत सा च युक्तिरेवाभेदेन परात्मनोरपरात्मनोरैक्यं भेदपरिहारपुरस्सरमभेदतत्त्वं

---

20 तत्रैव १/१७२

21 पं०द०त०वि०प्र०का० ४३

चिन्मात्रमेव लक्षयति  भागलक्षणाद्वारा, तेनात्र समागतस्य विरोधस्य परिहारः सम्भवति।

**तत्पदार्थः-** तमःप्रधानां मायामाश्रित्य यज्जगत उपादानं भवति। तथा च शुद्धप्रधानां मायामादाय  जगतो निमित्तत्वमुपैति तद्ब्रह्म एव 'तत्त्वमसीति' महावाक्यस्य तत्पदेनाभिधीयते। अयं भावः यत् सच्चिदानन्दस्वरूपं ब्रह्म तमोगुणप्रधानमायां स्वीकृत्य (उपाधिभावेन स्वीकृत्य) चराचरजगत उपादानम् (अथवा अध्यासस्याधिष्ठानं) जायते। तद्वदेव विशुद्धसत्त्वप्रधानं मायामश्रित्य (स्वोपाधिं मत्वा) निमित्तं जायते। किं वा उपादानादिकस्य ज्ञाता कर्ता भवति। एवम्भूतमुभयात्मकमुपादानं निमित्तञ्च ब्रह्म तत्त्वमसीति महावाक्यस्यस्य तत्पदेनाभ्यधीयत।

एतच्चोभयमुपादनं निमित्तं कारणं ब्रह्मैव भवति, न तु लौकिककार्यवत्,। यथा हि लोके घटादिकार्याणां निमित्तोपादानयोः कारयोर्भेदो भवति न तथा जगतस्तदाह-

**"जगतो यदुपादानं मायामादाय तामसीम्।**

**निमित्तं शुद्धसत्त्वाभ्यां तामुच्यते ब्रह्म तद्गिरा"॥**[22]

**त्वंपदार्थविवेचनम्-**  तदेव पूर्वोक्तं ब्रह्म यस्यामवस्थायां मलिनसत्त्वात्मिकां कामकर्मादिदूषिताम् अविद्यानाम्नीं मायामुपाधिभावेन स्वीकुरुते तदा तादृशं ब्रह्म त्वंपदाभिधेयं भवति।

एवम्भूतां त्रिप्रकारिकां परस्परविरुद्धां (तस्य तस्योपाधित्वेन स्वीकृताम्) मायामपहायैव तत्त्वमसीत्यादीनि महावाक्यानि अखण्डं सच्चिदानन्दं शान्तमैकरसं ब्रह्म लक्षयन्ति। त्रिप्रकारिका च माया तमःप्रधाना, विशुद्धसत्त्वप्रधाना, मलिनसत्त्वप्रधाना, एताः परस्परं विरुद्धा विरुद्धानां परित्यागो विधीयते। विरुद्धधर्माणां परित्यागदशायां तत्त्वमसीत्यादीनि

---

[22] तत्रैव का० ४४

महावाक्यानि आगत्याधिकारिणः समक्षं भेदरहितसच्चिदानन्दमखण्डमेकरसं च संलक्ष्य प्रयान्ति, अनधिकारिणश्चोन्मत्तवत् पश्यन्तो भवन्ति।

**"त्रयीमपि तां मुक्त्वा परस्परविरोधिनीम्।**

**अखण्डं सच्चिदानन्दो महावाक्येन लक्ष्यते"॥**[23]

'सोऽयं देवदत्तः' इत्यस्य विचारः क्रियते, अत्र देवदत्तस्यैकता किन्त्वेकताया विरोधो जायते, तत्तेदन्तयोर्विशिष्टत्त्वात्, यतोहि तत्कालतद्देशविष्टस्य देवदत्तस्यैतत्कालैतद्देशविशिष्टस्य देवदत्तस्य सम्भावनमेककालावच्छिन्ने देशे स्थाने च न सम्भवति, तस्मादुभयोर्धर्मयोर्विरोधस्य सत्वात्, विरोधपरिहाराय भागत्यागलक्षणाया आश्रयो नीयते तदानीमेव तत्तेदन्तयोराश्रयस्याविरुद्धस्य देवदत्तस्य तत्तेदन्तविरुद्धभागपरित्यागेनैव सम्भवति।

एवम्भूतयैव रीत्यैव 'तत्त्वमसि' इति महावाक्यस्यापि बोधः सञ्जायते तदाह विद्यारण्यस्वामी-

**"मायाविद्ये विहायैवमुपाधी परजीवयोः।**

**अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते"॥**[24]

अत्र पर इति मायोपाधिकं ब्रह्म, अविद्योपाधिको जीवः, उभयोरशेषतो विरुद्धयोरुपाध्योः परित्यागे सति भेदरहितस्याखण्डस्य सच्चिदानन्दस्वरूपस्य परब्रह्मणो बोधो लक्षणया जायते।

**ब्रह्मणः परोक्षज्ञानम्-**

**"अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत्।**

**अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते"।।**[25]

यदि संसारेऽस्मिन् कश्चिद्बोधयिता बोधयति बोधिते सति कस्यचिज्ज्ञानं जायते यद्ब्रह्म तत्त्वमस्ति चेदेवम्भूतं ज्ञानं परोक्षज्ञानं कथ्यते,

---

[23] तत्रैव का०४६

[24] तत्रैव का० ४८

[25] तत्रैव चित्रदीपप्रकरणम्, का० १६

तथैव यदानीन्तने दृढीयान् विश्वासो भवतु यद्  'अहं ब्रह्म अस्मि' प्रक्रियैषा साक्षात्कार इति कथ्यते।

साक्षात्कारे सत्येव यदा मनुष्यः संसारसागरान्मुक्तो भवति, तदात्मतत्त्वं चतुर्धा विद्यते, यथा एक एव आकाशश्चतुर्धा व्यभज्यत, घटाकाशः, महाकाशः, जलाकाशः, मेघाकाशः इति, तथैव चेतन आत्मा एकः सन्नपि उपाधिभेदादाकाशादिव कूटस्थः, ब्रह्म, जीवः, ईशः इति चतुर्धा। उपाधिभेदनाशे तु चेतनमात्रं सदेकमद्वितीयमेव भवत्विति नान्यत्तत्त्वम्। यथा विविधाकाशानामुपाधिनाशे आकाशमात्रं भवति। अहं ब्रह्मास्मीति वाक्यस्य प्रत्यक्षमेव ज्ञानं जायते।

**ब्रह्मज्ञानाय समुचितवाक्यम्-**

एतद्ब्रह्मविषयकचिन्तनं विद्यते तस्य विचारः कैर्वाक्यैः स्यात्, तद्विचारयति। विद्यारण्यस्वामी प्रतिपादयति। न केवलमुपनिषत्सु प्रत्युत सर्वेषु शास्त्रेषु अवान्तरवाक्यैः परोक्षब्रह्मणो ज्ञानं कार्यते, महावाक्यैश्चापरोक्षस्यार्थात् प्रत्यक्षं ब्रह्मणो ज्ञानं कार्यते।

**"अवान्तरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत्।**

**सर्वत्रैव महावाक्यविचारादपरोक्षधीः"**॥[26]

एतस्य वाक्यस्य प्रामाण्यमपि प्रस्तौति यदाचार्यशङ्करेण स्वकीयवाक्यवृत्त्यभिधे ग्रन्थे कृतमस्ति[27] अत्र ब्रह्मणः पारोक्ष्यबोधनाय महावाक्यमिति विषये विदुषां प्रवादो न जायते, समेऽपि कण्ठरवेणैव एकस्वरेण स्वीकृतवन्तः, अतो ब्रह्मणः साक्षाज्ज्ञाने महावाक्यमेव कारणमुपयाति।

---

[26] तत्रैव, तृ०दी०प्र० का०६९

[27] ब्रह्म पारोक्षसिद्ध्यर्थं महावाक्यमितिरितम्। वाक्यवृत्तावतो ब्रह्मपारोक्ष्ये विमतिर्नहि॥ तत्रैव का०७०

**तत्त्वंपदार्थयोः प्रतिपादनम्-**

**“आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः।**

**अन्तःकरणसम्भिन्नबोधः स त्वंपदाभिधः”।।**[28]

अन्तःकरणोपाधिको बोधः (चिदात्मा), यद् अहमिति प्रतीत्या, अस्मच्छब्दस्य विषयरूपेण प्रतीयते, एवम्भूतो बोधस्त्वंपदस्य वाच्यार्थ इति कथ्यते। अहमितिपदस्य वाच्यार्थः-

**“मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः।**

**पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः”॥**[29]

माया यस्योपाधिर्विद्यते जगतो यच्चाभिन्ननिमित्तोपादानकारणम्, सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्त्रित्वादिकं तटस्थलक्षणम्, पारोक्ष्यनामको धर्मो यत्र विद्यते तथा च सत्यज्ञानानन्तादिकं यस्य स्वरूपम्, तदेव तत्पदवाच्यार्थः।

अनयोः वाक्यार्थयोरैक्यार्थावबोधायैव लक्षणा वृत्तिराश्रीयते यतोहि परस्परमत्यन्तं विरुद्धयोरैक्यासम्भवाद्युक्तिरन्विष्यते। सा च वाचो युक्तिर्लक्षणा। लक्षणायास्त्रैविध्यादेव तेष्वन्यतमाया भागत्यागनामिकाया आश्रयो नीयते तदेवाग्रे विचार्यते ।

पुनरत्र स्पष्टयति यत् संसर्गः विशिष्टो वा न वाक्यार्थोऽत्र स्वीकर्तुः न शक्यते कथमिति विदुषामनभीष्टत्वात्-

**“संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।**

**अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः”॥**[30]

अत्र विचारणा विषयः संसर्गस्य वाक्यार्थता भवितुमर्हति वा यथा लौकिकवाक्यानां वाक्यार्थः सञ्जायते, लौकिके हि वाक्ये ‘गामानय’ इत्यादिषु वाक्येषु यथा लक्षणाया आश्रयणं विनापि वाक्यार्थः सम्भवति तथैवात्रापि

---

[28] तत्रैव का० ७२

[29] तत्रैव, ७२

[30] तत्रैव ७५

स्यात्, तदैतस्याः शङ्कायाः समाधानं समाधीयते समाधानञ्चेत्थम्- यथा 'गाम् आनय' इत्यनयोः पदयोः पदार्थोपस्थितिरभिधयोपस्थितिः ततश्चाकाङ्क्षादिभिरन्वये सति परस्परं संसर्ग एव वाक्यार्थ इति न्यगद्यत।

अत एवम्भूतस्य संसर्गस्य वाक्यार्थत्वं यथा लौकिकवाक्येषु स्वीकार्यत्वं तस्याविरुद्धत्वाल्लोके, न तथा महावाक्यस्य लोके शास्त्रे च संसर्गाख्यवाक्यार्थस्य साक्षाद्विरोधात्तस्य नाङ्गीकारः। विशिष्टोऽपि न वाक्यार्थस्तद्यथा 'नीलं महत्सुगन्ध्युत्पलम्' तदत्र च नीलत्वावच्छिन्नं महत्वावच्छिन्नं सुगन्धित्वावच्छिन्नमुत्पलं साक्षादविरोधेन वाक्यार्थाङ्गीकारे न काथञ्चित्कोऽपि विरोधः समापतति। तस्मा'न्नीलत्वादिविशष्टमुत्पलम्' इत्यस्य स्वीकारे दोषाभावत्वाद् विशिष्ट इति वाक्यार्थः सम्भवत्येव। किन्तु महावाक्यऽपि यद्येवम्भूताया युक्तेः समाश्रयत्वदशायां लौकिकस्य शास्त्रीयस्य च साक्षाद् विरोधान्न स्वीकर्तुं शक्यते विशिष्टवादः।

अतः कीदृशस्यार्थस्य मान्यमान्यत्वमत्र तदाह 'अखण्डैकरसः' यः पदार्थः स एव वाक्यार्थोऽत्र विद्वद्भिरभिप्रीयते।

**"तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।**

**सोऽयमित्यादिवाक्यस्थपदयोरिव"**॥[31]

साक्षादुदाहरणमुखेन प्रतिपादयति यथा "सोऽयं देवदत्तः" इत्यत्र तत्कालावच्छिन्नस्य तद्देशावच्छिन्नस्य वाचकं 'सः' इति पदम्, एतत्कालैतद्देशावच्छिन्नस्य वाचकम् 'अयम्' इति पदमुभयोः परस्परमशेषतो विरुद्धत्वात्, देवदत्तस्यैकत्वावधारणाय भागत्यागलक्षणया आश्रयणं नीयते, भागत्यागे चोभयोर्विरुद्धयोर्धर्मयोरशेषतः परित्यागादविरुद्धे देवदत्तमात्रे वृत्तिर्जायते।

तेनैवम्भूतया युक्त्या साक्षात् सन्देहस्य निवारणं यथा क्रियतेऽत्र तथैव तत्त्वमसीति महावाक्येऽपि परोक्षत्वापरोक्षयोः सर्वज्ञत्वासर्वज्ञत्वयोः विशिष्टधर्मकयोः तत्त्वंपदर्थयोः पदार्थयोर्भागत्यागलक्षणया एव संशाधयितुं शक्यते। न विद्यते कश्चिदन्यतरो मार्गो येन च साक्षाच्चैतन्यावबोधस्स्यात्, अतो

---

[31] तत्रैव ७४

भागत्यागया लक्षणया उभयोः पदयोविरुद्धांशमपहायाविरुद्धाशं चैतन्यमात्रः सच्चिदानन्दः प्रतिबोध्यते।

**अखण्डार्थस्य स्वरूपम् -**

अखण्डार्थस्य विचारणायां सत्यामेवम्भूतस्यार्थस्यानुचिन्तनं यथा- यः प्रत्यगबोधः चिदात्मा सर्वान्तरः प्रतीयते यच्च बुद्धादीनां साक्षी भवन् भासते, स एवाद्वितीयतीयः सच्चिदानन्दस्वरूपः परमात्मेति न्यगद्यत, सोऽयमखण्डचिदैकरस आत्मैव।

**"प्रत्यगबोधो य आभाति सोऽद्वयानन्दलक्षणः।**

**अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः"॥**[32]

यदा कस्यचित् पुरुषस्य तादत्म्यज्ञानं जायते तदा त्वमर्थे समागता अब्रह्मताऽर्थाद् भ्रान्तिवशात् त्वं पदार्थो न ब्रह्म इति बोधोऽवामन्यत, अत्र कारणभूतायाः भ्रान्तेरपावर्तनं तत्क्षणं भविष्यति। तथैव तदर्थेऽपि भ्रान्त्या सम्प्राप्ता परोक्षताऽर्थात् परमात्मा परोक्षज्ञानस्य विषयः इति, तस्या अपि अपाकरणं जायते। एवम्भूताया भ्रान्तेर्निवारणे सति किं जायते, तदा श्रुणु यः परमात्मा प्रत्यगबोधविषयमात्र आसीत्, स च पूर्णानन्दो भवति।

अत्र परिहसत्याचार्यो यदेवम्भूते पूर्णानन्दे ज्ञाते सत्यपि यैरुच्यते महावक्यात् परोक्षज्ञानं जायते पूर्वोक्तसिद्धान्तस्य रहस्यं न जानते तेषां सिद्धन्तज्ञानरहितानां वार्त्तां श्रुत्वा अस्माभिर्हस्यते इति विद्यारण्यः स्वामी तदाह-

**"एवं सति महावाक्यात् परोक्षज्ञानमितीर्यते।**

**यैस्तेषां शास्त्रसिद्धान्तविज्ञानं शोभतेतराम्"॥**[33]

अतो परमात्मनो ज्ञानमपरोक्षात्मकमेव जायते, अपरोक्षत्वञ्च- साक्षादनुभवः, अतोऽनुभवद्वारा परमात्मा ज्ञायते।

---

[32] तत्रैव ७६

[33] तत्रैव ७९

**वेदान्तवाक्यैर्द्विधा ब्रह्मणः प्रतिपादनम्-**

आचार्यस्य विद्यारण्यस्वामिनो मतमिदं यद्वेदान्तवाक्यानि द्विधा ब्रह्मणः प्रतिपादनं कुर्वन्ति, अतद्व्यावृत्तिरूपेण, साक्षाद्विधिमुखेन वा।

अतद्व्यावृत्तिर्नाम- तदर्थाद्ब्रह्म, न तद् अतदर्थाद्ब्रह्मभिन्नं यदज्ञानादिकम्, तस्याज्ञानादिकस्य 'नेति नेति' इत्यादिद्युपनिषद्वाक्यैरपसारणम्, किं वा अतद्भूतो यः प्रपञ्चः, एतादृशस्य प्रपञ्चस्य व्यावृत्यात्मकोपायोऽपि ब्रह्मदर्शनं कारयति।

साक्षाद्विधिमुखेन यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्म इति व्यजानात्' 'प्रज्ञानं ब्रह्म' इत्यादिमहावाक्यानां यज्ज्ञानं तत् साक्षाद्विधिमुखेन कार्यते।

**"अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च।**

**वेदान्तानां प्रवृत्तिः स्यात् द्विधेत्याचार्यभाषितम्"**।।[34]

एवम्रीत्या द्विधा ब्रह्मज्ञानप्रकारो विद्यारण्यस्वामिना प्रतिपादितः।

पुनरत्र शङ्कोदेति यद्यतद्व्यावृत्त्या वेदान्यवाक्यैर्ब्रह्मज्ञानं कार्यते तदा 'अहं ब्रह्मास्मि' इति अनुभववाक्यार्थेऽहपदार्थः कूटस्थः, तस्य कूटस्थार्थस्यापि परित्यागाद् 'अहं ब्रह्मास्मि' इत्यस्य ज्ञानं कथं सेत्स्यति तदुत्तरति, वेदान्तिभिरस्माभिः सर्वत्यागो न स्वीक्रियते प्रत्युत भागलक्षणया जहदजहल्लक्षणया वा अहमिति पदस्य भागरूपस्यैकदेशस्य परित्यागात्, कूटस्थांशस्य चापरित्यागादहं ब्रह्मास्मीति वाक्यस्य ज्ञानमविरोधेन जायत एव तत्र का क्षतिः।

**पञ्चप्रक्रियायां लक्षणा-**

**"लक्षणा तु पुनः मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे सति मुख्यार्थसम्बन्धादर्थान्तरे वृत्तिः"**। 'गङ्गायां घोषः' इत्युदाहरणे गङ्गाशब्दस्य मुख्यार्थो भगीरथरथखातावच्छिन्नजलप्रवाहः, किन्तु जलप्रवाहरूपे मुख्यार्थे

---

[34] तत्रैव ८७

घोषाधिकरणात्वं न सम्भवति तस्य सर्वथाऽनुपपन्नत्वात्, अन्वयानुपपत्त्या तात्पर्यानुपपत्त्या व लक्षणाया अवसरः समापतति। तदा शक्यस्य अशक्येन सह सम्बन्धः साध्यते, शक्यार्थो जलप्रवाहस्तस्याशक्येन तीररूपेऽमुख्यार्थे वृत्तिः, एवं रीत्या लक्षणया निर्वाहः क्रियते। वेदान्तदर्शने तु प्राणभूतैषा लक्षणा एतां विना सम्भवत्येव काथञ्चित्कोऽपि महावाक्यार्थबोधः।

**गौणी—**

**"गुणवृत्तिस्तु मुख्यार्थपरिग्रहे प्रमाणान्तरविरोधे सति मुख्यार्थगुणयोगादर्थान्तरे वृत्तिः"।**

गौण्यां वृत्तौ तु मुख्यार्थस्य स्वीकारे सति मुख्यार्थस्य प्रत्याक्षादिप्रमाणैः सह साक्षाद्विरोधात् तस्य मुख्यार्थस्य गुणवृत्तिसहकारेण अन्यस्मिन्नर्थे वृत्तिः स्वीक्रियते। तद्यथा 'सिंहो देवदत्तः' अत्र देवदस्य साक्षात् सिंहशब्दस्य वाच्यार्थस्य स्वीकारे सति न सम्भवति अन्वयः देवदत्तपदार्थेन सह, तस्मात् साक्षाद्बोधितेनार्थेन सह तस्य गुणवृत्तिद्वारा सामानाधिकरण्यं सम्भवति, तद्यथा सिंहः क्रूरत्वशूरत्वादिमान् भवति तथाभूता गुणा क्रूरत्वशूरत्वादयो देवदत्तेऽपि विद्यन्ते एवं गौण्यया वृत्त्या गुणकृतसादृश्यात् क्रूरशूराधिकरणो देवदत्तपदार्थः सम्भवति विरोधोऽपसारितो भवति।

पुनश्च लक्षणा जहदजहज्जहदजहद्भेदात् त्रिधात्वमुपैति।

**परमात्मनि कतमा वृत्तिः—**

एतासां वृत्तीनां वर्णनेन आचार्यः प्रतिजानीते यन्मुख्याया वृत्तेः प्रवृत्तिर्न सम्भवत्येव परमात्मनि। **"ननु मुख्यगुणलक्षणावृत्तीनां मध्ये कतमा प्रत्यगात्मनि शब्दस्य वृत्तिः"**[35] विचारे क्रियमाणे सति मुख्याया अर्थादभिधया वृत्त्या साक्षाद्योऽपदार्थो बोध्यते स पदार्थो लौकिकः सन् स्वसत्तां प्रतिपादयति, किन्तु परमात्मनोऽमूर्तत्त्वात् तत्र मुख्यया कार्यं न साधयितुमिष्यते प्रत्याक्षादिप्रमाणैः सह विरोधाद्, यतोहि षष्ठ्या गुणस्य जातेः क्रियाया यदृच्छायाश्च तत्र प्रत्यगात्मनि साक्षादभावो जायते।

---

[35] पञ्च प्रक्रिया, पृ सं १

यतोहि लौकिकपदार्थस्य सत्तायामेव एते षष्ठी अर्थात् सम्बन्धो जातिर्गुणः क्रिया यदृच्छा इत्यादयो नानाधर्मविशेषाः सम्भवन्ति, न तु प्रत्यगात्मनि। कारणानि प्रत्यायति यन्न खलु 'नेति नेति' प्रतिसिद्धेषु समस्तविशेषणेषु सत्सु प्रत्यगात्मनि वाङ्मनोभ्यामगोचरे परमतत्त्वे षष्ठीजातिगुणादीनामसम्भवत्वादेव मुख्या। मुख्या वृत्तिश्च घटयितुं न शक्यते, तस्मात् प्रत्यगात्मनो विषये मुख्याया वृत्तेरभावः प्रत्यसिध्यत। अतो गौण्या लक्षणाया वा प्रवृत्तिर्भाव्यते प्रत्यगात्मनो विचारणायाम्।[36]

**गौण्या वृत्तेः प्रत्यगात्मनि प्रवृत्तिः-**

**"प्रत्यक्त्वादतिसूक्ष्मत्वादात्मदृष्ट्यनुशीलनात्"** इति गुणयोगादहमादिशब्दस्य गौणी प्रत्यगात्मनि वृत्तिरङ्गीकृतैव। 'अहं ब्रह्मास्मि' इत्यादिषु वाक्येषु आन्तरतमत्वाद् अतिसूक्षमत्वाद् आत्मदृष्ट्यनुशीलनाद् गौणीवृत्तिः सम्भवति। लक्षणा च जहदजहदेव प्रवर्तते।

एते आचार्या वैयाकरणानुगामिनो विद्यन्ते शब्दशक्तीनां विषये साक्षाद्वचोभिरवोचन्, यल्लक्षणाया मूलं तु **"समर्थः पदविधिरि"ति** सूत्रमेव। तत्रैव तस्य सूत्रस्य महाभाष्यीये व्याख्याने आचार्यपतञ्जलिरुल्लिलेख। भाषापदप्रक्षेपेण अर्हाद् भाषाविषयकचिन्तनेन त्रैविद्यवृद्धाः त्रिविद्यात्वं च किमिति चेत् पदवाक्यप्रमाणज्ञाः पदशास्त्रस्यार्थाद्व्याकरणस्य वाक्यास्यार्थान्मीमांसायाः प्रमाणस्यार्थान्यायस्य विद्वांसो तत्र भवन्तो वैयाकरणा व्यचारयन्।

लक्षणा वेदान्तिभिराचार्यैः स्वीक्रियते 'तत्त्वमसीति' महावाक्यार्थावबोधाय। यदि भागत्यागलक्षणा न स्यात्तदा तादृशमहावाक्यार्थावबोधोऽपि न स्यादिति परम्परा, किन्तु राज्ञा धर्मध्वरीन्द्रेण पारम्पर्यक्रममुं विहाय स्वतन्त्रः पन्था आश्रीयत। तन्मते तु भागत्यागलक्षणया विनापि महावाक्यार्थबोधो सम्भाव्यत एव। स युक्तिभिः प्रतिपत्स्यतेऽग्रे लक्षणाविभागवर्णनप्रसङ्गे।

---

[36] तस्माद्गौणी लक्षणा वा शब्दस्य प्रत्यगात्मनि वृत्तिः, तत्रैव पृ० २

**“सिद्धान्तलेशसङ्ग्रहकारः पूर्वपक्षिणां मतमुपस्थापयति-**

**‘आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः”**

इत्यस्य चर्चायां प्रतिपादयति यद्विवरणकाराणां मते शब्दस्य कारणता जायत एव प्रत्यक्षात्मकबोधे।

‘श्रोतव्यः’ इत्यत्र श्रवणविधेर्विधानं विधीयते, तच्च निश्चयात्मकशब्द-जन्यपरोक्षज्ञानस्य उद्देश्यादेव क्रियते, शब्दजन्यापरोक्षज्ञानाय न क्रियते। यतोहि शब्द स्वभावादेव अपरोक्षज्ञानं जनयति, यथा संस्कारसहकृतचक्षुः ‘स एवायं देवदत्तः’ इतस्याः प्रत्यभिज्ञाया जनको भवति। तथैव मनन-निदिध्यासनादिभिर्युक्तं मनोऽप्यपरोक्षज्ञानस्य जनकं भवितुमर्हति।

अतो वेदान्तश्रवणकर्तुः पुरुषस्य शब्दमुखेनापरोक्षात्मकं निश्चयात्मकमेव ज्ञानमेव जायते यतोहि शब्दस्य परोक्षात्मकज्ञानोत्पादनायैव शक्तिः शब्दः स्वकीयं स्वाभावं नोलङ्घयति, ततश्च मनननिदिध्यासनादिभिः सहकारिकारणैर्युक्तः सन् अपरोक्षं ज्ञानं जनयति, यतोहि सहकारिकारणस्य विचित्रतायां सत्यां कार्येऽपि विचित्रता दृश्यते। ‘सोऽयं देवदत्तः’ इत्यत्र तदंशस्य ग्रहणे इन्द्रियस्य सामर्थ्याभावादपि तत्तांशस्य ज्ञाने समर्थसंस्कारस्य सानिध्याच् चक्षुरिन्द्रियं प्रत्यभिज्ञानात्मकज्ञानस्य कारणं भवति, तथैवात्रापि शब्दस्वयमेवापरोक्षज्ञानस्य जननेऽसमर्थः, तथापि विधुरपुरुषद्वारा परिभावितकामिन्याः साक्षात्कारवन् निश्चितभावनाप्रचयस्य सहभावेन शब्देऽप्यपरोक्षज्ञानजनकता विद्यत एव। एवं सति जनकता स्वरूपतः शब्दे स्वविषयवाच्यस्य परोक्षज्ञानस्य जनकता, तथा च भावनाधिक्यस्य सहभावाज्ज्ञानकरणमात्रे विधुरस्यान्तःकरणादपरोक्षज्ञानस्यापि जनकता प्राप्तैव तस्माद्विवरणकारस्य मतेऽत्र विद्यते नियमविधिर्न त्वपूर्वविधिः।[37]

---

[37] तथा तदीयाः शब्दस्तु परोक्षज्ञानकृत् पुरा।मननादियुतोऽध्यक्षं कुर्याद्विधुरचित्तवत्॥
सिद्धान्तलेशशङ्ग्रहः, प्र० प० पृ०२८

**अत्र विषये वाचस्पतिमिश्रस्य मतम्-**

मननादिवद् 'आत्मा' श्रोतव्यः एवं रीत्या आगमविषयकत्वेनोक्तं श्रवणमप्यागमशास्त्रेण गुरोरुपदेशेन जायमानमात्मज्ञानमेव, तात्पर्यविचाररूपं न तस्मादत्र न कोऽपि विधिरिति।[38] अतः परं नव्यवेदान्तिनां मतमुपन्यस्यते तत्र विशेषतो वेदान्तपरिभाषाकारस्यान्य एव पन्था विद्यते तेन च सर्वस्याः परम्पराया विचारः परिहृतस्तथा च नवः पन्था आश्रीयत। स च लक्षणायाः त्यागरूप एव। अत्र तस्य व्याख्याने नूतनं दर्शनं जायते वयं तु ब्रूमः इति उक्त्वा स स्वमतं प्रस्तौति वेदान्तपरिभाषायामत्र तदुक्तानां विषायाणामेवातः परं चर्चा विधास्यते-

वेदान्तपरिभाषाकारः प्राह- "***तत्र लक्षणाविषयो लक्ष्यः***"[39] तत्र लक्षणायां यः पदार्थो विषयो भवति, स एव लक्ष्यार्थ इति ग्रन्थकारस्य मतं विद्यते। किन्तु लक्षणाया लक्षणं प्रागेव विधेयमिति न प्रकृत्यादौ लक्ष्यपदार्थमेवाभिधत्ते, किन्तु शास्त्रान्तरेषु प्रथितलक्षणालक्षणमाधृत्यैव ***लक्षणा च*** इति वाक्येन शक्यसम्बन्धो हि लक्षणेति स्वीकृत्यैव तद्भेदान् वर्णयति।[40] अत्र प्रसङ्गस्य प्राप्तत्वात् लक्षणास्वरूपं बोध्यते। शक्तिर्लक्षणे शब्दस्य सम्बन्धरूपे वृत्ती स्तः। तस्मात् शक्यपदार्थस्य पूर्वमेववर्णनमस्ति, यतोहि लक्षणायां शक्यसम्बन्धस्यावश्यकत्वात्। अतः शक्यसम्बन्धो हि लक्षणा इत्याधृत्यैव द्विधा विभजते- "***केवललक्षणा लक्षितलक्षणा चेति। तत्रशक्यसाक्षात्सम्बन्धः केवललक्षणा।तीरे यथा गङ्गायां घोषः इत्यत्र प्रवाहसाक्षात्सम्बन्धिनि गङ्गापदस्य लक्षणा केवललक्षणा***"।[41] अतः शक्तिवृत्तेर्विषयः शक्यः, लक्षणावृत्तेर्विषयो लक्ष्यः। 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्यार्थः- "भगीरथरथखातावच्छिन्नजलप्रवाहः"। जलप्रवाहे गङ्गापदस्य शक्तिरस्ति। अतो जलप्रवाहः शक्यः। तथा च जलप्रवाहरूपे शक्यार्थे घोषोऽसम्भवः। तस्मात् प्रवाहरूपशक्यार्थस्य सम्बन्धस्तीरेण सह

---

[38] तत्रैव पृ०४१

[39] वेदान्तपरिभाषा, पृ० २२१

[40] तत्रैव, प्रकाशटीका, पृ० २२२

[41] तत्रैव, पृ० १०३

वर्तते। तीरेण सह जायमानः सम्बन्ध एव लक्षणा इति कथ्यते। अत्र प्रवाहात्मकस्य शक्यपदार्थस्य साक्षात्सम्बन्धस्तीरपदार्थेण सह वर्तते, अतो यत्र साक्षात्सम्बन्धो भवति। सा केवललक्षणा इति व्यवह्रियते। तदनु लक्षितलक्षणा निरूप्यते। यत्र वाच्यार्थेन सह साक्षात्सम्बन्धो न भवति, तथा च परम्परा सम्बन्धस्य आवश्यकता भवेत्। तत्सम्बन्धद्वारा कस्यचिदन्यार्थस्य भानं भवति। सा स्थितिरेव लक्षितलक्षणा कथ्यते। अत्रेदं बोध्यम्- परम्परासाक्षात्सम्बन्धयोर्विषये। ***"सम्बन्धान्तराघटितः सम्बन्धः साक्षात्सम्बन्धः"।***[42] अर्थाद् यत्र केवलमेकेनैव सम्बन्धेन कार्यं भवति। अन्यस्य कस्यचित् सम्बन्धस्यावश्यकता न भवति, सः साक्षात्सम्बन्ध इति कथ्यते। स च संयोगसमवायादिभेदेन बहुविधः। ***"सम्बन्धान्तरघटितसम्बन्धः परम्परासम्बन्धः कथ्यते"।***[43] अस्मिन् सम्बन्धे एकाधिकानां सम्बन्धानामावश्यकता भवति। अर्थात्साक्षान्नार्थो गम्यते। तस्मात्परम्परासम्बन्ध इति निगद्यते। अतः लक्षितलक्षणा परम्परासम्बन्धघटिता भवति। वाच्यार्थेन सह साक्षात्सम्बन्धत्वाभावात्। तदाह ग्रन्थकृत्- ***"यत्र शक्यपरम्परासम्बन्धेनार्थान्तरप्रतीतिस्तत्र लक्षितलक्षणा। यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरपदघटितपरम्परासम्बन्धेन मधुकरे वृत्तिः"।***[44] अत्रोदाहरणं दीयते लक्षितलक्षणायाः- द्विरेफ इति शब्दः। तत्रास्य वाच्यार्थः, द्वौ रेफाविति। तथा चास्य लक्ष्यार्थो वर्तते द्विरेफघटितं पदम्। बहुव्रीहिसमासेन विगृह्यते- द्वौ रेफौ यस्मिन् तद्विरेफ इति पदम्। तथा च द्विरेफघटितपदं भ्रमर एव कथ्यते। किन्तु तादृशा बहवः शब्दाः सन्ति यत्र द्विरेफघटितत्वमस्ति, किन्तु न सर्वेषु 'भ्रमर' इति व्यवहारो जायमानो दृश्यते। केवलं भ्रमर इति ज्ञानं द्विरेफपदेन भवतीति परम्परा। तस्माद् द्विरेफपदस्य भ्रमररूपार्थो योऽवबोधो जायते। स च लक्षितलक्षणाद्वारक एव। तस्मादेवम्भूते बोधे रूढिरेवात्र कारणत्वमुपैति। लक्षितलक्षणा एव गौणीलक्षणा इति कथ्यते। गौणीलक्षणा गुणानादाय

---

42 नव्यन्यायभाषाप्रदीपः, पृ० ३५

43 तत्रैव, पृ० ४३

44 वेदान्तपरिभाषा, पृ० १०३

सम्भवति। यदा केषाञ्चनान्यधर्माणां सादृश्यादीनाम् अन्यत्र कुत्रचिदारोपो विधीयते। तदानीमेव या लक्षणा सा गौणी इत्यभिधीयते। अत्र वैशिष्ट्यमिदमेव यत् परम्परासम्बन्धमादायैव लक्षितलक्षणा। तथा च गौणीलक्षणा गुणानादायैव भवति। ततोऽपि ग्रन्थकृदुभयोर्व्याख्यानमेकेनैव करोति। प्रतिपादयति यद् गौणीलक्षितलक्षणयोरैक्यमेव। अथवा लक्षितलक्षणायामेवान्तर्भूतत्वमस्या इत्यवबुध्यते। तस्मान्नास्ति पार्थक्येन सत्ता गौणीलक्षणायाः। उदाहरणार्थं प्रदर्शयति- 'सिंहो माणवकः' उदाहरणेऽस्मिन् बालकस्य सिंहत्वमनुपपन्नम्, यतोहि बालकः सिंहो न भवितुं शक्नोति। मुख्यार्थो बाधित एव। अतस्तादृगर्थप्रतीतये का वाचो युक्तिः स्यात्, येनास्य वाक्यस्य वाक्यार्थोऽवबुध्येत। तदर्थं लक्षणा क्रियते सा च गुणकृतसादृश्यमादायैव यतोहि गौण्यातिरिक्तो नान्यः कश्चन पन्थाः। तस्मात् सिंहे ये शौर्यक्रौर्यादयो धर्मास्ते धर्मा माणवके समारोप्यन्ते। तदानीं कृते सत्यारोपे शौर्यक्रौयादिगुणवान् माणवक इति। अत्र गुणकृतेन सम्बन्धेनैव सिंहशब्दवाच्यधर्माणां बालके समारोपो भवति। तथा चोपचरितोऽयं व्यवहारः 'सिंहो माणवक' इति। अत्र गौणी वृत्तिवादिनोऽयमभिप्रायः कदाचित्भवितुमर्हति यत् सिंहशब्दस्य वाच्यार्थो भवति पशुरिति। एवम्भूतस्यार्थस्य पशुना सह माणवकस्य सम्बन्धत्वासम्भवात्। अतः शक्यसम्बन्धो हि लक्षणा सा चात्र बाध्यते। अतः शब्दस्य गौणीति नामधेया वृत्तिः स्यादेव?

**गौणीवृत्तेर्निरसनम् –**

अत्र शक्यार्थस्य लक्ष्यार्थेन सह सम्बन्धत्वाभावेऽपि द्विरेफपदवदेव लक्षणा सम्भाव्यत एव परम्परासम्बन्धेन। एतस्माद्धेतोरेव लक्षितलक्षणानामके लक्षणाया द्वितीये प्रकारे गौण्या अन्तर्भावो भवति। अतो नास्ति पृथक्त्वं गौणीवृत्तेः। कारणमिदमेव यद् 'गङ्गायां घोषः' तथा च 'द्विरेफः' इत्युभाभ्यामर्थप्रतीतये शक्यसाक्षात्सम्बन्धशक्यपरम्परा-सम्बन्धावाश्रीयेते। तस्मात् केवललक्षणा – लक्षितलक्षणा एवाभ्युपेये। तयोरेव स्वीकृतत्वात् 'सिंहो माणवकः' इत्यादिस्थलेषु, भासमानेन परम्परासम्बन्धेन वाक्यार्थोपपत्त्या गौणी न स्व्यक्रियत। प्रकृतस्थले शक्यार्थस्य कीदृशो

परम्परा-सम्बन्ध इति प्रतिपाद्यते- उत्तरति यदत्र सिंहशब्दार्थः पशुः, अतः पशुरूपं वाच्यार्थमादाय यदि माणवकेन सम्बन्धो विधीयते, तदा सम्बन्धाभावत्वात् तत्र तात्पर्यानुपपत्त्या लक्षणा स्वीक्रियते। सा च लक्षणा माणवकोऽयं सिंहवत्क्रौर्यादिगुणैर्युक्तः, इत्यस्मिन्नर्थे स्वीकार्या।[45] अतोऽत्र क्रौर्यादिगुणविशिष्टो माणवक इत्यर्थः सम्पद्यते। यद्यप्यत्र सिंहशब्दवाच्यार्थस्य साक्षात्माणवकेन सम्बन्धाभावः। ततोऽपि सिंहे तादात्म्यसम्बन्धेन विद्यमानैः शौर्यक्रौर्यादिगुणैः सिंहपशुः माणवकेन सम्बध्यते। यथा सिंहः शौर्यादिगुणैर्युक्तस्था माणवकोऽपि। अतः प्रकृतस्थले सिंहशब्दः स्ववाच्यवृत्तिक्रौर्यादिसामानाधिकरण्यसम्बन्धेन लक्ष्यभूतेन माणवकेन सह सम्बन्धितोऽस्ति। लक्षणसमन्वयः- स्वपदेन सिंहः तस्य वाच्यार्थः सिंहस्थशौर्यक्रौर्यादयो गुणास्तदधिकरणं यथा सिंहस्था माणवकोऽपि। एतस्मात्कारणादेव द्वयोरत्र क्रूरत्वादिगुणयुक्तत्वमेवात्र शक्यसम्बन्धः। अत्रापि पूर्ववत्सिंहपदस्य स्ववाच्यवृत्तित्वेन साक्षात्सम्बन्धेन केवलक्षणया लक्षितक्रौयादिगुणानां माणवकेन सह समानाधिकरण्यसम्बन्धत्वादियं लक्षितलक्षणेति। अनया रीत्या लक्षितलक्षणायामेव गौण्या अन्तर्भावत्वात् लक्षितलक्षणातिरिक्तो गौणपदार्थो नास्ति। अतः पदार्थो द्विविध एव। यदि द्वैविध्यं पदार्थस्य तदा पदद्वैविध्यं स्वयमेवागतम्, तत्स्था वृत्तिरपि द्विधा। तदाह मूले- "***पदार्थो द्विविधः। अतः गौण्यपि लक्षितलक्षणैव यथा सिंहो माणवक इति । अत्र सिंहशब्दवाच्यसम्बन्धिक्रौर्यादिसम्बन्धेन माणवकस्य प्रतीतिः"।***[46]किन्तु शोधार्थिदृशा तु गौणीवृत्तेर्खण्डनं प्रौढिवाद एव प्रतीयते। यतोहि गौण्यतिरिक्तया वृत्त्या तादृगर्थप्रतिपादने काठिन्यमायाति। एवं लक्षणाया द्विधात्वं प्रत्यपाद्यत। पुनः प्रकारान्तरेण लक्षणा त्रिधेति। प्रकाराश्च जहल्लक्षणाजहल्लक्षणाजहदजहल्लक्षणाः। जहल्लक्षणां व्याख्याति- "***तत्र शक्यमनन्तर्भाव्यं यत्रार्थान्तरप्रतीतिस्तत्र जहल्लक्षणा। यथा-विषं भुङ्क्ष्वेति"।***[47] स्वकीयवाच्यार्थं विहाय यदा अर्थान्तरो बोध्यते, तदा तत्र जहल्लक्षणा भवति। एवम्भूतायां लक्षणायां वाच्यार्थस्येषदपि प्रतीतिर्न

---

[45] तत्रैव, पृ० २२४

[46] तत्रैव, पृ० २२४

[47] तत्रैव, पृ० २२६

भवति। एते प्रकाराश्चान्वर्थसञ्ज्ञकाः, यतोहि 'ओहाक् त्यागे'[48] धातोर्भवति निष्पतिरेतेषां लक्षणाप्रकाराणाम्। यथा- जहति स्वार्थं पदानि यस्यां सा जहल्लक्षणा, एवमेव न जहति स्वार्थं पदानि यस्यां सा अजहल्लक्षणा। इत्थमन्वर्थः सङ्गच्छते। यथा 'विषं भुङ्क्ष्व' इत्यस्य वाक्यार्थो भवति यद् 'विषकर्मकं भक्षणं क्रियताम्' यदि तत्र साक्षादेव वाच्यार्थो गृह्यते तदा तात्पर्यं नोपपद्यते, वक्तुर्विवक्षा नैतत्प्रकारिका भवति। तस्माच्छ्रोता तद्वाक्यार्थमेवं प्रकारेण बुध्यते- 'देवदत्तो भोजनार्थम् आह्वयते' तथा च मित्रतमो यज्ञदत्तः कथयति 'विषं भुङ्क्ष्व' इति। तस्मादस्यां परिस्थितौ तस्येदमेव तात्पर्यं यत् स्वारिगृहं भोजनार्थं न गम्यमन्यथा केनचित्सङ्कटेनोपस्थास्यते, इत्यवगम्य चिन्त्यते तेन यन्मम शत्रुगृहे भोजनं न कार्यमिति। अतोऽत्र स्थले '*विषं भुङ्क्ष्व*' इत्यस्य शत्रुगृहे भोजनिवृत्तिरूपार्थे लक्षणा विद्यते। "***अत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते"।***[49] अत्र विषशब्दो मुख्यया वृत्त्या विषबोधको नापित्वपकारकत्वरूपशक्यसम्बन्धेन शत्रोरन्नमेव विषशब्दार्थः। एवमेव भुङ्क्ष्व इत्यत्रापि भुज् धातुः शक्त्या भोजनरूपार्थं न बोधयति। अर्थाद्वैपरीत्येन उत लक्षणावृत्त्या भोजननिवृत्तिरूपार्थं बोधयति। एतस्मात् कारणादेवात्र वैपरीत्यापकारकत्वरूपौ द्वौ साक्षाच्छक्यसम्बन्धाविति। तेन दत्तोदाहरणे साधुरीत्या जहल्लक्षणया भूयते। "***अजहल्लक्षणा-यत्र शक्यार्थमन्तर्भाव्यैवार्थान्तरप्रतीतिस्तत्राजहल्लक्षणा।***[50] ***यथा शुक्लो घट इति",*** यदानीं प्रत्याययिष्यति लक्ष्यार्थे वाच्यार्थेनाप्यन्तर्भूयते तथाभूता लक्षणाऽजहल्लक्षणा निगद्यते। यथा जहल्लक्षणायां सर्वथैव त्यागो भवति वाच्यार्थस्य। किन्त्वजहल्लक्षणायां न वाच्यार्थः त्यज्यतेऽपितु वाच्यार्थमादाय तत्सहकारेण लक्ष्यार्थावगतिर्भवतीति। 'शुक्लो घटः' इत्यस्मिन्नुदाहरणे विभावयामः- वाक्येऽस्मिन् शुक्लशब्दस्य वाच्यार्थो भवति शुक्लगुणः। एतस्माच्छुक्लशब्दस्य गुणत्वाच्छुक्लो न घट इति। अतश्शुक्लशब्दस्य

---

[48] सिद्धान्तकौमुदी, जुहोत्यादिप्रकरणम्, धातुसङ्ख्या,१२६५, पृ०१८७

[49] तत्रैव, पृ० २२६

[50] शक्यार्थविशिष्टविषयो वृत्तिः, अजहल्लक्षणा। इत्यपि लक्षणं दीयते। तत्रैव, पृ० २२८

वाच्यार्थेन सहानुपपत्त्या घटशब्दस्य शुक्लगुणेन सह नित्यसम्बन्धत्वात्। शुक्लगुणवति घटरूपार्थे लक्षणा स्वीक्रियते। लक्षणायाः स्वीक्रियमाणे सति शुक्लगुणरूपवाच्यार्थस्य सर्वथाऽप्रतीतिर्न जायते। यतोहि शुक्लगुणविशिष्टघटस्य ज्ञानं शुक्लगुणरूपविशेषणज्ञानं विना न सम्भाव्यते। एवमेव 'रक्तो धावति' इत्यपि वाक्यं जहल्लक्षणायां रक्तगुणविशिष्टार्थकः सङ्गच्छते। एवं रीत्याऽजहल्लक्षणा व्याख्यत्। अतः परं तृतीयः प्रकारो व्याख्यायते, जहदजहल्लक्षणेति। इयमेव भागत्यागलक्षणेति नाम्ना व्यवह्रियते।

***जहदजहल्लक्षणा-***

***"यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा। यथा- सोऽयं देवदत्त इति। अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वम्"।***[51]लौकिकव्यवहारे दृश्यते 'सोऽयं देवदत्तः' इति वाक्ये तत्पदस्यार्थः तत्कालविशिष्टः, तथा अयमर्थ एतत्कालविशिष्टः। किन्तु परोक्षत्वापरोक्षत्वोभयवृत्तिधर्मवान् 'देवदत्त' इति न सम्भवत्येककालावच्छेदेन। अतस्तदयम्पदार्थयोरशेषतो विरुद्धत्वात् स्ववाच्यार्थं परित्यज्य देवदत्तरूपविशेष्यावबोधने एव तात्पर्यमिति। जहदजहल्लक्षणाया उदाहरणम्। एवमेव "***तत्त्वमसीत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वं पदवाच्येनान्तःकरणविशिष्टेन-ऐक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः"।***[52] जहदजहल्लक्षणायाः स्वीकरणं क्रियते मुख्यत्वेन वेदान्तिभिर्महावाक्यार्थानामभेदार्थावबोधाय। अस्यां विशेषणभागं परिहृत्य विशेष्यमात्रमेवावगम्यते। तस्माद् विशेषणभागस्य परित्यागाद् भागत्यागलक्षणेति कथ्यते। 'तत्त्वमसी'ति वाक्ये लक्षणसमन्वयः क्रियते। 'तत्' पदार्थः सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्त्रित्वादि- धर्मैर्विशिष्टं चैतन्यम्, 'त्वम्' पदार्थश्चाल्पज्ञत्वानीश्वरत्वादिधर्मैर्विशिष्टमन्तःकरणोपाधिविशिष्टं चैतन्यम्,

---

[51] तत्रैव, पृ० २२८-२२९

[52] तत्रैव, पृ० २२९

अतो द्वयोरत्यन्तविरुद्धधर्मत्वादभेदो न सम्भाव्यते। यतोहि मायोपाधिको यः सर्वज्ञेश्वर स कथमल्पज्ञत्वेन जीवपदवीं ध्रियेत। एतस्मादेव कारणाद् वाच्यार्थस्यासम्भवाद् भागत्यागलक्षणा आश्रीयते। अत्रत्ये वाक्यार्थबोधे जहदजहदोरभ्युपगमो न क्रियते यतोह्यत्र जहति सत्यां त्वशेषार्थस्य परित्यागोऽर्थाद्विशेषणेन सह विशेष्यस्यापि हानम्, तथा सति विरोधोऽभेदे। तद्वदेवाजहति सत्यामप्यभेदावबोधे आपत्तिः श्रुतिविरोधश्च। अतो भागत्यागलक्षणा अखण्डार्थं बोधयति। तद्द्वारा एव तत्पदवाच्यार्थं सर्वज्ञत्वादिविशेषणं तथा च त्वमर्थमल्पज्ञत्वादिविशेषणं परित्यज्य विशेष्यभूतचैतन्यरूपार्थमेव स्वीकार्यम्। एवं विशेष्यांशभूतचैतन्यरूपार्थस्वीकारे सत्यखण्डमहावाक्यार्थज्ञाने न किञ्चिदपि काठिन्यम्। तथा श्रुतिविवक्षितश्चैतन्याभेदरूपार्थस्सिद्ध्यति।

**धर्मराजाध्वरीन्द्रस्य मते महावाक्यार्थबोधनाय लक्षणा नास्तीत्येतन्मतखण्डनम् –**

सः कथयति – ***"वयन्तु ब्रूमः सोऽयं देवदत्तः, तत्त्वमसीत्यादौ विशिष्टावाचकपदानामेकदेश- परत्वेऽपि न लक्षणा, शक्त्युपस्थितयोर्विशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवाभेदान्वयाऽविरोधात्"।***[53]

अत्र ग्रन्थकृत् स्वाभिमत्यं प्रकाशयति, तच्चेत्थम्- घटपदस्य शक्तिं घटत्वजातिविशिष्टे घटे स्वीकरोति, यतोहि शब्दस्य शक्ति विशिष्टे भवति, इति स्वीक्रियमाणे सत्येव घटस्य शक्तिः घटत्वजातौ यथा तद्वदेव घटव्यक्तावपि भवति। एतस्मात्कारणाद् यत्र शब्दस्य विशिष्टपदार्थान्वये काठिन्यमायाति। तत्र यस्यांशे काठिन्यं न भवति तस्यैवान्वयो भवति। शाब्दबोधे एवम्भूतो न कश्चन नियमो दृश्यते यच्छब्दस्य यावदंशे शक्तिस्तावदंशस्य भानं शाब्दबोधे स्यादेव । अत्रांशत्वेन विशेषणविशेष्यावेव गृह्येते। उभयोरंशयोरन्वयो न भवतीति प्रस्तूयते उदाहरणमुखेन। यथा आकाशस्य शब्दाश्रयत्वविशिष्टाऽऽकाशे शक्तिरिति। अत आकाशेत्युच्चार्यमाणे सति शब्दाश्रयत्वस्यावबोधो न तात्पर्यस्य विषयो भवत्यपित्वाकाशमात्रमेव। तद्वदेव विशिष्टवाचकपदानां पर्यवसानमेकदेशे स्वीकृते सत्यपि मुख्यया वृत्त्यैव

[53] तत्रैव, पृ० २३०

'तत्त्वमसी'त्यादिमहावाक्यानामर्थावबोधः सम्भाव्यत एव। अतस्तदर्थं लक्षणाऽभ्युपगमस्यावश्यकता न विद्यते। अन्यैरपि दार्शनिकैः स्वीक्रियते। तच्चेत्थं प्रदर्श्यते- 'घटोऽनित्यः' अस्मिन् वाक्यार्थे घटपदस्य घटविशिष्टो घटो वाच्यार्थः, किन्त्वनित्यपदेन सह घटत्वस्य घटस्य वाऽन्वयो न सम्भाव्यते। यतोहि न्यायनये घटत्वजातेर्नित्यत्वं वेदान्तनयेऽपि व्यवहारनित्यता तु अस्त्येव। अतो हेतोरेव नैयायिकैरत्र वाच्यैकदेशभूतविशेष्यांशेन घटव्यक्त्या सहान्वयो क्रियते। तथा च घटव्यक्तिरनित्येत्यर्थो समायाति। जातिना सहान्वयो न सम्भाव्यते, यतोहि जातेर्नित्यताऽवबुध्यतेऽतोऽनित्यपदार्थेन नाऽन्वीयते। एवम्भूतो बोधः शक्त्यैव जायमानोऽवलोक्यते। तस्मान्न लक्षणा। "***यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेश- घटत्वस्याऽयोग्यत्वेऽपि घटव्यक्त्या सह नित्यान्वयः"।***[54] धर्मराजाध्वरीन्द्रः पुनराशङ्कां प्रदर्श्य साधयति- यदि ***घटो नित्यः,*** इत्यस्मिन् वाक्ये घटरूपविशेष्यांशस्य नित्यत्वेन सहान्वयो यदा बाधितो भवति, तदा तस्य घटत्वरूपविशेषणांशेऽपि पर्यवसानं मुख्यया वृत्यैव भविष्यति। किन्तु विशेषणांशस्य व्यवहारो लक्षणयैव भवतीति प्रामाणिकव्यवहारस्य बाधः स्यात्। तदुत्तरति- यच्छक्तिः प्रधानतया विशेष्ये एव तिष्ठति, अतएव तद्विशेष्यस्य स्वतन्त्रतया केवलव्यक्तिरूपेण जायमानो यो बोधः स तु शक्तिवृत्त्यैव भवितुमर्हति। अतस्तत्र लक्षणाया आवश्यकता न भवति। किन्तु विशेषणे गौणता भवति। अतो यस्मिन् वाक्ये स्वतन्त्रतया विशेष्यानपेक्षणं क्रियते तथा च गुणभूतविशेषणेनैव पदार्थस्यान्वयो भवति। तस्मिन् वाक्ये विशेषणांशरूपोपस्थितये लक्षणा स्वीकार्या एव। "***यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिः, तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः"।***[55] उदाहरणमुखेन प्रस्तौति- घटो नित्यः, इत्युक्ते सति घटपदाद् घटत्वविशिष्टस्य घटव्यक्तेरुपस्थितिर्भवति। किन्तु घटव्यक्तिरूप-विशेष्यांशेन नित्यत्वस्यान्वयो न भवितुमर्हति। घटव्यक्तेरनित्यत्वात्। घटव्यक्तिरूपविशेष्यांशस्यान्वयबोधो न भूत्वा, विशेषणीभूतेन

---

[54] तत्रैव, पृ० २३१

[55] तत्रैव, पृ० २३२

घटत्वरूपैकदेशेन सहान्वेति नित्यत्वम्। एवम्भूतोपस्थितिः स्यात् तदर्थं घटपदस्य घटरूपार्थे लक्षणा स्वीक्रियत एव। यतोहि नियमोऽयं यत् "***पदार्थः पदार्थेनान्वेति नत्वेकदेशेन"।***[56] पदजन्यपदार्थप्रतीतौशक्तिवृत्त्या विशेष्यभूतेनांशेन सह पदार्थस्यान्वयो भवति। तदैकदेशेन न पदार्थान्वयो न भवति। एवम्प्रकारकस्य नियमस्य सत्त्वाद् घटपदात् विशेष्यनिरपेक्षघटत्वरूपविशेषणांशस्योपस्थितिर्लक्षणां विना न सम्भाव्यतेऽतो हेतोर्लक्षणा स्वीक्रियत एव। इत्थं विशिष्टवाचकात् पदाद् विशेष्योपस्थितये लक्षणाऽनभ्युपेया। विशेषणमात्रोपस्थितये लक्षणा स्वीकार्येति नियमः। तदाह- "***घटो नित्य इत्यत्र घटपदाद् घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा"।***[57] एतस्मात्कारणादेव विशिष्टवाचकपदेभ्यो विशेष्यज्ञानाय लक्षणाया आवश्यकत्वाभावात्। इत्यसिद्ध्यत्। एवमेव 'तत्त्वमसी'त्यादिषु महावाक्येष्वभेदार्थावबोधाय लक्षणाया आवश्यकतैव न प्रतिभाति। अत्र पश्यामः- यथा तत्त्वम्पदयोः सर्वज्ञत्वाल्पज्ञत्वविशिष्टचैतन्यार्थबोधकत्वात्। तयोरभेदान्वयस्य बाधितत्वात्तदपि जहदजहद्द्वारा चैतन्यरूपाभेदार्थबोधकता सञ्जायते, इति प्राचीनानां मतम्। किन्तु तवाभिप्रेतार्थस्य विशेष्यरूपार्थस्योपस्थितिस्तु उपर्युक्तनियमेनैव भवति। लक्षणाया आवश्यकता न भवति। "***एवमेव 'तत्त्वमसी'त्यादिवाक्येऽपि न लक्षणा। शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्"।***[58] घटादिपदानां नैसर्गिकी शक्तिः घटत्वविशेषणे घटविशेष्ये च। तस्माद्यत्रापि द्वयोर्मध्ये एकस्यैवोपस्थितिर्भवति। तत्रैकदेश एव तेषां वाच्यार्थः। इति न वक्तुं शक्यते, एतस्माद्धेतोरेव घटो नित्य इत्यादिषु वाक्येषु केवलविशेषणस्य ज्ञानाय यथा भवता लक्षणा स्वीक्रियते, तद्वदेव 'तत्त्वमसी'त्यादिवाक्येष्वप्यङ्गीक्रियत एव। तर्हि कथं लक्षणाया आवश्यकता

---

[56] परमलघुमञ्जूषा,समासवृत्तिनिरूपणम्, पृ० २९७

[57] तत्रैव, पृ० २३२

[58] तत्रैव, पृ० २३३

नास्तीति कथ्यते। धर्मराजाध्वरीन्द्रेण समाधत्ते- यदस्माभिस्तु विशेषणज्ञानायैव लक्षणा स्वीक्रियते न विशेष्यज्ञानाय यदि विशेषणेन तुल्यं विशेष्यज्ञानमपि लक्षणया गम्येत तदा तु महाननर्थः स्यात्। गेहे घटः, इत्यस्मिन् वाक्येऽपि गृहत्वविशिष्टगृहव्यक्तिरूपार्थोऽवगम्यते। तथा च गृहपदाद् गृहांशरूपविशेष्यार्थबोधायापि लक्षणा स्वीकार्या यतोह्यत्रापि वाच्यैकदेशभूतघटत्व- रूपेणार्थेन सह गृहपदार्थस्य आधेयतासम्बन्धेनान्वयोऽसम्भवः। यतोहि गृहे घटत्वं न सम्भाव्यतेऽपितु गृहे एव घटः। गृहत्वजातावपि न घटः। द्वितीयमपि दर्शयति- घटे रूपम्, इत्यत्रापि घटत्वविशिष्टे घटेऽर्थाद् घटत्वे, घटे च रूपमित्यर्थो नोपपद्यते। यस्माद्रूपं घटे एव सम्भाव्यते, घटत्वजातौ रूपस्यासम्भवात्। घटत्वरूपेण सह आधेयतासम्बन्धेनान्वयाभावात्। अत एव वाक्याद् घटे रूपमित्याकारको बोधोऽपि लक्षणयैव जायत इत्यपि वक्तव्यम्। तृतीयमपि दर्शयति- 'गामानय' अत्रापि वाक्ये गोत्वविशिष्टपदस्यापि गोव्यक्तिविशेष्यरूपार्थे लक्षणां स्वीकृत्यैव विशेष्यानयनं क्रियायामन्वेतीति वाच्यम्। यतोह्यत्रापि वाच्यैकदेशभूतस्य गोत्वरूपामूर्तविशेषणस्य आनयनक्रियायां कर्मत्वेनान्वयासम्भवः। अतोऽत्र पूर्वपक्षी कथयति यदङ्गीक्रियते लक्षणा 'गेहे घट' इत्यादिषु का हानिरिति चेन्नोचितम्? "प्राधान्येन व्यपदेशा भवन्ति" इति नियममनुसृत्य वाक्यस्य वाच्यार्थप्रधानभूतैकदेशरूपस्य विशेष्यस्योपस्थितौ सत्यां विशेष्य एव शक्य इत्येवोचितम्। वाक्ये विशेषणस्याप्राधान्यात् विशेष्यरहितविशेषणस्य ज्ञानं लक्षणां विनां न भवितुमर्हति। अतः विशेषणांशे एव लक्षणा स्वीकर्तव्या। यतोहि घटपदस्य वाच्यार्थो घटत्वमिति प्राधान्येन व्यवहारो न। तस्मादेव पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन, अयं नियमोऽपि विशेषणविषयकः, अर्थाद्विशेषणेन सह पदार्थस्यान्वयो न भवति, अन्वयस्तु विशेष्येण सहैव भवति। इति न्यायार्थो बोध्यः। "***अन्यथा 'गेहे घटो' 'घटे रूपम्' 'घटमानये'त्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात्***"।[59] यदि लक्षणा न

[59] तत्रैव,

स्वीक्रियते तदा तु पूर्वाचार्यैः सह विरोधो भवतीति, तन्न- पूर्वाचार्यैस्स्वीकृतभागत्यागलक्षणा परम्परामन्वसर्यत, वस्तुतस्तैरपि न स्वीकरणीया आसीदेषा। यदि पूर्वपक्षिणा पृच्छ्यते यद् यदि भागत्यागलक्षणाया अभेदान्वयबोधायावश्यकतैव नास्ति, तर्हि त्रैध्यं कस्माच्छक्तीनाम्? 'काकेभ्यो दधि रक्ष्यताम्' इत्याद्यर्थमेव। अत्र 'छत्रिणो यान्ति' 'कुन्तान् प्रवेशय'। इत्यादिष्वपि जहदजहद्बोध्या। अतो लक्षणायास्त्रैविध्यं सङ्गच्छते। 'काकेभ्यो दधि रक्ष्यताम्' इति वाक्यस्य तात्पर्यं केवलं दधिरक्षणं काकेभ्य एव नापितु कुक्कुरमार्जारादयो ये दधिनाशकास्तेभ्योऽपि कार्यमिति तात्पर्यम्। एवम्प्रकारकं तात्पर्यं विचिन्त्यैव सः सर्वेषु दध्युपघातकेषु लक्षणां स्वीकरोति, सत्यां लक्षणायामेव तात्पर्यार्थोऽवबुध्यते। तदाह ग्रन्थकृत्- "***तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काकेऽकाकेऽपि काकशब्दस्य प्रवृत्तेः"।***[60] अत्र जहदजहल्लक्षणायाः प्रकारेऽपि वैमत्यं प्राग्भ्यो वेदान्तिभ्यः, यतोहि ते विरूद्धांशं परित्यज्य तत्राविरुद्धांशेऽभेदार्थरूपं तात्पर्यमवबुध्यन्ते। तथा च नव्यैरत्र 'काकेभ्यो दधि रक्ष्यताम्' इति उदाहरणं भागत्यागलक्षणायाः प्रादर्शि। तस्मादत्र काकपदार्थापरित्यागेन सहान्यदध्युपघातकानामवबोधो जायत इति। अतो न लक्षणायामत्र भागस्य त्यागोऽत्र तस्माल्लक्षणा न घटमाना दृश्यते। अत्रोत्तर्यते यन्नव्यवेदान्तिभिर्धर्मराजाध्वरीन्द्रादिभिः प्रागुक्तभागत्यागलक्षणायाः स्वरूपमस्वीकृत्य नूतनं लक्षणममानि। तच्चेत्थम्- यया शक्याशक्यार्थयोः सामान्यतया बोधः कार्यते सा जहदजहल्लक्षणा कथ्यते। प्रकृतेऽस्मिन्नुदाहरणे भागत्यागलक्षणायाः समन्वयो सञ्जायत एव। अत्र काकशब्दः काकत्वरूपवाच्यार्थं सन्त्यज्याशक्यं वाच्यार्थभिन्नं दध्युपघातकत्वरूपं धर्मं पुरस्करोति तथा च मार्जारकुक्कुरादिलक्ष्यार्थैः सह वाच्यार्थस्य काकस्यापि तेनैव दध्युपघातकत्वरूपेण धर्मेण दध्युपघातकत्वरूपे बोधं कारयति। एवं रीत्या वाक्यमिदं दध्युपघातकैर्मार्जारादिभिः सह काकस्यापि बोधं कारयति। अतोऽत्र जहदजहल्लक्षणा जायते। 'छत्रिणो यान्ति' इत्यत्रापि

---

[60] तत्रैव, २३५

एकासार्थवाहित्वसम्बन्धेन शक्यछत्रधारिणोऽशक्याछत्रधारिणो बोधो भवति। एवम्भूतं स्वरूपं लक्षणाया जहल्लक्षणाऽजहल्लक्षणाजहदजहल्लक्षणाभेदेन व्याख्यायि।

**लक्षणायाः प्रवृत्तौ बीजम् -**

कैश्चिद्दार्शनिकैर्लक्षणाया बीजत्वेनान्वयानुपपत्तिरेव स्वीक्रियते तन्न साधुत्वमावहति। अर्थाद् वेदान्तपरिभाषाकृता बीजत्वेनान्वयानुपपत्तिस्तिरस्क्रियते। यतोहि 'काकेभ्यो दधि रक्ष्यताम्' इत्युदाहरणे दधिरक्षणस्य केवलं काकशब्देन सहान्वयो न भवति, अर्थादत्र मुख्यार्थस्य स्वीकारे सत्यन्वयानुपपत्तिर्न भवत्यतोऽन्वयानुपपत्तिर्न कारणं लक्षणायाम्, यतोहि सत्यामन्वयानुपपत्त्यां 'काकेभ्यो दधि रक्ष्यतामि'त्यत्र लक्षणैव न स्यात्। यस्मात् काकातिरिक्ता दध्युपघातका यदि दूषयन्ति दधि, तदा तु वक्तुस्तात्पर्यं नोपपद्यते। तथाभूततात्पर्यानुपपत्तिरेव लक्षणायां बीजमिति। सर्वत्र तात्पर्यानुपत्तेः स्वीकारे सति शाब्दबोध उपपद्यतेऽतः पार्थक्येनान्वयानुपपत्तिरेव लक्षणायां बीजमित्यस्वीकर्तव्यम्। यतोहि क्वचित्तात्पर्यानुपपत्तिः क्वचिच्चान्वयानुपपत्तिरिति निर्धारणे सति गौरवमायाति। तस्मादेकमेव कारणमभ्युपेयमिति। यच्च सर्वत्र घटमानं स्यात्। तादृशं तु तात्पर्यानुपपत्तिरेव भवितुमर्हति। तात्पर्यानुपपत्तिरेव किमर्थं लक्षणायां बीजं स्यादिति प्रतिपादयति। यत्र कुत्रापि तात्पर्यानुपपत्तिस्तत्रैवान्वयानुपपत्तिरपि, किन्तु तात्पर्यानुपपत्तौ सत्यां लक्षणा भवत्येव। अन्वयानुपपत्तिस्वीकारे सति पूर्वमेव दोषः प्रादर्श्यत। अन्वयानुपत्ताविदमेवोदाहरणं दीयते। 'गङ्गायां घोषः' यतोहि गङ्गापदस्य मुख्यार्थः प्रवाहस्तस्य चाऽऽधेयतासम्बन्धेन घोषेण सहान्वयो न सम्भाव्यते, अन्वयानुपपत्त्या गङ्गासम्बन्धितीररूपार्थे गङ्गापदस्य लक्षणा, इत्येवाभिमत्यमन्वानुपपत्तिवादिनाम्। ग्रन्थकर्तुर्मतम् – यथाऽन्वयोऽत्र नोपपद्यते तथैव तात्पर्यमपि न बुध्यते। यतोहि गङ्गापदस्य प्रवाहरूपो मुख्यार्थः, तथा सति वाक्यस्य तीरप्रतीतिजननयोग्यत्वरूपं तात्पर्यं न सम्भाव्यते। तस्मादत्रापि तात्पर्यानुपपत्तिरेव स्वीकरणीया। अतो भिन्न-भिन्नप्रयोजनानुगमकानां स्वीकरणस्यापेक्षया तात्पर्यानुपपत्तिरूपैकानुगमकता

ज्यायसी। "***लक्षणाबीजं तु तात्पर्यानुपपत्तिरेव नत्वन्वयानुपपत्तिः। 'काकेभ्यो दधि रक्ष्यतामि'त्यत्रान्वयानुपपत्तेरभावात्। 'गङ्गायां घोष' इत्यादौ तात्पर्यानुपपत्तेरपि सम्भवात्"।***[61]

**लक्षणाशब्दशक्तेर्वाक्यवृत्तित्वम् -**

नैयायिकानां लक्षणा पदमात्रवर्तिनी भवति। तेषां लक्षणाया विषयेऽनुमानं जायत इत्थम्- यल्लक्षणापदमात्रवृत्तिः, वृत्तित्वाच्छक्तिवदिति।[62] तस्यानुमानप्रकारस्य सामीचीन्यं नावहति। यतोहि तस्या व्यभिचारो दृश्यते । 'गभीरायां नद्यां घोषः' इत्यत्र वाक्येऽस्मिन् गभीरविशेषणविशिष्टनदीपदस्य तीररूपार्थे लक्षणा क्रियते। अत एव पदमात्रवृत्तित्वं न सम्भाव्यते। नैयायिकानुमानेऽपि वृत्तित्वमिति यो हेतुः, स च सोपाधिकः। यतोहि शक्तित्वमुपाधिरत्र। तथाहि- यत्र पदमात्रवृत्तित्वरूपसाध्यं भवति। तत्र घटपटादिस्थलेष्वपि शक्तित्वं भवति, अतः शक्तित्वं साध्यव्यापकम्, यत्र वृत्तित्वरूपो हेतुर्भवति, तत्र शक्तित्वं भवतीति न कश्चन नियमः। यथा गभीरनद्योः पदयोर्लक्षणावृत्तिरस्ति, किन्तु शक्तित्वं नास्ति। एतस्माच्छक्तित्वं साधनाव्यापकम्, तस्मादेव नैयायिकानुमितिः सोपाधिकत्वरूपेण दोषेण दूषिता। 'गभीरायां नद्यां घोषः' गभीरमिति विशेषणम्, किन्तु गभीरे जले घोषोऽसम्भाव्यते। अतो गभीरनद्योरुच्चारणान्नदीशब्दस्य तीररूपार्थ एव विवक्षितः। यदि नदीमात्रस्य तीरे लक्षणा स्वीक्रियते, तदा गभीरे तीरे घोष इत्यर्थो भवितुं शक्नोति, तीरे तु गभीर इति विशेषणं न दातुं शक्यते यतोहि तीरे न गभीरत्वं भवत। गभीरपदस्यापि तीरे लक्षणा न सम्भाव्यते, गभीरतीरयोरभेदासम्भवात्, एवमेव तीरनद्योरपि नाभेदेन । अतो हेतोर्लक्षणं क्रियते – "***लक्षणा च न पदमात्रवृत्तिः, किन्तु वाक्यवृत्तिरपि। यथा 'गभीरायां नद्यां घोष' इत्यत्र***

---

[61] तत्रैव, पृ० २३६

[62] तत्रैव, पृ० २३८

***पदद्वयसमुदायस्य तीरे लक्षणा"।***[63] अतः 'पदार्थः पदार्थेनान्वेति न त्वेकदेशेन' इति नियमश्शाब्दबोधे। नदीतीरपदस्य नदीरूपैकांशेन सह गभीरपदस्यान्वयो न भवितुं शक्नोति। अतः परिशेषन्यायेन गभीरनद्योरुभयोः पदयोस्तीररूपार्थे लक्षणा स्वीक्रियते। तदा गभीरविशेषणविशिष्टनदीपदस्य तीरपदार्थे लक्षणा। स चार्थो गभीरनदीभ्यां परस्परान्वितः सन्नुभाभ्यां निष्पद्यते। एतस्मादेव वाक्यवृत्तिर्लक्षणा। शक्तिवल्लक्षणा पदवृत्तिरिति न नियमयामः। लक्षणा यथा पदवृत्तिस्था वाक्यवृत्तिरपि। "***ननु वाक्यार्थस्याशक्यतया कथं शक्यसम्बन्धरूपालक्षणा"?***[64] पुनः पूर्वपक्षः क्रियते- यतोहि लक्षणायाः स्वरूपं तु स्वशक्यसम्बन्ध इति प्रत्यपद्यत, किन्तु वाक्यार्थे शक्तेरभावत्वात्तत्र शक्यसम्बन्धरूपा लक्षणा कथं सम्भाव्यते। समाधीयते- यथा पदजन्यार्थो (पदार्थः) शक्यस्तथैव वाच्यार्थोऽपि शक्यः। अत एव शक्यसम्बन्धरूपा लक्षणा वाक्येऽपि सम्भवति, यतोहि योऽर्थो शक्त्या साक्षाद्बोध्यते स एव शक्यार्थ इति। इत्येवम्भूता परिभाषा यदि स्वीक्रियते तदा तु त्वत्पक्षानुसारं नः पक्षेऽपि लक्षणाया या वाक्यवृत्तिता, तस्या अनुपपत्तिः स्यात्। अस्मदीयः शक्यार्थस्तु शक्त्या साक्षात् परम्परया वा बुध्यते। तस्माच्छक्त्या साक्षात् पदार्थो यद्यपि बोध्यते तथापि परम्परया वाक्यार्थोऽपि बोध्यते। पदैः पदार्थज्ञाने जाते सति पदार्थानां पारस्परिकान्वयादस्माभिर्योऽर्थो ज्ञायते। स एव वाक्यार्थ इति। वाक्यार्थोऽपि शक्त्यैव परम्परया ज्ञायते। अतः पदार्थवद् वाक्यार्थेऽपि शक्यता। एतस्मात्कारणादेव यथापदं वाक्यस्यापि स्वशक्यरूपार्थेन सम्बन्धितेऽर्थे लक्षणा भवितुं शक्नोति। "***शक्त्या यत् पदसम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा, शक्तिज्ञाप्यश्च यथा पदार्थस्था वाक्यार्थोऽपीति न काचिदनुपपत्तिः"।***[65] पुनः प्रमाणत्वेन वैदिकवाक्यमुपस्थापयति, यथा लौकिकवाक्ये लक्षणा तथैव वैदिकवाक्येऽपि। अर्थवादवाक्यानां प्राशस्त्यनिन्दिततत्वे लक्षणा, प्राशस्त्ये यथा- "वायुर्वै क्षेपिष्ठा

---

[63] तत्रैव, पृ० २३८

[64] तत्रैव, पृ० २३९

[65] तत्रैव, पृ० २३९

देवता"[66] 'निन्दितत्वे च सोऽरोदीत्' 'यदरोदीत्' "तद्रुद्रस्य रुद्रत्वम्"[67] इत्यादिषु वाक्येषु लक्षणयैव बोधो जायतेऽन्यथा वैदिकवाक्यानां वैयर्थ्यं स्यात्। तथा च "*आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते*"[68] इत्यस्योक्तेर्भङ्गापत्तिः। अर्थवादवाक्येषु साक्षादर्थबोधकता न भवति, तस्माल्लक्षणयैव प्राशस्त्यनिन्दितत्वयोस्तत्तत्वाक्यैः सहैक्यवाक्यतायाः तत्रावतिः सञ्जायते। एकवाक्यता च द्विधा- पदैकवाक्यता वाक्यैकवाक्यता च। तथा तथा चार्थवादवाक्येषु पदैकवाक्यता भवति। "***एवञ्च विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिवाक्येन एकवाक्यत्वं भवतीत्यर्थवादानां पदैकवाक्यता"।***[69] वाक्यैकवाक्यता च- "***यत्र प्रत्येकं भिन्न-भिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षा- वशेन महावाक्यार्थबोधकत्वम्"।***[70] यथा- 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत'[71] इत्यादिवाक्यस्य 'समिधो यजति' इत्यादिभिः प्रयाजादिवाक्यैः[72] सह परस्परापेक्षितत्वादङ्गाङ्गिभावावबोधकतया तेषामेकवाक्यता सिद्ध्यति। कुमारिलभट्टेन कथ्यते-

***"स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।***

***वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते"।।***[73]

इत्येवम्प्रकारेण द्विधैकवाक्यता प्रादर्श्यत। तथा च वेदान्तशास्त्रे शक्तेर्लक्षणायाः च व्याख्यानमकारि।

---

[66] अर्थसङ्ग्रहः, पृ० १९२

[67] तत्रैव, १९२

[68] मीमांसासूत्रम्,१/२/१

[69] तत्रैव, पृ० २४०

[70] तत्रैव, पृ० २४७

[71] अर्थसङ्ग्रहः, पृ० ९२

[72] समिधो यजति,तनूनपातं यजति,इडो यजति, बर्हिर्यजति, स्वाहाकारं यजती'ति, तत्रैव, पृ० ४३

[73] तत्रैव, पृ० २४७

**शास्त्रयोनित्वात्-** एतेन सूत्रेण ज्ञायते यद् ब्रह्म ऋग्वेदादिशास्त्राणां रचयिता विद्यते, पूर्वसूत्रे ब्रह्मणो यल्लक्षणं कृतं विद्यते तत्र सन्देहस्तदुपादनं निमित्तं वा? एतन्निवृत्तयेऽधिकरणस्य प्रारम्भः, ब्रह्मैव ऋग्वेदादिशास्त्राणां कर्ता चेतनत्वात्, एवमेव निमित्तकारणं विद्यते नोपादानम्, तर्हि न वक्तुं शक्यते उपादानकारणे एव पञ्चमी भवति इति नियमो न, यथा पुत्रात् प्रमोदोजायते इत्यादिषु पञ्चमी निमित्तेषु दृश्यते यतोहि पुत्रः प्रमोदस्योपादानकारणं न विद्यते, एतस्य सूत्रस्य विषयवाक्यमेवं विद्यते- **“एतस्य महतो भूतस्य निःश्वसितमृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं श्लोको व्याख्यानान्यनुमानानि प्रमाणभूतानि।**[74] **तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे”**[75] एवं सर्वासां विद्यानां भण्डारत्वाद् वेदानां कर्तृत्वाच्च ब्रह्म चेतनजगतो निमित्तकारणं विद्यते, इच्छापूर्वकं कर्तृत्वं निमित्तकारणे एव न तूपादने यथोक्तम्-

**“इच्छापूर्वककर्तृत्वं प्रभुत्वमत्स्वरूपता।**

**निमित्तकारणेष्वेव नोपादानेषु कदाचित्”॥**[76]

सूत्रस्यास्य द्वितीयोऽर्थोऽपि विद्यते शास्त्रं योनि प्रमाणं यस्मिन् तच्छास्त्रयोनिस्तस्य भावस्तत्त्वम्, अत्र योनेरर्थः प्रमाणमर्थाच्छास्त्रं यस्मिन् प्रमाणं, शास्त्रं यं निमित्तरूपेण कथयेत तच्छास्त्रयोनिः कथ्यते, एतस्मिन्नधिकरणे विषयवाक्यमिदं ‘स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थाद् व्यधाच्छाश्वतीभ्यः समाभ्यः’[77] अत्रापि परमात्मनो निमित्तकारणतैव विधीयते, यतोहि बुद्धिपूर्वकं कर्तृत्वं निमित्तकारणे एव नान्यत्र। ‘द्वा सुपर्णा सयुजा सखाया.....अभिचाकशीति’[78] अत्र चेतनयोर्जीवेश्वरयोराश्रयः

---

[74] बृ०उ००२/४/१०

[75] यजु० ३१/७

[76] वे०द०वे०भा०पृ० ११

[77] यजु०४०/८

[78] ऋग्/ २/३/१७

प्रकृतिरूपो वृक्ष एव जीवश्च कर्मफलभोक्ता ईश्वरश्चाभोक्ता साक्षी सन् वर्ततेऽर्थाज्जीवेश्वरप्रकृतयोऽनादयः पदार्थास्तत्र प्रकृतिर्जगत उपादानमीश्वरश्च निमित्तम्।

**अभिन्ननिमित्तोपादाने प्रमाणम्-**

केचन् मायावादिनो ब्रह्म अभिन्ननिमित्तोपादनकारणं मत्वा तत्सिद्धये चैवं प्रमाणयन्ति –

'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति' इत्यनेन मन्त्रेण भावयन्तीश्वरस्याभिन्ननिमित्तित्तोपादनत्वम्, लूतातन्तुवत्।

'यथा सतः पुरुषः केशलोमानि जायन्ते तथाक्षरात् सम्भवतीह विश्वम्'[79] एतेन वर्णनेन साध्यते यदस्य जगतो निमित्तोपादनकारणं ब्रह्मैव लूतातन्तूदाहरणेन।

**शब्दस्याप्यत्मसाक्षात्कारे कारणत्वम्-**

साक्षादिन्द्रियैर्यज्ज्ञानमुत्पद्यते तेनैवात्मसाक्षात्कारः सम्भवति, शब्दस्तु परोक्षज्ञानस्योद्भावकः तस्माच्च शब्दैरात्मबोधो भाव्यते ततश्च श्रवणमननादिभिर्निरन्तरमात्मचिन्तनेन कृते सति प्रमात्रे आत्मसाक्षात्कारः सम्भवति।[80]

**प्रकाशानन्दस्य मतम्-**

'तत्त्वमसि' अनयोः पदयोरखण्डार्थबोधो लक्षणां विना न सम्भवति। तद्यथा-

**"अखण्डार्थपदत्वं हि पदयोर्लक्षणां विना।**

**निर्णीयेत्थं तमाचार्यः पूर्वपक्षं निषेधति"**॥[81]

पूर्वपक्षे केचन आचार्या उक्तवन्तो यल्लक्षणया परमतत्त्वस्य ब्रह्मणो ज्ञानं भावयितुं शक्यते तस्य पूर्वपक्षस्य प्रकाशात्मयतिद्वारा उत्तरोऽदीयत यन्मुख्यार्थस्य साक्षाद् विरोधादेव तत्र लक्षणायाः प्रवृत्तिर्व्यधीयत तद्विना नैव सम्भवति परब्रह्मणोऽखण्डैकार्थतत्वमिति प्राचां समेषां विदुषां मतं सर्वत्र ग्रन्थेषु प्रकाशितं विद्यते तथैव प्रकाशात्मयतेरपि प्राचां विदुषां मते न सम्भवति केनाप्यन्येनोपायेन ब्रह्मणो ज्ञानं लक्षणां विना।

---

[79] मु०उ०९/७

[80] इन्द्रियजन्यस्यैव ज्ञानस्य साक्षात्कारत्वात्, शब्दस्य परोक्षजनकत्वस्वभावात्। वे सि० मु०

[81] ना०दी०भा०पृ० १७४ उद्धृतम् वेदन्तसिद्धान्तमुक्तावली पृ० २२८

**शास्त्रस्य प्रयोजनम्-**

शास्त्रस्य प्रयोजनं भवति दुःखनिवृत्तेरुपायं तथा चाज्ञाननाशस्तेन च सुखस्य प्राप्तिर्भवति, ऐहिकी पारमार्थिकी, इहलोके सुखं भुक्त्वा परलोके महीयते।

**"हैतं सम्प्रेप्सतां मोहादहितं च जिहासताम्।**

**उपायान् प्राप्तिहानार्थान् भासयतेऽर्कवत्"॥**[82]

अज्ञानवशवर्तिनो जनाञ्छास्त्रं हितस्य प्राप्तिमहितस्य च परित्यागात्मकं शिक्षणं ददाति यथा सूर्य इह जगति उदितः सन्नन्धकारमपहाय प्रकाशं जनयति तेन च सर्वोऽपि लोक आनन्दमनुभवति तथैव शास्त्रमपि सांसारिकानज्ञानोपहताञ्जनान् विषयीकृत्य तदन्तःकरणस्थं तमो संनश्य प्रकाशात्मकं ज्ञानं दत्त्वा सर्वान् सुखं जनयति, इत्येव शास्त्रस्य शास्त्रत्वम्। तस्माच्छास्त्रेण अविद्याया नाशः क्रियते, अविद्यानिवर्तकत्वमेव शास्त्रस्य सम्यगवबुध्यते, अविद्यया विरहिताः साधका ये केऽपि स्युस्ते च निर्मलान्तःकरणाः सन्तः स्वकं स्वरूपं ज्ञातुं प्रयतन्ते। शास्त्रं च न क्वापि पदार्थे नूतनां शक्तिं समुत्पादयति प्रत्युत वस्तुषु वर्तमानां शक्तिं प्रकाशयति तदुच्यते—

**"न परीप्सां जिहासां वा पुंसः शास्त्रं करोति हि।**

**निजे एव तु ते यस्मात् पश्चादावपि दर्शनात्"॥**[83]

शास्त्रं च प्रवृत्तिनिवृत्त्यात्मकं दृश्यते लोके तस्मादिष्टे वस्तुनि प्रवृत्तिस्तथाऽनिष्टे वस्तुनि न प्रवर्तयति तद्यथा **"शंसनाच्छासनाद्वा शास्त्रम्"** भारतीय दर्शनेषु प्रतिपादितं विद्यते शास्त्रप्रयोजनं

"**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।**

**पुसां येनोपदिश्येत तच्छात्रमितीर्यते"॥**[84]

एतेनेदमायातं यत् प्रवृत्तिनिवृत्त्युपदेशविशिष्टं शास्त्रं कथयते। अविद्यानिवर्तकत्वमेव शास्त्राणां तच्च कथ्यते तत्त्वज्ञानं मिथ्याज्ञानस्य विरोधि विद्यतेऽतएव तन्मिथ्याज्ञानं नाशयितुं समर्थं भवति। यथा सूर्यस्य प्रकाशः

---

[82] नै०सि०श्लो० २९

[83] तत्रैव श्लो० ३०

[84] भा०द,इति०

अन्धकारम् अवश्यमेव नाशयति इति तस्य प्रभावस्तथैव शास्त्रविषयकं ज्ञानम् अज्ञानात्मकं तमो नाशयत्येव।

**तत्त्वज्ञानस्य प्राबल्यम्—**

एवम्भूतं तत्त्वज्ञानं प्रमाणैरुत्पन्नं प्रबलं विद्यते तस्य च प्राबल्यादेव मिथ्याज्ञानेन तस्य बाधो न क्रियते, तस्माच्च मिथ्याज्ञानस्याप्रमाणैरुत्पन्नत्वात् तस्य बाधः प्रमाणजन्यतत्त्वज्ञानाद् बाधः भवति तत्त्वज्ञानस्य बलीयस्त्वाच्च, तत्त्वज्ञानं च प्रबलं सन्मिथ्याज्ञानजन्यसंस्कारान्नाशयितुमस्य सहायकस्यापेक्षां न करोति। तदुच्यते-

**"तस्माद्दुखोदधेर्हेतोरज्ञानस्यापनुत्तये।**

**सम्यग्ज्ञानं सुपर्याप्तं क्रिया चेन्नोक्तहेतुतः"॥**[85]

**मुमुक्षोर्वर्णनम्-**

**"मुमुक्षुरेव गुरुमुपसर्पति गुरुचरणयोर्गमनं विना वेदान्तवाक्यानां श्रवणं न सम्भवति"**[86]

वाक्यं च किंस्वरूपमित्यपि प्रतिपादयति- वाक्यं विना च पदपदार्थयोः क्वापि सत्ता न सम्भवति। पदपदार्थयोरभावेऽन्वयव्यतिरेकावपि न स्याताम्, यतोहि वाक्ये एव सर्वं सम्भवति वाक्ये च पदानि, पदेषु च पदार्थाः, पदपदार्थयोर्बोधनियामिका शक्तिरपि पदेषु विद्यते, तयैवार्थबोधो विधीयते, एवमाहत्य वाक्यस्य स्वरूपं भवति यदि वाक्यं न स्याच्चेदेवं प्रकारकं व्याख्यानं न कर्तुं पार्यते एव वाक्यानाम्। पुनश्चान्वयव्यतिरेकाभ्यां न जायते कदाचिदपि वाक्यार्थज्ञानं तथा च वाक्यार्थराहित्ये सत्यज्ञानस्य नाशो न सम्भवति, तदाह-

**"अन्वयव्यतिरेकाभ्यां विना वाक्यार्थबोधनम्।**

**न स्यात्तेन विना ध्वंसो नाज्ञानस्योपपद्यते"।**।[87]

**नैष्कर्म्यसिद्धौ लक्षणा-**

अहं वृत्तिश्चैतन्यप्रतिबिम्बं धृत्वा चिद्रूपिणी जायतेऽत आत्मनो देहादीनामपेक्षयाहं वृत्तिः प्रत्यग्भूता (आन्तरः) विद्यते तस्माल्लक्षणयैवाहं वृत्तेर्निरासः।

---

[85] नै० सि० श्लो० ३७

[86] न चामुमुक्षोरस्तीह गुरुपादोपसर्पणम्। न विना गुरुसम्बन्धं वाक्यस्य श्रवणं भवेत्। तत्रैव द्वि०अ०श्लो०७

[87] तत्रैव श्लो० १०

**"अनेन गुणलेशेन ह्यहं कर्तृकर्मय लक्ष्यतेऽसौऽहवृत्त्या नाञ्जसाऽत्राभिधीयते"॥**[88]

एतेन स्पष्टं भवति यद् गुणलेशस्य सम्बन्धत्वादहंकारः, कर्ता(प्रमाता) तस्य कर्म देहं घटादिकमतिक्रम्य संस्थिता या कूटस्थचैतन्यस्वरूपा अहं वृत्तिः, तयैवात्मनः प्रतिपादनं क्रियते साक्षान्न, यतोहि आत्मनः साक्षात् प्रतिपादनमभिधया शब्दशक्त्या न कर्तुं शक्यते।

**व्याकरणदर्शने लक्षणाविमर्शः-**

व्याकरणदर्शने लक्षणायाः स्थितिः साक्षाच्छब्दमुखेन तु न मन्वाना दृश्यन्ते विद्वांसस्ततोऽपि वैयाकरणानां ये ग्रन्था दृश्यन्ते तेषां विश्लेषणेन चाङ्गीकर्तुं शक्यते यद्वैयाकरणैरपि लक्षणाया व्याख्यानमकारि। तेषां मतान्युदाहरणानि च साक्षाद् दृष्टिपथमवतरन्ति। तत्र तत्र ग्रन्थेषु विचारो विधीयते। आचार्यपाणिनिकृतायामष्टाध्याय्यां सूत्रमेकमुपलभते **'पुंयोगादाख्यायाम्'** तत्रत्यायां विचारणायां लक्षणाया मूलं प्राप्यते तदत्र प्रदर्श्यते- "**प्रष्ठस्य स्त्री' 'ब्राह्मणस्य स्त्री**" इत्येवमादिष्वर्थेषु ब्रह्मणादिषु शब्देषु स्त्रीत्वस्य आख्यायां पुंसो योगे पूर्वोक्तसूत्रेण ङीष्प्रत्यये कृते सति 'प्रष्ठी' 'ब्राह्मणी' 'गोपी' इत्येवमादय शब्दाः सिध्यन्ति।

अत्र प्रश्नेन भूयते यदत्र पुल्लिङ्गमूलस्य ये शब्दास्तेषां स्त्रीत्वं कथं सम्भवति, समागतायां तादृश्यायांपरिस्थितौ आचार्यस्य पाणिनेर्व्याख्यानं साधुत्वं नावहेत्, यतोहि सूत्रमभिप्रैति "**या पुमाख्या पुंयोगाद् स्त्रियां वर्तते ततो ङीष् स्यात्। गोपस्य स्त्री गोपी**"।[89] स्त्रियाः पुरुषस्य चात्मनः स्वतन्त्रता विद्यते, तस्मात् पाणिनेरभिमतं सम्बन्धं भावयति आचार्यपतञ्जलिः। तादृशः सम्बन्धः योग्यतारूपः कथ्यते, एवम्भूतस्य सम्बन्धस्य चर्चामाचार्यपाणिनिः 'तदर्हति' 'तदर्हम्' इति द्वयोः सूत्रयोश्चर्चितः, तस्मादुभाभ्यां सूत्राभ्यां स्पष्ट्यते यत् पदार्थद्वयस्य मध्ये योग्यतारूपः सम्बन्धः सञ्जायते। एवम्भूतं व्याख्यानमाश्रित्यैव वैयाकरणा आचार्या योग्यतारूपं सम्बन्धमभावयन्, आचार्यपतञ्जलिरपि तस्यायमित्यस्मिन् सम्बन्धेऽनुपपत्तिप्रदर्श्यन्नुपपत्तिनिरासपूर्वकं तस्यायम् इत्येवम्भूतामेव सम्बन्धं विभावयति तच्चैवं प्रकारेण- 'गोपालिकादीनां प्रतिषेधः' इत्यस्य वार्तिकस्य

[88] तत्रैव पृ० १३५

[89] वै०सि०कौ०पुंयोगादाख्यायाम्, सूत्रस्य वृत्तिः पृ,१२४

व्याख्याने प्रतिपादयति- **"किं पुनरत्रोदाहरणम्? प्रष्ठी, प्रचरी । कथं पुनरयं शब्दः अकारान्तः स्त्रियां वर्तते"?** एतदाक्षेपसाधकं भाष्यं समाधत्ते- **"तस्येदमित्यनेनाभिसम्बन्धेन। यथैव ह्यसौ तत्कृतान् स्नानोद्वर्तनपरिषेकाल्लभते, एवं प्रष्ठशब्दमपि लभते। नावश्यमेवाभिसम्बन्धो भविष्यति तस्येदमिति। अयमप्यभिसम्बन्धो भवति सोऽयमिति"।**[90] एवम्प्रकारेण स्त्र्याख्यायां ङीष्प्रत्ययस्य विधानं सञ्जायते। पूर्वकालिकेन महाभाष्यीयव्याख्यानेन निर्दिष्टं यदेतेऽपि लक्षणां स्वीकुर्वन्ति। पुंसो वाचकाच्छब्दादेव स्त्रीत्वस्यारोपे बोधिते सत्येव तत्र स्त्रीत्वबोधकस्य प्रत्यस्य ङीषो विधानं जायते।

भट्टोजिदीक्षितमहोदयस्य सिद्धान्तकौमुद्याः प्रख्यातटीकाकारस्तत्त्वबोधिन्यामटीकत **"स्त्रियां वर्तते इत्यनेन गौणी वृत्तिरुक्ता"**[91] अत्र गौणीवृत्तिमुद्भाव्य स्पष्टैरक्षरैराचार्यपाणिनेराभिमत्यं प्राकाशयत्। एतस्माल्लक्षणशब्दशक्त्या विना साधयितुं शक्यते कार्यमस्य सूत्रस्येति पतञ्जलिना तत्त्वबोधिनीकारेणापि निरदिशि।

व्याकरणदर्शने योग्यताख्यस्सम्बन्धोऽङ्गीकृतः, योग्यतारूपे सम्बन्धे सत्यत्यन्तं भिन्नयोः पदार्थयोर्भेदनिवारणपूर्वकोऽभेदः कथं संसाधयितुं शक्यते। तथाभूतस्य विषयस्य व्याख्यानमुपस्थापयता तेन लक्षणाशब्दशक्तिर्विशेषरूपेण साधिता। आचार्यपतञ्जलिर्लक्षणास्वरूपं विभावयति– **"कथं पुनरेतस्मिन् सः इत्येतत् भवति? चतुर्भिश्च प्रकारैरेतस्मिन् सः इत्येतद्भवति, तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यादिति"** इत्थञ्चतुर्धा लक्षणाया वर्णनमक्रियत पतञ्जले महाभाष्ये, मञ्जूषात्रय्यां नागेशीयाभिमत्यमपि तथैव विद्यते। पूर्वोक्तरीत्यैव मञ्जूषाग्रन्थे कैयटाभिधो विदुषो मतमुदध्रियत।

अत्र प्रत्येकमुदाहरणं दीयते - तद्यथा – **तात्स्थ्यस्य 'मञ्चा हसन्ति' 'गिरिर्दह्यते' ताद्धर्म्यात् 'जटिनं यान्तं ब्रह्मदत्त' इत्याह,** ब्रह्मदत्ते यानि कार्याणि जाटिन्यपि

---

[90] म०भा० ४/१/१८

[91] वै०सि०कौ०त०बो०टी०पृ०१५०

तानि क्रियन्ते इत्यतो जटी ब्रह्मदत्त इत्युच्यते॥ **"तत्सामीप्यात्- 'गङ्गायां घोषः' 'कूपे गर्गकुलम्' तत्साहचर्यात्- 'कुन्तान् प्रवेशय' 'यष्टीः प्रवेशयेति"॥**[92]

शाब्दिकानां शक्यताऽवच्छेदकारोपरूपा विद्यते, हेतुत्वेनारोपस्य तात्स्थ्यादयः स्वीक्रियन्ते। एतेन वैयाकरणा शक्यतावच्छेदकप्रकारकमेव लक्ष्यार्थबोधमिति सम्भावयन्ति। अत्र यथा 'सिंहो माणवकः' इत्यादौ सिंहपदेन सिंहत्वावच्छिन्नमाणवकस्य बोधः। न तु माणवकत्वावच्छिन्नस्येति तत्प्रकारकप्रतीतिविशेष्यप्रसिद्धात्वम्- मुख्यत्वम्। एवम्प्रकारेण मुख्यत्वस्य प्रतिपादनं विदधत् स गौणतामप्यसाधयत्। गौणता चाप्रसिद्धिशक्तिद्वारैव बोधयितुं शक्यते, तस्माद्यथा प्रदीपटीकाया व्याख्याकर्त्रा व्याख्यायते यत् 'सिंहो माणवकः' उदाहरणस्यास्य विश्लेषणाय सिंहत्वप्रकारकप्रतीतिविशेष्यो यः प्रसिद्धार्थः सिंहरूपस्तत्त्वं मुख्यार्थत्वम्, सिंहत्वप्रकारकप्रतीतिविशेष्यो योऽप्रसिद्धार्थो माणवकरूपस्तत्त्वं गौणत्वमिति समन्वयो विधीयते।

आचार्यनागेशभट्टो महाभाष्यकारस्य वचनमनुद्धरन् लक्षणाया विषये व्याख्यातीत्थम्। श्लोकोऽयं कुत्र प्राप्यत इति न ज्ञायते किन्तु भाष्यवचनमनुवदति। "***तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात्तथैव च। तत्साहचर्यात्तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः"॥***[93] नागेशेश्चतुर एव हेतून् स्वीकुरुते, तादर्थ्यनामकः पञ्चमो भाष्यातिरिक्ताभिसम्बधोऽतिरिकत्त्वेन स्वीक्रियते।

***तात्स्थ्यम्-*** 'मञ्चा हसन्ति' 'ग्रामः पलायितः' आदिमोदाहरणे 'मञ्चे'ति शब्दस्य वाच्यार्थस्याचेतनत्वे सति तस्य वाच्यार्थस्यान्वयो हासक्रियायां बाधितस्सन् तात्स्थ्यसम्बन्धद्वारा लक्षणाशक्त्या मञ्चस्थपुरुषानाक्षिपति। तस्माच्च च मञ्चस्थपुरुषाणामन्वयो हासक्रियया सञ्जायते। तेन मञ्चस्थव्यक्तयो हसन्तीति लक्ष्यार्थस्य प्रतीतिरवबुध्यते। अपरस्मिन्नुदाहरणे ग्रामशब्दवाच्यार्थोऽप्यचेतनः, अचेतनत्वादत्रापि पलायनक्रियायामन्वयो न सम्भवति। 'ग्रामः पलायितः' इत्येतस्याभिप्रायो जायते। ग्रामस्था जनाः पलायनं कृतवन्तः। अत्रापि तात्स्थ्यसम्बन्धा लक्षणा भवति।

---

[92] म०भा० ४/१/४८

[93] परमलघुमञ्जूषा, पृ० ४८

***ताद्धर्म्यम्-*** 'सिंहो माणवकः' 'गौर्वाहीकः' 'जटी ब्रह्मदत्तः'। अत्रत्यस्याप्युदाहरणेषु गुणकृतेन क्रियाकृतेन वा सामानाधिकरण्येन साध्यते। 'गौर्वाहीकः' लाक्षणिकप्रयोगे जाड्यमान्द्यादिगुणकृतसादृश्यमवगत्यैव वाहीकपदे गोत्वमारोपणं क्रियते। अत्र मुख्यार्थस्यानुपपन्नत्वादर्थात् सामानाधिकरण्यानुपपत्तेस्सत्त्वात्, तात्स्थ्यधर्माणां साम्याभ्युपगमादेव लक्ष्यार्थो गम्यते- गोपदार्थे विद्यमानजाड्यमाद्यादिगुणवान् वाहीकपदार्थ इत्यर्थः। 'सिंहो माणवकः' इत्यत्रापि माणवकस्य सिंहत्वं बाध्यत एव। किन्तु सिंहस्थशौर्यादयो गुणाः, माणवके विशेषेणारोप्यार्थाच्छौर्यादिगुणवान् माणवक इति। 'जटी ब्रह्मदत्तः' इत्यत्रापि यस्य नाम 'ब्रह्मदत्त' न विद्यते, सोऽपि ब्रह्मदत्तसदृशगुणैर्लक्षित इत्युच्यते दृष्ट एव बह्मदत्तपदेन व्यवहृतं भवति।

***तत्सामीप्यम्-*** सामीप्यसम्बन्धेन प्रयुक्तलक्षणाया उदाहरणम्- 'गङ्गायां घोषः' 'कूपे गर्गकुलम्'[94] अत्राप्याधाराधेयभावरूपसम्बन्धस्य बाधितत्त्वादेव सामीप्यरूपं सम्बन्धं स्वीकृत्य गङ्गाशब्दस्य मुख्यार्थस्तेन मुख्यार्थेन सह सम्बद्धतीररूपार्थस्य लक्षणया बोधो जायते। तथा च सामीप्यरूपसम्बन्धे स्वीकृते सत्याधाराधेयभावे न काचन विप्रतिपत्तिः। 'कूपे गर्गकुलम्' इत्यस्मिन्नपि सामीप्यसम्बन्धेनैव कूपस्यारोपः कूपतटे विधीयेते। एतस्मादेव लक्षणाद्वारैव कूपसमीपे गर्गकुलं विद्यते।

***तत्साहचर्यम्-*** साहचर्यवशादप्यन्यधर्मस्यान्यस्मिन् धर्मे समारोपणं विधीयते। तद्यथा – 'कुन्तान् प्रवेशय' 'यष्टीः प्रवेशय'[95] अचेतनकुन्तयष्ट्योः प्रवेशनक्रियायामन्वयो न सम्भवति। मुख्यार्थबाधितत्वादेव साहचर्यरूपनिमित्तमवमन्य कुन्तधराणां यष्टिधराणां वा पुरुषाणां बोधः कार्यते।

***तादर्थ्यम्-*** 'इन्द्रार्था स्थूणा इन्द्रः' इन्द्राय निर्मितः स्तम्भ इन्द्र इति। अत्र त्विन्द्रशब्दस्य वाच्यार्थस्य स्थूणापदवाच्यार्थेन सहाभेदान्वयो न सम्भवति।

---

[94] महाभाष्यम्, ४/१/४८

[95] तत्रैव, ४/१/४८

तस्मादिन्द्रमुद्दिश्य पशूनां बन्धनाय निर्मितः स्तम्भः। वास्तविकरूपेणेन्द्रनिमित्तमेव, एतस्मात्तादर्थ्यरूपनिमित्तमादाय स्तम्भ इन्द्रस्योपकारक इति ज्ञानं लक्षणाद्वारा कार्यते।

महाभाष्यकारो निमित्तान्यादाय प्रयुज्यमानां लक्षणां विविच्य प्रष्ठाद्यकारान्तपुल्लिंगशब्दानां स्त्रीत्वानुपपत्तौ यं प्रश्नं समुदस्थापयत्, तस्य समाधानमपि कृतवान्। 'प्रष्ठस्य स्त्री' 'ब्राह्मणस्य स्त्री' इत्यादिप्रयोगेषु साहचर्यरूपनिमित्तमादाय स्त्रियां प्रष्ठत्वं ब्राह्मणत्वञ्चारोप्यते। यस्मात् कारणादेव पुल्लिंगशब्देऽपि स्त्र्याख्या सम्भवति। डित्थादिशब्दानामव्युत्पत्तिदशायामपि तैरर्थबोधं स्वीकुर्वाणस्तेषु डित्थादिषु गुणक्रियादीनामारोपं प्रतिपादयति। डित्थादिषु प्रकृत्यर्थातिरिक्तप्रत्ययार्थस्याविद्यमानत्वात्। गुणाद्यभावे एतैश्शब्दैस्तस्य भावस्त्वतलाविति सूत्रेण भावार्थकयोस्त्वतलोर्विधानं न भविष्यति। एवम्प्रकारिकायाः समस्यायाः समाधानं महाभाष्यकारो वर्तमानकालिकडित्थादिषु प्राथमकल्पितडित्थादिगुणानामारोपस्य कल्पनां स्वीकरोति। इदमवधेयमत्र यत् प्राक्तनकल्पे जातानां डित्थडाम्भिट्टादिव्यक्तिभिः क्रियमाणानां गुणानां क्रियाणां च सादृश्यादिवशाद् वर्तमानकालिकेषु डित्थादिष्वारोपणं कृत्वैव, एतैर्भावप्रत्ययानामुपपत्तिर्विधीयते। तच्चेत्थम्- "***डित्थादिषु तर्हि वर्त्यभावात् वृत्तिर्न प्राप्नोति- डित्थत्वं डित्थता। डाम्भिट्टत्वमिति। तत्रापि- कश्चित् प्राथमकल्पिको डित्थो डाम्भिट्टश्चेति। तेन कृतां क्रियां गुणानि वा यः कश्चित् करोति। स उच्यते- डित्थत्वं त एतड्डाम्भिट्टत्वं त एतत्। एवं डित्थाः कुर्वन्ति एवं डाम्भिट्टाः कुर्वन्ति"*** ।[96] इतोऽपि महाभाष्यकारः "द्विर्वचनेऽचि"[97] सूत्रस्य व्याख्यायां लाक्षणिकप्रयोगाणां व्याख्यानमकरोत्। "***द्विर्वचनेऽचि च, द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद्द्वित्वे कर्तव्ये"*** [98] अत्र पाणिनिना निमित्तशब्दस्योपादानं न व्यधीयत। निमित्तशब्दस्योपादानं विना निमित्तशब्दस्य प्रतीतिर्न भवितुं शक्यते। एतस्मादेव पाणिनिनाऽत्र

---

[96] तत्रैव, ५/१/११९

[97] अष्टाध्यायी, १/१/५९

[98] सिद्धान्तकौमुदी, पृ० ३४७

निमित्तशब्दप्रयोगपूर्वकेण भाव्यं किन्तु न तथा दृश्यते? पतञ्जलिना समाधीयते समस्यामिमाम्- "*एवं तर्हि निमित्तशब्द उपादेयः, नह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते। अन्तरेणापि निमित्तशब्दं निमित्तो गम्यते*"[99] यद्यप्यत्र भाष्यकृता लक्षणाया नामसङ्कीर्तनं न क्रियते तथापि द्विर्वचने इत्यनेन द्विर्वचननिमित्तार्थस्य प्रतीतिर्लक्षणयैव सम्भवति। अयमेवाभिप्राय एतेषां प्रतीयते। कैयटस्तु- "*तत्र द्विर्वचननिमित्तत्वात्तद्रूपारोपेणाजेव द्विर्वचनमुच्यते*"[100] द्विर्वचनस्य निमित्तत्वादेव तद्रूपारोपेण 'अचः' एव द्विर्वचनत्वमुच्यते। नागेशोऽपि पतञ्जल्युदाहृतोदाहरणान्याधृत्य निमित्तार्थो लक्षणागम्य इत्युक्त्वा महाभाष्यकाराभिमत्यं पुष्यति। "*दृष्टान्तबलेन तथैव लाभात्*"[101] महाभाष्यकृदस्मिन्नेव सूत्रे द्वित्वनिमित्तकेऽचि सति द्विर्वचनत्वस्यारोपसिद्धये त्रिसङ्ख्याकान् लाक्षणिकप्रयोगान् प्रदर्शयति-"*१-दधित्रपुसं प्रत्यक्षो ज्वरः, २-नड्वलोदकं पादरोगः, ३-आयुर्घृतम्*"[102] तत्र प्रथमे दधित्रपुसं प्रत्यक्षो ज्वर इत्यस्य तात्पर्यं भवति, अवस्थाविशेषसस्यार्थान्मासविशेषस्य दधि प्रत्यक्षं ज्वरो वर्तते। इति मुख्यार्थो बाध्यते, यतोहि दधि ज्वरो न भवितुमर्हति। एतस्मात् कारणाल्लक्षणया दधित्रपुसं ज्वरनिमित्तं भवतीत्यर्थो सम्पद्यते। द्वितीयेऽपि नड्वलोदकं पादरोगो भवितुं न शक्नोति, अतो लक्षणया नड्वलोदकं पादरोगनिमित्तं भवतीति लक्षणया बुध्यते। तृतीयेऽपि 'आयुर्घृतम्' आयुषो निमित्तमिति गम्यते। "*पतञ्जलिना दृष्टान्तरूपेणोपस्थापितेषु एतेषूदाहरणेषु लक्षणाऽमन्यत। एतेषु स्थलेष्वव्यभिचारेण कार्यजनकत्वरूपप्रयोजनमङ्गीकृतम्*"[103] द्विर्वचनेऽचि च इति सूत्रस्य व्याख्याने सिद्धान्तकौमुद्यास्तत्त्वबोधिनीटीकायामपि पतञ्जलेरिदमेवाभिमत्यं प्रकाशितं विद्यते। अचा सामानाधिकरण्यलाभाय द्विर्वचनशब्दस्य तन्निमित्ते

---

99 महाभाष्यम्, १/१/५९

100 तत्रैव, प्रदीपटीका, १/१/५९

101 तत्रैव, उद्योतटीका, १/१/५९

102 तत्रैव, ६/१/३२

103 व्याकरणतन्त्रस्य काव्यशास्त्रे प्रभावः, पृ० १४६

लक्षणा स्वीक्रियते।[104] अतोऽचा सह सामानाधिकरण्यस्य सिद्धिस्स्यात्तदर्थं द्विर्वचनशब्दस्य द्विर्वचननिमित्तार्थे लक्षणा स्वीक्रियते। एवम्भूतेन द्विर्वचनेऽचि च, इति सूत्रस्य व्याख्यानेन निष्कर्षो निस्काश्यते यल्लक्षणा अष्टाध्यायीकारेण महाभाष्यकारेण च स्पष्टशब्दैः स्वीकृता विद्यते। द्वयोरपि विवेचनयोर्लक्षणास्वरूपस्य निमित्तस्य प्रयोजनस्य स्पष्टा व्याख्यासमभ्यधीयत। अत उभाभ्यामप्याचार्याभ्यां लक्षणाया स्वीकारः क्रियते ।

**वाक्यपदीयकर्तुर्मते लक्षणास्वरूपम् –**

वाक्यपदीयकारेणापि शक्तित्वेनेकैव शक्तिस्स्वीक्रियते सा च पुनर्दिधा सिद्ध्यसिद्धिभ्यां व्यभज्यत। एतस्यैव समुपजातभेदस्य नागेशः कालान्तरे प्रसिद्धाऽप्रसिद्धात्वेन व्याख्यानमकरोत्। सिद्धिनिमित्तकश्च शब्दो मुख्यत्वेनाभिधीयतेऽसिद्धिनिमित्तकश्च शब्दो गौणत्वेनाभ्यधीय। तदाह भर्तृहरिः-

*"शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते।*

*स मुख्य इति विज्ञेयः स्वरूपमात्रनिबन्धनः॥"*[105]

आचार्यभर्तृहरिरेकामेव शक्तिं मत्वा द्विप्रकारकानर्थान् प्रत्यपद्यत। एतस्मात् कारणादत्र व्याख्याते यत् सर्वशक्तिमता शब्देन सर्वविधा अर्था दीयन्ते न तत्र काचिदपि क्षतिर्विद्यते।

*"सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।*

*प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपवर्ण्यते"॥*[106]

सर्वशक्तिमति शब्दे एव प्रसिद्धिद्वारा मुख्यार्थो भाव्यतेऽप्रसिद्धिद्वारा चामुख्यार्थो भाव्यते। अमुख्यार्थश्चात्र गौणपदार्थः। किन्तु शक्तेरेकत्वमेव बोधयन्ति वैयाकरणाः। न त्वर्थभेदाच्छक्तिभेदो भावयन्ति शाब्दिकाः। शक्तित्वेकैव सा चाभिधाख्यैव तदत्र प्रतिपादयत्याचार्यः-

---

[104] वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनीटीका, पृ० ३४७

[105] वाक्यपदीयम्, २/२६५

[106] तत्रैव २/२५३

*“यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।*

*तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः”।।*[107]

अत्रत्यव्याख्यानमाचार्यरघुनाथशर्मा करोतीत्थम्, तेन च स्पष्टा प्रतिपत्तिर्जायते “***यथा गोत्वजात्यभिधानपुरस्सरं येन गोशब्देन सास्नादिमान् पिण्डोऽभिधया वृत्त्याऽवबोध्यते तथा स एव गोशब्दस्तयैव वृत्त्या अर्थभेदेन स्वरूपभेदेऽप्यभिधात्वेनैकया वाहीकपदार्थस्याभिधानेऽपि व्यवस्थितो भवति। व्यवस्था चात्रार्थभेदेऽपि शक्तिभेदे चापि शब्दैक्यरूपो नियमस्तां प्राप्तः। एतेनात्रैकशब्ददर्शनम्, शक्तिस्वरूपभेदेऽप्यभिधात्वेन एकैव चाभिधावृत्तिः, नास्ति लक्षणा नाम शुद्धा गौणी वा वृत्त्यन्तरम्। अभिधायाश्च प्रसिद्ध्यप्रसिद्धिनिमित्तकश्च गौणमुख्यविभागरूपः शब्दोपचार इति सर्वं सूचितम्”।***[108] एवम्भूतं व्याख्यानं कृत्वा शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तक एव जायत इति सारल्येन साधुरीत्या च प्रादर्शयत। एकस्यैव शब्दस्य बह्वर्थानां प्रत्यायने सामर्थ्यमुपेयते इति सिद्धान्तस्य स्वीकृतेऽपि प्रसिद्धिमप्रसिद्धिञ्चाश्रिय गौणमुख्यविभागव्यवस्थापने न काचित् हानिस्तदनया कारिकया प्रोच्यते-

*“अनेकार्थत्वमेकस्य यैः शब्दस्यानुगम्यते।*

*सिद्ध्यसिद्धिकृता तेषां गौणमुख्यप्रकल्पना”॥*[109]

तस्माद्यैरपि शब्दस्यैकस्यानेकार्थत्वमवबुध्यते तत्सर्वम्।

**शब्दानां गौणमुख्यार्थविभाजनम् –**

आचार्यभर्तृहरिः स्पष्टां प्रतिपत्तिं कारयति यद्येषां शब्दानामन्यशब्दप्रयोगकारणाद् अर्थप्रकरणादिरूपप्रयत्नैर्मुख्यार्थाद् भिन्नस्य अर्थस्य प्रबोधनाय प्रयोगो भवति तेऽप्रसिद्धा इति मन्यन्ते। अप्रसिद्धशब्दानां गौणार्थावबोधने हठात्प्रवृत्तिस्सञ्जायते।

---

107 तत्रैव, २/२५२

108 अम्बाकर्त्री, पृ० ३३२

109 तत्रैव, २/२६३

*“यस्त्वन्यप्रयोगेण यत्नादिव नियुज्यते।*

*तमप्रसिद्धं मन्यन्ते गौणार्थाभिनिवेशिनम्”॥*[110]

अत्रत्यव्याख्याने प्रतिपादनं विद्यते यद्गौणार्थस्य बोधस्तु प्रयत्नेनैव कार्यते,एतस्मादिदं भावयितुं शक्यते यद्गौणपदार्थाभिधेयत्वं यत्नोपपाद्यमेव। यत्नानामभावे गौणपदार्थोऽसम्भवी।निमित्तानि च कानि कीदृशानि यैर्गौणार्थोऽवबुध्यते तेषामत्र प्रदर्शनं क्रियते। लक्षणा प्रयोजकनिमितविषये भर्तृहरिणाऽन्याचार्याणामपि मतानि स्व्यक्रियत। तद्यथा- तत्रादौ वक्ति यदस्ति केषुचिन्मते न्यूनाधिक्यभावरूपनिमित्तमिति, किन्तु भर्तृहरिस्तन्मतमुपस्थापयन् खण्डयति ।[111] किमर्थं न सम्भवति तथाभूता व्यवस्था- आपेक्षिकत्वादस्याव्यवस्थिततत्वमेवेति तस्मान्न गौणत्वमुख्यत्व-व्यवहारः। सादृश्यवर्णनङ्करोति-

**“जातिशब्दान्तरेणापि जातिं यत्र प्रयुज्यते।**

**सम्बन्धिसदृशाद्धर्मात् तं गौणमपरे विदुः”॥**[112]

अत्रत्यव्याख्याने वर्ण्यते यद् गोत्वादिजातिप्रवृत्तिनिमित्तकः शब्दो गोत्वादिजातिं विनापि वाहीकादौ सम्बन्धिसदृशाद्धर्मात् = गोत्वादिजातेः, आश्रयत्वेन सम्बन्धिनी गोव्यक्तिः, तस्य धर्मो जाड्यादिः, तत्सदृशो धर्मो वाहीकेऽतस्तं वाहीकादिगतं जाड्यादिधर्मं निमित्तीकृत्य प्रयुज्यते तादृशं सादृश्यं निमित्तीकृत्य वाहीकादौ प्रयुज्यमानो गवादिशब्दः परैर्गौण इति ज्ञायते। गोत्वजातिमन्तरेणापि गोशब्दः स्वाश्रयव्यक्तिगतजाड्यादिगुणसादृश्यात् वाहीके नियुज्यतेऽतस्तत्र सादृश्यमेव गौणव्यवहारे निमित्तत्वमुपयाति। उच्यते च **“साहित्यिकैर्यदुपचारो हि नामात्यन्तं विशकलितयोः पदार्थयोः सादृश्यातिमहिम्ना भेदप्रतीतिस्थगनमात्रम्”**।[113] **“उभयरूपा चेयं शुद्धा,**

---

[110] तत्रैव, २/२६६

[111] *नैवाधिकत्वं धर्माणां न्यूनता वा प्रयोजिका। आधिक्यमपि मन्यन्ते प्रसिद्धेर्न्यूनतां यथा॥* तत्रैव, २/२७१

[112] तत्रैव, २/२७३

[113] काव्यप्रकाशे चतुर्थोल्लासः, पृ० ५९

**उपचारेणामिश्रितत्वात्"**।[114] काव्यप्रकाशकारस्य मतमपि तथैव शुद्धात्वमुचारेणामिश्रितत्वम्, उपचारेणमिश्रितत्वं गौणीत्वम्। एवम्भूतव्याख्यान काव्यप्रकाशकारेणापि कृतं विद्यते।

**अध्यारोपात्मकविपर्यासे गौणी –**

अर्थविपर्यासरूपशक्तीनामपयङ्गीकरणं लक्षणाऽर्थाद्गौणनिमित्तेषु व्याख्यातं विद्यते वाक्यपदीयकारेण तद्यथा विपर्यासस्य व्याख्या क्रियते- विपर्यासश्च द्विधा। अध्यवसायात्मकोऽध्यारोपात्मको वा। यस्मिन् स्थानेऽध्यवसायात्मको विपर्यासस्तत्र गौणार्थे स निमित्तत्वं नोपयाति। अध्यारोपाख्यो यो विपर्यासः स निमित्ततामुपगच्छति। तदाह – **"विपर्यासादिवार्थस्य यत्रार्थान्तरतामिव। मन्यते स गवादिस्तु गौण इत्युच्यते क्वचित्"॥**[115] तस्मादेव कारणात् अतस्मिंस्तद्बुद्धिरित्यध्यारोपरूपो विपर्यास एव शब्दस्य गौणत्वव्यवहारे निमित्तमिति। रघुनाथशर्मणा विपर्यासस्येत्थं व्याख्यानं व्यधीयत। एवं प्रकारेण गौणत्वव्यवहारस्तदैव विपर्यासे सम्भवति यदा अध्यारोपनिमित्तको विपर्यासो, न त्वध्यवसायरूप इति। रूपनिमित्तकः शक्तिनिमित्तको वा गौणमुख्यव्यवहारो भवति, इत्यपि कथ्यते। तद्यथा यत्र सास्नादिमदाकृतिविशिष्टः पदार्थोऽवलोक्यते। तत्र उच्चारितो गोशब्दो मुख्यार्थस्य वाचकः, तथा चान्यत्र स गौण इत्यर्थको भवतीति। शक्तौ चापि गौणमुख्यव्यवहारो यदि दोहनवहनासाधनत्वरूपा शक्तिर्दृश्यते तदैवम्भूतशक्तिसमन्वितो गोशब्दो मुख्येति निगद्यतेऽन्यत्राभावे गौण इति व्यवह्रियते।[116]

आशङ्क्यतेऽत्र यद्गोगतास्वनेकशक्तिषु सत्स्वेव तस्य प्रयोगो वाहीकेऽपि जायते चेद्गौणमुख्यविभागे आपत्तिस्स्यात्। एवम्भूते सति गोशब्दे गौणमुख्यविभागस्यापत्तिर्जायते तदेव समाधीयते - ***"श्रुतिमात्रेण यत्रास्य***

[114] तत्रैव, पृ० ५७

[115] वाक्यपदीयम्, २/२७४

[116] *नियताः साधनत्वेन रूपशक्तिसमन्विताः। यथाकर्मसु गम्यन्ते सीरासिमुसलादयः॥* तत्रैव, २/२/२७५

*तादर्थ्यमवसीयते। मुख्यं तमर्थं मन्यन्ते गौणं यत्नोपपादितम्"॥*[117] यत्रत्यस्थानेषु वाक्यानां प्रयोगे सति श्रवणमात्रेणार्थादर्थप्रकरणापेक्षया विनैव निश्चीयतेऽर्थः। एवम्प्रकारकार्थोऽर्थप्रकरणादिनिमित्तविरहितः सन् श्रुतिमात्रेणावबुद्धो मुख्यार्थ इति निगद्यते। वैयाकरणानामिदमेव मतम्। यत्रत्येषु वाक्यप्रयोगेषु शब्दश्रवणमात्रेणार्थप्रत्यायकत्वाभावस्तत्रत्ये स्थले अर्थप्रकरणादिरूपैर्यत्नैरमुख्यार्थरूपो गौणार्थ इत्यवगम्यते। एवम्रीत्या गौणार्थबोधाय येषां निमित्तानां वर्णनं हरिणा कृतम्।इदानीं संक्षेपेणात्र प्रदीयन्ते। तद्यथा- सप्तसङ्ख्यापरिमितानि च विद्यन्ते तानि १- अर्थः २- प्रकरणम् ३-शब्दान्तरसन्निधानम् ४-न्यूनाधिकभावः, ५- सादृश्यम्,६- विपर्यासः,७- रूपशक्तिः।[118] अत्रोच्यते यदर्थप्रकरणमात्रं न गौणमुख्यविभागे निमित्तम्। पुरारादित्यादि शब्दैरर्थप्रकरणादिना प्रतीयमानस्यार्थद्वयस्यापि मुख्यत्वेनातिप्रसङ्गात्। न्यूनाधिकभावस्यापि न निमित्तत्वम् तस्यापेक्षिकत्वेनाव्यवस्थितत्वात्। सादृश्यस्यापि तत्रानिमित्ततैव, काश्यपप्रतिकृतिः काश्यप इत्यादौ कन् लुबन्ते सादृश्यरूपगौणनिमित्तयुक्तेऽपि गौणत्वसद्भावात्। तदर्थे तस्य व्याकरणेन साधुत्वबोधनात्तदर्थे तस्य मुख्यत्वात्। परिशेष्यात् प्रसिद्ध्यप्रसिद्धिसहिताः प्रकरणादयः प्रकरणादिसहिते वा प्रसिद्ध्यप्रसिद्धी, अध्यारोपलक्षणो विपर्यासः, रूपशक्तिरिति चत्वारः पक्षाः गौणमुख्यत्वयोः निमित्तत्वेनात्र गृहीताः। एतैरेव चतुर्भिः शब्दसम्बन्धी गौणमुख्यव्यवहारो भवति, अर्थसम्बन्धी वा गौणमुख्यव्यवहारो भवति। अर्थोपचारो द्विविधः- वाच्यार्थस्य गोत्वादेर्वाहीकादौ उपचार आरोपो जाड्यादिगुणमूलक एकः, अपरस्तु गोशब्दस्वरूपस्य वाहीके तद्गुणमूलक आरोपः। एवम्भूतो द्विविधोऽप्यर्थाश्रयत्वादर्थोपचारः। अत्र तूभयोरप्यर्थयोः शब्दशक्यत्वेऽपि शब्दस्य तत्तदर्थे प्रसिद्ध्यप्रसिद्धिभ्यां गौणमुख्यव्यवहार इति शब्दोपचारः। एवम्भूतं व्याख्यानमाचार्येण भर्तृहरिणा कृतम्। गौणपदार्थमादाय किन्तु क्वचिदप्याचार्येण लक्षणा इत्यस्याः शक्तेर्नामसङ्कीर्तनं नाकारि। व्याख्यानेनावबुध्यते यथा दर्शनान्तरेषु शब्दशक्तीनां व्याख्यानावसरेषु

---

117 तत्रैव, २/२७८

118 तत्रैव, अम्बाकर्त्रीटीका, पृ० ३५०

तत्तत्सम्प्रदायीयैराचार्यैर्यथा व्यक्रियत गौणी लक्षणा तथैवात्रापि व्याख्यानं गम्यमेव न साक्षाच्छब्दप्रतिपादिता। अखण्डवाक्यार्थस्य माहात्म्याद् यद्यपि वैयाकरणेभ्यो लक्षणादेः स्वतन्त्रसत्ताया अभ्युपगमस्यावश्यकतैव नास्ति। तथापि यदानीन्तने पदपदार्थयोर्विचारणा भवति ततस्त्ये स्थले एभिरावश्यकताऽनुभूयते। एतदर्थं एभिरपि लक्षणाया विचारः प्रास्तावि। भर्तृहरिस्तु मुख्यगौणपदार्थयोर्व्याख्यानमप्यकारि। तद्व्याख्यानमनुसृत्य प्रतिपाद्यते यत् गौणीवृत्तिरेव गच्छता कालेन लक्षणा इति नाम्ना प्रसिद्धिमगात्।

मञ्जूषासु लक्षणाविमर्शः –

आचार्यनागेशभट्ट एव स्पष्टरूपेण मञ्जूषात्रय्यां लक्षणायाश्चर्चां कृतवान्, तथा च समीचीनयुक्तिभिर्विचारमकरोत्- "***ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद इति चेत्? न। योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्मदादीनां तदभावात्"।***[119] वैयाकरणानां मते लक्षणाया अभाव एव इति परम्परा विद्यते सा च परम्परा परवर्तिभिरपि वैयाकरणैः पालिता पाल्यते। किन्तु नागेशभट्टस्यैव विचारेषु सा लक्षणा योगिभ्यो न विद्यते। किन्त्वसमादृशां सामान्यानां जनानां कृते विद्यत एव। लक्षणा नास्तीति योगिनां तपःपूतानां महर्षीणां कृते जनसामान्यानां कृते तु तस्या आवश्यकत्वात्, ।

लौकिकव्यवहारान् सञ्चालयितुं मञ्जूषाकारो लक्षणां वाञ्छति। एतस्मात् सर्वेषां सर्वार्थवाचकत्वेऽपि न लक्षणा सङ्क्षयति, क्षयो लक्षणाया योगिनां कृते एव। तथाभूताया लक्षणाया कीदृशं स्वरूपं स्यादिति बहुविधमतानि प्रदर्श्य स्वमतं समस्थापयत् तत्रादौ- "***किञ्चान्वयाद्यनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेनोद्बुद्ध-शक्तिसंस्कारतो बोधे लक्षणेति व्यवहारात्"।***[120] पक्षेस्मिन् यत्रत्ये स्थलेऽन्वयादेरनुपत्तिज्ञाने सति शक्यत्वरूपेण ज्ञातो योऽर्थस्तस्य सम्बन्धज्ञानादुद्बुद्धो यो शक्तिविषयकसंस्कारस्तेन योऽवबोधः, स बोधो

---

119 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९०

120 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९०

लक्षणया भवतीति व्यवहारः सञ्जायते। एतादृशं लक्षणायाः स्वरूपं विचारयति।

**लक्षणाप्रवृत्तौ बीजम् –**

शब्दसम्प्रदाये तात्पर्यस्योपपत्तिदशायां जायमानायामेवाभिधा-मुखेन शब्दव्यापारेणार्थबोधो भाव्यते। यादृशस्थले वक्तुस्तात्पर्यावबोधे बाधा समायति तदात्वे लक्षणायै साक्षादवसरः मिलति। तादृशी बाधा तात्पर्यानुपपत्त्याख्या, तात्पर्यस्वरूपं कीदृगिति प्रतिपादयति- तत्स्वरूपञ्च वक्तुरिच्छात्वम्। "***एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा-तात्पर्यम्"।***[121] ***"वस्तुतस्तु तात्पर्यानुपपत्तिरेव तद्बीजम्, अन्यथा 'गङ्गायां घोष' इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिः, तावताप्यन्वानुपपत्तिपरिहारात्"।***[122] ***"वस्तुतस्तु तात्पर्यानुपपप्रतिसन्धानमेव तद्बीजम्"***[123] एतस्मात् तात्पर्यानुपपत्तिरूपबीजस्य स्वीकारे सति 'गङ्गायां पापी गच्छति' एतद्वाक्ये वक्तुस्तात्पर्यानुपपत्तिवशादेव लक्षणया येन पूर्वं पापमाचरितं स तच्छुद्धये गङ्गायां स्नानार्थं गच्छति। अन्वयमात्रस्यानुपपत्तौ सत्यामत्र गङ्गापदस्य नरके लक्षणायाः स्वीकारादन्वयस्तूपपद्यत एव, किन्तु वक्तृतात्पर्यानुत्पत्तित्वादेवात्र तात्पर्यस्यानुपपत्तिः स्वीक्रियते। 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' एतस्मिन्नप्युदाहरणे यद्यन्वस्यानुपत्तिस्स्वीक्रियते तदानीन्तने तात्पर्यन्नोत्पद्यते, यतोह्यन्वयानुपपत्तिस्वीकारात्तु दिवसेऽपि कादाचिन्नक्षत्रदर्शने सति वाग्व्रतकर्मकं विसर्जनं सम्भाव्यते। किन्तु वक्तुस्तात्पर्यं न दिवसे वाग्विसर्जनरूपम्, नक्षत्रस्य दृश्यमाने सति वाक्कर्मकं विसर्जनं रात्रावेव कार्यम्, । व्याख्यानविषयीभूतं तात्पर्यमादायैव लक्षणाशब्दशक्तेरर्थबोधो जायते। तस्मादाचार्यस्य नागेशभट्टस्य मते तात्पर्यानुपपत्तिरेव लक्षणायाः प्रवृत्तौ कारणत्वेनाभ्युपेयते।

---

121 परमलघुमञ्जूषा, पृ० ९४

122 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९१

123 परमलघुमञ्जूषा,पृ० ५०

**लक्षणाप्रवृत्तावन्ययानुपपत्तिविचारः–**

अन्वयानुपपत्तेरर्थोऽन्वयस्याप्राप्तिरन्वयस्यासङ्गतिः। यदानीन्तने वाक्यस्थानां पदानामर्थदृष्ट्याऽन्वयो न सम्भवति। अर्थादर्थस्यासङ्गतिर्भवति। तादृशस्तलेऽन्वयानुपपत्तिं स्वीकृत्य लक्षणाद्वारा तत्सम्बन्ध्यन्यार्थमादाय तस्य वाक्यस्योपपत्तिं समादध्मः। तद्यथा- 'गङ्गायां घोषः' गङ्गापदस्य वाच्यार्थो जायते भगीरथरथखातावच्छिन्नजलप्रवाहरूपः। एतस्मिन् वाच्यार्थे जलप्रवाहे घोषो न सम्भाव्यतेऽतोऽन्वयस्यानुपपत्तिर्जायते। अत्र चान्वयानुपत्तिराधाराधेयभावसम्बन्धाख्या, एतस्मात् तदुपपत्तयेऽस्माभिस्तत्सम्बन्धितीरे लक्षणा संविधीयते। इत्थं क्रियमाणे सति गङ्गायास्तटे घोष इत्यादीनां वाक्यानामुपपत्तिर्जायत।

**अन्वयानुपपत्तिरूपबीजस्वीकारे दोषाः –**

अन्वयानुपत्तिरेव लक्षणायां बीजमिति स्वीक्रियते। तदानीन्तने तत्रातिव्याप्तिरूपो दोषः समापतति। अन्वयसिद्धिदशायामपि वाक्यार्थस्य विश्रान्तिर्न जायते। यथा 'गङ्गायां घोष' इत्यस्मिन्नेवोदाहरणे गङ्गापदस्य तटत्वरूपार्थे लक्षणा भवति, तद्विहाय तथैव घोषपदस्य मकरे लक्षणां स्वीकृत्यान्वयोपपाद्यते, किन्तु वक्तुरेवम्भूतस्य तात्पर्यस्याभावाद् वाक्यस्य विश्रान्तिर्न जायते, एवमेव 'गङ्गायां पापी गच्छति' इत्यत्राप्यन्वयानुपपत्तिस्वीकारे सति गङ्गापदस्यार्थो नरकमिति भवति, किन्तु लक्षणयैवम्भूतार्थे न वक्तुस्तात्पर्यम्। ***अन्यथा "गङ्गायां घोष' इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिस्तावताऽप्यन्वयानुपपत्तिपरिहारात्। गङ्गायां पापी गच्छतीत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च"।***[124] अतो लक्षणायामन्वयानुपत्तिस्वीकारे सति महाननर्थः स्यात्। तस्मादेव तात्पर्यानुपपत्तिः स्वीक्रियते। "***अस्माकं तु*** 'गङ्गायां पापी गच्छति' ***भूतपूर्वपापावच्छिन्नलक्षकत्वे तात्पर्यान्न दोषः। नक्षत्रं दृष्ट्वा वाचं विसृजेद्,***

124 परमलघुमञ्जूषा, पृ० ५०

***इत्यत्रान्वयसम्भवेऽपि तात्पर्यानुपपत्त्यैव लक्षणास्वीकारात्"।***[125] तात्पर्यानुपपत्तिं स्वीकारयति। नव्यवेदान्तिभिरपि तात्पर्यानुपपत्तिबीजवती लक्षणा स्व्यक्रियत। सा च अत्रैव व्याख्याता। तात्पर्यानुपपत्तिरेव बीजमिति धर्मराजाध्वरीन्द्रो भावयति। महाभाष्यकृताऽपि पूर्वोक्तारोपस्य चतुर्षु निमित्तभूतेषु सम्बन्धप्रकारेषु तात्पर्यानुपपत्तिरूपैव लक्षणा व्याख्यत। पाणिनिव्याकरणे प्रमाणसमीक्षायां निगदितम्- "***उपरोक्तलक्षणाया बीजं वैयाकरणैरवश्यमेव विवेचनीयम्, अन्यथा आरोपस्यावसर एव न स्यात्। तत्र च पूर्वोक्तभाष्येण तात्पर्यानुपपत्तेस्तद्बीजत्वं लभ्यते। यतोहि चतुर्भिः प्रकारैरतस्मिन् स इत्येतद् भवति, इत्यत्र चतुर्थप्रकारस्योदाहरणम् 'यष्टीः प्रवेशय' इत्युक्तम्, तत्रान्वयानुपपत्तिर्नास्त्येव। लघुमञ्जूषाकृतापि इयमेव सरणिरादृताऽस्ति"।***[126] आचार्यभर्तृहरिणापि तात्पर्यानुपपत्तिः स्वीकृता इति प्रतिभाति- "***काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः। उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति"॥***[127] रघुनाथशर्मणाऽपि व्याख्यातेयं कारिका तात्पर्यानुपपत्तित्वेन। "***यद्यपि सर्पिषः काकेभ्यो रक्षणमत्र विशेषरूपमेव विहितम्, तथापि दध्युपघातकमात्रनिवारणफलकमेव तात्पर्यतः पर्यवस्यतीति सामान्यरूपमेतदेव विशेषाभिधायकस्य प्रकृतवाक्यस्य प्रयोजकम् = प्रयोगनिमित्तम्, बोध्यम्"।***[128] यद्यपि तात्पर्यानुपपत्त्यन्वयानुपपत्त्योरुभयोः स्वीकारः कर्तुं शक्यते तथापि तात्पर्यानुपपत्तिमात्रस्य लक्षणायां कारणत्वेन स्वीकारे सत्यभीष्टार्थो गम्यते। अतो नानुगमकद्वयस्वीकरस्यावश्यकता, तात्पर्यानुपत्तावेवान्वयानुपपत्तिरन्तर्भवति।

अन्वयानुपपत्तिकारणककार्याणि तात्पर्यानुपपत्तौ स्वीकृतायां सत्यां भवितुं शक्नुवन्ति। अत आह- "***एकानुगमकस्वीकारेण निर्वाहेऽनेकानुगमकस्वीकारे गौरवाच्च"।***[129] लक्षणा तदैव भवति यदानीन्तने

---

[125] तत्रैव, पृ० ५०

[126] पाणिनिव्याकरणे प्रमाणसमीक्षा, पृ० २३६

[127] वाक्यपदीयम्, २/३१२

[128] तत्रैव, अम्बाकर्त्रीटीका, पृ० ३७७

[129] परमलघुमञ्जूषा, पृ० ५०

तत्र रूढिः प्रयोजनं वा भवति। तस्माद्वक्ति ग्रन्थकृत्– ***"एवं रूढिः प्रयोजनान्यतरदपि तत्कारणमनुभवबलात्"।*** [130] ***"त्वन्वयव्यतिरेकाभ्यां रूढिप्रयोजनान्यतरदपि तत्कारणं बोध्यम्, अनुभवबलात्"।***[131] एतेन प्रतिपादितलक्षणास्वरूपेण निश्चीयत यन्नागेशभट्ट आलङ्कारिकैः प्रभावितो वर्तते- मुख्यत्वेन तु मम्मटाचार्येण, यतोहि तद्वदेव तेन लक्षणा न्यगद्यत। तद्यथा- ***"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपितक्रिया"॥***[132] अर्थात् तत्र तिस्रः परिस्थितयो भवन्ति। १-मुख्यार्थस्य बाधः, (अन्वयानुपपत्त्या,तात्पर्यानुपपत्त्या) २- मुख्यार्थेन सह लक्ष्यार्थस्यान्यार्थस्य वा सम्बन्धत्वात्। ३-रूढ्या प्रयोजनविशेषेण वा, यया शब्दशक्त्या अन्यार्थो लक्ष्यते, स मुख्यार्थस्थ शब्दस्याऽऽरोपितो व्यापारो लक्षणाऽभिधीयते। अतो मुख्यार्थस्य बाध, लक्ष्यार्थस्य मुख्यार्थेन सह योगः, रूढिप्रयोजनान्यतरत् कारणम्, एवम्भूतायां परिस्थितावेव लक्षणा भवति।

**लक्षणाविभागाः –**

नैयायिकश्शक्यसम्बन्धरूपा लक्षणा स्वीक्रियते, तस्मान्नैयायिकाननुसरन्नेवात्र लक्षणाया विभाजनं विद्यते।

१-गौणी २-शुद्धा ३-अजहत्स्वार्था ४- जहत्स्वार्था ५-जहदजहल्लक्षणा ६-लक्षितलक्षणा ७- प्रयोजनवती ८-निरूढा। एवं विभाजनं कृतं विद्यते, तेष्वादौ गौणीविचारणा क्रियते।

**गौणी-** ***"स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी"।***[133] शक्यार्थनिरूपितं यत्सादृश्यम्, तदाश्रयत्वसम्बन्धेन शक्यार्थसम्बन्ध्यर्थस्य बोधिका लक्षणा गौणीति कथ्यते। शक्यार्थस्य गुणकृतं सादृश्यं जायते। गुणकृतसादृश्ये स्वीकृते सति गुणादागता गौणीति कथ्यते।

---

130 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९१

131 वैयाकरणसिद्धान्तमञ्जूषा, पृ० २२

132 काव्यप्रकाशद्वितीयोल्लासः, पृ० ५१

133 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १९९

यथा- 'सिंहो माणवकः' अत्र सिंहपदं स्वनिष्ठशौर्यादिगुणकृतेन सादृश्यसम्बन्धेन स्वसम्बन्धिनं माणवकं प्रबोधयति। एतस्मादेव सिंहपदस्य लक्षणा माणवकेऽभवत्।

२-*शुद्धा* – "*तदतिरिक्तसम्बन्धेन तत्प्रतिपादिका शुद्धा"।*[134] शक्यार्थनिरूपितसादृश्यातिरिक्तसम्बन्धेन शक्यसम्बन्धिनोऽर्थस्य प्रत्यायिका शुद्धेति। यथा- 'गङ्गायां घोषः' अत्र गङ्गापदस्य यः शक्यार्थप्रवाहरूपस्तस्य सम्बन्धी यस्तटरूपार्थः, तत्रैव लक्षणा। अत्र शक्यार्थस्य जलप्रवाहस्य तटे सादृश्यभिन्नः सामीप्यसम्बन्धोऽतः सामीप्यसम्बन्धेन सम्बन्धिनोऽर्थस्य तटरूपस्य प्रत्यायिका लक्षणा शुद्धेति न्यगद्यत। गौणीशुद्धयोः प्रकारान्तरेण भेदद्वयं विद्यते- अजहज्जहस्वार्थेति।

३- ***अजहत्स्वार्था** – "**शक्यार्थापरित्यागेनेतरार्थलक्षणामाद्या, तदपरित्यागश्च शक्यार्थस्य येन केनापि रूपेणलक्ष्यार्थान्वयिनाऽन्वयित्वम्"।***[135] साहित्यशास्त्रे लक्षणाया भेदोऽयमुपादानेति पदेन ज्ञायते। अर्थाच्छक्यार्थेन सह यत्र शक्यसम्बन्धिनोऽन्यार्थस्य बोधो भवति, तत्रैवाजहत्स्वार्था भवति। तथा च शक्यार्थस्य केनचिदपि रूपेण लक्ष्यार्थस्य यो सम्बन्धी तेन सह सम्बन्धः स्यात्। तेन शक्यलक्ष्यो'भयसाधारणरूपेण लक्ष्यार्थान्वयिना शक्यार्थान्वयित्वस्यैव पदार्थत्वेनार्थादत्यागपदार्थत्वेन।

**छत्रिणो यान्ति-** छत्रिणो यान्तीत्यत्रैकसार्थवाहित्वेन रूपेण यथा लक्ष्याणामच्छत्रिणां गमनेऽन्वयो भवति तथैव शक्यानां छत्रिणामपि। एवञ्च शक्यार्थापरित्यागेन परार्थबोधेनाजहत्स्वार्था।

**कुन्तान् प्रवेशय -** कुन्तधारिणि पुरुषे संयोगेन कुन्तो विशेषणम्। एवञ्च विशिक्रियायां यथा लक्ष्याणां कुन्तधारिणामन्वयस्तथैव कुन्तानामपि कुन्तवद्विशेषणतयाऽन्वयो भवति।

**काकेभ्यो दधि रक्ष्यताम्-** इत्यादिष्वपि काकपदस्य दध्युपघातकत्वावच्छिन्ने लक्षणया लक्ष्यतावच्छेदकदध्युपघातकत्वरूपेण विडालादीनामिव

---

[134] तत्रैव, पृ० १९९,

[135] तत्रैव, पृ० १९९

काकस्याप्यन्वयादेतेषु सर्वेषु अजहत्स्वार्थेति बोध्यम्। 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र कश्चिद्विशेषः। काकपदस्य दध्युपघातके लक्षणा भविष्यति। तदा काकरूपशक्यार्थस्य त्यागे सत्यजहत्स्वार्था कथमिति? अस्य समाधानमित्थन्दीयते- अत्र काकपदस्य दध्युपघातके लक्षणा न कार्या। प्रत्युत काकाकाकसमुदाये कार्या। शक्यार्थस्य लक्ष्यार्थेन सह दध्युपघातकत्वमेकक्रियाकर्तृत्वञ्च सम्बन्धः। दध्युपघातकत्वावच्छेदेन काकसमुदाये काकत्वारोपरूपा लक्षणापि भविष्यति। दध्युपघातकत्वेनोक्तसमुदाये काकत्वस्यारोपोऽपि सेत्स्यति। काकादिगतदध्युपघातकत्वातिशयप्रतीतिप्रयोजनम् इति सरलाटीकायामाचार्यरामप्रसाद- त्रिपाठिना व्याख्यातम्।

**जहत्स्वार्था-** ***"स्वार्थपरित्यागेनेतरार्थलक्षणमन्त्या।तत्परित्यागश्च शक्यार्थस्य केनापि रूपेण लक्ष्यार्थान्वयिनाऽनन्वयित्वम्। अतो गां वाहीकं पश्य, इत्यादौ न दोषः। अत्र गोसदृशे लक्षणायामपि न गोस्तदन्वयिदर्शनक्रियाऽन्वयित्वम्"।***[136] स्वार्थपरित्यागपूर्वकमितरार्थ-बोधिकात्वं जहत्स्वार्थात्वम्।

शक्यार्थस्य केनचिदपि रूपेण लक्ष्यार्थस्यान्वयिनि पदार्थेऽन्वयित्वाभाव एव। तात्पर्यमिदं यत्र क्रियादौ लक्ष्यार्थस्यान्वयो भवति, तस्यामेव क्रियायामन्वयाभावादर्थस्य परित्यागे सत्यजहत्स्वार्था। अत्र गोपदस्य गोसदृशे लक्षणा स्वीक्रियते, ततोऽपि गोपदस्य यः शक्यार्थस्तस्य दर्शनक्रियायामन्वयो न भवति। लक्षितगोसदृशवाहीकपदार्थस्यैव दर्शनक्रियायामन्वयो भवति।

**जहदजहल्लक्षणा-** "***विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणायां जहदजहल्लक्षणेति व्याहरन्ति वृद्धाः। वाक्यार्थे किञ्चिदंशत्यागः,किञ्चिदंशपरिग्रहश्च। अत्र ग्रामैकदेशे पटैकदेशे च दग्धे ग्रामो दग्धः, पटो दग्ध इति व्यवहारः"।***[137] यदा किञ्चित् पदं विशिष्टार्थकस्य बोधकं भवति, तस्य पदार्थैकदेशे लक्षणा क्रियते। तदा सा जहदजहल्लक्षणा कथ्यते, अत्र शक्यतावच्छेदकांशस्य परित्यागेन विशेष्यांशमात्रस्य बोधो जायते।

---

136 तत्रैव, पृ० २००

137 परमलघुमञ्जूषा, पृ० ५१

किञ्चिदंशपरित्यागो नाम विरोध्यंशस्य परित्यागः, किञ्चिदंशपरिग्रहो नामाविरोध्यंशस्य परिग्रहः। गृहादिसमूहो ग्रामः, तन्तुसमुदायः पटः, यदा कानिचन गृहाणि दग्धानि तदापि ग्रामो दग्ध इति व्यवहारः। अवयवदाहेऽपि समुदायदाहव्यवहारस्त्वनयैव लक्षणयाबोध्यः, तथा च 'तत्वमसीति' महावाक्ये सर्वज्ञत्वाल्पज्ञत्वांशयोः परित्यागं कृत्वा शुद्धचैतन्ययोरभेदेनान्वयो भवति। नागेशेनान्यत्र "***ग्रामो दग्धः, पुष्पितं वनम्, इत्यादौ दग्धादिपदान्यर्शाद्यजन्तानि इत्यर्थवत्सूत्रभाष्योक्तेः। तत्र लक्षणा नैवेति बोध्यः, ईदृशेषु जहदजल्लक्षणेत्यन्ये"।***[138] अतो नागेशस्य मतेन नैतादृशेषु स्थलेषु लक्षणा भवति, अन्यैर्नाम प्राचीनवेदान्तिभिः स्वीक्रियते, इत्यद्वैतवेदान्तदर्शने लक्षणायाः सर्वमपि व्याख्यानं विहितं तत्र समेऽपि प्राचीना विद्वांसः स्वीकृतवन्तः न नूतनाः, तेषु वेदान्तपरिभाषाकृता तु न स्वीक्रियते।

**लक्षितलक्षणा-** "***द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षणायां लक्षितलक्षणेति व्यवहारः। स्वबोध्यपदवाच्यत्वं च सम्बन्धः"।***[139] इयं लक्षणा नैयायिकाभिमता, द्विरेफपदघटकस्य रेफपदस्य रेफद्वयविशिष्टे भ्रमरपदे लक्षणा। लक्षितञ्च, भ्रमरपदं लक्षणया भ्रमररूपमर्थं बोधयति। लक्षितस्य लक्षणा इति वाच्यार्थः। सम्बन्धमाह- स्वमर्थाद्द्विरेफपदम्, तद्बोध्यं भ्रमरपदम्, तद्वाच्यत्वं भ्रमररूपेऽर्थेऽस्तीति लक्षणोपपत्तिः। वस्तुतस्तु द्विरेफपदं रूढिशक्त्यैव भ्रमरबोधकम्, अत्रावयवार्थस्य प्रतीतिस्तु तथैव न भवति यथा रथन्तरादौ। यद्वा पदनिष्ठरेफद्वयस्यार्थे आरोपात्तत् सम्बन्धित्वेनैव भ्रमरबोधः। अत एव कोशेषु भ्रमरपर्यायेषु द्विरेफपदस्य पाठः। बाधप्रतिसन्धानं विनैव द्विरेफपदाद् भ्रमरबोधोऽनुभूयते, अतो लक्षणाश्रयणमयुक्तम्।

**प्रयोजनवती-** 'कुन्ताः प्रविशन्ति' इत्यत्र भीतिपलायमानवाक्ये कुन्तानां तात्पर्यविषयकुन्तिप्रवेशेऽन्वयबाधात्कुन्तपदस्य तत्संयुक्तपुरुषे लक्षणा,

---

[138] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २०४

[139] तत्रैव, पृ० ५३

"***कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्***"।[140] भीत्या पलायमानानां व्यक्तीनां 'कुन्ताः प्रविशन्ती'ति वाक्ये कुन्तसंयुक्तपुरुषाणां प्रवेशे तात्पर्यत्वात् प्रवेशनक्रियायां कुन्तान्वयस्य बाधितत्वात्, कुन्तशब्दस्य कुन्तसंयुक्ते पुरुषे लक्षणा क्रियते। कुन्तगततैक्षण्यप्रतीतेः प्रयोजनत्वात्, प्रयोजनवती कथ्यते। कुन्तास्त्रस्य लौहनिर्मितत्वेनात्यन्ततैक्षण्यम्, तस्मात् कुन्तसंयुक्तपुरुषैरात्मरक्षणं कुर्वाणाः पलायनं कुर्वन्तीत्यादिः प्रयोजनम्। 'गङ्गायां घोषः' इत्यत्रापि शैत्यपावनत्वादिप्रतीतिः प्रयोजनम्।

**निरूढा लक्षणा** – "***असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्सम्बन्ध्यपरार्थबोधे निरूढेति लक्षणा***"।[141] "***असति प्रयोजने शक्यसम्बन्धो निरूढा लक्षणा। त्वचा ज्ञातम्***"।[142]

साहित्यशास्त्रादौ प्रसिद्धां लक्षणां स्वरूपयति- प्रयोजनाभावे शक्यार्थबाधप्रतिसन्धानपूर्वकं शक्यार्थसम्बन्ध्यपरार्थबोधे निरूढा लक्षणेति व्यवहारो भवति। यथा 'त्वचा ज्ञातमि'त्यत्र त्वचस्त्वगिन्द्रिये लक्षणा, वस्तुतस्तु इदं शक्तिरेव बोध्या। इत्येवं प्रकारेण नागेशभट्टेनाष्टसङ्ख्याकानां लक्षणाभेदानां स्वकीयासु मञ्जूषात्रयीषूदाहृतम्।

**मञ्जूषाकारस्य व्याकरणाभितलक्षणा** –

वैयाकरणानां मते जिज्ञास्यते यदेतेषां प्रस्थाने शक्त्यतिरिक्ता लक्षणा न विद्यते, लक्षणायाः अतिरिक्तरूपत्वेनाप्रसिद्धशक्तित्वेन स्वीकाररदशायामस्ति तद्भावः, तादृशस्वीकारदशायां वैयाकरणानां मते लक्षणायाः किमिपि व्यावहारिकं स्वरूपं भवतु तच्च किंस्वरूपमिति ज्ञिज्ञासायामुच्यते- मञ्जूषाकारो अनुभव-युक्ति-लाघवादिबहुप्रमाणैः सामीप्यादिसम्बन्धमूलकः शक्यतावच्छेदकारोप एव लक्षणा इति भावयति। "***परे तु शक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे***

---

140 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २०१

141 तत्रैव, पृ० २०१

142 परमलघुमञ्जूषा, पृ० ५६

***व्यक्तिवेशेष बोधे वा लक्षणेति व्यवहारः"।***[143] अर्थादरोपितो यो शक्यतावच्छेदकधर्मस्तद्रूपशक्तिसम्बन्धेन गङ्गादिपदस्य वाच्यत्वरूपेण या प्रसिद्धा व्यक्तिस्तत्सम्बन्ध्यन्यव्यक्त्यवबोधे।

अथवा व्यक्तिविशेषस्य बोधे लक्षणया जायमानोऽयं बोधः, इत्थं व्यवहारो जायते, यथा- गङ्गापदस्य वाच्यत्वेन प्रसिद्धः प्रवाहरूपार्थस्तस्मिन्नन्यव्यक्तिविषयको बोधोऽर्थात्तटरूपार्थव्यक्तिबोधो लक्षणया भवति। एवम्भूतो व्यवहारो जनैः क्रियते। गङ्गापदस्य शक्यार्थो भगीरथरथखातावच्छिन्नजलप्रवाहः, अतः शक्यार्थे जलप्रवाहरूपे एव जलप्रवाहत्वरूपः शक्यताऽवच्छेदको वर्तते।

तादृशशक्यतावच्छेदकजलप्रवाहत्वस्यारोपः तटे विधीयते। यद्यप्ययमारोपो ज्ञानविशेषः, न तु सम्बन्धरूपः। ततोऽपि लक्षणारूपेण व्यवह्रियते तच्च कथमिति प्रदर्शयति- शक्यार्थसम्बन्धो यत्र ज्ञातो भवति, तत्रैव शक्यतावच्छेदकस्यारोपः क्रियते। अयमारोप एव उक्तसम्बन्धज्ञानस्य फलं भवति। कैश्चिदाचार्यैरुक्तसम्बन्ध एव लक्षणाऽभिधीयत। कैश्चिच्च सम्बन्धस्य फलभूतारोप एव लक्षणा। अतः ज्ञानरूपा लक्षणा सम्बन्धज्ञानेनप्रयोज्येति।

**शक्यताऽवच्छेदकाऽऽरोपस्य व्याख्यानम् –**

'छत्रिणो यान्ति' अत्र शक्यतावच्छेदकछत्रियत्वस्यारोपो साहचर्यसम्बन्धेन छत्रिभिन्नेष्वपि क्रियते। 'काकेभ्यो दधि रक्ष्यताम्' अत्रापि काकत्वरूपशक्यताऽवच्छेदकधर्मस्य आरोपः काककुक्कुटविडालादि-प्रभृतिदध्युपघातकेषु भवति, यतोहि काकाकाकसमुदायरूपलक्ष्यार्थे तादृशसमुदायत्वावच्छेदेन किं वा दध्युपघातकत्वावच्छेदेन काकत्वस्याभावो वर्तते। अतः तदभाववति तत्प्रकारकबुद्धिरारोपरूपा समपद्यत। व्यक्तिविशेषस्योदाहरणानि- "***तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते। रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि"॥***[144] कमलानि

---

[143] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २१७

[144] तत्रैव, कलाटीका, पृ० २२०

कमलानीत्यादौ कमलत्वेनैव व्यक्तिविशेषबोधः। अत्र द्वितीयकमलपदेन सौरभातिशयविशिष्टकमलरूपव्यक्तिविशेषस्य बोधो भवति। अत्रापि कमलत्वरूपशक्यताऽवच्छेदकस्य आरोपः सौरभातिशयविशिष्टकमले भवति, यद्यपि विशेष्यभूतकमलांशे कमलत्वधर्म एव, अस्यां परिस्थितावारोपः कथम्? अत्र कथ्यते कमले विशेषणीभूतो यः सौरभातिशयः, विशेषणीभूतसौरभातिशयांशे कमलत्वाभावात्, आरोपो भविष्यति। अथवा विशिष्टं शुद्धादतिरिच्यते, इत्याधृत्य सौरभातिशयविशिष्टं कमलं शुद्धकमलादतिरिक्तमिति मत्वा कमलत्वस्यारोपो भविष्यति। विचारोऽयं विशिष्टं शुद्धादतिरिच्यते, कमलानि कमलानि, इत्यस्य सरलाटीकया प्रदत्तं वर्तते।[145]

*"त्वामस्मि वच्मि विदुषां समवायोऽत्र विद्यते।*

*आत्मीयां मतिमादाय स्थितमत्र विधेहि तत्"॥*[146]

अत्रापि युष्मत्पदार्थो सम्बोध्यरूपः, शक्यताऽवच्छेदको धर्मः, सम्बोध्यत्वरूपः उपदेश्यत्वादिधर्मविशिष्टार्थे तस्यारोपं कृत्वा लक्षणावृत्तेः सञ्चारो भवति। 'कमलानि कमलानि' 'त्वामस्मि वच्मि' इत्यादौ पौनरुक्त्या विशेषार्थाप्रतिपत्त्या वा तात्पर्यानुपपत्तिर्बोध्या।

अत आरोपरूपा लक्षणा नागेशभट्टेन स्वीक्रियते। आरोपश्च शक्यताऽवच्छेदकधर्मरूपः। अत्र च प्रमाणत्वेन महाभाष्यकृतमुपस्थापयति।[147] गोपीत्यादि- प्रयोगाणां सिद्धये गोपसम्बन्धिस्त्रीत्वेन गोपस्य स्त्र्यर्थे लक्षणायां तदर्थे तस्येदमिति सूत्रेण अण्प्रत्यये सति गोपीति प्रयोगस्य सिद्धिरथवा

---

145 तत्रैव, सरलाटीका, पृ०२२२

146 तत्रैव, कलाटीका, पृ० २२०

147 अत एव पुंयोगादाख्यायाम् इति सूत्रे भाष्येगोपीत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायां तस्येदम् इति शास्त्रेण तादृशेऽर्थेऽण्प्रत्ययान्तस्यैव तादृशवाक्यस्यैव वा साधुत्वनियमादसाधुत्वापत्तिं दूषणमभिसंधाय नावश्यमेवाभिसम्बन्धो भवति तस्येदमिति, किन्तु तन्मूलकः सोऽयमित्यप्यभिसम्बन्धोऽस्ति, इत्युक्त्वा चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवतितादर्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्, मञ्चाहसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय, इत्युक्तम्। कैयटोऽप्याह आरोप्यते ताद्रूप्यं न तु मुख्यम्। वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ०२१९

गोपस्य स्त्रीति वाक्यस्यैव साधुत्वं काशते, अतो गोपीति पदस्यासाधुत्वापत्तिर्भविष्यति। अयं दोषः प्रदर्श्यता भाष्यकारेणोक्तम्। तस्येदमित्ययमेव सम्बन्धो भवतीति नावश्यकमपितु दाम्पत्येति सम्बन्धवशात् सोऽयमित्यप्यभेदसम्बन्धे गोपस्य तदस्त्रियां भासनं वर्तते। चतुर्भिः प्रकारैरतति तद्बुद्धिर्भवति, तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यादिति, तदुदाहरणानि प्रादर्श्यन्त।

अत्रत्ये व्याख्याने आचार्यकैयटेनोच्यते, आरोप्यते ताद्रूप्यं न तु मुख्यम्, ताद्रूप्यमर्थाच्छक्यतावच्छेदकरूपो यो धर्मस्तस्यारोपो क्रियते। अर्थाच्छक्यतावच्छेदकप्रकारक एव लक्ष्यार्थबोधः क्रियते। तत्प्रकारकप्रतीतिविशेष्यप्रसिद्धार्थत्वं मुख्यत्वम्। तादृशाप्रसिद्धार्थत्वं गौणत्वम्। बालेषु मञ्चत्वरूपशक्यताऽवच्छेदकधर्मस्य आरोपं कृत्वा मञ्चपदस्य तद्बोधने प्रवृत्तिर्भवति। सा च 'हसन्ति' पदस्य प्रयोगेण ज्ञायते। सोऽयमिति भाष्यस्य तात्पर्यम्, सोऽयमित्यपि भवति। अतः आरोपमूलिका लक्षणा जायत इति महाभाष्यस्य तात्पर्यम्।

**आरोपे भ्रमत्वाशङ्का –**

***"न च गङ्गायां घोष इत्यादावारोपितगङ्गात्वेन बोधेऽपि तस्य ज्ञानस्य भ्रमत्वाच्छास्त्रज्ञानवतां सर्वथा भ्रमत्वेन ग्रहाच्च तदुत्तरं गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिध्येत्, अत एव शुक्तिरजतज्ञाने भ्रमत्वज्ञानवतां न प्रवृत्तिरिति वाच्यम्"***[148] 'गङ्गायां घोषः' इत्यादिस्थलेषु आरोपितगङ्गात्वरूपेण तीरस्य बोधे सति तज्ज्ञानस्य भ्रमरूपत्वात् शास्त्रजन्यज्ञानवतां विदुषां कृते सर्वथा भ्रमत्वेन रूपेण ज्ञानस्य सत्वाल्लक्षणाया उत्तरं गङ्गागतशैत्यपावनत्वादिप्रतीतिरूपस्य फलस्य सिद्धिर्न भविष्यति। अत एव शुक्तिकायां जातरजतज्ञाने यदि भ्रमत्वज्ञानम्, अर्थाद्रजतस्य ज्ञानं भ्रमात्मकमिति बुद्धिरजायत, तदा तु रजतस्यानयनादिसङ्ग्रहे प्रवृत्तिरेव न स्यात्। एवम्भूतायाः समस्याः समाधानं ग्रन्थकृताऽदीयत-

[148] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २१९-२२०

**लक्षणायां भ्रमत्वनिरासः –**

"***मध्ये व्यञ्जनया मुख्यगङ्गापदार्थभेदस्यापि प्रतीतेः। व्यञ्जनाजन्यज्ञाने च बाधज्ञानेन नाप्रामाण्याग्रह इत्यदोषात्"।***[149] लक्षणायां भ्रमस्याभावो गम्यते, यस्माच्च लक्षणाया अनन्तरं द्वितीयव्यञ्जनायाः पूर्वं, मध्ये गङ्गापदार्थस्य यो लक्ष्यार्थस्तीररूपः तस्मिंस्तीरेऽभेदस्यापि बोधो व्यञ्जनावृत्त्या भवति। व्यञ्जनाजन्यज्ञाने जाते सति बाधज्ञानेनाप्रमात्वग्रहो न भवति। तात्पर्यमिदं यन्मध्यवर्तिन्या व्यञ्जनया शक्यार्थस्य लक्ष्यार्थे योऽभेदः प्रवाहाभिन्नं तीरमिति तद्भासते। तद्बलादेव द्वितीयव्यञ्जना प्रवाहनिष्ठशैत्यपावनत्वादिप्रतीतिं कारयिष्यति। यद्यपि प्रवाहत्वाभाववत्तीरम्, इत्ययं बाधनिश्चयस्तथाप्यभेदबुद्धिर्व्यञ्जनावृत्तिद्वारा जायते। व्यञ्जनामहिम्नैव प्रवाहाभाववत्तीरम्, अत्रत्ये ज्ञाने न प्रामाण्यस्याभावः।

**बाधनिश्चयस्याप्रतिबन्धकत्वम् –**

अनुपपत्तिमूलके लक्षणाजन्यबोधेऽपि बाधनिश्चयस्य प्रतिबन्धकत्वण् न मन्यते। "***वस्तुतस्तु शब्दानुपपत्तिमूलकारोपितार्थबोधे बाधज्ञानेन नाप्रामाण्यग्रहो जन्यते"।***[150] शाब्दबोधस्यानुपपत्तिदशायां जायमानायामारोपितार्थस्य बोधे बाधनिश्चयेन अप्रमात्वज्ञानं न भवति। अप्रमात्वञ्चेदमारोपेण जायमानो बोधो यथार्थज्ञानं न, इत्येवं प्रकारकः। अतो बाधनिश्चयस्य प्रतिबन्धकता न भवति व्यञ्जनाजन्यज्ञाने।

तदुदाहरणमुखेनाभिधीयते- पचतीत्यादिक्रियासु तिङर्थस्यैकत्वादीनां क्रियायामारोपं कृत्वैकवचनत्वादीनामुपपत्तिर्भवति। अन्यथा क्रियायामसत्त्वरूपतायाः सत्त्वादेकत्वादिसङ्ख्याया अभावत्वादेकवचनादीनामुपपत्तिर्न स्यात्। उक्तबोधेऽप्रमात्वग्रहस्य सत्त्वादनुपपत्तेः परिहारोऽशक्य एव। प्रमात्मकं ज्ञानमेवानुपपत्तेः परिहारकं भवति। वस्तुतस्तु शाब्दिकानां सिद्धान्ते क्रियायामेकत्वादीनामारोपो न

---

149 तत्रैव, पृ० २२०

150 तत्रैव, पृ० २२४

मन्यते। कर्त्रादिनिष्ठैकत्वादिरेव भासते। "***मतान्तरे तु क्रियायामेकत्वस्यान्वयाभावात् 'स्थाली पचती'त्यादौ व्यापारसमुदायस्य पचत्यादिवाच्यस्यैकदेशे आरोप इति दृष्टान्तो बोध्यः"।***[151]

अत एव 'स्थाली पचत' इत्यत्र पचिधातुवाच्ये स्थालीस्थे व्यापारे एकदेशभूतेऽपि अधिश्रयणाद्यधःश्रयणान्त-व्यापारत्वारोपेण तद्विषयकबोधे नाप्रमात्वग्रहः। अन्यथाऽनुपपत्तिपरिहारो न सम्भवेत्।[152]

***कुन्ता प्रविशन्ति-*** अत्र कुन्तपदस्य कुन्तसंयुक्ते पुरुषे लक्षणा क्रियते। अत एव लक्षणेयमजहत्स्वार्थेति न्यगद्यत। यतोह्यत्र लक्ष्यार्थे कुन्तोऽपि प्रविष्टः, तथा कुन्तस्य स्वसंयुक्तपुरुषनिष्ठसम्बन्धेन प्रविश्क्रियायामन्वयो भवति। या च लक्ष्यार्थे पुरुषे स्वनिष्ठकर्तृत्वसम्बन्धेन साक्षादन्विता।

अत्रान्वयिताऽवच्छेदकधर्मोक्तपुरुषवृत्त्या-रोपितकुन्तत्वम्, कुन्तरूपशक्यार्थस्यापि स्वसंयुक्तपुरुषनिष्ठकुन्तत्वरूपेणान्वयस्य सत्त्वादजहत्स्वार्थालक्षणायाः स्थितिः स्व्यक्रियत। प्रदीपकृता कैयटेन कथ्यते- "***आरोप्यते ताद्रूप्यम्, न तु मुख्यम्"।***[153], अर्थाच्छक्यताऽवच्छेदकधर्म आरोप्यते, स च न मुख्यो भवति।

***मञ्चा हसन्ति-*** बालकेषु मञ्चत्वरूपशक्यताऽवच्छेदकस्यारोपाद् मञ्चपदस्य तस्य बोधे प्रवृत्तिः, 'हसन्ती'ति क्रियापदप्रयोगेण ज्ञायते। यतोह्यचेतनमञ्चे हासक्रियायाः कर्तृत्वं न सम्भाव्यते।

**प्राचां मते दोषः –**

केषाञ्चन प्राचीनानामाचार्याणां व्याख्यानं विद्यते यच्छक्यादन्यो यो कश्चिदर्थस्सैव लक्षणा इति कथ्यते तादृशव्याख्यानस्य खण्डनं कुरुते नागेशभट्टः।

---

151 तत्रैव, कुञ्जिकाटीका, पृ० २२४

152 शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ३३

153 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २२५

***“शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा। इति तु कस्यचित्*** प्रमादोक्तिः”।[154] शक्यताऽवच्छेदकरूपो शक्यार्थस्तस्मादन्यरूपेण ज्ञानविषयीभूताऽर्थे भवति लक्षणा इति, प्राचीनाचार्याणां वचो दोषावहो दृश्यते। वैयाकरणानां मते आरोपितशक्यताऽवच्छेदकरूपेण ज्ञानविषयीभूतार्थे एव लक्षणा भवति, अथवा शक्यताऽवच्छेदकादन्यो यो धर्मस्तद्वत्त्वरूपेण गृहीतार्थे लक्षणा, अर्थाच्छक्यतावच्छेदकस्यारोपो भवतीति तात्पर्यं तद्वाक्यस्य।

एतेन व्याख्यानेन प्राचीनव्याख्यानगतो विरोधोऽपसारितः। यथा ‘गङ्गायां घोष’ इत्यादिस्थलेषु गङ्गापदस्य शक्यताऽवच्छेदको गङ्गात्वरूपस्तदतिरिक्ततो यस्तीरत्वरूपार्थः। तस्माद् गृहीततीररूपार्थस्य गङ्गात्वरूपेण यो बोधः, स लक्षणाजन्यो भवति। अत एव ‘गङ्गायां मीनघोषौ’ इत्यादिवाक्यानि सङ्गच्छन्ते। यदि शक्यताऽवच्छेदकारोपारूपा लक्षणा न स्वीक्रियते। “***अन्यथा द्वन्द्वार्थस्यैकधर्मावच्छिन्नेऽन्वयस्य तादृशस्य द्वन्द्वाद्यर्थेऽन्वयस्यैव वा अजां ग्रामं नयति, अजाविधनौ देवदत्तयज्ञदत्तौ , इत्यादौ यथासङ्ख्यान्वये द्वन्द्ववारणाय पयः पयो नयति, इत्यादावेकशेषवारणाय चावश्यकत्वेन, पररीत्या च मीनस्य नीरत्वावच्छिन्नेऽन्वयेन घोषस्य तीरत्वावच्छिन्नेऽन्वयेन द्वन्द्वोऽसाधुः स्यात्”।***[155]

अपितु शक्यसम्बन्धादिरूपा स्वीक्रियते, तदानीन्तु ‘गङ्गायां मीनघौषौ’ इत्यत्र द्वन्द्वस्यैवासधुत्वापत्तिः स्यात्। द्वन्द्वार्थस्य एकशेषार्थस्य वा एकधर्मावच्छिन्नेऽन्वयो भवति, अथवा एकधर्मावच्छिन्नस्य एकधर्मावच्छिन्नसंसर्गेण एकधर्मावच्छिन्नेऽन्वयः, इति नियमस्तत्र भवति। अत एव ‘अजां ग्रामं नयति’ अस्मिन् वाक्ये ग्रामरूपकर्मणः संयोगरूपफलात्मके धात्वर्थे, तथा चाजायाः संयोगानुकूलव्यापारार्थेऽन्वयस्य तात्पर्येण

---

[154] तत्रैव, पृ० २२५

[155] तत्रैव, पृ० २२५-२२६

कथितवाक्येऽजाग्रामयोर्द्वन्द्वस्य साधुत्वं न। यतोहि द्वयोरन्वय एकधर्मावच्छिन्ने नास्ति। 'अजाविधनौ देवदत्तयज्ञदत्तौ' इति वाक्यस्य क्रमिकबोधेऽजादेवदत्तयोरवियज्ञदत्तयोरेतस्मिन्नर्थबोधे द्वन्द्वस्य न साधुत्वम्। 'पयः पयो नयति' अत्राप्येकशेषस्य साधुत्वापत्तिः, पृथगन्वयकारणान्न। न्यायादिदर्शनान्तरीयरीत्या मीनस्य नीरत्वावच्छिन्ने नीरे, घोषस्य तीरत्वावच्छिन्ने तीरेऽन्वये स्वीकृते सति द्वन्द्वस्यासाधुत्वापत्तिर्भविष्यति।

***"वैयाकरणमतं द्वन्द्वस्थलाय मम तु गङ्गात्वेनैव तीरबोधादेकधर्मावच्छिन्नेऽन्वयसत्त्वेन न क्षतिः"।***[156] शाब्दिकानां मतेन गङ्गात्वरूपेण नीरतीरयोरुभयोः बोधत्वादेकधार्मावच्छिन्नेऽन्वयो भवति न तत्र काचन क्षतिः। एककालावच्छेदेन वृत्तिद्वयात्मको विरोधोऽपि न दोषावहः। यतोहि द्वयोर्वृत्त्योः शक्तिलक्षणयोर्यौगपद्येन सत्ता। या च सकृदुच्चरितन्यायेनानुचिता, तथाभूतो दोषोऽत्र नास्त्येव। अत्रत्ये व्याख्याने त्वन्वयानुपपत्यैककालावच्छेदेनवारोपितगङ्गात्वेनैव नीरतीरयोरुपस्थितेः सत्त्वात्।

तथैव 'काकेभ्यो दधि रक्ष्यताम्' इत्यादिष्वपि स्थलेषु तथैवारोपितकाकत्वेनैकेनैव सह काक-तदितरकुक्कुटबिडालादीनामुपस्थितिर्जायते। "***अन्यथानुपपत्त्या च युगपदेव गङ्गात्वेनैव नीरतीरयोरुपस्थितिः। काकेभ्यो दधि रक्ष्यताम्, इत्यादावाप्येवमेव"।***[157] तस्मादारोपात्मिका लक्षणा। 'धवखदिरौ छिनत्ति' एतस्मिन् स्थले धवखदिरावित्येतद्धर्मावच्छिन्नस्य कर्मत्वनिरूपिताकसंसर्गेण छिनत्ति क्रियायामन्वयो भवति। धवखदिरयोरुभयोरुभयत्वरूपैकधर्मेण छेदनत्वरूपैकधर्मेणावच्छिन्नछेदनेऽन्वयस्य सत्त्वात् पूर्वोक्तनियमस्य चरितार्थता भवति।

'अजाविधनौ देवदत्तयज्ञदत्तौ' अत्राजाव्योर्देवदत्तयज्ञदत्तयोः पृथक्-पृथगन्वयो न भवत्यपितु मिलितस्यैवान्वयो भवति।

---

[156] तत्रैव, पृ० २२६

[157] तत्रैव, पृ० २२६

समुदायत्वरूपैकधर्मविशिष्टे एव भवति। 'अजां ग्रामं नयति' अत्राजाग्रामयोः परस्परं द्वन्द्व एव न समजायत।

तस्यैकधर्मावच्छिन्नेऽन्वयाभावात् पृथक्-पृथगेवान्वयो सम्भवति। 'पयः पयो नयति' अत्रैकस्य 'पयः' इति पदार्थस्य मुख्यकर्मता। अपरस्य च अकथितञ्चेत्यत्यनेन गौणकर्मत्वम्। द्वयोर्वाचकयोश्शब्दयोरेकशेषो न भवति। एकशेषोऽपि द्वन्द्वस्यापवादत्वात् साहित्य एव भवति। अत एवोत्सर्गसमानदेशा अपवादाः। तस्माच्छक्यताऽवच्छेदकारोपरूपा लक्षणा बोध्या।

**कचतस्त्रस्यति वदनम्, अत्रारोपप्रकारः –**

'कचतस्त्रस्यति वदनम्' अत्रत्ययुदाहरणे राहुत्वविशिष्टे कचत्वारोपः। चन्द्रत्वविशिष्टे च वदनत्वारोप इति न त्रासान्वयानुपपत्तिः। अत्र प्रथमारोपेण त्रासप्रयोजकत्वमारोपितकचत्ववति राहौ। किञ्च 'कचतः' इत्यत्र तसर्थप्रयोजकत्वस्य स्वनिरूपितप्रयोज्यत्वसम्बन्धेन त्रासेऽन्वय उपपद्यते। अन्यथा कचपदार्थः केशस्तत्प्रयोज्यत्वस्य त्रासे बाधात् स नोपपद्येत।

कर्तर्यभेदेन तादृशकर्तुश्च वृत्तित्वसम्बन्धेन त्रासेऽन्वय उपपद्यतेऽन्यथा त्रासस्य चेतनधर्मतया वदनस्य तु चेतनत्वाभावेन स न स्यात्।[158] अत एव रसगङ्गाधरेऽतिशयोक्त्यलङ्कारवर्णनप्रसङ्गे कचत्वराहुत्वोभयप्रकारको बोधः स्वीकृतः। अवश्यकतामनुसृत्यान्यतरप्रकारकबोधोऽपि जायत इति केषाञ्चन विदुषां मतम्। उभयत्वप्रकारकबोधपक्षे कचत्वमारोप्यते। राहुत्वस्य वास्तविकत्वम्, अतो न विरोधः।

पश्चादपि ज्ञेयमिदम्- राहौ कचत्वारोपे सति व्यञ्जनया वृत्त्या कचाभिन्नो राहुरित्येव बोधो जायते। 'सौजन्यचन्द्रिकाचन्द्रो राजा' सौजन्याभिन्नश्चन्द्रिकासम्बन्धी यो चन्द्रः, तस्मादभिन्नो राजा। इति बोध प्रकृतवाक्येन जायते। रसगङ्गाधरेऽत्र सन्देहोपस्थापितः।

---

[158] शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ३५

यदा सौन्दर्यस्याभेदश्चन्द्रिकायां भासितः, तदा राज्ञोऽप्यभेदः चन्द्रमसि भासेत, न तु चन्द्रमसोऽभेदः। अत्र कथ्यते – अभेदः क्वचित् प्रतिगोगिमुखेन क्वचिच्चानुयोगिमुखेन गृह्यते, तात्पर्यबलात्। अतः चन्द्रप्रतियोगिकोऽप्यभेदो राजनि पूर्वोक्तवाक्येन भासते। एवमेव कचस्याभेदो राहौ भासिते सति, राहोरप्यभेदः कचे भासितो भविष्यति। स्थितावस्यां राहोर्धर्मस्त्रासकत्वं कचे, चन्द्रमसो धर्मस्त्रस्तत्वं मुखे (स्त्रियः मुखावच्छिन्ने चैतन्ये) आरोपितत्वे सति मुखं कचात् त्रस्यते, इत्यर्थे वाक्यमुपपद्यते।[159]

शक्यतावच्छेदकारोपे भर्तृहरिसम्मतिः- वैयाकरणैरेकैव शब्दोऽनेकार्थकः स्वीक्रियतेऽर्थेन प्रकरणेन शब्दन्तरेण वा, सम्बन्धरूपनिमित्तभेदम्- आदाय तस्यैकस्य शब्दस्य सर्वार्थवाचकता भवति। अनेके धर्माः सन्ति प्रवृत्तिनिमित्तत्वेन यस्मिन् एवम्भूतसर्वार्थनिरूपितः शब्दः, प्रसिद्धिवशात् प्रसिद्धार्थबोधनेन मुख्यार्थकः। अप्रसिद्धार्थात् प्रसिद्धिसदृशार्थबोधनेन गौणार्थको भवति–

*"एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः।*

*निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते।*[160]

*सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।*

*प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वञ्चोपवर्ण्यते"॥*[161]

गौणार्थस्य मुख्यार्थस्य वा बोधक शब्द एक एव, एकस्यां वेलायां न सर्वानर्थान् प्रकाशयति, तत्र कारणं प्रकरणादिकमेव। गोशब्दो गोत्वजातौ प्रसिद्धः, वाहीके त्वप्रसिद्धया गौण इति कथ्यते। एवं स्थितौ सत्यां शब्दार्थसम्बन्धस्यानित्यत्वं स्यात्तदाह-

---

[159] वैयाकरणसिद्धान्तलघुमञ्जूषा,सरलाटीका, पृ० २३८

[160] वाक्यपदीयम्, २/२५०

[161] तत्रैव, २/२५३

*"गोत्वानुषङ्गो वाहीके निमित्तात् कैश्चिदिष्यते।*

*अर्थमात्रे विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः"।*[162]

शब्दार्थसम्बन्धनित्यत्ववादिभिर्वैयाकरणैर्जाड्यादिनिमित्तान्यादाय गोत्वस्यारोपो वाहीके क्रियते। शब्देन तु गोत्वस्यैवाभिधानं क्रियते। गौरितिस्थले मुख्यं गोत्वं तथा च वाहीकार्थे आरोपितगोत्वस्य भानं जायते। शब्दस्य स्वरूपमेव प्रवृत्तिनिमित्तं भवति। पक्षेऽस्मिन् गोशब्दो कदाचिद् वाहीकार्थेऽपि प्रयुज्यते। प्रसिद्ध्यप्रसिद्धिवशादेव गौणमुख्यविभागः क्रियते। अर्थमात्रं विपर्यस्तमित्यस्य तात्पर्यं यदर्थस्य विशेष्यता स्यात् पदे, स च भिन्न-भिन्नप्रकारको भवति। प्रवृत्तिनिमित्तभूतेऽर्थेशब्दो नियमेन संस्थितो भवति।

प्रवृत्तिनिमित्तमेव शब्दस्य शक्यार्थो भवति, अत एव शब्द एकार्थक एव। यदि वाहीकोऽपि गोशब्दस्य गोत्वरूपेणाप्रसिद्धशक्यार्थोऽभूत्। तदा तु 'गौर्वाहीक' इत्यादिस्थलेषु लक्षणायाः फलं किम्? अत्र कथयति सादृश्यप्रतीतिरेव लक्षणायाः फलम्। वाहीके गोसादृश्यज्ञानमेव फलम्, तेन गोसदृशो वाहीक इत्याकारकज्ञानं लक्षणायाः फलम्। सादृश्यज्ञानस्य तात्पर्यं गोगतजाड्यसदृशजाड्यवत्त्वं वाहीके भासते, ततो व्यञ्जनया वृत्त्या वाहीके जाड्यातिशयत्वं भासते। इयं प्रयोजनवतीगौणीलक्षणायाः फलम्।

**गौणीलक्षणायाः जघन्यत्वम् –**

***"मुख्यार्थसाक्षात्सम्बन्धमूलारोपान्मुख्यार्थवृत्तिगुणसमानगुणवत्त्वरूपपरम्परासम्बन्धमूलारोपो जघन्य इति गौण्या अतिजघन्यत्वं बोध्यम्"।***[163] मुख्यार्थस्य यः साक्षात् सम्बन्धः, तन्मूलकारोपापेक्षया मुख्यार्थवृत्तिगुणतुल्यो गुणवत्त्वरूपो यः परम्परा सम्बन्धः, तन्मूलको य आरोपः स जघन्यः, अर्थात् प्रथमारोपोऽपि जघन्यः, तदपेक्षयाऽयमपि जघन्यः। इत्थं निम्नकोटिकमतिजघन्यत्वम्, अतो गौण्या जघन्यतरत्वमववर्णत।

---

162 तत्रैव, २/२५५

163 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २३६

**गौणीलक्षणायां बीजम् –**

गौण्यामेव परम्परासम्बन्धो लक्षणाबीजं नान्यत्र। परम्परासम्बन्ध एव गौणीलक्षणायां बीजमिति स्वीक्रियते। अत एव प्रयोजनं लक्ष्यमर्थाल्लक्षणागम्यं नाऽवबुध्यते, यतोहि शब्दार्थयोः प्रयोजनेन सह साक्षात् सम्बन्धो न भवति, गौणीलक्षणायामपि परम्परासम्बन्धे स्वीक्रियमाणे सत्यपि प्रयोजनवतीशुद्धालक्षणायामतिव्याप्तिर्भविष्यति। विचारोऽयं काव्यप्रकाशादौ विहितः। कुञ्जिकाटीकायामुच्यते- "***न च गौण्यां लक्षितलक्षणात्वापत्तिः, लक्षितलक्षणायाः ग्रन्थकृतैव निराकरिष्यमाणत्वात्। लक्षणयैव शैत्यपावनत्वादीनां प्रतीतेर्न व्यञ्जना वृत्त्यन्तरमिति तार्किकमतं निराकुर्वतां प्रकाशकारादीनां सम्मतिं दर्शयति- प्रयोजनं न लक्ष्यमिति। शैत्यपावनत्वादौ शक्यसम्बन्धाभावाल्लक्षणा न सम्भवति"।***[164] "प्रयोजने लक्षणा न भवति, ***प्रयोजनेन सहितं लक्षणीयं न युज्यते"।***[165] काव्यप्रकाशकृता इत्थं प्रत्यपादि। अनेन श्लोकेन व्यञ्जनाया अवश्योपादेयता प्रतीयते- "**यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।**[166] **फले शब्दैकगम्येऽत्र व्यञ्जना स्यान्नापरा क्रिया"॥**

आचार्यमम्मट: प्रतिपादयति- **"नाभिधा समयाभावात्"**[167] समयाभावाल्लक्षणा न भवितुमर्हति।

द्वितीयमत्र हेतुं वदति लक्षणामपि निरस्यति **"हेत्वभावान्न लक्षणा"**[168] अत्र हेतुर्नाम किमिति मुख्यार्थबाधादित्रयं हेतु:। हेतुरित्यस्य व्याख्या- १-शब्दस्य मुख्यार्थबाध: २-मुख्यार्थेन सह लक्ष्यार्थस्य सम्बन्ध ३-रूढिरथवा प्रयोजनं स्यादिति त्रीणि कारणानि भवन्ति, एतानि त्रीण्यपि कारणानि व्यञ्जनायां न भवन्ति। अत: प्रयोजकसामग्र्याभावे प्रयोजनस्य बोधो लक्षणया न गम्यते, तथा च कथयति-

---

164 तत्रैव, कुञ्जिकाटीका, पृ० २३९

165 काव्यप्रकाशद्वितीयोल्लासः, पृ० ७५

166 तत्रैव, पृ० ७०

167 तत्रैव, पृ० ७०

168 तत्रैव, पृ० ७१

**"लक्ष्यं न मुख्यं नाप्यत्र बाधो योगो फलेन नो।**

**न प्रयोजनमेतमिन् न च शब्द: स्खलद्गति:"॥**[169]

एतदत्र प्रतिपादयितुं प्रयतते यद् व्यञ्जनाव्यापारातिरिक्तमन्य: कश्चिदुपायो न वर्तते। यतोहि तद्रूपलक्ष्यार्थो मुख्यो न, न तस्यात्र बाध:, न च तस्य शैत्यपावनत्वादिफलेन सह सम्बन्ध:' इतोपि यदि प्रयोजनमिदं लक्ष्यार्थत्वेन स्वीक्रियते तदा प्रयोजनमेव नास्ति, प्रयोजनविषये लाक्षणिक: शब्द: 'स्खलद्गति' अर्थान्मुख्यार्थबाधादिना विना प्रयोजनस्य प्रतिपादनेऽसमर्थोऽथवा मुख्यार्थबाधात्परमेव प्रयोजनप्रतिपादने समर्थ इति। स्खलद्गति:- शब्द: स्खलद्गतिर्नास्ति, अस्याभिप्रायो यच्छैत्यपावनत्वादि-प्रयोजनं बोधयितुं बाधितार्थो न, विना मुख्यार्थबाधमपि स शब्द: शैत्यपावनत्वादिरूपमर्थमभिव्यङ्क्तुं शक्नोति, किन्तु मुख्यार्थबाधे सति, स एव शैत्यपावनत्वादिकं न, अपितु तटरूपमर्थं बोधयति।

इयमेव वार्ता आचार्यनागेशेन मञ्जूषायां प्रयोजने लक्षणाया निरासः केवलं साक्षात् सम्बन्धस्याभावे कृतम्। इदमपि ध्येयं गङ्गापदार्थस्य सामीप्यसम्बन्धस्तीरे ज्ञातः, पुनः गङ्गात्वरूपशक्यताऽवच्छेदको यः पदार्थस्तस्य तीरे आरोपात्मिका लक्षणा। लक्षणायां सत्यामपि शैत्यपावनत्वादीनामतिशयस्य प्रतीतेरभावाद् वक्तुस्तात्पर्यं नोपपद्यते। तात्पर्योपपत्तये मध्ये गङ्गापदार्थस्य तीरपदार्थेण सहाभेदस्य बोधो व्यञ्जनया भवति, तत्परमेव गङ्गापदार्थगतानां शैत्यपावनत्वादीनामतिशयस्य तीरे प्रतीतिः।

कार्यकारणभावोऽयमन्वयव्यतिरेकाभ्यां गम्यते। प्रयोजनविशिष्टतीरे लक्षणायाः स्वीकारे सत्ययमनुभवसिद्धो कार्यकारणभावो व्याहनिष्यति। तथा गौण्यतिरिक्तशुद्धायामपि यदि परम्परासम्बन्धो लक्षणायां बीजं मन्यते, तदा स्वशक्यसंयुक्तवृत्तित्वरूपः परम्परासम्बन्धः शैत्याद्यतिशयधर्मेषु भविष्यति। अथवा प्रयोजनविशिष्टे तीरादौ लक्षणायाः स्वीक्रियमाणे सति

---

169 तत्रैव, पृ० ७२ सूत्रम् २६

स्वशक्यपावनत्वाद्यतिशयप्रकारकं ज्ञानं विषयत्वसम्बन्धेन स्वीकार्यं भवष्यति। यस्य हि गुरुपरम्पराघटितत्वादतीव जघन्यत्वम्। अत एव ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्, इति शिष्टोक्तिः साधुतरत्वमावहति। अन्यथाऽलङ्कारशास्त्र- सम्मताया व्यञ्जनावृत्तेरुच्छेदः स्यात्। पुनरत्र जिज्ञास्यते- लक्षणायाः प्रयोजने शब्दबोधस्य विषयतायै व्यञ्जनावृत्तेः स्वीकारस्यावश्यकत्वात्, गवादिशब्देषु व्यञ्जना वृत्त्या अतिशयित-जाड्यादिगुणानां वाचकतायाः सत्वात् 'प्रकारे गुणवचनस्ये'ति सूत्रेण द्वित्वापत्तिस्स्यात्। तदुत्तर्यते- "***एवञ्च गवादिशब्दानां व्यञ्जनया जाड्यादिरूपगुणबोधकत्वाद् गुणवचनत्वेऽपि ततः प्राक् गुणवचनत्वाभावात्, प्रकारे गुणवचनस्येति न द्वित्वम्, इति न तत्सूत्रस्थभाष्यविरोधः***"[170]

'गौर्वाहीकः' 'अग्निर्माणवकः' इत्यादिस्थलेषु अग्न्यादिशब्दानां द्वित्वामाशङ्क्य भाष्यकृता कथितम्। गवादिशब्दानां व्यञ्जनावृत्त्या जाड्यादिगुणबोधकत्वात् गुणवाचकत्वेऽपि सति प्रकारार्थे या विद्यमानता जायते, तस्याः पूर्वमेव यत्र गुणवाचकता भवति, तत्रैव प्रकारे गुणवचनस्येत्यनेन गुणवाचकता भविष्यति। अस्यां परिस्थितौ प्रकारार्थे वर्तमानतायाः पूर्वमग्निशब्दो जातिवाचकः, तथैव गोशब्दोऽपि गुणवत्वबोधनात् प्राग् जातिवाचकः। एव गुणवचनत्वाभावान्न पूर्वोक्तसूत्रेण द्वित्वं न तस्माद्विरोधो भाष्यप्रतिपादितः। गौतमसम्मतिः- 'गङ्गायां घोषः' अत्र यदि गङ्गाया अत्यन्तसमीपे घोषः, तदा गङ्गापदार्थे प्रवाहे तीरत्वधर्मस्यारोपः क्रियते। तत्र लक्षणां विनाऽधिकरणे सप्तमीति गौतमेन समवादि। यत्र व्यवहितसमीपे तीरं तत्रैव तत्रैव शक्यताऽवच्छेदकप्रवाहस्य तीरे आरोपरूपा लक्षणा।

वार्तेयं 'पुंयोगादाख्यायाम्' सूत्रस्य भाष्ये चतुर्भिः प्रकारैरित्यादिभिः समभाणि। "***अद्योऽपि साधकतममिति तमब्ग्रहणेन गौणाधारस्यापि***

170 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २३९

***ग्रहणज्ञापनाद्यत्रात्यन्तसामीप्यात् प्रवाहे घोषाधिकरणत्वारोपस्तत्र सप्तमी"।***[171] "स्वरितेनाधिकार:" इति सूत्रे वर्णितम्।

**प्रकृतिप्रत्यययोर्लक्षणाविवेचनम् –**

प्रकृतिप्रत्ययमात्रकप्रयोगस्थले नैयायिका विशिष्टार्थे लक्षणां सम्मन्यन्ते। यथा 'गर्गाः' इत्यादौ गर्गापत्यरूपे प्रत्ययार्थविशिष्टो योऽर्थस्तस्मिन्नर्थे प्रकृतेः 'गर्ग' इत्यस्य शब्दस्य, 'इयान्' इत्यादौ प्रत्ययस्य च प्रकृत्यर्थविशिष्टे लक्षणा।[172] एवम्भूतं मतं वैयाकरणा न मन्वते। तेषु-तेष्वर्थेषु तथाभूतानां शब्दानां शक्तेरेव स्वीकारात्। अत्र प्रमाणभूतो भर्तृहरिर्न्यगादीत्- "***शास्त्रे क्वचित्प्रकृत्यर्थः प्रत्येनाभिधीयते। प्रकृतौ विनिवृत्तायां प्रत्ययार्थश्च धातुभिः"॥***[173] तथा च "नक्षत्रे च लुपि"[174] इति सूत्रमपि मानतामेति, तथा च प्रौढमनोरमायां "सरूपाणामेकशेष एकविभक्तौ"[175] इति सूत्रस्य व्याख्याने भट्टोजिदीक्षितेनापि व्याख्यायीथम्- "***तथाहि यः शिष्यते स लुप्यमानार्थाभिधायीति स्थिते श्रूयमाणैकशब्दोपस्थितं सर्वमविशेषादैकरूपेणैक–अन्वेतुमर्हति"।***[176] एतदपि मानमस्त्येव। एवम्प्रकारेण गर्गार्थे प्रत्ययस्य गर्गापत्यरूपार्थे प्रकृतेः साधुत्वं शक्तिवृत्त्यैव शिन्वन्ति। लोपविधायकशास्त्राण्येव प्रमाणत्वमुपयान्ति। एवञ्चैतेषु स्थलेषु कथिता प्रसिद्धा शक्तिरेव, न त्वप्रसिद्धिरूपा लक्षणेति सिद्धान्तः। कैश्चित् तु 'प्रत्ययलोपे प्रत्ययलक्षणम्'[177] लक्षणायाः समर्थने दीयते, यदित्थम्- प्रत्ययलोपे सति प्रकृतेः प्रत्यये प्रत्ययार्थे लक्षणं लक्षणा, एतद्व्याख्यानं भाष्याद्यननुगुणत्वान्नाद्रियते।

---

[171] तत्रैव, कुञ्जिकाटीका, पृ० २३९

[172] शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ३९

[173] वाक्यपदीयम्, २/२३१

[174] अष्टाध्यायी, २/३/४५

[175] तत्रैव, १/२/६४

[176] प्रौढमनोरमा, अजन्तपुल्लिंगप्रकरणम्, पृ० ३८६

[177] अष्टाध्यायी, १/१/६२

**न्यायदर्शनस्य द्विरेफपदे लक्षणायाः खण्डनम् –**

प्रथमं स्वमतं प्रकाशयति- ***"द्विरेफपदं तु रूढिशक्त्या भ्रमरबोधकम्। अवयवार्थप्रतीस्तु नास्त्येव, रथन्तरादिपदवत्"।***[178] रूढिशक्त्या यथा रथन्तरशब्दबोधकाले सामवेदस्य प्रतीतिर्भवति, तथैवात्रापि रूढिशक्त्यैव भ्रमरपदं बुध्यते। द्वौ रेफौ यस्मिन्नित्याकारकोऽवयवार्थो न प्रतिबुध्यते। भ्रमररूपजन्तुविशेषस्य प्रतीती रूढ्यैव जायते, अथवा योगजशक्त्या द्विरेफपदस्य द्विरेफवत् पदम् (गर्गरः, गर्वरः, भ्रमरः) इत्यर्थो सम्पद्यते। तत्पदनिष्ठरेफद्वयं भ्रमररूपजन्तुविशेषार्थे स्वघटितत्वसम्बन्धेनारोप्य रेफद्वयसम्बन्धित्वरूपेण भ्रमर इत्याकारकजन्तुविशेषस्य बोधः सञ्जायते।

अत एव योगजशक्त्या रूढिशक्त्या वा भ्रमरस्य बोधसत्वाद् भ्रमरपर्यायेषु द्विरेफपदमपि समुपालभ्यत। मुख्यार्थबाधानुसन्धानं विनैव द्विरेफपदेन भ्रमरस्यावबोधो जायते। अतोऽत्र सर्वथानुचित्यं भजते लक्षणा वृत्तिः। अथवा द्विरेफपदेन रेफद्वयसम्बन्धित्वे रेफद्वयवदिति भ्रमरपदोपस्थितावपि भ्रमरपदनिष्ठशक्तताऽवच्छेदकानुपूर्वीरूपेण भ्रमरपदोपस्थितेरभावे भ्रमरपदस्याबोधो न भवितुं शक्नोति, इतोऽपि यदि कथ्यते द्विरेफपदेन लक्षणावृत्त्याऽत्रोपस्थितिर्भविष्यति भ्रमरस्य। तस्माल्लक्षितलक्षणा न्यायशास्त्रे व्यवह्रियते। लक्षिते लक्षणा लक्षितलक्षणोच्यते। तात्पर्यमिदं यद्विरेफपदेन लक्षितं यद् भ्रमरपदं तस्य पुनः द्विरेफसम्बन्धिवाच्यत्वरूपेण जन्तुविशेषे लक्षणा लक्षितलक्षणा कथ्यते।

प्रत्ययार्थान्वये च ***"प्रकृतिप्रयोज्योपस्थितिरपिकारणमिति तु बोधनापत्तेरिति"।***[179] प्रत्ययार्थेन सहान्वयबोधे प्रकृतिप्रयोज्योपस्थितेः कारणतायामर्थाद् 'द्विरेफं जहि' इत्यादिस्थलेष्वमितिप्रत्ययस्य कर्मत्वरूपार्थे द्विरेफरूपप्रकृत्या जायमानोपस्थितिविषयीभूतार्थस्यान्वयः स्यात्। यतोहि प्रकृत्यर्थान्वितस्य प्रत्ययस्य वाचकत्वम्, नियमस्यात्र बाधोऽवलोक्यते।

---

178 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २४०

179 तत्रैव, पृ० २४१

द्विरेफरूपा य प्रकृतिः, तज्जन्योपस्थितिर्भ्रमरपदस्य तस्य कर्मत्वरूपेऽमिति प्रत्ययार्थेऽन्वयो बाधितः।

अतः कथयति- प्रकृतिजन्योपस्थितिमनुक्त्वा प्रकृतिप्रयोज्योपस्थितिः कारणमिति, अर्थात् प्रकृत्यर्थकथनेन प्रकृतिजन्योपस्थितिविषयीभूतार्थमनुक्तत्वा प्रकृतिप्रयोज्यविषयीभूतार्थः क्रियते। तदा द्विरेफरूपप्रकृतिप्रयोज्या या जान्तुविशेषस्योपस्थितिस्तद्विषयीभूतार्थस्य जन्तुविशेषरूपार्थस्य ग्रहणं भविष्यति।

अतो लक्षितलक्षणोपस्थितजन्तुरूप-विशेषार्थेऽन्वितकर्मार्थस्य बोधोऽमिति प्रत्ययेनैव भविष्यति, एवं रीत्या लक्षणावृत्त्या निवाहो भविष्यतीति न्यायवादिनां मतम्। एवं जातेऽप्यन्वयबोधो न सम्भाव्यते। द्विरेफपदेन लक्षितं यद् भ्रमरपदं तस्यानुच्चरितत्वात् कथं जन्तु विशेषस्य प्रत्यायनम्?, "***उच्चरितः सन्नेव शब्दोऽन्वयबोधस्य जनको भवति, उच्चरितस्यैव बोधकत्वमित्यणुदित्सूत्रभाष्ये स्पष्टम्। पुस्तकदर्शनस्थलेऽपि मानसजपवत् सूक्ष्मतरताल्वदिव्यापारेण सूक्ष्मतरं स्वोच्चारणमस्त्येवेति न दोषः"।*** [180] "***उच्चर्यमाण शब्दः सम्प्रत्ययायको भवति न सम्प्रतीयमानः"***[181] एकान्तेऽपि पुस्तकमीक्षमाणस्य सूक्ष्मोच्चारणं भवत्येव- यथा च मानसजपे क्रियते। जपकाले च मन्त्राणां त्रैस्वर्यज्ञानमावश्यकं भवति। तस्मादुदात्तदिस्वरास्ताल्वादीनामुच्चदेशेषूपलभ्यन्ते।

इत्यावश्यकत्वान्मानसत्वरूपेण सूक्ष्मोच्चारणामवश्यमेव स्वीकार्यम्। इदमेव सूक्ष्मोच्चारणं कथ्यते। तथा भारद्वाज आह- "***सूतके मृतके कुर्यात् प्राणायाममन्त्रकम्। तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत्॥ गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेदिति***[182] ***मानसजपलक्षणमन्यतोऽप्युद्धरति- धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्। उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जपः"।***[183] अत्रोच्चरेन्नाम बुद्ध्या कृतं सूक्ष्मोच्चारणम्। मानसिके जपे

---

[180] तत्रैव, पृ० २४१

[181] महाभाष्यम्, १/१/६९

[182] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २४२

[183] तत्रैव, पृ० २४२

सूक्ष्मोच्चारस्तु सम्भव एव। ऋगिति कथनेन अग्निमीलेपुरोहितमित्याद्यानुपूर्वीविशिष्टाया ऋचस्तात्पर्यवशाद्बोधेऽपि तदर्थस्य बोधो न जयते। 'ऋक्' शब्देनाग्निमीडे इत्यादीनामृचां स्मरणं भवति, ऋक्शब्देन नोच्चारणम्, 'गामानय' इत्याह, इत्याद्यनुकरणस्थलेषु, अनुकरणेन अनुकार्यस्य 'गामानय' इति शब्दराशेर्बोधेऽपि (गामानय) तदर्थबोधो न सम्भाव्यत इत्यनुभवसिद्धम्। इतोऽपि भूतकाले उच्चरितानां भविष्यति। चोच्चरितानां वृत्तेरभावत्वाज्ज्ञानमेव न भवति। यथा घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादिजनने कारणता, न स्मृतिविषयीभूतस्य, यथा च पटहादीनां शब्दानां श्रवणे सत्येव कर्णपीडाजनकता, न स्मृतस्य, तथैव पदेष्वपि बोधजनकता तदैव सम्भाव्यते।

यदा ते श्रावणप्रत्यक्षविषयीभूता भवन्ति। तदानीमेव सुखादिजनकताऽवच्छेदक-गन्धत्वविशिष्टगन्धस्य घ्राणेन्द्रियेणैव ग्रहणम्। तथैव सुखादिजनकताऽवच्छेदकशब्दत्वस्य विशिष्टस्य शब्दस्य श्रोत्रियेन्द्रियेणैव ग्रहणं नान्येन। अतः शब्दे सुखजनकतावच्छेदको विलक्षणो धर्मः श्रावणप्रत्यक्षविषयत्वं शब्दत्वम्, अत उच्चरित एव शब्दोऽर्थस्य बोधजनको भवति। विषयेऽस्मिन् नागेशेन कथ्यते- "***परोक्षे लिट्"***[184] ***इति सूत्रे परोक्षे इति न धातोः विशेषणम्, शब्दस्वरूपस्य तस्य परोक्षत्वासम्भवात्। इति भाष्यकैयटयोरुक्तम्।*** परोक्षे इति धात्वंशस्य विशिषणं नास्ति, यतोहि शब्दरूपधातोः परोक्षत्वासम्भव एव। स तु श्रावणप्रत्यक्षविषयीभूयैवार्थबोधरूपकार्यजनने समर्थो भवति।

नैयायिकानां कथनमिदं यत् स्वबोध्यपदवाच्यत्वसम्बन्धेन द्विरेफपदं लक्षणया वृत्त्याभ्रमररूपजन्तुविशेषं बोधयति। लक्षणावृत्तिस्तु न कारयितुं शक्नोति। स्वबोध्यपदवाच्यत्वरूपपरम्परासम्बन्धोऽपि न युज्यते, यतोहि गौणीलक्षणातिरिक्तस्थले शुद्धालक्षणायां साक्षात्सम्बन्ध एव लक्षणायां बीजममन्यत। निष्कर्षत्वेन प्रतिपादयति लक्षितलक्षणां न च स्वबोध्यपदवाच्यत्वसम्बन्धेन द्विरेफपदं लक्षणया भ्रमरं बोधयतीति युक्तम्।

---

[184] अष्टाध्यायी, ३/२/११५

अनुपपत्तिप्रतिसन्धानं विनापि बोधात्। गौण्यतिरिक्तस्थले साक्षात्सम्बन्धस्यैव लक्षणा बोधत्वाच्चेति दिक्।[185]

**संस्कारविशेषस्य लक्षणात्वप्रतिपादकत्वविश्लेषणम् –**

***"ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद इति चेन्न, योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्मदादीनां तदभावात्। किञ्चान्वयाद्यनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतसम्बन्धज्ञानेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणेति व्यवहारात्"।***[186] इति मूलग्रन्थघटकस्य योगिनां सर्वार्थवाचकत्वज्ञाने इत्यादिप्रतिपादनेनान्येषां तदभाव एव लभ्यते। "***किन्तु योगिनामपि तद्व्यवहारस्य क्वचिद्वक्तव्यत्वेन कुत्र सः, अन्येषामयोगिनां मते लक्षणायाः स्वरूपं किम्? अतो योगिनस्तादृशवैयाकरणसिद्धान्ताभिमानियावच्छब्दार्थज्ञानं तथा सर्वार्थवाचकत्वज्ञानमस्मत्पदवाच्यवैयाकरणसाधारण्येन ये दीक्षितादयोऽभ्युपयन्ति तन्मतेन चाह 'किञ्चे' त्यवतरणं प्रदत्तम्।***[187] न***नु व्यवहारदशायाम् 'इदं लक्ष्यम्' व्यवहारोपपत्तये तदावश्यकत्वमत आह 'किञ्चेत्यु' पन्यस्तं सभापतिना"।***[188] तत्तु अस्मदादीनां तदभावादिति ग्रन्थोत्तरमनतिरञ्जकमेव मन्ये।

अग्रेतनं पुनरुपर्युक्तमूलघटकं 'बोधे लक्षणेति व्यवहारादि'ति प्रतीकमादाय 'तस्मिन् बोधे सति तज्जनकतादृशसंस्कारे तच्छक्तौ वा लक्षणेति व्यवहारादि' ति व्याख्या विहिता। "***व्यवहारादि' त्यनेन द्वितीयपक्षस्यैव (तच्छक्तौ लक्षणाव्यवहारस्यैव) इष्टत्वं सूचितम्, लाघवाद्दोषलेशाभावाच्चे' त्युपन्यस्तम्।***[189] ***सभापतिना तु यत्र 'लक्ष्यार्थविषयकसंस्कार एव लक्षणेति भावः' इत्यलेखि। उपर्युक्तमूलघटकस्य 'व्यवहारादि' त्यस्य सन्मात्रविषयिण्याः***

---

[185] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २४५

[186] तत्रैव, पृ० १९०-१९१

[187] तत्रैव, कलाटीका, पृ०१९१

[188] तत्रैव, रत्नप्रभाटीका, पृ० ९५

[189] तत्रैव,कलाटीका, पृ० १९१

***भगवदिच्छायास्तीरादावपि सत्त्वाच्छक्तिरेव भावः इत्युपन्यस्य 'एतेनैकस्या एवेश्वरेच्छायाः शक्तिस्वीकारेणानन्तस्थलेऽतिरिक्तशक्तिकल्पनापेक्षया क्लृतशक्यसम्बन्धरूपलक्षणायां लाघवमित्यपास्तमि'ति च निर्दिष्टम्"।***[190] किन्तु शाब्दिकमते ईश्वरेच्छाशक्तेरस्वीकारादीदृशं विवरणं न श्रद्धास्पदमिति जानामि। अग्रेतनस्य तच्छसंस्कारश्चेदृशस्थले जन्मान्यरीयोऽपी'ति "***अपिरैहिकसमुच्चायक अनेन जन्मान्तरीयस्यापि संस्कारस्य स्वीकारेण सर्वार्थवाचकत्वानभिमान्यस्मत्पदवाच्यवैयाकरणानामतिः सूचितेति व्याख्याय सर्वार्थवाचकत्वाभिमानिनां योगिनां द्विविधोऽपि(एहिको जन्मान्तरीयश्च) सर्वार्थवाचकत्वानभिमानिनामस्मदादिवैयाकरणानां जन्मान्तरीय एव तच्छक्तिसंस्कारः फलबलकल्प्यः इति बोध्यमि'ति विवृतम्"।***[191] मूले पुनः प्रसिद्धनानार्थविषयकबोधजनकत्वमेव नानार्थत्वं गङ्गादिपदेन तीरादिबोधेऽपि नातिप्रसक्तं नानार्थत्वमिति स्पष्टोल्लेखः।

एतावता दर्शितमूलतद्विवरणोपन्यासेन सर्वार्थवाचकत्वरूपशाब्दिक-सिद्धान्तस्य योग्यगोगिसाधारण्येनाभ्युपगमेऽप्यनुपपत्ति-विरह उभय-साधारणासाधारणव्यवहारोपपत्तिः, तच्छक्तेर्लक्षणास्वरूपता गङ्गादिशब्दस्य नानार्थकत्वापत्तिविरहो लघुत्वञ्च सर्वं समानमेवोपपादनीयम्। अत्र तच्छक्तिसंस्कारो लक्षणेत्येकः पक्षः, तच्छक्तिरेव लक्षणेत्यपरः, शक्यसम्बन्धो हि लक्षणा तार्किकाणां पक्षः, शक्यसम्बन्धज्ञानजन्या-शक्यत्वेन गृहीतप्रसिद्धार्थसम्बन्धज्ञानजन्या शक्यादशक्योपस्थितिर्लक्षणेत्यालङ्कारिकाणां पक्षः।

एतत्पक्षे स्मरणात्मकोपस्थितेरात्मनिष्ठत्वेऽपि स्वविषयसम्बन्धिवाचकत्वसम्बन्धेन तस्याः पदनिष्ठत्वोपपत्तिः। एतदालङ्कारिणां पदप्रयोज्यैव, न तु पदजन्या तीराद्युपस्थितिस्तत्र शाब्दे बोधे कारणम्। उपस्थितेर्वृत्तित्वानुपपत्तिरपि न, शाब्दबोधजनकोपस्थितिजनकज्ञानविषयस्य स्वज्ञानद्वारा शाब्दबोधहेतूपस्थितिजनकस्य वा वृत्तित्वमनङ्गीकृत्य

---

[190] तत्रैव,रत्नप्रभाटीका,पृ० ९५

[191] तत्रैव, कलाटीका १९१

शाब्दबोधजनकपदपदार्थसम्बन्धत्वस्यैव वृत्तित्वस्वरूपाभ्युपगमात्, तस्य च तत्राक्षतत्वात्, लघुमञ्जूषाकलाटीकायां 'वृत्तित्वञ्च सङ्केतविशेषसम्बन्धेन वृत्तित्वमि' इत्युक्त्यापूर्वं[192] प्रदर्शितवृत्तिलक्षणस्य च तत्रोपस्थितौ सङ्गमात्। शक्यतावच्छेदकप्रकारकारोपस्य लक्षणात्वपक्षः पञ्चमो नव्यवैयाकरणस्य नागेशस्य।

उपाध्यायेन "***शक्यतावच्छेदकारोपरूपा, संस्काररूपा, सम्बन्धरूपा, सम्बन्धज्ञानरूपा, उपस्थितिरूपेति मतभेदेन पञ्चविधा लक्षणेत्युपन्यस्तम्***"[193] परन्तु स्वसम्बन्धज्ञानस्य तत्र कारणत्वे सत्यपि लक्षणात्वं नान्येन केनाप्युक्तम्। मञ्जूषायां "***सम्बन्धज्ञानं तीरसम्बन्धिप्रवाहबोधकमिदमिति गङ्गापदशक्यप्रवाहसम्बन्धितीरम्,*** **वा यद्युपन्यस्तम्**"[194], तथापि तत्र तथोपन्यासो न तस्य लक्षणात्वैकत्वपक्षपरः, किन्तु सर्वेषु पक्षेषु तस्यावश्यकारणत्वेनापेक्षिततत्वमात्रप्रदर्शकः।

**अप्रसिद्धाशक्तिविचारः –**

वैयाकरणैर्द्विधा शक्तिः स्वीक्रियते प्रसिद्धाऽप्रसिद्धाभेदेन। तत्र 'सर्वे सर्वार्थवचका' इति पञ्जलिसिद्धान्तात् प्रसिद्ध्यप्रसिद्धिभेदेन शक्तेरेव द्वैविध्यमुपगम्य निर्धार्यते, यद्वैयाकरणानां सिद्धान्ते शक्त्यतिरिक्तलक्षणावृत्तिर्नास्ति। तत्र प्रसिद्धाऽप्रसिद्धत्वज्ञानाय परमलघुमञ्जूषायामुक्तम्- "***आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्, सहृदयहृदयमात्र वेद्यत्वमप्रसिद्धात्वम्,***"[195] प्रमाणसमीक्षायामपि कथ्यते- "***आपामरविद्वज्जनवेद्यात्वं प्रसिद्धात्वम्, सहृदयमात्रवेद्यात्वमप्रदिसद्धात्वम्।***[196] **प्रचुरप्रयोगविषयत्वं प्रसिद्धत्वम्"।**[197]

---

192 तत्रैव, कलाटीका, पृ० १६

193 तत्रैवरत्नप्रभाटीका, पृ०१००

194 तत्रैव, पृ०१९३

195 परमलघुमञ्जूषा,पृ०५९

196 पाणिनीयव्याकरणे प्रमाणसमीक्षा, पृ०२२२

197 वैयाकरणसिद्धान्तमञ्जूषा,पृ०२१

अतः प्रचुरप्रयोगविषयता प्रचुरजनवेद्यता यत्र भवति तस्यैव प्रसिद्धात्वमिति लक्षणम्। अल्पजनवेद्यता, अल्पप्रयोगविषयता यत्र तदप्रसिद्धात्वेनावगम्यते। आपामरविद्वज्जनवेद्यत्वस्य प्रसिद्धायामपि पामरजनावेद्यताया सम्भवाभावात्। एतेन व्याकरणभावनापरिपक्वबुद्धिमत्वादिना सहृदयत्वस्य परिष्कारोऽपि नावश्यकः। इयमेवाप्रसिद्धाशक्तिर्लक्षणोच्छेदे कारणत्वमुपयाति।

**लक्षणाभावप्रतिपादनम् –**

यद्यपि पूर्वोक्तलक्षणायाः स्वरूपप्रतिपादनेन प्रतिभाति यन्नागेशेन लक्षणा स्वीक्रियते। किन्तु लक्षणाया व्याख्यानकाले तैरुपास्थापि वचनं भाष्यकर्तुर्येन लक्षणाभावो गम्यते। किन्तु वचनमिदं महाभाष्ये नोपलभ्यते। ***"सति तात्पर्ये सर्वे सवर्थिवाचक इति भाष्याल्लक्षणाया अभावात्। वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्, जघन्यवृत्तिकल्पनाया अन्यायत्वात्"***[198] धारणेयं नागेशस्य। तात्पर्ये सति सर्वेषामर्थानां वाचकाः शब्दा इति अतो नास्त्यावश्यकता लक्षणायाः। शक्त्यतिरिक्ता लक्षणा न स्वीक्रियते। लक्षणा च जघन्यवृत्तित्वेन प्रतिपादिता, जघन्यत्वञ्च वृत्तिद्वयावच्छेदकत्वरूपम्।

लक्षणास्वीकारे शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणा-जन्योपस्थितेश्च कारणत्वं वाच्यम्, इति कार्यकारणभावद्वयकल्पने गौरवम्। शक्तिमात्राङ्गीकर्तृमते तु शक्तिजन्ययोपस्थितित्वेनैव हेतुतेति लाघवं स्पष्ठम्। किञ्च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः। शक्तिजन्योपस्थितं विनाऽपि लक्षणाजन्योपस्थितितः शाब्दबोधात्। न चाव्यवहितोत्तरत्वसम्बन्धेन शक्तिज्ञानजन्योपस्थितिविशिष्टशाब्दबुद्धित्वम्, लक्षणाज्ञानजन्योपस्थितिविशिष्टशाब्दबुद्धित्वं कार्यताऽवच्छेदकम्, शक्तिज्ञान-जन्योपस्थितित्वञ्च लक्षणाज्ञानजन्योपस्थितित्वञ्च कारणताऽवच्छेदकमिति वाच्यम्। अनन्तकार्यकारणभावप्रसङ्गात्।

नित्यानन्दपर्वतीयस्तु प्रवाहादिसम्बन्धित्वेनोपस्थिततीरादौ गङ्गापदादेः 'सर्वे सर्वार्थवाचका' इति भाष्यात् सामान्यतः पूर्वमेव ज्ञातः शक्तिरूपः सम्बन्ध एव

---

198 परमलघुमञ्जूषा, पृ० ५७

कल्पनीयो न तु शक्यसम्बन्धरूपः। तथा सति तयोरुभयोः शाब्दबोध-जनकपदार्थोपस्थितिजनकपदपदार्थसम्बन्धत्वरूपं शाब्दबोधजनकपदपदार्थ-सम्बन्धत्वरूपं वा वृत्तित्त्वं कल्पनीयम्। शाब्दबोधकारणताऽवच्छेदकत्वं उपस्थितिकारणताऽवच्छेदकत्वञ्च शक्तत्व-शक्यसम्बन्धयोरुभयोः कल्पनीय-मिति गौरवम्। शक्तिकल्पनापक्षे तु तस्या एव वृत्तित्वकल्पनम्। तत्त्वस्यैव च तत्तदवच्छेकत्वकल्पनमिति लाघवम्। तन्मतेऽन्यदपि गौरवमिति भवति तच्च जघन्यवृत्तित्वरूपं जघन्यत्वं नाम न तस्याः किञ्चित् प्रयोजनं यतोहि तत्पर्यवसानं तु व्यञ्जनायामेव जायते। यदि नास्ति लक्षणा शक्तिस्तदा कथं बोधस्तीरादीनां स्यात्- ***"कथं तर्हि गङ्गापदात् तीरप्रत्ययः? भ्रान्तोऽसि , 'सति तात्पर्ये सर्वे सर्वार्थवाचका' इति भाष्यमेव गृहाण"।*** [199]

अतोऽनेन तात्पर्येण सर्वाथविषयको बोधो भविष्यत्येव, नास्ति लक्षणेति वैयाकरणनिकाये नागेशः। व्यवहारादिना गङ्गापदादौ तीरादिशक्तेः पूर्वं विशेषरूपेणाग्रहेणाप्रसिद्धत्वाल्लक्षणापदेन व्यवहार इति बोध्यमित्याहुः। शक्तिमात्रेण निर्वाहसम्भवे लक्षणावृत्तिप्रयुक्तकार्यकारणादिस्वीकारेऽतिगौरवस्य दुरुद्धरत्वादिति भावः।

**अप्रसिद्धयैव लक्षणा गम्यत इति विचारः –**

***"शक्तिर्द्विविधा-प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्"?*** [200] एवं लक्षणायाः खण्डनं करोति नागेशः, सा च लक्षणाऽप्रसिद्धशक्तिस्वरूपा। सर्वेषां सर्वार्थवाचकत्वे सति शब्दानां पर्यायतापत्त्याख्यदोषः स्यादिति चेन्न, तत्प्रतिपाद्यते- ***"ननुसर्वे सर्वार्थवाचका इति चेद् ब्रूषे तर्हि घटपदात्पटप्रत्ययः किन्न स्यादिति चेन्न, सति तात्पर्ये इत्युक्तत्वात्तात्पर्याभावादिति गृहाण। तात्पर्यञ्चात्र ऐश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति सर्वं सुरूढम्"।*** [201] परमलघुमञ्जूषायां तु नागेशेन लक्षणायाः खण्डनं क्रियते, तथा च

---

[199] तत्रैव, पृ०५७

[200] तत्रैव,पृ० ५९

[201] तत्रैव, पृ० ५९

लक्षणाऽप्रसिद्धशक्त्या गम्यते इति प्रतिपाद्यते। वैयाकरणसिद्धान्त-लघुमञ्जूषायां तु लक्षणायाः विस्तृतविवेचनावरे स कथयति यत्-शक्यताऽवच्छेदकारोप एव लक्षणा एवं रीत्या तत्रत्ये ग्रन्थे लक्षणा अमीमनत। इत्यस्माभिर्लक्षणाव्याख्याने विस्तरेण चर्चितम्।

नागेशेन शब्दार्थयोर्भेदद्वयं स्वीकृत्यैव लक्षणा प्रत्याख्याता परमलघुमञ्जूषायाम्। भेदाश्च- मुख्यगौणौ प्रसिद्धाप्रसिद्धौ, निमित्तनिमित्तिनौ। एतयोः स्वीकारेणैवाप्रसिद्धेन लक्षणाया निर्वाहो भविष्यत्येवैवं व्याख्यानं कर्तुं शक्यते। केवलं 'सर्वे सर्वार्थवाचकाः' इति स्वीकृत्य लक्षणाया निरासो न कर्तुं शक्यते। नागेशकृतं शक्तौ भेदद्वयकल्पनं प्रसिद्धऽप्रसिद्धरूपं तत्प्रौढत्वस्य परिचायकम्। सामान्यबुद्धयोऽपि सारल्येन यथा बोधं कुर्यस्तस्य प्रसिद्धात्वं विद्वज्जनमात्रज्ञेयताऽप्रसिद्धात्वम्। "***शक्तिर्द्विविधा-प्रसिद्धाऽप्रसिद्धा च। अमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्। सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्"***[202] इति नागेशस्य मतं परमलघुमञ्जूषायाम्।

**सर्वे सर्वार्थवाचका इति स्वीकृते सति सम्प्राप्तदोषनिवारणम्–**

उपर्युक्तसिद्धान्तस्वीकारेण घटपदेन पटस्यापि बोधो जायताम्, इति शङ्कां मनसिकृत्य नागेशो वक्ति- घटपदस्योच्चारणे सति कादपि नैवं दृश्यते, यत् घटपदं पटपदार्थं बोधयेदिति। वक्तुस्तात्पर्यमपि नैवम्भूतं भवति। यतोहि घटपदात् पटस्य बोधो न भवितुमर्हति। तदर्थमेव तथाभूतस्य दोषस्यापत्तिरेव न स्यात्। "***ननु सर्वे सर्वार्थवाचका इति चेद् ब्रूषे तर्हि घटपदात्पटप्रत्ययः किन्न स्यादिति चेन्न, सति तात्पर्ये इत्युक्तत्वात्"।***[203] तात्पर्यस्य चानादित्वं सूच्यते ईश्वरकृतत्वात्। स च परम्परयाऽस्माभिर्लभ्यते। तात्पर्यञ्च लोकव्यवहारेण सर्वदा प्राप्यते, तच्च सर्वविधेषु व्यवहारेषु स्थितं भवती'ति स्वीकारे सति न काचनापत्तिः। अयमभिप्रायः तत्वप्रदीपे न्यगद्यत। यदर्थे यत्पदं प्रसिद्धं तदर्थे तत्पदवाच्यत्वं तदर्थवाचकत्वञ्च तत्पदस्येष्यते। तत्पदादेव

---

202 परमल्घुमञ्जूषा, पृ०५९

203 तत्रैव, पृ०५९

जायमानस्तदर्थबोधो मुख्यो भवतीति नियमेन प्रसिद्धेरेव शक्तेर्वाचकभावनियामकत्वात् घटपदं पटवाचकमिति व्यवहारो नैव जायते। तस्मात् तदर्थनिरूपितप्रसिद्धशक्तिमत्त्वं तदर्थवाचकत्वं तत्पदनिष्ठप्रसिद्धशक्ति-निरूपकत्वं तत्पदवाच्यत्वमिति फलितम्।[204]

**समीक्षणं निष्कर्षश्च –**

आचार्यनागेशो निम्नकारणानि स्वीकृत्य लक्षणाभावं विचारयति, तानि च कारणानि-

१-वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्, जघन्यवृत्तिकल्पनाया अन्यायत्वाच्च। २- सति तात्पर्ये सर्वे सर्वार्थवाचकाः। ३- तथाहि शक्तिर्द्विधा प्रसिद्धाऽप्रसिद्धा च। एतेषु द्वितीयवाक्यस्य कथनं महाभाष्यकारं पतञ्जलिमनुसृत्य कथयति, तथा च तृतीयवाक्यस्य कथनं वाक्यपदीयकारमनुसृत्य कथ्यते। एताभ्यां वाक्याभ्यां द्वाभ्यामेव नागेशः प्रथमं वाक्यमभिधत्ते। अन्यथा लक्षणावृत्तेर्निरासः सारल्येन कर्तुं न शक्यते। नागेशो महाभाष्यवाक्यपदीययोराश्रयणं कृत्वा यथा लक्षणां प्रत्याख्याति, तत्तु लाघवदृशा साधुरिति वक्तुं शक्यते। वस्तुतश्शक्तेः 'प्रसिद्धाऽप्रसिद्धा' भेदद्वयकल्पनमपि शक्तिलक्षणावदेव। वैयाकरणसिद्धान्तमञ्जूषायां तथा च वैयाकरणसिद्धान्तलघुमञ्जूषायां लक्षणाया वर्णनं विस्तारेण व्यधीयत। तदस्माभिर्व्याख्यायि। 'सर्वे सर्वाथवाचकाः' इति महाभाष्यानुसारिसिद्धान्तेन लक्षणा तु स्वीक्रियते एव, यतोहि तस्य व्याख्याने नागेशेन कथ्यते – "***ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद इति चेत् ? न। योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्मदादीनां तदभावात्***"।[205] एवम्भूतेन व्याख्यानेन सर्वथा निषेधो न कर्तुं शक्यते लक्षणायाः। तस्मात् कारणादेव शक्यताऽवच्छेदकारोपरूपलक्षणा स्वीक्रियते इति नागेशो वैयाकरणसिद्धान्तलघुमञ्जूषायाम्। एतेन लक्षणाविषयकव्याख्यानेन शोधार्थिना निश्चीयते यद् वैयाकरणसिद्धान्तमञ्जूषाया व्याख्यानकाले

---

204 तत्त्वप्रदीपः, पृ०५२, उद्धृतम्- नागेशभट्टस्य व्याकरणदर्शने चिन्तनम्, पृ०११७

205 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ०१९०

नागेशः 'सति तात्पर्ये सर्वे सर्वार्थवाचका' इति महाभाष्यकर्तुस्तात्पर्यमादाय स्वकं विवेचनमस्थापि, यतोहि योगिनां कृते एव वचनमिदं न त्वस्मदादीनां कृतेऽन्यथा व्यवहारोच्छेदप्रसङ्गः स्यादिति व्याख्यानादेव शक्यताऽवच्छेदकारोपरूपां लक्षणां कथयति। "***परे तु शक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिवेशेष बोधे वा लक्षणेति व्यवहारः"।*** [206]परमलघुमञ्जूषायां तु पूर्णत एव भर्तृहरेः प्रभावोऽवलोक्यते - सिद्ध्यसिद्धिभ्यां तेषां गौणमुख्यप्रकल्पना, शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते, तमप्रसिद्धं मन्यन्ते गौणार्थाभिनिवेशिनम्, इत्यादिभिः कारिकांशैर्निश्चीयते यल्लक्षणायाः खण्डने परमलघुमञ्जूषायां भर्तृहरिणा प्रभावितो नागेशः। अत एव नागेशस्तिसृणां मञ्जूषाणां वृत्त्यारम्भकाले कथयति- सा च वृत्तिस्त्रिधा- शक्तिर्लक्षणा व्यञ्जना च। अतो मञ्जूषाद्वयीमाधृत्य वक्तुं शक्यते यन्नागेशो लक्षणां स्वीचिकीर्षति। अत्र विशेषरूपेण प्रतिपादयितुं शक्यते यन्नागेशभट्टः साहित्यिकैः प्रभावितः सन् लक्षणां व्यञ्जनां च परिभाषते, यतोहि वैयाकरणसिद्धान्तमञ्जूषायां तथैव तन्मतमुद्धरति लक्षणास्वीकाराय। तस्य ग्रन्थाध्ययनेन प्रतिभाति मम्मटाचार्येण सः प्रभावितो वर्तते। अत एव त्रयो भेदा न्यगद्यन्त। तथा च परमलघुमञ्जूषायां स्वीकृतशक्तिभेदोऽपि यदि लक्षणाऽप्रसिद्धत्वेन कथ्येत तदाऽपि न काचन क्षतिरिति लक्षणा विचारः।

अद्वैतवेदान्तस्यानुयायिनो लक्षणां मन्वते सा च लक्षणा त्रिविधा विद्यते जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा। अजहल्लक्षणा भागत्यागत्यागलक्षणा नाम्ना ज्ञायते। एषैव जहदजहल्लक्षणा भागत्यागमुखेन ब्रह्मणोऽवबोधं कारयति।

वेदान्तदर्शने लक्षणाशब्दशक्तिः प्रणभूता विद्यते। यतोहि निर्गुणनिर्विकल्पकस्य संसर्गभेदस्य रहितस्य परिकल्पातीततत्त्वस्य ब्रह्मणो ज्ञानं न सम्भवत्यभिधया। अभिधानं च जतितो गुणतो क्रियातो यदृच्छातः सञ्जायते। तस्माद्ब्रह्मणि नैतज्जात्यादिकं संभवति। व्यञ्जनायाश्चाभाव एव विद्यते। तस्माच्च लक्षणयैव साध्यतेऽद्वैतवेदान्यस्य चैतन्यम् ।

---

[206] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० २१७

## ॥ चतुर्थोऽध्यायः ॥

## ॥ व्याकरणाद्वैतवेदान्तयोर्व्यञ्जनाविमर्शः ॥

शाब्दबोधौपयिकपदपदार्थसम्बन्धत्वं वृत्तित्वम्। स च सम्बन्धो विशिष्टभिधानेन शक्तिरिति कथ्यते। शक्तयश्चत्रयो मन्यन्ते तत्र प्रत्येकं शक्तेश्चर्चा यथा अभिधाया व्याख्यानं द्वितीयाध्याये लक्षणायास्तृतीयाध्याये, चतुर्थे च पुनर्व्यञ्जनाया विश्लेषणं विधीयते।

तत्रादौ विचारयामो यद्व्यञ्जनाया आवश्यकत्वं किमिति चेदुच्यते। व्यञ्जनां विना वैयञ्जनिकशाब्दबोधो भवितुं नार्हति। तेन च साहित्यादिशास्त्राणां काव्यात्मभवनमेव नश्येत्। दर्शनेषु वास्तविकरूपेण व्यञ्जना न मन्यते यतोहि तत्र वैयञ्जनिकशाब्दबोधस्य आवश्यकताया अभाव एव। दर्शनेषु व्याकरणदर्शन-मङ्गीकुरुते व्यञ्जनाम्। सा च साक्षान्नागेशभट्टेन मञ्जूषात्रय्यां व्यचार्यत। तच्च च व्याख्यानं व्याकरणदर्शनस्य व्यञ्जनाप्रसङ्गे समुपस्थापयिष्यते।

अत्राद्वैतवेदान्तदर्शने व्यञ्जनाया आवश्यकता न विद्यते, न च तत्र वैयञ्जनिकशाब्दबोधो न स्वीक्रियते। तस्मादत्र दर्शने व्यञ्जनायाश्चर्चा न क्वापि विद्यते। किन्त्वत्र सत्कार्यवादिदर्शनेऽभिव्यक्तिवाद एव विद्यते। परमात्मनोऽभिव्यक्तिरेव जगदिदं विद्यते। तथाभूताया अभिव्यक्तेस्स्वरूपं किमिति विचारयितुं शक्यते। अभिव्यक्तिः, विवर्तः, परिणामः, प्रतिबिम्बः, आभासः, इत्यादयश्शब्दाः पौनःपुन्येन प्रायुज्यन्त। तेषामत्र प्रत्यासत्या विचारः कर्तुं शक्यते।

अत्रत्यव्याख्याने परवर्तिषु वेदान्तिषु मधुसूदनसरस्वती विद्यते महानाचार्योऽद्वैतवेदान्तस्य। स च व्यञ्जनायाश्चर्चां स्वकीये कल्पलतिका इत्यभिधे ग्रन्थे व्यधात्। स चर्चां पूर्वपक्षत्वेन साहित्यशास्त्रिण आदाय उपास्थापयत्। स कथयति– **"व्यञ्जनाख्या अपरा वृत्तिः इत्यलङ्कारिकाः, ते तु गौणीं लक्षणामध्येऽन्तर्भाव्य, मुख्या लक्षणा व्यञ्जना चेति त्रैविध्यमाचक्षते"**।[1] एवं रीत्या आचार्यो विभागपुरस्सरं 'गतोऽस्तमर्कः' इत्यस्य वाक्यस्य वैयञ्जनिकशाब्दबोधं

---

[1] वे०क०ल०, पृ० ७७

प्रादर्शयत, एतस्य वाक्यस्य वहुविधा अर्थाः समदीयन्त। सर्वेऽपि स्व-स्वप्रकृत्यनुगुणमर्थं स्वीकृत्य कार्ये लग्ना जायन्ते। अत्रत्यव्याख्याने स सर्वान्ते वदति शब्दो हि नियतसम्बन्धेनैवार्थमभिव्यनक्ति। नियतसम्बन्धाभावेऽपि यदि केनचिदपि शब्देन काथञ्चित्कोऽपि पदार्थो दीयते चेदन्यथाऽतिप्रसङ्गः स्यात्। तथैवानुमानादिना सम्भवेत्, यदि च न सम्भवति चेदर्थापत्तावन्तर्भावः स्यात्, सर्वान्ते स कथयति– **"अस्तु सापि वृत्तिः, इत्यस्माकं न कापि क्षति"**।[2]

व्यञ्जनायाः खण्डनम्- आचार्यमधुसूदनसरस्वती साक्षाच्छब्दमुखेन प्रतिपादयति यद् ब्रह्मणि न सम्भवति एव व्यञ्जना वृत्तिः। कारणमित्येव यत्तत्र प्रमाणाय किमपि तादृशमुपोद्वलकं नास्ति। उपोद्वलकाभावे तस्या अप्यभाव एव। **"न, व्यञ्जनापि सम्भवति, तस्या अप्रामाणिकत्वात्, प्रामाणिकत्वे वा निःसम्बन्धेऽप्रसरात्, इति"**।[3] यदि च प्रामाणिकताऽपि स्यात् तदात्वे तु सम्बन्धरहितेषु स्थलेषु सा न सम्भवति। यतोहि एकमेवादितीयं ब्रह्म इत्यादिश्रुतिषु प्रतिपादितत्वात्। ब्रह्मणस्तु पदार्थाभाववत्त्वमेव। यस्य च पदार्थत्वमेव नास्ति तस्य च वाक्यार्थेन सह समन्वय एव न सम्भवति। पदार्थस्य राहित्याद् वाक्यार्थ एव न सेत्स्यति। तेन च पदार्थस्य वाक्यार्थस्य च भेदे सत्यखण्डार्थता च तस्यात्मनो विरुध्येत्। यदि कथञ्चिदेवम्भूतो वाक्यार्थः स्वीक्रियते चेद् वाक्यार्थस्यैव वैयर्थ्यापतिः स्यात्। तस्मात् कथञ्चिदपि न सम्भवति व्यञ्जना अद्वैतवेदान्तदर्शने। यतोहि शब्दानां शक्तिमतां च स्वरूपद्वारा प्रकारतया विषयतया आश्रयत्वेन फलतः कारणतो वा अविद्यानिवर्तकत्वमेव ब्रह्मसम्बन्धिनः। यतोहि शब्दा ब्रह्मसम्बन्धिनमज्ञानमपकृत्यैव निर्वृत्ता भवन्ति। अज्ञाननिवृत्तिपरमेवोपलक्षितस्यात्मनो मोक्ष इति। अतो व्यञ्जनाया अत्र शास्त्रेऽनवकात्वमेव भोत्स्यामहे।[4] तस्मात् कारणात् पूर्वपक्षिणां प्रवादाः स्वमेव

---

[2] तत्रैव, पृ० ७९

[3] तत्रैव, पृ० ९४

[4]"तस्मादद्वितीयस्य ब्रह्मणः पदार्थत्वाभावात्, अपदार्थस्य च वाक्यार्थायोगात्, पदार्थवाक्यार्थयोरभेदेऽखण्डासिद्धेः, अभेदे च वाक्यार्थवैयर्थत्वात्, केनापि रूपेण न , अद्वितीयब्रह्मात्मैक्यानुभवः सम्भवति, तदेवं स्वरूपतः प्रकारतो विषयतः आश्रयतः फलतः कारणतश्च, अविद्यानिवर्तकज्ञानानिरूपणात्, अविद्यानिवृत्त्युपलक्षित आत्मैव मोक्षः, इति न क्षोदक्षमं पश्यामः, इति, अनुपासिगुरवो मन्दबुद्धयः स्वयं सन्दिहानाः एव पूर्वपक्षयन्ति ते व्युत्पत्तिप्रकारदर्शनेनानुकम्पनीयाः कारुणिकै, इति"॥
तत्रैव, पृ० ९५

दूष्यन्तेऽखण्डैकरसाभाववत्वाबोधनात्। गीताया द्वितीयाध्यायस्य शाङ्करभाष्ये इत्थं वर्ण्यते-

**"कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।**

**तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्"॥**[5]

कर्म ब्रह्मोद्भवं ब्रह्म वेदः। स उद्भवः कारणं यस्य तत्कर्म ब्रह्मोद्भवं विद्धि जानीहि, ब्रह्म पुनर्वेदाख्यमक्षरसमुद्भवम्, अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तदक्षरसमुद्भवं ब्रह्म वेद इत्यर्थः। यस्मात् साक्षात् परमात्माख्याद् अक्षरात् पुरुषनिःश्वासभूतं ब्रह्म। तस्मात् सर्वार्थप्रकाशकत्वात् सर्वगतम्, सर्वगतमपि सन्नित्यं सदा यज्ञविधिविधानत्वात्वाद्यज्ञे प्रतिष्ठितम्।[6]

अत्र च यद् प्रकाश्यते प्रकाशकत्वमेव व्यञ्जनायाः स्वरूपमिति प्रतिपादयितुं शक्यते। व्यञ्जनम्, अभिव्यक्तिः, इत्यादिभिर्नामभिर्व्यञ्जना बोध्यते। सत्कार्यवादे तदनुगामिषु दर्शनेषु विचारधारासु च सर्वमभिव्यज्यते न च नूतनं किमपि तच्च 'विवर्त' इति शब्देन व्यपदिश्यते।

**वाक्यवृत्तौ व्यञ्जनाबीजम्-**

आचार्यशङ्करो निर्दिशति प्रकाशकस्य स्वरूपं तच्च कथङ्कारं स्वरूपं प्रपादयति-

**"घटावभासको दीपो घटादन्यो यथेष्यते।**

**देहावभासको देही तथाहं बोधविग्रहः"॥**[7]

**अपरोक्षानुभूतौ–**

अत्रापि प्रकाशस्य प्रकाशकत्वं प्रतिपादयति तच्च यथा पदार्थानां ज्ञानं प्रकाशेन विना न जायते। तथैव ज्ञानमपि न प्रकाशते, विचारेण विना

---

[5] गी०अ०, २/१५

[6] गी०शा०भा०, पृ० ४९

[7] वा०वृ०का०, २३

तत्राविद्यायाः कारणात्। अविद्या अस्माकं ज्ञानमवरोधयति। तस्मादविद्यात्मकस्यान्धाकारस्यापनोदनाय प्रयासो विधेयः। किन्तु जनाः कर्मणि व्यस्ताः सन्तस्तत्रैवावलम्बन्ते। किन्तु यथा वास्तविकज्ञानाय अविद्यायां सिद्धा बहवः, तदानीमेव शनैश्शनैरविद्यात्मकस्यान्धकारस्य लोपे सति ज्ञानं प्रकाशमानं जायते नान्यथा। अत्रापि प्रकाशकत्वमात्मनः –

**“नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः।**

**यथा पदार्थभानं हि प्रकाशेन विना क्वचित्”॥**[8]

ब्रह्मणः सर्वप्रकाशकत्वं प्रतिपादयति तथा च तस्य तेजोऽन्येभ्यस्तेजोभ्यः श्रेय एव-

**“आत्मनस्तत्प्रकाशकत्वं यत्प्रकाशावभासनम्।**

**नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि”॥**[9]

अत्मनः प्रकाशकता सर्वविधानपि प्रकाशवतोऽतिशेते। तद्यथा प्रकाशको वह्निः किन्तु तस्य च सीमा विद्यते। सूर्योऽपि प्रकाशकः संसारस्यैतस्यापि मर्यादा विद्यते, तत्परं न प्रकाशते। किन्तु आत्मनः प्रकाशः सर्वत्र विद्यते निस्सीमं तेजस्तस्य, निस्सीमतेजोवता आत्मना प्रत्येकं व्यक्तः प्रकाश्यते ब्रह्माण्डमपि। अतस्तत्रापि प्रकाशकत्वधर्मस्तस्य व्याख्यानमपि प्रकाश्यप्रकाशकभावेन कर्तुं पार्यते।

यथा दीपः स्वयमेव प्रकाशते प्राकाशितः सन् घटमपि प्रकाशयति। किन्तु स दीपो घटं प्रकाशयन्नपि घटाद्विलक्षणमेव भवति। तथैव देहस्य प्रकाशको देही

---

[8] अप०, का० ११

[9] तत्रैव, का० २२

शरीरादचेतनाद् भिन्न आत्मेति चैतन्यस्वरूपः। अतोऽत्र प्रकाश्यप्रकाशकभावः सम्बन्धः प्रतिपादयितुं शक्यते। यथा दीपः प्रकाशितः सन् स्वस्वरूपं प्रकाश्यान्धकारमपनोद्य तत्रस्थान् पदार्थान् प्रकाशयति। तथैव आत्मापि स्वयमेवं प्रकाशितः सन्नचेतनं देहमप्यवभासयति। यथा शब्दः स्वस्वरूपं प्रदर्श्य अर्थमपि प्रकाशयति तच्च भर्तृहरिराह-

**"ग्राह्यत्वं ग्राकत्वं च द्वे शक्ती तेजसो यथा।**

**तथैव सर्वशब्दानामेते पृथगवस्थिते"॥**[10]

**अभिव्यक्तिवादः-**

व्यञ्जनाया विषये विवरणप्रमेयसङ्ग्रहे प्रथमवर्णके 'अथातो ब्रह्मजिज्ञासा' इत्यस्य विचारकाले कथयति विमतं **"शास्त्रमारम्भणीयम्, सम्भावितविषयप्रयोजनत्वात्, कृष्यादिवदिति। न च सूत्रे विषयप्रयोजनानुपादानान्नायं विषयः सूत्रसिद्ध इति शङ्कनीयम्, मुखतोऽनुपादानेऽप्यर्थात् सूचितत्वात्। सूत्रस्य हि सूचनमलङ्कारः, न तु दोषाय"**।[11] एतस्य व्याख्यानं क्रियते- सूत्राकारः साक्षाद् विषयप्रयोजनयोश्चर्चां न व्यधात्। ततोऽप्यर्थतोऽसूचयत्। वाचकशब्दैस्साक्षादभीष्टार्थस्य प्रतिपादनं न कृत्वा व्यञ्जनया वृत्त्या तदर्थस्य प्रबोधना सूत्राणामलङ्करणमेव, न तु दूषणम्। एतेन विवरणव्याख्याने गम्यते यद्व्यञ्जनयाऽप्यर्थबोधः कार्यते। अत्र विषयः **"स वा अयमात्मा ब्रह्म"**[12] इति ब्रह्मात्मैक्यं विषयः, प्रयोजनं च **"तरति शोकमात्मवित्**[13] **ब्रह्मविदाप्नोति परम्"**[14] इत्यादिश्रुतिप्रसिद्धा दुःखोच्छेदब्रह्मप्राप्तिः प्रयोजनम्।

---

[10] वा०प०, ब्र०का०

[11] वि०प्र०, पृ० १९-२०

[12] शत०ब्रा०, १४/७/२/६

'तत्त्वमसी'ति महावाक्यैश्शमदमादिभिश्चत्वारिसाधनैश्च जीवब्रह्म-विषयिका शुद्धा मानसिकी वृत्तिर्जायते, तस्यां च शुद्धायां मानसिक्यां स्थितौ स्वतः सिद्धायाः स्वयं प्रकाशस्वरूपा इत्यर्थः। तस्य स्वप्रकाशस्वरूपस्य परमात्मनोऽभिव्यञ्जनम्, शाङ्कर्याः शङ्करसम्बन्धिन्या द्वैतप्रतिपादनाविषय-भूताया चिच्छक्तेश्चितोऽभिव्यक्तिर्जायते सैवाभिव्यक्तिरेवाज्ञानस्य नाशिका॥

**"तस्यां चिदभिव्यक्तिः स्वतः सिद्धाः च शाङ्करी।**

**तदेव ब्रह्मविज्ञानं तदेवाज्ञाननाशनम्"॥**[15]

**उपदेशसाहस्त्र्यामभिव्यक्तिवादः—**

आचार्यशङ्करस्यैषा रचना अत्राद्वैतवेदान्तस्य सिद्धान्तान् प्रत्यपाद्यत। तत्रैवाभिधालक्षणयोश्चर्चा सम्यग्रूपेण व्यविच्यत। तस्मिन्नेव क्रमेऽद्वैतवेदान्तोऽभिव्यक्तिवादमपि मनुते। तेन च यद्यभिव्यक्तिश्चेति व्यञ्जना स्यादेव किन्तु परम्परायां चर्चा न कृता विद्यते । यदि जगदिदमभिव्यज्यते चेद् व्यङ्ग्यव्यञ्जकभावाख्यो व्यापारस्तु स्यादेव। अस्तु तदैवात्र विचार्यते

**"तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः।**

**व्यज्यते नैव वाक्यार्थो नित्यमिक्तोऽहमित्यतः"॥**[16]

'तत्त्वमसि' इत्यादौ महावाक्ये विचारिते सति त्वंपदार्थस्य भानाभावादहं नित्यमुक्त इत्येवम्भूतो वाक्यार्थो भावयितुं न शक्यते। अत्र व्यज्यते इत्यनेनाभिव्यज्यत इत्येवार्थः स्यात्।

---

13 छा०उ०, ७/१/३

14 तैत्ति०उ०, २/१

15 वि०प्र०, श्लो० ९

16 उ०सा०, श्लो० १८१

तस्मात् तत्पदस्य ज्ञानं तु परोक्षत्वादिविशिष्टं चैतन्यं जायते। त्वं पदस्य च अर्थोऽपरोक्षत्वाल्पज्ञत्वादिविशिष्टमित्यर्थोऽभिजायते। किन्तु मायायाः कारणादहं नित्यमुक्तो न कदापि बद्ध इत्येवम्भूतार्थोऽभिव्यङ्क्तुं न शक्यते। अतोऽत्राभिव्यक्तिरेव व्यञ्जनेति प्रतिपादयितुं शक्यते। पुनश्च प्रत्यगात्मनो निश्चयः कथं जायत इत्यपि विभावयति तच्चेत्थम्-

**"वाक्यार्थो व्यज्यते चैवं केवलोऽहं पदार्थतः।**

**दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात्"॥**[17]

अत्राचार्यस्य शङ्करस्य प्रतिपादनमेवं विद्यते यदहं नित्यमुक्तः सर्वविधाविद्याजनितावरणैर्दुःखादिभिर्विनिर्मुक्तः सन् राजे, सर्वदा दुःखातीतं तत्त्वमेवाहमित्येवम्प्रकारकं ज्ञानं सञ्जायते। तदानीमेव प्रत्यगात्मनो बोधोऽभिव्यङ्क्तुं शक्यते। तस्मादहमितिपदार्थमात्रादेव वाक्यार्थोऽभिव्यज्यते। तत्र च प्रतिबन्धक 'महं दुखी' इति चैतन्यस्य यो मिथ्यासंसर्गवभासस्तमपसारयन्नेव प्रत्यगात्मनो निश्चय इति भावयितुमिच्छति आचार्यशङ्करः।

**वेदान्ते पदार्थः–**

अद्वैतवेदान्तदर्शने सिद्धान्तबिन्दौ पदार्थो द्विधा इति स्वीक्रियते। दृक्पदार्थः, दृश्यपदार्थश्च। अन्यदर्शनेषु सम्मतानां पदार्थानामप्यत्रैवान्तर्भावो भवति। दृक्पदार्थश्च चेतनज्ञानस्वरूपः, दृक्पदार्थ आत्मा अद्वितीयः, कूटस्थः, नित्यः, पारमार्थिकः। यद्यपि एक एव तथाप्युपाधिभेदात् स कूटस्थ आत्मा ईश्वरजीवसाक्षिभेदात् त्रिधा भवति। ईश्वरश्च कारणस्वरूपमज्ञानोपाधिरीश्वरः।

अन्तःकरणम् अन्तःकरणसंस्कारैरवच्छिन्नोऽज्ञानोपाधिको जीवः। अविद्यायां प्रतिबिम्बितं चैतन्यमीश्वरः। बिम्बचैतन्यं च साक्षी। बिम्बचैतन्यमेवेश्वर इत्येतस्मिन् पक्षे तु बिम्बप्रतिबिम्बरूपौ

---

[17] तत्रैव, श्लो० १८३

मुखेष्वनुगतमुखस्वरूपवत्। जीवेश्वरयोरनुगतं सर्वेषामनुसन्धातृचैतन्यं साक्षी इति निगद्यते। वार्तिककारस्य मते ईश्वर एव साक्षी। अतएव जीवेश्वरभेदाद् द्रष्टापि द्विविधः।

**ईश्वरस्य भेदाः-**

ब्रह्मविष्णुरुद्रभेदात् त्रिधा, भेदाश्च त्रिगुणात्मिकाया अविद्याया उपाधिवशाद्भवन्ति, कारणस्वरूपः सत्त्वगुणेनावच्छिन्नो दृक्पदार्थः पालयिता संसारस्य विष्णुः। रजोगुणावच्छिन्नः संसारस्य सृष्टा ब्रह्मा। तमोगुणावच्छिन्नः संसारस्य संहर्ता च रुद्रः। तस्मादेकस्यैव दृक्पदार्थस्य ब्रह्मविष्णुमहेशादिपुरुषाकारास्तथैव भारती-भवानी-आदयः स्त्र्याकारा अपि जायन्ते। एते च अवतारा ईश्वरेण भक्तानामनुग्रहाय लीलाद्वारा अविर्भाव्यन्त इत्येव ज्ञेयम्। तदाह-

**"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।**

**उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना"॥**[18]

**जीवः–**

त्रिप्रकारको जीवः, जाग्रतावस्थाभिमानी जीवो विश्वः, अविद्यान्तःकरणोपाधिभ्यां युक्तः स्वप्नाभिमानी तैजसः, अविद्यामात्रोपहितः सुसुप्त्यभिमानी प्राज्ञः।

**दृश्यपदार्थः–**

अविद्यातद्व्याप्यतत्कार्यात्मकः प्रपञ्चो दृश्यपदार्थः। अविद्या तद्द्वारा व्याप्तोऽविद्याचैतन्यसम्बन्धादिकोऽविद्यायाः कार्यरूपः प्रपञ्चः दृश्यपदार्थः। अविद्यातदुपजातं कार्यमात्रमपारमार्थिकं ततोऽपि व्यावहारिक्याः सत्तायाः स्वीकारात् स्वप्ने दृष्टानां पदार्थानामिव निरूपणं व्यर्थं न भवति।

---

[18] सि०बि०, पृ० १५२

**दृश्यपदार्थस्त्रिविधः–**

अव्याकृतो मूर्तोऽमूर्तश्च। तस्माच्च संसारे दृश्यमानं सवमिदं चैतन्यातिरिक्तं दृश्यपदार्थः।

**आभासवादः–**

चिदाभासो यद्यपि जडो न चेतनोऽपि न, यतोहि तत्र चिदभावः, चिद आभासमात्रम्, अतएव चिदाभास उपाधितन्त्रं (बुद्धिरूपोपाधेरधीनः) प्रतीयते। एवं दशायां चिदाभासो जडचेतनाभ्यां विलक्षणः। एतस्मादेव 'तत्वमसि' वाक्यप्रतिपद्यैकतायाः सिद्धये वाच्यार्थस्यैकदेशभूतस्योपाध्यंशवद् वाच्यैकदेशभूतचिदाभासांशस्यापि त्यागं कृत्वा वाच्यार्थस्यान्तर्गतश्चिदात्मा एव लक्ष्यम्। अतएव 'तत्त्वमसी'ति वाक्ये जहल्लक्षणा। चिदाभासश्चानिर्वचनीयः। अतएव वार्तिकारादिभिस्तस्य मिथ्यात्वं स्वीकृतं विद्यते। अपरोक्षानुभूतावप्याभास्येत्थं प्रतिपादनं विद्यते – आत्मनः आभासो जगति तथैवावलोक्यते सांसारिको यथा च मृत्तिकया घटोऽभिव्यज्यते। स च घटः पृथ्वीति नाम्ना ज्ञायते। तथैव तन्तुभिर्निर्मीयमाणानि वस्त्राण्यपि तन्तुनाम्ना व्यपदिश्यन्त। तथैव संसारस्य कारणभूतं ब्रह्म अपि, तेन चाभिव्यज्यमानं निखिलं जगदपि एव ब्रह्मैवमवभासते ।

**"घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः।**

**जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः"॥**[19]

तस्माच्चावभासस्य करणभूता या मायाशक्तिस्तस्याः परिणामोऽयं यज्जगदेवं व्यवहरति। तेन तस्या निरवारणफलकं ज्ञानमेवं शरणं ज्ञानेनाज्ञानं नंष्ट्वा मिथ्याभावमपहाय च 'ब्रह्म सत्यं जगन्मिथ्या' इति भावं भावयामः।

---

[19] अप०, का० ६४

**वाक्यवृत्तावाभासः–**

**"प्रत्यग्बोधे य आभाति सोऽद्वयानन्दलक्षणः।**

**अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः"॥** [20]

अन्तःकरणावच्छिन्नं तस्माच्च प्रत्यक्त्वं गतो बोधस्त्वमितिपदस्य लक्ष्यत्वेन आभाति। अर्थात् स्वयमेव प्रकाशते। स च अद्वय आनन्दस्वरूपः परमात्मा तत्पदलक्षयत्वेन स्वयमेव प्रकाशमानः प्रत्यग्बोधैकलक्षणः। प्रत्यग्बोधने एकमभिन्नं लक्षणं स्वरूपं यस्य स प्रत्यग्बोधैकलक्षणः। पुनश्चानन्दबोधयोः कथं तादात्म्यं स्यादिति विरोधः, तन्न आत्मनो बोधानन्दस्वरूपत्वात्। अत्रापि आभाति प्रकाशते, अभिव्यज्यते इत्यर्थः। अभिव्यञ्जनमेव शास्त्रान्तरेषु व्यङ्ग्यव्यञ्जकव्यापारेण प्रकाशते। इत्येवम्भूतं व्याख्यानं कर्तुं शक्यते।

अत्रायमाशयो वस्तुतत्त्वं शुद्धचिदात्मा वाच्यवाचकाधिसम्बन्धैर्विरहितः सन् व्यवहारातीतो विद्यते। तस्माच्च साभासाज्ञानादिष्वेव व्यवहार्यत्वात् तस्मिन्नेव वाच्यता सिद्ध्यति। अत एव साभासाज्ञानसाभासाहङ्कारयोश्शब्द-वाच्यत्वं तयोरधिष्ठानत्वादुभयोरनुगतत्त्वाच्च तत्सम्बन्धिनि चिदात्मनि ब्रह्मशब्दाहंशब्दयोः पक्षे जहतीलक्षणा भवत्येव।

**सिद्धान्तविन्दुकारः कथयति–**

अथवा चिदाभासादविविक्तं चैतन्यमपि तत्पदस्य त्वंपदस्य च वाच्यमिति। पक्षेऽस्मिन् वाच्यस्यैकदेशस्य परित्यागाभावाज्जहदजहल्लक्षणैव विद्यते। अत्र न कश्चिद्दोष एवम्भूतो व्याख्यानपरः पक्ष अभासवाद एव कथ्यते[21]

---

[20] वा०वृ०, का० ३९

[21] "अथवा चिदाभासाविविक्तमपि चैतन्यमपि तत्त्वमादिपदवाच्यम्। तेन वाच्यैकदेशस्यात्यागादस्मिन् पक्षे जहदजहल्लक्षणैवेति न कोऽपि दोषः। अयमेव च पक्षः आभासवाद इति गीयते"। सि०बि०, पृ० ७८

**प्रतिबिम्बवादः–**

प्रकाशात्मयतिद्वारा प्रतिबिम्बवादस्य सिद्धान्तोऽमीमनत। स च सिद्धान्तः काथञ्चित्को विद्यते इति विभावयामो वयम्- अज्ञानद्वारोपहितं बिम्बचैतन्यमीश्वर इति कथ्यते।

अज्ञानेनानुपहितं शुद्धचैतन्यं भवति। ईश्वरस्य विम्बनं च चैतन्यरूपं जीवश्च प्रतिबिम्बरूप इति विवरणकराणां मतम्। एषैव प्रतिबिम्बवादः कथ्यते। अन्तःकरणस्य तथा च अन्तःकरणस्य संस्कारैरवच्छिन्नेऽज्ञाने प्रतिबिम्बितं चैतन्यं जीव इत्युच्यते। अन्तःकरणम् अन्तःकरणस्य संस्कारः इत्येतयोर्द्वयो-र्मध्येऽन्यतरेणावच्छिन्नेऽज्ञाने प्रतिबिम्बितं चैतन्यं जीवः। सृष्टिकालेऽन्तः करणमज्ञानेनावच्छिन्नं भवति। प्रलयदशायां चान्तःकरणस्य संस्कारैरवच्छिन्नं भवतीति विवेकः। अन्तःकरणं तत्संस्कारश्चानन्तेः। अतएव तादृशोपाधि-भेदद्वारैकमेवाज्ञानं घटाकाशादिवन्नानात्वमुपैति। एवम्रीत्या अविद्यापक्षेऽपि नानाजीववादस्य समर्थनं जायते।

सङ्क्षेपशारीरककारस्य मतेऽज्ञाने प्रतिबिम्बितस्य चैतन्यस्येश्वरत्वं बुद्धौ प्रतिबिम्बितस्य चैतन्यस्य जीवत्वम्। द्वयोरपि पक्षयोर्बुद्धिभेदादेव जीवानां नानात्वम्। प्रतिबिम्बस्य पारमर्थिकत्वात् तत्त्वं पदयोर्जहदजहल्लक्षणैव विद्यते इत्येव प्रतिबिम्बवादः।[22]

जीवेश्वरयोरनुगतः साक्षिणो रूपं शुद्धम। संक्षेपशारीरककारस्य मतेऽस्मिन् जीवेश्वरावुभावपि प्रतिबिम्बौ स्तः। पक्षेऽस्मिन् समष्ट्यज्ञाने प्रतिबिम्बितं चैतन्यमीश्वरः, तथा च व्यष्ट्यज्ञानस्य कार्यभूतानेकबुद्धिषु प्रतिबिम्बितं चैतन्यस्वरूपं जीव इति।

बुद्धिश्चान्तःकरणम् , बुद्धीनां भेदाच्च बुद्धिसंस्काराणां भेदः, संस्काराणां भेदाच्च संस्कारावच्छिन्नाज्ञाने प्रतिबिम्बितं चैतन्यस्यापि नानाजीववादः, इति विवरणकारस्य मतम्। तथा च संक्षेपशारीरककारस्य मते बुद्धिभेदाद्

[22] “अज्ञानोपहितं बिम्बचैतन्यमीश्वरः, अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीव इति विवरणकाराः, अज्ञानप्रतिबिम्बितं चैतन्यमीश्वर बुद्धिप्रतिबिम्बितं चैतन्यं जीवः अज्ञानानुपहितं तु विम्बचैतन्यं शुद्धमिति संक्षेपशारीरककाराः० अनयोश्च पक्षयोर्बुद्धिभेदाज्जीवनानात्वम्। प्रतिबिम्बस्य च पारमार्थिकत्वाज्जहदजहल्लक्षणैव तत्त्वमादि पदेषु इममेव प्रतिबिम्बवादमाचक्षते”। तत्रैव, पृ० ७९

बुद्धिप्रतिबिम्बितचैतन्यस्य भेदस्तस्मान्नानाजीववादः। प्रतिबिम्बश्च बिम्बादतिरिक्तो न विद्यते। अतएव बिम्बो बिम्बरूपेण पारमार्थिक एव विद्यते।

पञ्चदशीकारस्य वचनैः –

**“यद्यत् सुखं भवेत् तत्तद् ब्रह्मैव प्रतिबिम्बनात्।**

**वृत्तिष्वन्तर्मुखास्वस्य निर्विघ्नं प्रतिबिम्बनम्”॥**[23]

यत्र कुत्रापि ब्रह्माण्डे यावदपि सुखमनुभूयते सर्वमपि ब्रह्मणः प्रतिबिम्बनाद् ब्रह्मतत्त्वमेव। इष्टभोगानां प्राप्त्यनन्तरं यदा प्राणिनां वृत्तिरन्तर्मुखी भवति, तदा तद्ब्रह्म अन्तर्मुख्यां वृत्तौ निर्विघ्नतया केनचिदवरोधं विना प्रतिबिम्बते, तदैव प्राणी सुख्यति। सुखं परमात्मनः स्वरूपं परमात्मनः स्वभावः क इति प्रतिपादयति-

सच्चिदानन्दः परमात्मा, अर्थाद् ब्रह्मणि सत्ता, चैतन्यम्, आनन्दश्च, एते स्वभावास्तस्य[24], एतेषु मृत्तिकायां शिलायां च ब्रह्मणः सत्तैव दृश्यते। चैतन्यसुखयोरभावो विद्यते। मूढघोरादिदुष्टप्रकृतिकजनेषु ब्रह्मणः स्वभावद्वयमेव लभ्यते सत्ता, चैतन्यञ्च, शान्तप्रकृतिकजनेषु सत्ता-चैतन्यम्-आनन्दश्च एते त्रयोऽपि लभ्यन्ते।

**प्रतिबिम्बवादे ब्रह्मणः स्थितिरेवं विद्यते-**

यथा एक एव ज्योतिरूपः सूर्यो भिन्न-भिन्नजलेषु प्रतिबिम्बितः सन्ननेकधा दृश्यते। तथैव प्रकाशस्वरूप एक एव परमात्माप्यविद्या एवं स्थूलसूक्ष्मशरीरेषु प्रतिबिम्बितः सन्ननेकधा (जीवः) जायते।[25]तत्तच्छरीरेषु प्रतिबिम्बितः सन्ननेकधा दृश्यते।

---

23 प०द० विष० प्र०, पृ० ५६२

24 “सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः। मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्वयम्”।
प०द०विष०प्र०, पृ० ५६१ श्लो० १९

25 “यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भिन्नरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा”॥
नै०सि०भू०, पृ० ९

चन्द्रमसोऽप्युदाहरणं ददाति यथा आकाशे विद्यमान एक एव चन्द्रः सलिले प्रतिबिम्बितः सन्ननेकरूपेषु दृश्यते। तथैव परमात्माऽपि तत्तच्छरीरेषु प्रतिबिम्बितः सन् विविधरूपेषु दृश्यते।[26]

**विम्बाभासयोर्विशेषः-**

एकेन लौकिकोदाहरणेन प्रतिपादयति प्रस्थो दारुजन्यो भवतु, कांस्यनिर्मितो वा भवतु, तोलनं तु समानमात्रायामेव क्रियते। दारुनिर्मितः प्रस्थः स्वच्छो न, कांस्यनिर्मितश्च स्वच्छो भवति। ततोऽपि तोलनकार्ये समानत्वमेव।

आभासपदेनोच्यते प्रतिबिम्बोऽपि तथैव गण्यते, प्रतिबिम्बे च बिम्बस्य किमपि लक्षणं न भवति। तथापि बिम्बवद्भासते प्रतिबिम्बः। तस्मादाभास-प्रतिबिम्बयोः समानत्वमेव तदाह-

**"ईषद्भासनमाभासः प्रतिबिम्बस्तथाभिधः।**

**बिम्बलक्षणहीनः सन् बिम्बवद्भासते हि सः"॥[27]**

चिदाभासः ससङ्गो विकारयुक्तश्च। एतस्मात् कारणादस्मिन् विम्बस्य लक्षणानि तु न भवन्ति। परन्तु स चिदाभासः स्फूर्तिरूपः, चिदाभासस्य स्फूर्तिरूपत्वमेव बिम्बवद्भासनं कथ्यते। एवम्भूता भासनैवाभास इति कथ्यते, तदुच्यते-

**"ससङ्गत्वविकाराभ्यां बिम्बलक्षणहीनता।**

**स्फूर्तिरूपत्वमेतस्य बिम्बवद्भासनं विदुः"॥[28]**

---

[26] तत्रैव

[27] प०द०कू०प्र०, पृ० ३४१

[28] तत्रैव,

आत्मबोधावपि सर्वेषां प्रकाशवतां प्रकाशयिता ब्रह्मैव न विद्यतेऽस्य प्रकाशकत्वं केनापि सर्वप्रकाशनसाधनेषु ब्रह्मप्रकाशकत्वशक्तेरभावात्।

**"यद्भासा भासतेऽर्कादिर्भास्यैर्यस्तु न भास्यते।**

**येन सर्वमिदं भाति तद्ब्रह्म इत्यवधारयेत्॥**

**सर्वमन्तर्बहिर्व्याप्यं भासयन्निखिलं जगत्।**

**ब्रह्म प्रकाशते वह्निप्रतप्तायसपिण्डवत्"॥**[29]

सर्वस्यावभासको ब्रह्म एवं तच्च बहिरन्तः सर्वत्र विद्यते। तस्य च प्रकाशना न कर्तुमेव पार्यते काथञ्चिकैरपि प्रकाशैरिति। गीतायामुक्तम्-

**"न तद्भासयते सूर्यो न शशाङ्को न पावक।**

**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम"॥**[30]

**अवच्छेदवादः–**

एषः पक्षो वाचस्पतिमिश्राणां विद्यते। एतेषां मतेऽज्ञानस्य विषयो यच्चैतन्यं तदेवेश्वरः। अज्ञानस्याश्रयश्चैतन्यं जीवः। अत्राज्ञानां नानात्वादेव जीवानामपि नानात्वं सम्भवति। प्रत्येकं जीवस्य प्रपञ्चोऽपि भिन्न-भिन्नं वर्तते। जीवस्य चाज्ञानोपाधिकत्वात् संसारस्योपादनकारणं विद्यते। प्रत्यभिज्ञा चात्यन्तसादृश्यादेव भवति। प्रपञ्चसहितस्य जीवस्योपाधिरूपाया अविद्याया अधिष्ठानत्वादीश्वरे कारणत्वस्योपचार एवावच्छेदवादः।[31]

[29] आ०बो०, श्लो० ६१-६२

[30] गीता० १५/६

[31] "अज्ञानविषयीभूतं चैतन्यमीश्वरः। ज्ञानाश्रयीभूतं च जीव इति वाचस्पतिमिश्राः। अयमेव चावच्छेदवादः"। तत्रैव, पृ० १०

**जगतो निमित्तोपादानकारणत्वम्–**

कार्यकारणयोर्विषये विचारे कृते सतीदमेवायति यज्जगतः कारणं ब्रह्म कार्यं च जगद्विद्यते। तच्च लौकिकोदाहरणेन प्रतिपादयति। यथा घटमृदोः कार्यकारणता विद्यते। घटो मृत्तिकया निर्मीयते तस्मान्मृत्तिका कारणं घटस्य। घटश्च कार्यं तथैव निखिलस्य प्रपञ्चजास्य कारणं ब्रह्म इति। काल्पनिकं जगदत्र यत्किमपि चराचरं भूतभौतिकं विद्यते। तत्सर्वं ब्रह्मण एव, अतः कारणं ब्रह्म कार्यं च जगत्। तदाहापरोक्षानुभूतिकारः–

**"कार्यकारणता नित्यमास्ते घटमृदोर्यथा।**

**तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह"॥**[32]

अयमतीव विचित्रं संसार आनन्दादेव जायते। "**आनन्दाद्धेव खल्विमानि भूतानि जायन्ते"।**[33] एवं प्रकारेणानन्दमूलिका सृष्टिः, आनन्दे एव सांसारिका जनास्तिष्ठन्ति, आनन्दं विहाय जीवनं दुष्करं दृश्यते संसारिणाम्। पुनश्च आनन्दरहिताः सन्तो म्रियमाणास्तस्मिन्नेव आनन्दे विलीयन्ते। एतस्मात्कारणादानन्दातिरिक्तं जगन्नविद्यते।

तस्माच्चानन्द एव जगतो निमित्तमुपादनं च कारणं विद्यते। उदाहरणमुखेन प्रस्तौति-

**"कुलालाद् घट उत्पन्नो भिन्नश्चेति न शङ्क्यताम्।**

**मृद्वदेष उपादनं निमित्तं च कुलालवत्"॥**[34]

यथा घटस्य निमित्तकारणं कुलालो भवति। उपादानं च मृत्तिका भवति। न तथा आनन्दः प्रत्युत लूतातन्तुवन्निमित्तमुपादानं च भवति। कुलालस्य

---

[32] अप०का० ६६

[33] तै०उ०, ३-६

[34] प०द०अ०प्र०, पृ० ५०३

निमित्तकारणत्वमेव किमर्थमिति कदाचिदपि कुम्भस्य स्थितिर्लयश्च कुम्भकारे न दृश्येते प्रत्युत मृत्तिकायामेव। अतो न उपादानकारणं कुम्भकारः। तथैव जगतो लय आनन्दे एव तस्मादानन्द एव जगत उपादानम्।

**उपादानप्रकाराः-**

उपादानं त्रिप्रकारकं मन्यते विवर्तः, परिणामः, आरम्भश्च। एतेषु त्रिष्वप्यारम्भस्य परिणामस्य च प्रवृत्तिर्निरवयववस्तुनि न सङ्गच्छते।

**आरम्भवादस्य स्वरूपम्-**

आरम्भवादिनो नैयायिका वैशेषिकाश्च कथयन्ति यदन्यात् कारणात् सर्वदाऽन्यदेव कार्यमुत्पद्यते्। तच्च कारणजातं कार्यं सर्वदैव कारणाभिन्नमिति मन्वते। तन्तुभिर्जायमानानि वस्त्राणि सदैव करणभूतैस्तन्तुभिः सर्वदा भिन्नान्येव भवन्ति। उभयोश्च पारस्परिको भेदः, यतोहि पटद्वारा जायमानि कार्याणि तन्तुभिर्न साधयितुं शक्यन्ते। तच्चोपस्थाप्यते-

**"आरम्भवादिनोऽन्यस्मादन्यस्योत्पत्तिमूचिरे।**

**तन्तोः पटस्य निष्पत्तेर्भिन्नौ तन्तुपटौ खलु"॥**[35]

**परिणामस्य स्वरूपम्-**

**"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः"।**[36] विकार एव परिणामपदेनोच्यते। यथा किमपि तत्त्वं स्वपूर्वावस्थां परित्यज्यापरामवस्थां प्राप्नोति। सैव दशा परिणामपदेनोच्यते। यथा दुग्धस्य परिणामे सति दधिरूपेण परिवर्तनम्। मृत्तिकायाः परिणामे सति घटादिपदार्थेषु परिवर्तनम्। सुवर्णस्य च

---

[35] तत्रैव, पृ० ५०४

[36]

कटककुण्डलादिरूपेण परिवर्तनं जायते। तर्हि दुग्ध-मृत्तिका-सुवर्णाः स्व-स्वपूर्वावस्थां हित्वा तत्त्वतो दधिघटकटकाद्यवस्थां प्राप्तवन्तः। किन्तु तत्त्वं तदेवावस्थामात्रकृतं परिवर्तनमत्र जायते। ग्रन्थकारो ब्रूते-

**"अवस्थान्तरतापत्तिरेकस्य परिणामिता।**

**स्यात् क्षीरं दधि, मृत् कुम्भः, सुवर्णं कुण्डलं यथा"॥**[37]

ततोऽपि परिणामवादेऽपि मन्यते यद्स्तुनः स्वरूपपरिवर्तने सत्यपि तस्य पूर्वावस्थां न व्यभिचरति। तत्राक्षतत्वं च शाश्वतं जायते-

**"सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम्।**

**ब्रह्मणो जायमानस्य ब्रह्मत्वं च शाश्वतम्"॥**[38]

यथा सुवर्णेन कटकादीनामाभूषणानां निर्माणम्, तेन च अवस्थान्तरगतेऽपि सुवर्णे किन्तु सुवर्णस्य सुवर्णत्वं न नश्यति सैव प्रकृतिर्भवति। तथैव ब्रह्मणा जायमानानां भूतभौतिकानां स्वभावोऽपि ब्रह्मवद् भवति न तत्र भेदः। तत्र भेदश्चेदविद्यावशादेव, सा चाविद्या अपसार्या, तदात्वे न कोऽपि दोषः।

**विवर्तस्वरूपम्–**

**"अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः"।**[39] स्वकीयायाः पूर्वावस्थायाः परित्यागमकृत्वा अन्याया अवस्थायाः प्रतिभानं विवर्तपदेनोच्यते।

यदा किमपि वस्तु स्वकीयेन मूलेन स्वरूपेण सह कुत्राप्यन्तर्भूतं सदन्यथा दृश्यते तदानीमेव विवर्तावसरः समायति। विवर्तस्योदाहरणम्– रज्जौ

---

[37] तत्रैव, पृ० ५०४

[38] अप०, का० ५१

[39]

सर्पाविभासः। रज्जौ विद्यमानो यः पदार्थः स सर्पत्वेन भासत इति सावयवपदार्थस्य दृष्टान्तः। निरवयवपदार्थस्यापि दृष्टान्तो विद्यते आकाश इति। आकाशो निरवयवः सन् तलवद्दृश्यते। तस्मिंश्च नीलवर्णतायाः कल्पना अर्थादारोपः। आकाशस्य स्वरूपमजानन्तो जनाः कुर्वन्त्येव।

**"अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत्।**

**निरंशेऽप्यस्त्यसौ, व्योम्नि तलमालिन्यकल्पनात्"॥**

निरंशे आकाशे विवर्तो जायते। तस्मान्निरंशेऽपि विवर्तस्य प्रवर्तनत्वाद् विवर्त एवावयवरहिते आनन्देऽर्थाद्ब्रह्मणि जगतः कल्पनां करोति। कल्पनाकर्तुरन्वेषणमिष्यते चेन्मायाशक्तिमेव आमानयन्तु। यदि मायाया दृष्टान्तं द्रष्टुमिच्छन्ति चेदैन्द्रजालिकस्य शक्तिं पश्यन्तु। ऐन्द्रजालिके विद्यमाना मणि-मन्त्रादिरूपिणी मायाशक्तिर्गन्धर्वनगरादीनां कल्पनां कृत्वा दर्शयति। किन्तु यथार्थत्वं भिन्नमेव, तथैवैतस्य लोकस्य विषये चिन्तयामः। यद्विवर्तवशादेव जगतः परमात्मयुतं तदभिन्नं स्वरूपमवलोक्यते।

**"ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।**

**मायाशक्तिः कल्पिका स्यादैन्द्रजालिकशक्तिवत्"॥**[40]

तस्माच्च शक्तिश्च शक्तिमतो पृथग् न विद्यते, एवं दृश्यते लोके। सा च शक्तिः साक्षान्नावलोक्यते प्रत्युत कार्यं दृष्ट्वैवानुमीयते। यदा कारणे सत्यपि कार्यं न स्यात् तदा तु प्रतिबन्धः स्वीक्रियते। यथा अग्नि ज्वलिति चेद्दाहाभावस्तदात्वे तु चिन्तनीयं भवति यन्मन्त्रादिना दाहकत्वशक्तेः प्रतिबन्धः कृतो विद्यते। जगत्कारणज्ञातुकामैर्मुनिभिरियं ध्यानयोगेन देवस्यार्थादात्मनः प्रकाशस्वरूपस्य

[40] तत्रैव, पृ० ५०५

मायारूपिणी शक्तिर्दृष्टा।[41] सा च परमात्मनश्शक्तिः क्रिया-ज्ञान-बलस्वरूपिणी भवति ॥[42] पञ्चदशीकारोऽपि वक्ति -

**"देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदन्।**

**परास्य शक्तिर्विविधा क्रियाज्ञानबलात्मिका"॥**[43]

**गीतायां शास्त्रस्य प्रयोजनम् –**

शास्त्रं त्वन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकेन प्रमाणत्वमात्मनि प्रतिपद्यते न तु अज्ञातार्थज्ञापकत्वेन[44]

**शब्दद्वारा ब्रह्मणो बोधस्तत्र प्रमाणानि –**

**भामतीप्रस्थानम्-**

भामतीप्रस्थाने शब्दप्रमाणेन परोक्षज्ञानमेवस्वीकृतमस्ति, न प्रत्यक्षम्। उक्तप्रस्थानेन उक्तप्रस्थानानुसारेण श्रवणमनननिदिध्यासनादीनामभ्यासा-ज्जायमानेन शुद्धान्तःकरणेन कर्तुं पार्यते। किन्तु विवरणप्रस्थाने सन्निकृष्टविषयस्थले शब्दद्वाराऽपि प्रत्यक्षं स्वीक्रियते।

अत एव श्रवणे ब्रह्मसाक्षात्कारं प्रति प्रधानकारणता भवति। मनन-निदिध्यासनादीनि श्रुत्यर्थमेव पोषयन्ति। तस्मात् ते स्वतन्त्रप्रमाणरूपेण न स्वीकर्तुं शक्यन्ते। एतेषामुपयोगस्तु प्राक्तनपापकर्मणां फलस्वरूपम् असम्भावना, विपरीतभावना तथा चित्तस्य अस्थिरतादिप्रतिबन्धकानां निवारणे एव भवति। अर्थाच्छब्दश्रवणेनोत्पन्नः साक्षात्कारः संशयादीनां सत्त्वाच्चित्तस्यैकाग्रतां विना

---

[41] "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्"॥ श्वे०उ०, ६-८

[42] "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया"॥ तत्रैव, ६-८

[43] प०द०अ०प्र०, पृ० ५०६

[44] गी०शां०भा० द्वि०, पृ० १६-१७

स्थिरो भवितुं न शक्नोति। मनन-निदिध्यासनादिना असम्भावनादीनां निवृत्तिपूर्वकं चित्तस्यैकाग्रत्वे सति स्थिरो भवति। विषयेस्मिन् पञ्चदशीकारः कथयति –

**"वाक्यमप्रतिबद्धं सत् प्राक्परोक्षावभासिते।**

**करामलकवद् बोधमपरोक्षं प्रसूयते"॥**[45]

श्रवणात्मकविचारणायाः पूर्वं 'तत्त्वमसीति' वाक्यम् आपाततः परोक्षरूपेण ब्रह्मणो ज्ञानं कारयित्वोक्तप्रतिबन्धानामभावे करामलकवद् ब्रह्मणोऽपरोक्षं ज्ञानं कारयति।

शब्दद्वारा अपि ब्रह्मणोऽपरोक्षज्ञानं जायते। एतस्मिन् 'आचार्यवान् पुरुषो वेदः' 'तं त्वौपनिषदं पुरुषं पृच्छामः' 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यादिश्रुतयः स्मृतयोऽपि प्रामाण्यमावहन्ति। 'यतो वाचो निवर्तन्ते' इत्यादीनि वाक्यानि ब्रह्मणः साक्षात्कारे शब्दगतस्य शक्तिरूपव्यापारस्य निषेधं कुर्वन्ति। किन्तु लक्षणारूपस्य व्यापारस्य निषेधं न कुर्वन्ति।

**"श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः।**

**ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः"॥**[46]

श्रुतिवाक्यैः श्रवणं युक्तिभिरात्मनो मननं मननात् परं परिपक्वज्ञाने सति तस्य ध्यानं यतोह्यात्मन साक्षात्कारे श्रवणमनननिदिध्यासनानि कारणम्।

**"तत्र तावन्मुनिश्रेष्ठाः श्रवणं नाम केवलम्।**

**उपक्रमादिभिर्लिङ्गैः शक्तितात्पर्यनिर्णयः"॥**[47]

---

[45] प०द०तत्त्व०दी०प्र०, श्लो०६२

[46] वि०प्र०, श्लो०१

अत्रापि श्रवणस्य प्राधान्यमेव वक्ति- मनननिदिध्यासनयोरपेक्षया श्रवणे प्राधान्यं विद्यते। यतोहि ज्ञानोत्पत्तावन्तरङ्गं मुख्यं च साधनं विद्यते- तदाह-

**"प्राधान्यं मननादस्मिन्निदिध्यासनतोऽपि च।**

**उत्पत्तावन्तरङ्गं हि ज्ञानस्य श्रवणं बुधाः"॥**[48]

मनननिदिध्यासनादीनि त्वसम्भावनया विपरीतभावनाया व्यावृत्तये बहिरङ्गसाधनानि सन्ति 'शमदमादीनि' इतिकर्तव्यतायां सन्ति।

अतो वेदान्तवाक्यानां धर्मपरत्वपर्युदासाय चोदनाग्रहणमिति सूत्रभाष्यवार्तिककाराभिप्रायेण वेदान्तानां ब्रह्मपरत्वमेव सिद्ध्यति।[49]

**नामरूपात्मकं जगदिति पक्षो वेदान्तिनाम् –**

वेदान्तिनस्तु 'त्रयं वा इदं नामरूपं कर्म' 'नामरूपे व्याकरवाणि' इति श्रुतिद्वयमाश्रित्य त्रैविध्यं द्वैविध्यं वाऽङ्गीकुर्वन्ति।[50] 'नाम रूपं कर्म' इति त्रयं स्वीकुर्वन्ति। 'नामरूपे व्याकरवाणि' इति श्रुत्या च समग्रः प्रपञ्चो द्विधा त्रिधा व स्वीकर्तुं शक्यते। एतेषु नामरूपकर्मात्मकं पक्षं स्वीकृत्यैव स्वभिमत्यं प्रकटयति ग्रन्थकारः। यतोहि सृष्टेर्बुद्धौ प्रप्रथमं नामरूपे स्फुरतः, कुलालस्योदाहरणेन बोधयति यथा कुलालो घटस्य निर्मितिं कामयमानस्तद्वस्तुनो वाचकशब्दं कल्पयति तदनु घटरूपमर्थम्। एतयोर्द्वयोर्ज्ञानमत्यन्तमपेक्षितं विद्यते। कुलालवदेव मूलकारणमपि बुद्धौ प्राप्तवस्तुन एव रचनां करोति। सृष्टिकर्तृत्वात् कुलालवत्।

---

47 तत्रैव, श्लो० २

48 तत्रैव, श्लो० ६

49 तत्रैव, पृ० ४३९

50 तत्रैव, पृ० ६६५

एतेन सिद्ध्यति यज्जगतो रचना कस्यचिद् बुद्धिमतश्चेतनस्य कार्यमेव कारणं च भिन्नमेव। तेन च न जीवकार्यमिदं जगदिति सूच्यते।[51]

**ब्रह्मणि युक्त्यनुभवयोरपेक्षा –**

**"सत्यं ज्ञानमनन्तं ब्रह्म"** इति स्वरूपवतो ब्रह्मणो ज्ञानमागमश्रुत्यादिकं विना न सम्भवति। आगमेनैव स्वरूपस्य निश्चयो जायते। अतो "**यतो वा इमानि भूतानि जायन्त"** इत्यादिकं शास्त्रमेव सूत्रे जन्मादिपदेन स्वीक्रियते चेदुचितम्, अनुमान-मात्रं न ।

अग्रेऽभिधीयमानेषु सूत्रेषु आगमवाक्यानामुदहराणानि दत्वा तात्पर्यस्य निर्णयोऽक्रियत। कारणमिदं यद्ब्रह्मसाक्षात्कारः शाब्दबोधानुकूलन्यायानां द्वारा वेदान्तवाक्यानां तात्पर्यनिर्णयकरणाद् ब्रह्मणि सम्भवति।[52] शास्त्रयोनित्वा**द्** इति इत्यस्य शास्त्रस्योपादनकारणत्वात्, वेदानामुपादानकारणत्वात्, अस्य व्याख्याख्यानां कुर्वता भाष्यकृता कथितं यन्महतो भूताद्योनेः सम्भवः "**अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदः..."**[53] तस्मादुपादानत्वमस्य वेदादिशास्त्रस्य ब्रह्मण्येव सङ्गच्छते। एवमादीनि बहूनि श्रुतिवाक्यानि तस्य कारणत्वं प्रतिपादयन्ति। पुनरत्र शास्त्रं योनिः प्रमाणं यस्मिन्, इत्येवम्भूते व्याख्याने कृते सति ब्रह्मणि वेदस्य प्रमाणत्वात्, वेदप्रमाणकत्वात्।

---

[51] "सृष्टुः सृज्यगोचरनामरूपयोः प्रथमं बुद्ध्यारोहात्। लोके घटं चिकीर्षौ कुलाले तद्दर्शनात्। मूलकारणमपि नामरूपाभ्यां स्वबुद्ध्यारूढं सृजति सृष्टित्वात्, कुलालवत्, एतावता जग् बुद्धिमच्चेतनकार्यमिति लभ्यते"। तत्रैव, पृ० ६६६

[52] "सत्यज्ञानादिरूपस्य ब्रह्मण आगममन्तरेणासिद्धेरागमग्रथन एव सूत्रतात्पर्यात्। आगमवाक्यानि हि वक्ष्यमाणसूत्रैः उदाहृत्य तात्पर्यतो निर्णीयन्ते। ब्रह्मसाक्षात्कारस्य शब्दानुसारिभिर्न्यायैर्ब्रह्मणि वेदान्तवाक्यतात्पर्यनिर्णयाधीनत्वात्"। तत्रैव, पृ० ६९९

[53] बृ०उ० २/४/१०

वेदः प्रमाणं यस्मिन् इति, ब्रह्मणि प्रमाणभूतानि वेदवाक्यानि 'यतो वा इमानि भूतानि जायन्ते' 'येन जातानि जीवन्ति' 'यत्प्रयन्त्यभिसंविशन्ति च' इतानि वाक्यानि न निष्प्रयोजनानि भवन्ति। यतोहि ब्रह्मणो ज्ञानं केवलं शास्त्रमात्रैकगम्यं विद्यते।[54] शङ्कराचार्येण स्वकीयजगतो जन्मादिनिमित्तोपादानं 'ब्रह्म' इति शास्त्रेणैव साध्यते। भाष्ये विलिखति यदृग्वेदादिशास्त्रं यस्य योनिरर्थात् कारणं प्रमाणमस्य। अस्य ब्रह्मणो यथार्थ्यस्वरूपावबोधने कारणतामुपयाति। तस्माच्च शास्त्रप्रमाणकारणत्वादेवैतस्य ब्रह्मणः संसारस्योत्पादयितृत्वं लयकर्तृत्वं च ज्ञायते नान्यथा।[55]

**वाचः सर्वशक्तिमत्त्वं प्रतिपादयति–**

**"औत्पत्तिकी शक्तिरशेषवस्तुप्रकाशने कार्यवशेन यस्या।**

**विज्ञायते विश्वविवर्तहेतोर्नमामि तां वाचमचिन्त्यशक्तिम्"**॥[56]

अत्र वाचैव सर्वं प्रकाश्यते यस्याः वाचोऽशेषवस्तुप्रकाशने औत्पत्तिकी शक्तिः कार्यवशेन विज्ञायते, तात्पर्यमिदं यत् समस्तवतूनां प्रतिपादने स्वाभाविकी कृत्रिमरहितैव शक्तिर्विद्यतेऽर्थान्न केनचित् सङ्केतिता जायते। कार्यवशेन नामालौकिकदेवतानां धर्मस्य स्वर्गस्य परब्रह्मणश्च प्रत्ययं जनयत्येवम्भूतेन कार्यलिङ्गेन ज्ञायते, तां तथाभूतां वाचं नमामि। अथवा अशेषवस्तु परब्रह्म सर्वस्यापि आत्मवादाधिष्ठानत्वाच्च तस्य च प्रकाशनं लक्षणावृत्त्या जायते, तस्य तत्र स्वाभाविकी शक्तिः कार्यवशेन सर्वैः प्रमाणैरगोचरा

---

54 "ब्रह्मप्रमापकं च वेदवाक्यं यतो वा इमानि इत्यादि, शास्त्रैकवेद्यत्वं ब्रह्मणोऽभिलक्ष्य पूर्वसूत्रस्यागमग्रथने तात्पर्याभिधानात्"। तत्रैव, पृ० ७३४

55 "तस्माज्जगजन्मादिनिमित्तोपादनकारणं सर्वज्ञं ब्रह्म शास्त्रैकगम्यमिति सूत्रद्वयेन सिद्धम्"।

56 शा०, श्लो० ४

प्रमेयरहितस्वभाववती तत्त्वस्फूर्तिरूपेण कार्यगमकत्वेन ज्ञायते। ईश्वरस्य विश्वाकारभूतविवर्तस्यातत्त्वतोऽन्यथाभावस्य हेतुः।

रचनाविषयीभूतस्यार्थस्य निमित्तकारणरूपा, अखण्डस्य सच्चिदानन्दस्य अवाङ्मनोगोचरस्य ब्रह्मणः प्रकाशने कथं तस्याः शक्तिरित्याशङ्कां मनस्याधाय वदति- **"षड्विधतात्पर्यलिङ्गोपबृहताया उपनिषदो भागलक्षणया ब्रह्मबोधन-सामर्थ्यमलौकिकमित्यर्थ"।**[57]

तात्पर्यमिदं यद्वाचा मनसा चागोचरस्य ब्रह्मणो बोधं कारयिष्यति न तत्र काचित् क्षतिः तत्र च वाचो युक्तिर्विद्यते, षड्विधानि लिङ्गानि तात्पर्यैश्चोपबृंहता वाग् भागत्यालक्षणावृत्तिद्वारा ब्रह्मबोधनं कारयिष्यतीत्यर्थः।

**व्याकरणदर्शने व्यञ्जनायाः स्वरूपम्–**

वस्तुतस्तु वैयाकरणानां परसिद्धान्तो यन्नास्ति शक्त्यतिरिक्ता काचिदपि वृत्तिरिति तत्र तत्र ग्रन्थेष्वभाव्यत विचारकाले। तद्यथा आचार्यो भर्तृहरिः साक्षादेव स्व्यक्रियत यन्नास्ति अभिधातिरिक्ता काचिदपि शक्तिः। लक्षणया विचारसमये भर्तृहरेरेतन्मतं प्राकाश्यास्माभिस्तत्र तत्रैवं द्रष्टुं शक्यते। किन्तु व्यावहारिकदृष्ट्या वयं तेषां सिद्धान्तानालोच्य विचारयिष्यामस्तेषां द्वारा प्रतिपादितव्यञ्जनायाः स्वरूपं किमिति।

तद्यथा लोकेऽत्यन्तं सुप्रसिद्धं वाक्यं विद्यते– अर्कोऽस्तं **गतः** इत्यादिदिवाक्यानां द्वारा मम सन्ध्योपासनं करणीयम् इत्यादिद्वितीयार्थानां सिद्धये वाक्येषु पदादिषु वा स्वीक्रियमाणा शब्दे तदर्थे च द्योत्यद्योतकभावसम्बधवती व्यङ्ग्यव्यञ्जकभाववती वा शक्तिलक्षणाभ्यामन्या

[57] तत्रैव, सु०टी०, पृ० १३

व्यञ्जनाख्या वृत्तिः। एवम्भूताया व्यञ्जनायाः शाब्दिकानां निकाये जीवनाधायकं स्थानं वरीवर्ति।

तत्र च कारणमिदमेव यदि व्यञ्जनायाः स्वीकारो न स्यात् तदावैयाकरणानां कारणभूतं स्फोटाभिधस्य तत्त्वस्याभिव्यञ्जनमेव न स्यात् । तदेवाचार्य व्याडिर्वदति- "**शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते। स्थितिभेदे निमित्तत्वं वैकृतं प्रतिपद्यते"**॥[58] भर्तृहरिद्वारा प्रतिपादितायाः व्यञ्जनायाः स्वरूपं व्याख्यानेन बोधयितुं शक्यते। तत्र वैयाकरणानां प्रसिद्धेयं परिभाषा- "**व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्"**[59] इति धिया व्यञ्जनायाः प्रकाशाय कारिकेयं सङ्गच्छते।

**"ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा।**

**व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः"**॥[60]

तात्पर्यमत्र विधीयते यदनया कारिकया व्यङ्ग्यव्यञ्जकभावरूपः सम्बन्धः स्वीकृतः, शब्दध्वन्योर्मध्य इति। अत्रेन्द्रियविषययोर्दृष्टान्तमाधृत्यैव व्याख्यत्। ग्रहणं नाम इन्द्रियं गृह्यतेऽनेनेति व्युत्पत्त्या, तदिन्द्रियस्य तथा च ग्राह्यो नाम विषयः, गृह्यतेऽसाविति व्युत्पत्त्या, तस्य ग्राह्यस्य। एतयोरुभयोर्मध्ये निश्चिता ग्राह्यग्राहकरूपा शक्तिः स्वाभाविकीति स्वीक्रियते, तद्वदेव स्फोटनादयोः व्यङ्ग्यव्यञ्जकभावेन व्यङ्ग्यव्यञ्जकगता योग्यता निश्चिता भवतीति गम्यते।

ग्राह्यग्रहणयोर्व्याख्यानमम्बाकर्तृकृता कृतम्- "**तद्यथा चक्षुसमवेतं रूपमेव बाह्यरूपस्य तदाश्रयस्य च बाह्यार्थस्याभिव्यक्तौ निमित्तम्, न चक्षुःसमवेतानि**

---

[58] वाक्यपदीयस्वोपज्ञवृत्तिः, पृ० १३०

[59] परिभाषेन्दुशेखरः, परिभाषा,१

[60] वाक्यपदीयम्, १/९७

**गुणान्तराणि, नापीतराणीन्द्रियाणि, नेन्द्रियान्तरगुणा इत्यस्ति बाह्यरूपतदाश्रयाभिव्यक्तौ नियतव्यञ्जकापेक्षा। तथा स्फोटस्यापि अभिव्यक्तौ नियतनादरूपव्यञ्जकापेक्षा न दोषायेति"।**[61] एतस्मादेव व्यङ्ग्यव्यञ्जकभावस्वरूपं व्यापारमुक्तवान्।

अन्यस्थलेऽपि विचारयितुं शक्यते- "**प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये।**[62] **वर्णवाक्यपदेषु व्यञ्जनीयेषु सत्सु ये व्यञ्जका ध्वनयस्ते वर्णवाक्यरूपव्यङ्ग्यभेदेन प्रत्येकं भिन्ना एव"।**[63] एतेन गम्यते यद् ध्वनय एव वर्णान् पदानि वाक्यानि चाभिव्यञ्जयन्ति। एतेनावबुध्यते यदि व्यङ्ग्यव्यञ्जकभावाख्यो व्यापारस्तदात्वे तु स व्यञ्जनैव। उभाभ्यामपि कारिकाभ्यां वर्णगता, पदगता, वाक्यगता, वृत्तिरववर्णत।

बोधगतात्वमपि विद्यतेऽस्याः। भूवादयो धातवः[64] इति सूत्रभाष्यतोऽथवा 'उपसर्गाः क्रियायोगे'[65] इति सूत्रतो वाऽस्याः शब्दवृत्तित्वस्यापि लाभः। तथाहि आद्ये क्रियाविशेषक उपसर्गः, पचतीति क्रिया गम्यते तां प्रत्युपसर्गो विशेषयति, इत्युक्तं भाष्ये। अत्रोद्योतकारो वक्ति- क्रियाविशेषक उपसर्ग इति – यथाऽन्वयव्यतिरेकाभ्यां प्रत्ययोऽर्थबोधकस्तथा ताभ्यामेव क्रियागतविशेषद्योतक उपसर्गः। एवं रीत्या व्यञ्जनायाः स्वरूपं पूर्वैरपि प्रत्यपादि- यथा प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये, व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः,

---

[61] वाक्यपदीयम्, अम्बाकर्त्री टीका, पृ० १५४

[62] वाक्यपदीयम्, १/८८ पूर्वार्द्धः

[63] तत्रैव, अम्बाकर्त्री टीका, पृ० १४४

[64] अष्टाध्यायी, १/३/१

[65] तत्रैव, १/४/५९

एवम्रूपेणोभाभ्यां कारिकाभ्यां सम्भावयति व्यञ्जनां वाक्यपदीयकृत्। एतयैव सरण्या निपातनां द्योतकता स्फोटस्य च व्यङ्ग्यता मन्यते-

**"निपाता द्योतका केचित् पृथगर्थाभिधायिनः।**

**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः"॥**[66]

एतदतिरिच्यापि जातिस्फोटाभिव्यक्तिप्रक्रियां ज्ञापयति। तद्यथा-

**"अनेकव्यक्त्यभिव्यङ्ग्या जातिस्फोट इति स्मृताः।**

**कैश्चिद्व्यक्तय एवास्याः ध्वनित्वेन प्रकल्पिताः"॥**[67]

अत्रत्यविवेचने जातिस्फोटस्याभिव्यक्तिं प्रदर्शयन् हरिः प्रतिपादयति यदनेकाभिर्व्यक्तिभिर्जाति-स्फोटोऽभिव्यज्यते। ताश्च व्यक्तयो ध्वन्यात्मकाः। अतो ध्वनिरूपैर्व्यक्तिभि-र्जातिस्फोटस्याभिव्यक्तिरित्यवमन्यते।

वस्तुतस्तु साक्षाच्छब्देनैतस्या व्यञ्जनाया उल्लेखो न विद्यते ततोऽपि। आचार्यस्य व्याख्यानेन तप्रतिपादितसिद्धान्तेन च व्यञ्जनायाः स्पष्टं स्वरूपं प्रतिपादयितुं शक्यते। व्यञ्जनयाः स्वरूपमभिधायैव महता बलेन समुद्घोषयितुं शक्यते यदाचार्याय व्यञ्जनायाः स्वरूपमभीष्टमस्तीति। किन्तु परवर्तिषु वैयाकरणेष्वाचार्यनागेशस्य महती प्रसिद्धिर्विद्यते वैयाकरणेषु। एवम्भूतो विलक्षणप्रतिभापदमाचार्यनागेशः प्रप्रथमं व्यञ्जनायाः स्वरूपं न्यगद्यत्। तच्चात्रोपन्यस्यते-

**कलाटीकाकारस्य व्यञ्जनाविचारः –**

बालम्भट्टमहोदयो वैयाकरणसिद्धान्तमञ्जूषायाः कलाटीकायां व्यञ्जनायसमर्थनाय काञ्चन युक्तियुक्तविचारान् प्रदर्शयति- **"तद्यथा- यत्तु 'गतोऽस्तमर्कः' इत्यादौ न व्यञ्जना, एकसम्बन्धिदर्शनादपरसम्बन्धिस्मरण-**

---

[66] वाक्यपदीयम्, २/१९२

[67] तत्रैव, १/९३

**वदुपपत्तेरिति, तन्न। 'गतोऽस्तमर्कः' इत्यादिश्रवणोत्तरं सन्ध्यावन्दनकर्तव्यत्वं मया स्मृतमित्यनुव्यवसायाभावात् तत्रानुल्लेखात्। इदं पदमेतदर्थस्य न वाचकं, नापि लक्षकं, नापि स्मारकमपितु व्यञ्जनया बोधकमिति प्रामाणिक-व्यवहारेणाप्यतिरिक्ततत्सिद्धेः। असम्बद्धस्यापि व्यङ्ग्यत्वाच्च"।**[68] एताभिरुपयुक्ताभिर्युक्तिभिर्भाव्यते व्यञ्जनायाः स्पष्टस्वरूपं स्वात्रन्त्यञ्च।

**व्यञ्जनायाः प्रयोजनम् –**

द्वाभ्यामेव मुख्यकारणाभ्यां वैयाकरणा व्यञ्जनां स्वीकुर्वन्ति। यदि व्यङ्ग्यव्यञ्जकभावरूपो व्यापारो न स्वीक्रियते चेद्वैयाकरणानां स्फोटाश्रितशास्त्रात्मकः प्रासाद एव सन्निपतेत्- तदत्र प्रस्तूयते, अतः व्यञ्जनामवश्यम्भावयति। तदाह नागेशः- "**अत एव निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यता हर्यादिभिरुक्ता**"[69] तत्र निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यत्वं साधयितुमेव,निपातस्फोटयोः प्रकाशनं व्यङ्ग्यव्यञ्जकभावव्यापारवतीं व्यञ्जनां विना न सम्पादयितुं शक्यते

**द्योतकत्वप्रतिपादनम् –**

**"द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वम्"**[70] अर्थात् स्वं निपातितपदम्, तेन निपातेन समभिव्याहृतं यत्पदम्, तन्निष्ठशक्तिव्यञ्जकत्वमेव द्योतकत्वमिति निगद्यते। वस्तुतः पूर्ववर्तिनो विद्वांसो व्यञ्जनायाः स्वरूपं न प्रतिपादितवन्तस्तथाप्याचार्यस्य नागेशभट्टस्य व्याख्यानेनोपरितनेन गम्यते

---

[68] वैयाकरणसिद्धान्तलघुमञ्जूषा, कलाटीका, पृ० २५३

[69] परमलघुमञ्जूषा, पृ० ६१

[70] तत्रैव, पृ०६१

यद्वैयाकरणैरवश्यमेव व्यञ्जना स्वीकार्या, नो चेन्न सम्भवति वैयाकरणानां स्फोटतत्त्वम्। "**वैयाकरणानामप्येतत्स्वीकार आवश्यकः"।**[71]

**व्यञ्जनास्वरूपप्रतिपादनम् –**

**"ननु व्यञ्जना कः पदार्थः? उच्यते- मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धाऽसम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्य-ज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना"।**[72]

**व्यञ्जनाया विषये नागेशस्य विनोदनम् –**

भट्टनागेशो व्यञ्जनायाः स्वरूपमित्थं प्रतिपादयति – व्यञ्जना नाम संस्कारविशेषः। संस्कारे च त्रिधात्वमुच्यते। लक्षणया शब्दशक्त्या बाधत् परमेव बोधः कार्यते, न तथा व्यञ्जनाव्यापारे। व्यञ्जनायां मुख्यार्थस्य बाधः स्यान्न वा बोधं तु कारयत्येव। मुख्यार्थबाधनिरपेक्षबोधजनकत्वं संस्कारे प्रथमो विशेषः।

लक्षणा तु मुख्यार्थसम्बद्धमप्रसिद्धं वार्थं बोधयति। न व्यञ्जनायां तथा बोधो भवति यादृशो बोधो लक्षणयां कार्यते, मुख्यार्थसम्बद्धासम्बद्ध-साधारणप्रसिद्धाप्रसिद्धार्थविषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः। उक्तसंस्कार-स्योद्बुद्धानुद्बुद्धत्वसाधारण्ये सर्वत्रैव सर्वेषामनया बोधः कथम्? इत्यति-प्रसङ्गवारणाय वक्त्रादिवैशिष्ट्यज्ञानस्यैतज्जन्यबोधे सहकारित्वं स्वीक्रियत इति वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धताऽपि तत्र तृतीयो विशेषः। अत्र वर्ण्यते- एवम्भूता संस्कारविशेषरूपा व्यञ्जना नैयायिकमते समवायसम्बन्धेनात्मनिष्ठा, तथा च वेदान्तदर्शने तादात्म्यसम्बन्धेनान्तःकरणनिष्ठेति शब्दतदर्थयोरुभयोरपि

---

[71] तत्रैव, पृ० ६१

[72] परमलघुमञ्जूषा, पृ० ६०

आवर्तमानत्वेन तयोः सम्बद्धताऽस्या नैव स्यात्। सम्बन्धस्योभयवृत्तित्व-नियमादिति।

सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे सत्याश्रयतया विशिष्टबुद्धिनियामको भवतीति स्वीकारात्। **“एवञ्च न्यायदर्शनाभिमताया इच्छायाः शक्तित्वस्वीकारे तस्याः पदपदार्थयोः सम्बन्धत्वाभावरूपो यो दोषः पूर्वं भवद्भिरुत्थापितः, स एव दोषोऽधुनोक्तसंस्कारस्य वृत्तित्वसमर्थने भवतां भालेऽप्यापतितः कथमुपेक्षित इत्यहो महान् विनोदो मान्यानाम्”।**[73] इति रामप्रसादत्रिठिकृतव्याख्यानम्।

**नागेशकर्तृक**व्यञ्जना**स्वरूपम्–**

**“मुख्यार्थसम्बद्धासम्बद्धसाधारणमुख्यार्थबाधग्रहाद्यप्रयोज्याप्रसिद्धाद्यर्थ-विषयकधीजनकत्वं व्यञ्जना”।**[74] परमलघुमञ्जूषास्थलक्षणे किञ्चित्किञ्चित् परिष्कारं कुरुते। तद्यथा-

**“ननु व्यञ्जना कः पदार्थः? उच्यते- मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धाऽसम्बद्धसाधार**णः **प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्य-ज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना”।**[75] अत्र आचार्यनागेशेन संस्कारविशेषव्यञ्जनात्वमित्यस्य विशेष्यांशस्य पञ्चविशेषणानि प्रादीयन्त।

मुख्यार्थबाधनिरपेक्षबोधजनकः। मुख्यार्थसम्बद्धासम्बद्धसाधारणः। प्रसिद्धाऽप्रसिद्धार्थविषयकः। वक्त्रादिवैशिष्ट्यज्ञानोद्बुद्धः। प्रतिभाद्युद्बुद्धः।

---

73 शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ५२

74 वैयाकरणसिद्धान्तमञ्जूषा, पृ० ३१

75 परमलघुमञ्जूषा, पृ० ६१

एतैर्विशेषणैर्भावयामो यदाचार्यः साहित्यशास्त्रिणामनुसरणं कृत्वा संस्कारविशेषस्य व्यञ्जनात्वं प्रतिपादयति

**मुख्यार्थबाधनिरपेक्षबोधजनकः –**

लक्षणाशब्दशक्तौ तु मुख्यार्थबाधस्तु जायत एव, व्यञ्जनाशब्दशक्तौ तु नैवम्प्रकारको नियमः। तस्माद् व्यञ्जना लक्षणाया भिन्नैव सिध्यति। यथा व्यञ्जना भावाभिव्यक्तिं करोति न तथऽभिधा लक्षणा वा भावयतः। 'गङ्गायां घोषः' इत्यत्र शैत्यपावनत्वादिरूपव्यङ्ग्यार्थस्य याऽभिव्यक्तिर्भवति, तदर्थस्य प्राप्तये मुख्यार्थबाधापेक्षा न दृश्यते। यतोहि लक्षणा मुख्यार्थबाधेन तु तटमात्रं संबोध्य निवर्तिता भवति, पश्चाच्च शैत्यपावनत्वादीनां बोधो व्यञ्जनाद्वारा जायते, अत एव नागेशो मुख्यार्थबाधं विनैव शैत्यपावनत्वादिबोधको व्यापारो व्यञ्जनेति प्रत्यपद्यत। एतस्मादेव मुख्यार्थबाधनिरपेक्षबोधजनकः, इति प्रथमविशेषणं विद्यते। विश्वनाथेन प्रोक्तम्-

**"विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।**

**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च"॥**[76]

तेन सहास्य तुलना निर्बाधरूपेण कर्तुं शक्यते।

**मुख्यार्थसम्बद्धासम्बद्धसाधारणः –**

व्यञ्जनाशब्दशक्तौ मुख्यार्थेन सह वाच्यार्थसम्बद्धता भवत्त्विति नावश्यकम्, क्वाचित्की सम्बद्धता। अन्यथाऽसम्बद्धेऽपि बोधो जायते, किन्तु लक्षणाविषयकव्यापारे तु मुख्यार्थेन सह सम्बन्ध आवश्यकत्वात्। यथा- 'गङ्गायां

---

[76] साहित्यदर्पणः, २/१२

घोषः’ इत्यत्र शैत्यपावनत्वादिरूपव्यङ्ग्यार्थो मुख्यार्थेन प्रवाहेण सह सम्बद्धो विद्यते।

**प्रसिद्धाऽप्रसिद्धार्थविषयकः–**

व्यञ्जनाव्यापारस्य तृतीयो विशेषः, यतोहि व्यञ्जना प्रसिद्धाप्रसिद्धार्थविषयकं द्वयमपि प्रबोधयति, अभिधा तु प्रसिद्धार्थमेव बोधयति। लक्षणा चाप्रसिद्धार्थमात्रविषया। व्यङ्ग्यव्यङ्जकभावव्यापारो द्वाभ्यामपि सम्बद्धो भवितुं शक्यते। न कश्चन तत्रानिवार्यनियमः।

**वक्त्रादिवैशिष्ट्यज्ञानोद्बुद्धः–**

उच्चारयितुः प्रतिपत्तुश्च श्रवणस्य भाषणस्य च महत्त्वं विद्यते। तस्मानागेशो वक्त्रादिविशेषज्ञानेन प्रतिभादिना वोद्बुद्धसंस्कारस्य वैशिष्ट्यमेव व्यञ्जनाशब्दशक्तिः। वक्त्रादिवैशिष्ट्यज्ञानस्य वर्णनं साहित्यिकैः कृतं विद्यते। तद्यथा-

**“वक्तृबोद्ध्व्यकाकूनां वाक्यवाच्यान्यसन्निधेः।**

**प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्।**

**योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा”॥**[77]

इत्थमेव विश्वनाथस्यपि व्याख्यानं विषयेऽस्मिन् विद्यते-

**“वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।**

**प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च।**

**वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा”॥**[78]

---

[77] काव्यप्रकाशतृतीयोल्लासः, पृ० ८२

द्वयोराचार्ययोर्व्याख्यानेन निश्चयो जायते, यदार्थीव्यञ्जनायाः सहकारिकारणानि कानि सन्ति तेषामत्र सङ्केतो दीयते- वक्तृवैशिष्ट्यम्, काकुवैशिष्ट्यम्, बोद्धव्यवैशिष्ट्यम्, वाक्यवैशिष्ट्यम्, वाच्यवैशिष्ट्यम्, अन्यसन्निधिवैशिष्ट्यम्, प्रस्ताववैशिष्ट्यम्, देशवैशिष्ट्यम्, कालवैशिष्ट्यम्, अन्यान्यवैशिष्ट्यम्, एवम्प्रकारकाणि दशतत्त्वान्यङ्गीकृतानि समानरूपेण मम्मटविश्वनाथाभ्याम्।

विश्वनाथस्तु चेष्टावैशिष्ट्यतत्त्वस्यापि वर्णनमकरोत्। वक्त्रादीनामेकादश-सङ्ख्याकानां वैशिट्यज्ञानं व्यङ्ग्यविशेषबोधाय सहायत्वं सम्भजते। एतस्मादेव नागेशेन कथ्यते- "**वक्त्रादिवैशिष्ट्यज्ञानं च व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तरः"**।[79] वक्त्रादिवैशिष्ट्यज्ञानं व्यङ्ग्यविशेषावबोधे सहायतां संयाति, किन्तु सर्वत्रानवश्यकत्वमेवैतेषाम्।

**प्रतिभाद्युद्बुद्धः-** काव्यप्रकाशकारस्य प्रतिभाजुषाम्, वचनेनानेन विदितं भवति नागेशवाक्येन सह प्रतिभाद्युद्बुद्धसंस्कारस्य समानता। एवम्भूतेषु हेतुषु विद्यमानेषु प्रतिभायाः सत्ता भवेदेव। प्रतिभया विना तु व्यङ्ग्यार्थप्रतीतिरेव न सम्भवेत्।

नागेशः प्रतिभया सह ज्ञानकृतं महत्त्वमपि संमनुते। यतोहि ज्ञानेन विना प्रतिभाऽपि स्वकीयविचित्रतां सम्पूर्णसौन्दर्यप्रदर्शनञ्च न प्रकाशपथमानयति। तन्नागेशः प्राह- "**अनया चार्थबोधे जननीये वक्तृबोद्धृवाच्यादिवैशिष्ट्यज्ञानं प्रतिभा च सहकारि। तद्बीजनकत्वज्ञानजनकमेव वा। प्रतिभा च नवनवोन्मेषशालिनी बुद्धिः। तदुक्तम्– प्रज्ञानवनवोन्मेषशालिनी प्रतिभा मता**

---

[78] साहित्यदर्पणः, २/१६-१७

[79] परमलघुमञ्जूषा, पृ० ६२

**इति। नवनवोन्मेषो जन्मान्तरीयतद्बीजनकत्वज्ञानजन्यसंस्कारोद्बोधः। वक्त्रादिवैशिष्ट्यसहकारेण तज्जनिका बुद्धिः प्रतिभेति फलम्"।**[80] ज्ञानस्य प्रतिभायाश्च महत्त्वं तदात्वे एव सभवति।

यदा च ज्ञानस्य प्रतिभायाश्च संस्कारस्य भावनाविशेषस्य वा जनिर्भवेत्। ज्ञानप्रतिभाभ्यामुद्बुद्धः संस्कारविशेष एव व्यञ्जनामुद्भावयति। तत्त्वतस्संस्कारविशेष एव व्यञ्जनाव्यापारेण सहाभेदं विधाय सहृदयहृदयान्याह्लाद्यन्ते।

साहित्यिकाः संस्कारविशेषं वासनेति पदेनाभिदधति। तच्च साहित्यदर्पणकारस्य वचनम्- **"न जायते तदास्वादो विना रत्यादिवासनाम्॥**[81] **धर्मदत्तस्य वचोभिः- सवासनानां सभ्यानां रसस्यास्वादनं भवेत्। निर्वासनास्तु रङ्गान्तःकाष्ठकुड्यश्मसन्निभाः"॥**[82] एतस्माद्रसास्वादस्तु तादृशानां सहृदयानां कृते एव सहृदयेभ्यो भवति। येषां हृदयेषु रत्यादिभावना समुद्बुध्यन्ते। नान्येषां कृते सञ्जायते। रसो व्यङ्ग्य इत्यबुध्यते। सा चेयमनुभूतिर्व्यञ्जनाव्यापारैकमात्र विषया भवति

**व्यञ्जनाभेदविचारः –**

व्यञ्जना शब्दशक्तिरभिधाशक्तिवन्न शब्दमात्रनिष्ठा, प्रत्युत मतन्तरीयलक्षणावदर्थनिष्ठाऽपीति द्विप्रकारिका। प्रकृतिप्रत्ययपदवाक्यनिष्ठतया चतुर्प्रकारिका । यथा- **"द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः"**[83] इत्यनेन नियमेन यदा अमादिविभक्तीनामेकत्वादिसङ्ख्याद्योतकता, तदा

---

[80] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३१

[81] साहित्यदर्पणः, ३/८

[82] तत्रैव, ३/८ धर्मदत्तवचनम्,

[83] लघुशब्देन्दुशेखरः, कारकप्रकरणेऽनभिहिते, इति सूत्रे

प्रकृतेस्तदवाचकता। यदा त्वमादीनां तद्वाचकत्वं जायते, तदानीमेव प्रकृतेः (घटादेः) तद्द्योतकता जायते। पदस्य द्योतकत्वं तु परिभवती'त्यादौ भूधातोः परिभवार्थवाचकत्वम्, परेरुपसर्गस्य तद्द्योतकत्वं प्रसिद्धमेव। तदुक्तम्-

**"उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते।**

**प्रहाराहारसंहारविहारपरिहारवत्॥**[84]

**उपसर्गास्त्वर्थविशेषस्य द्योतका भवन्ति"।**[85]

एवमेव **"वाह ऊठ्"**[86] इत्यत्रोठग्रहणं ज्ञापकमन्तरङ्गपरिभाषाद्वारकम्, तदपि पदनिष्ठमेव व्यञ्जनम्। **"प्रत्ययोत्तरपदयोः"**[87] चेति सम्पूर्णसूत्रं ज्ञापकम्। **"अन्तरङ्गानपि विधीन् बाधित्वा वहिरङ्गो लुग्भवति"**[88] इति वाक्यनिष्ठाव्यञ्जना। तथैव अर्कोऽस्तं गतः इत्यादिवाक्यस्य सन्ध्योपासनं कर्तव्यमित्यादिव्यङ्ग्यार्थ-व्यञ्जनं लोकव्यवहारे प्रसिद्धमेव।

**व्यञ्जनाद्विधा –**

व्यञ्जनायास्स्वरूपं द्विधा विचार्यते शब्दार्थमूलकत्वात्, शब्दनिमित्तिकायाश्च शाब्दीत्वमर्थमूलिकायाश्चार्थीत्वमिति द्विधैवेति सा

**"अभिधा लक्षणामूलाशब्दस्य व्यञ्जना द्विधा"।**[89] **"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते। एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया"।**[90] असावेव

---

[84] वैयाकरणसिद्धान्तकौमुदी, पृ० ३४५

[85] तत्रैव, पृ० ३४५

[86] अष्टाध्यायी, ६/४/१३२

[87] तत्रैव, ७/२/९८

[88] महाभाष्यम्, ७/२/९८

[89] साहित्यदर्पणः, २/१३

[90] तत्रैव, २/१४

शाब्दीव्यञ्जना अभिमूला लक्षणामूला चेति द्विप्रकारिका मन्यते। तत्राद्या नियन्त्रितान्यार्थविषयकबोधजनिका। दुर्गालङ्घित विग्रहो राजत्युमावल्लभः, इत्यत्रोमावल्लभशब्दस्योमानाममहादेवीवल्लभभानुदेवनृपे पतिरूपेऽर्थे प्रकरणेन नियमिते व्यञ्जनयैव पुनर्गौरीवल्लभरूपार्थो बोध्यते।[91] नियन्त्रितार्थविषयक-धीजनकत्वं शब्दव्यञ्जना। वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थ-धीस्तद्धेतुव्यापारत्वमर्थव्यञ्जना।[92] अपरत्र च वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्वं फलितम्। द्वैध्यञ्चास्य व्यापारस्य- **"नियन्त्रितार्थविषयकबोधजनकत्वं शब्दव्यञ्जना, वक्त्रादि-वैशिष्ट्यमूला या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापाररूपाऽन्यनिष्ठा"।**[93]

अत्र रामप्रसादत्रिपाठिमहोदयानां व्याख्यानं दीयते- नियन्त्रितार्थस्य त्वभिधैव बोधात्। तदन्यस्यैवानया बोधात्। लक्षणामूला तु गङ्गायां घोषः इत्यादौ। तत्र शक्त्या गङ्गापदस्य प्रवाहविशेषार्थो बोध्यते। अतः परं लक्षणया शब्दशक्त्या तटस्य बोधो सञ्जायते।पश्चाच्च शक्तिलक्षणाव्यापारयोर्निर्वृत्तिदशायां व्यञ्जनाशब्दशक्त्या लक्षणया बोधिततटरूपार्थे शैत्यपावनत्वातिशयस्य बोध इति। प्रयोजनवतीषु लक्षणासु सर्वत्रैवमेव प्रयोजनप्रतीतये लक्षणामूलाव्यञ्जना समुपास्यते।

---

[91] शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ५८

[92] वैयाकरणसिद्धान्तलघुमञ्जूषा, कलाटीका, पृ० २५२

[93] तत्रैव, रत्नप्रभाटीका, पृ० १३४

**शब्दवृत्तिता चेष्टावृत्तिव्यञ्जनायाः –**

"मूकबधिरादीनां कृते चेष्टयैवार्थबोधो जायते इत्याकारकव्यवहारो विद्यते। चेष्टागतापीयं व्यञ्जना। यतोहि मूकबधिराणां शब्दज्ञानाभावात्। वस्तुतस्तु तेषामपि जन्मान्तरीयशब्दस्मरणेन तत्रापि शब्दनिष्ठैव नातिरिक्तेत्यपि केषाञ्चिन्मतम्। एतत्सर्वं गुरुञ्जूषादौ स्पष्टरूपेणव्याख्यातं विद्यत इति कलाटीकाकर्तुर्मतम्"।[94] **"अनया कटाक्षेणाभिलाषोऽभिव्यञ्जित इति सर्वजनप्रसिद्धेस्तस्यां चेष्टावृत्तित्वस्याप्यावश्यकत्वाच्च"।**[95] यतोहि भुजप्रक्षेपाक्षि-निकोचादिभिरप्यर्थबोधो जायते। यथाऽक्षिप्रक्षेपद्वारा प्रेम्णोऽभिव्यक्तिरेवं रीत्या चेष्टावृत्तेर्व्यञ्जकत्वं समागतम्।

**अर्थनिष्ठव्यञ्जनाव्यापरस्य विचारः–**

"**वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतु-व्यापारोऽर्थनिष्ठा व्यञ्जना"।**[96] शब्दगता या व्यञ्जना भवति सा च व्यञ्जना गतार्थयतीमाम्। अर्थीव्यञ्जनाया उदाहरणं प्रदीयते-

**"रतिकाले विलोक्य श्रीर्नाभिपद्मे पितामहम्।**

**रसाकुला छादयते दक्षिणं नयनं हरेः"॥**[97]

इत्यादिषु हरिपदद्वारा दक्षिणनेत्रस्य सूर्यरूपत्वम्, तस्य च सङ्कोचेन सूर्यास्तस्माच्च पद्मसङ्कोचः, तेन पितामहस्य गमनं तेनाप्रतिबद्धं

---

94 वैयाकरणसिद्धान्तलघुमञ्जूषा, कलाटीका, पृ० २५३

95 वैयाकरणसिद्धान्तमञ्जूषा, पृ० ३१

96 शब्दशास्त्रीयवृत्तिविमर्शः, पृ०५१

97 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३१

रतिविलसितमिति क्रमेण व्यङ्ग्येषु प्रतीयमानेषु तत्तदर्थप्रतीत्युत्तरमेव व्यङ्ग्यप्रतीतेरर्थस्यापि व्यञ्जकत्वावश्यकत्वात्।[98]

अत्रत्यव्याख्यानेन ज्ञायते यदर्थनिष्ठता व्यञ्जनाया विद्यत एव, यतोहि एकस्मिन्नर्थेऽन्यार्थानां स्थितिराध्रियते, तस्मात् परम्परया व्यञ्जनाऽर्थनिष्ठत्वमुपगच्छति। तेनैव प्रकारेण द्वितीयोदाहरणमपि दर्शयति-

**"पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला।**

**रम्ये मारकते पात्रे शुक्तिकेव च निर्मला"॥**[99]

**"तत्रापि निश्चलत्वेन शुक्त्युपमाया चाश्वस्तत्वम्। तेन तस्य निर्जनत्वम्, तदेवावयोः सङ्केतस्थानमित्यादिषु क्रमेण प्रतीयमानेषु तत्तदर्थव्यङ्ग्येष्वपि बोध्यम्"।**[100] उपयुक्तेन व्याख्यानेन निसचीयत यद्व्यञ्जना न पदमात्रवृत्तित्वं भजतेऽपित्वर्थवृत्तित्वमपि। एतेन अर्थनिष्ठव्यापारवती व्यञ्जना इत्यर्थो जायते।

**शाब्दबोधे व्यञ्जना स्वरूपसती हेतुः –**

व्यङ्ग्यार्थस्यानित्यत्वान्नानादित्वमिति यदि न मन्यसे, तथा संस्कारविशेषरूपमात्रस्य व्यञ्जनात्वम्। न तूक्तसम्बन्धविशेषरूपो व्यञ्जनाव्यापार इति स्वीकुरुषे। तदानीन्तने तु शाब्दबोधं प्रति सर्वत्रोक्तसंस्काररूपव्यञ्जनायाः स्वरूपसत्या एव हेतुत्वमिति शाब्दबोधात् प्राक्कथं व्यङ्ग्यव्यञ्जकभावस्य ज्ञानमिति प्रश्नस्यावसर एव समाप्तिङ्गच्छति। अत एवोक्तं पूर्वं व्यञ्जनायाः स्वरूपसत्या हेतुत्वं कलाटीकायाम्- "**एवञ्च शक्तिरेतज्जन्मगृहीतैवार्थबोधिका**

---

98 तत्रैव, कलाटीका, पृ० २५२

99 वैयाकरणसिद्धान्तमञ्जूषा, पृ० ३१

100 तत्रैव, पृ० ३१

**व्यञ्जना तु जन्मान्तरगृहीताऽपीत्यपि शक्तेरस्याः भेदकत्वम्। इदमेवाभिप्रत्य व्यञ्जनास्वरूपसती हेतुरिति प्रवादः"।**[101]

**व्यञ्जनाया विलक्षणत्वम्–**

उपरितने व्याख्यानेऽभाणि यद् वक्त्रादिवैशिष्ट्येन प्रतिभाशालि-सहृदयेभ्योऽर्थान्तरस्य प्रतीतिप्रापको व्यापारो व्यञ्जनेति निगद्यते। अर्थान्तरं प्रत्यायन्तीयं व्यञ्जनार्थी व्यञ्जनेति कथ्यते। अतो नागेशेन समर्थितेयं व्यञ्जना।व्यञ्जनावृत्तिव्याख्यानस्य समालोचनेन अभिधालक्षणा-मूलव्यञ्जनयोरपेक्षया अर्थीव्यञ्जनाया वैलक्षण्यप्रतीतेः।

व्यञ्जनायाः क्षेत्रं विशालम्, तथा च ज्ञानप्रतिभाद्युद्बुद्धसंस्काररूपव्यापारवत्त्वात्, व्यञ्जनाव्यापारस्य महत्ता वर्तते। अभिधायाः श्रुतिमात्रेणार्थप्रत्यायकत्वात्, सर्वजनसौलभ्यम्, लक्षणया चाऽप्रसिद्धार्थविशेषबोधकत्वेन निमित्तादिविशेषणानां ज्ञानस्यावश्यकत्वात्। सभापतिमहोदयो वक्तृवैशिष्ट्यस्यार्थो वैलक्षण्यमित्यकरोत्, तथा च नागेशो वक्त्रादिवैलक्षण्यहेतुका प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्व-मिति।

यावद्वक्तुः सम्भाषणादौ वैलक्षण्यं जायते। तावद्व्यञ्जनायाः प्रसूतिरपि न दृश्यते। इतोऽपि व्यञ्जनाया वैलक्षण्यं यद्व्यङ्ग्यार्थस्य सर्वदाऽनैयत्यम्, वाच्यलक्ष्ययोश्च नैयत्यमिति ज्ञायते। अतो हेतोरनियतार्थप्रतीतये लक्षणा

[101] वैयाकरणसिद्धान्तलघुमञ्जूषा, कलाटीका, पृ० २५१

समुपास्यते। एवञ्च नागेशवचोभिः कथ्यते- **"सा चेयं शब्दतदर्थ-पदैकदेशवर्णरचनाचेष्टासु सर्वत्र। तथैवानुभवात्"।**[102]

**शक्तिलक्षणान्यात्वं व्यञ्जनात्वम् -**

एवम्भूता व्यञ्जना शक्तिमूला शक्त्या, लक्षणामूला च लक्षणया यदि गतार्था स्यात्, तदा कथमस्य स्वतन्त्रता स्वीकर्तुं शक्येत? इति चेदुच्यते- **"राजत्युमावल्लभः' इत्यादावप्राकरणिकद्वितीयार्थबोधान्निष्कम्पं प्रवृत्त्यभावेन तस्यास्वादविशेषजनकत्वेन च तत्र वैजात्यमवश्यं वाच्यमिति तस्य बोधस्य कारणविशेषेणैव सिद्धिर्वाच्या स्यादिति व्यञ्जनाऽगत्या सम्माननीया सहृदयैः"।**[103] अत एव शक्तिद्वारा व्यञ्जनामात्रव्यापारस्य गतार्थता भवतीति व्याख्यानं कर्तुं न शक्यते। किञ्चव्यञ्जना सहृदयैकमात्रवेद्या। शक्तेस्स्तु पामरजनवेद्यत्वम्। तस्माद् बोद्धृष्वपि भेदस्य विद्यमानत्वाच्छक्तिभेदो विधीयते।

'गतोऽस्तमर्कः'इत्यादौ वाच्योऽर्थस्यैकत्वमेव, व्यङ्ग्यस्त्वनेक इति प्रतिपाद्यसङ्ख्या भेदः। वाच्यार्थप्रतीतिस्तु शब्दानामुच्चारणमात्रिका जायते। व्यङ्ग्यस्तूक्तप्रतिभानैर्मल्यादिना इति निमित्तभेदः। एवमेव कार्यप्रतीतिकालाश्रय-विषयदीनां च भेदाद्भेदः। किञ्च शक्तिविषयकज्ञानं शाब्दे हेतुः, व्यञ्जना तु स्वरूपसती हेतुतां याति, इत्यपि महान् भेदः, इति कथं व्यञ्जनाव्यापारः शक्त्या क्रोडीकर्तुं शक्यते? नापि लक्षणायामन्तर्भवत्येषा।

एवम्भूतेन व्याख्यानेन शक्तिलक्षणाऽन्यतमत्वमेव सिध्यति व्यञ्जनात्वम्।

---

102 परमलघुमञ्जूषा, पृ० ६१

103 साहित्यदर्पणः, २/१४, रामचरणतर्कवागीशकृताविवृतिटीका, पृ० ५०, उद्धृतम्, शब्दशास्त्रीयवृत्तिविमर्शः, पृ० ६०

**व्यञ्जनायाः समालोचनम् –**

अचार्यनागेशभट्टः सङ्क्षेपेण व्यञ्जनां विविनक्ति, तस्य च विवेचनं सहित्यशास्त्रिभिः प्रभावितमिति स्वीकर्तुं शक्यते। नागेशश्च व्यञ्जनायाः स्वीकरणं कारणद्वयमादाय स्वीकुरुते। निपातद्योतकत्वाय, स्फोटस्य च व्यङ्ग्यत्वसाधनाय, ततोऽपि यदि सूक्ष्मैक्षिकाद्वारा विचारो विधीयते। तदैवमनुभावनं जायते। यत्स व्यञ्जनां स्वीकारयितुं तथा न बलं ददाति। तत्र शोधार्थिना हेतुत्वमिदवेव दातुमिष्यते। यावन्महत्पश्रमद्वारा नागेशो लक्षणाया निरसनं कृतवान्।

अप्रसिद्धां स्वीकुर्वाणः स जघन्यवृत्तित्वमपि प्रतिपादयति। सा च शक्तिद्वारैव गतार्थीभवति। एवं रीत्या शक्तेर्भेदद्वयं मनुते प्रसिद्धाऽप्रसिद्धा च। अप्रसिद्धयैव लक्ष्यर्थोऽवगम्यते, न तत्र घटपदेन पटपदार्थस्य बोधापत्तिः समागमिष्यति। यस्माद्धि सति तात्पर्ये सर्वे सर्वार्थ वाचकाः इत्याश्रित्य लक्षणावृत्तेरभावो यथा जायते तस्य विचारेण, तथैव यद्यप्रसिद्धशक्त्यैव व्यञ्जनाया अपि निर्वाहणं स्वीक्रियते। तदानीन्तु व्यञ्जनाया अप्यभावो भावयितुं शक्यते।

व्यञ्जनाशक्तिद्वारा यादृशस्य वैयञ्जनिकार्थस्य प्रतीतिर्भाव्यते, तादृशस्य वैयञ्जनिकार्थस्य प्रतीतिरप्यप्रसिद्धिशक्तिद्वारा भावयितुं शक्यते। यथा व्यङ्ग्यार्थस्य प्रतीतिः सहृदयानां हृत्सु सञ्जायते, तथैव नागेशस्याप्रसिद्धाशक्तिरपि 'सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्' इति। एतेन सहृदयैरेव लक्ष्यार्थः प्रतिबुध्यते। सहृदयहृदयमात्रवेद्यविषयत्वं विद्यतेऽप्रसिद्धाविषयः। एतेन नागेशस्य व्याख्यानेन प्रतिभाति यदप्रसिद्धयैव वैयञ्जनिकार्थोऽपि भवेत् कदाचित्। एतदेवावबुध्य आशाधरभट्टो व्याख्याति - अत्र व्याकरणदर्शनम्-

**"शक्तिरेव शब्दवृत्तिः, तस्यश्च प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः व्यञ्जना तु तत्रान्तर्भवति। दीर्घव्यापारात्"।**[104] अत आशाधरभट्टस्यापि व्याख्यानमप्रसिद्धामभिलक्ष्यैव कृतं विद्यते। तद्रीत्या लक्षणाव्यञ्जनयोर्विरह एव दृश्यते, तयैव रीत्या कालिकाप्रसादशुक्लस्यापि व्याख्यानं दृष्टुं शक्यते- "**तथापि तार्किकेषु शाश्वतिकविरोधानां शाब्दिकानां तार्किकमतप्रत्याख्यानमात्रफलको व्यञ्जनासमर्थनप्रयासो भवेत्"।**[105] यतोहि नैयायिकास्तु लक्षणां स्वीकुर्वते, किन्तु व्यञ्जनां त्वनुमानेऽन्तर्भावयन्त्यथवा लक्षणया भावयन्ति। अतो व्यञ्जनाया अस्तित्वं पृथगेवाभुपेयम्, अतो नैयायिकानां या स्थितिर्वर्तते लक्षणामभिलक्ष्य तां चाभिलक्ष्य वैयाकरधुरीणो नागेशो निरस्यति। –

**न्यायदर्शनस्य व्यञ्जनानिरसनम्-**

**"यत्तु तार्किकाः- लक्षणयैव गतार्था व्यञ्जनेति न सा स्वीकार्येत्याहुः"।**[106]

यतोहि नैयायिका व्यञ्जनां शब्दशक्तिं नाङ्गीकुर्वन्ति। पूर्वपक्षिणश्शङ्कां कृतवन्तः, तेषां शङ्काया निरासायोत्तर्यते- यथा लक्षणया तटार्थस्य बोधस्तथैव तयैव वृत्त्या शैत्यपावनत्वादीनापि बोधो जायताम्, नास्ति काचिदप्यनुपपत्तिरित्येतेन वाक्येन नैयायिकाननुवदत् प्रत्याचख्यौ। "**लक्षणायाः मुख्यार्थबाधपूर्वकलक्ष्यार्थबोधकत्वात्, मुख्यार्थसम्बद्धार्थस्यैव लक्षणया बोधकत्वात्, व्यञ्जनाया अतथात्वेन तदनन्तर्भावाच्चेति दिक्"।**[107] लक्षणाशब्दशक्तिद्वाराऽनुमानद्वारा वा व्यङ्ग्यार्थसाधितवतां नैयायिकानाङ्कृते वदति। स्वकीयस्य व्यङ्ग्यार्थस्य प्रतिष्ठापनायै युक्तयः- यत्रस्थानेषु मुख्यार्थो

---

104 त्रिवेणिका, पृ० ३६-३७

105 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ३७

106 परमलघुमञ्जूषा, पृ० ६२

107 तत्रैव, पृ० ६२

बाध्यते तदानीन्तन एव लक्षणा। स च लक्ष्यार्थो विबोध्यते लक्षणाशक्त्या। न केवलं मुख्यार्थबाधमात्रेऽपितु बाधितस्य मुख्यार्थस्य लक्ष्यार्थेन योगोऽपि स्यात्, तत्र च रूढिप्रयोजनयोरेकं किमपि भवेत्, तदात्वे लक्षणा कस्मिंश्चित् स्थाने सञ्जायते। व्यञ्जनां विना शब्दशास्त्रस्य प्रणभूतानां सिद्धान्तानां समायोजने बाधकत्वं समायाति तस्मादुपरेतनेन व्याख्यानेनैवमनुमीयते यन्नास्त्यन्यः पन्था व्यञ्जनाया अतिरिक्तम्। अद्वैतवेदान्तस्य ये सिद्धान्ताः सन्ति तेषु यथा - विवर्तवादः, अभिव्यक्तिवादः, एतयोस्सिद्धान्तयोः सम्भावना अभिव्यक्तिं विना न भावयितुं शक्यते यतोहि यद्यभिव्यज्यते किमपि तदात्वे तु तत्रत्यस्थले व्यङ्ग्यव्यञ्जकभावव्यापारस्तु स्यादेव। व्यङ्ग्यव्यञ्जकभावव्यापाराहित्ये-ऽभिव्यक्तिः कथं स्यात्, तेनाभिव्यक्तिवादो ववर्तवादो वा कथं साधयितुं शक्येते। सत्कार्यवादश्च कथं स्यादित्येषा समस्या स्यादेव, समास्याया एतस्या समाधानायैव व्यङ्ग्यव्यञ्जकभावव्यापारस्य आवश्यकत्वात्। विवर्तवादो वा भवत्वभिव्यक्तिवादो वा स्यात्, उभयोरपि सिद्धान्तयोर्नूतनं किमपि न जायते सर्जनं प्रत्युत पूर्वविद्यमानस्यैव ब्रह्मणोऽभिव्यक्तिर्जायते। तस्मादद्वैतवेदान्तिनोऽपि विषयेऽस्मिन् चिन्तयेयुरिति। वस्तुतस्तु तेषां मते सिद्धान्तो व्यञ्जना न स्वीकृता विद्यते।

## ॥ पञ्चमोऽध्यायः ॥

## ॥ व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षा ॥

व्याकरणाद्वैतवेदान्तयोश्शब्दशक्तयोऽचर्च्यन्त। तत्रादौ प्रामुख्येनाद्वैत-वेदान्तस्य व्याकरणदर्शनस्य च परम्परायाः प्राप्तैतिह्यानुरूपं विवेचनं विविधैः प्रमाणैर्व्यधीयत। तत्रादौ विविधप्रमाणैर्व्याकरणास्यवेदमूलकता समसाध्यत। सा च वेदमूलकतैव व्याकरणस्यास्तिकत्वं निर्दिश्य शब्दस्य प्रतिष्ठतमं पदमपि निर्दिशति व्याकरणस्य परम्परायां बहवस्तादृशो मन्त्राः सन्ति येषु च साक्षात् परब्रह्मस्वरूपत्वेन शब्दब्रह्मणस्सत्ता प्रत्यपद्यत। अत्र च शब्दस्य परमं पदं विद्यते, तच्च व्याकरप्रतिपाद्यस्य शब्दब्रह्मण एव।

**व्याकरणस्य महत्त्वम्–**

**"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन"॥**[1]

व्याकरणदर्शनस्य कार्यं पदसाधुत्वलक्षणपुरस्सरं तत्तदर्थानुभावनम्। तस्मात् सकलस्यापि व्याकरणस्याध्ययनं करणीयम्। तेन विना न सम्भवति शास्त्रान्तरस्यपि ज्ञानम्। महाभाष्यकारः कथयति- **सर्ववेदपारिषदं हीदं शास्त्रम्**[2] व्याकरणशास्त्रं पदसाधुत्वसंस्कारेण पदार्थान् प्रबोधयति, पदं च द्विविधं सुप्तिङन्तमिति। व्याकरणेतरेषु शास्त्रेषु चतुर्विधस्य पदस्य वर्णनं लभ्यते। तद्यथा-

**"चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।**

**क्रियते संशयोत्पत्तेर्नोपसगनिपातयोः।**

**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।**

**यदर्थद्योतकौ तौ तु वाचकः स विचार्यते"।**[3]

---

[1] पराशरोपपुराणम्, उद्धृतम्, म०भा०पृ०, ६

[2] म०भा०, २/१/५८

[3] उद्धृतम्, म०भ०प्र०उ०, पृ० ७

**व्याकरणे शब्दस्य स्थितिः-**

व्याकरणदर्शने प्रतिपादद्यस्य शब्दस्य द्विधा प्रयोगोऽभिलक्ष्यते। तच्च यथा महाभाष्यकारः स्वकीये महाभाष्यस्यादौ शब्दस्वरूपनिर्धारिणे प्रत्यपद्यत। तत्र च सिद्धान्तोऽयं विद्यते यच्छब्दस्य प्रयोगस्तु साक्षादर्थबोधायैव क्रियते। स चार्थबोधस्सामान्यजनेभ्यो निर्बाधतया निरवरोधेन च स्यात्। तदाह- **"भाष्यकारोऽर्थगत्यर्थः शब्दप्रयोगः"।**[4] अर्थस्यैव सम्प्रत्यायनायै शब्दः प्रयुज्यते। तेन द्वारैव जगतिकव्यवहाराणां निर्वहणं जायमानं दृश्यते। येन विना जना काथञ्चिकेऽपि व्यवहारे प्रवृत्ता न भवितुमर्हन्ति तादृशं स्वरूपं शब्दस्य। अतोऽर्थं सम्प्रत्याययिष्यामित्यर्थश्शब्दप्रयोग इति आयातम्। तस्माच्च च शब्दस्य सर्वशक्तिमत्ता निरदिश्यत।

धर्मशास्त्रे च न्यगाद्याचार्यमनुना यद् यः कश्चिदपि धर्मः सांसारिकेभ्यः कथितो विद्यते। तस्य तादृशस्य धर्मस्य वर्णनं वेदेषु विद्यते वेदाश्च शब्दराशयश्श्रुतयः। याभ्यो विना धर्मस्वरूपस्य ज्ञानं न जायेत। तद्विना च सार्वजनीनस्य व्यवहारस्य चान्यन्थानुपपत्तिप्रसङ्गः समागच्छेत्। तद्यथा-

**"यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**

**स सर्वो निगदितो वेदे सर्वज्ञानमयो हि सः"॥**[5]

कारणमिदमेव यदेतासु श्रुतिषु स्मृतिषु च प्रतिपाद्यमानो धर्म एव जनैरनुष्ठीयते। तस्माल्लोकव्यवहारमादाय श्रुतीनां स्मृतीनां महत्तमं स्थानं विद्यते। एताश्च सर्वाः शब्दराश्यात्मकशब्दं विना न सम्भवन्ति शब्दैर्विना च वाक्यानामभावस्स्यात्। वाक्यैर्विना भाषायाः कल्पनैव न, भाषाया अभावे च लोकव्यवहारासम्भवी। तेन च संसारोऽयं महत्यन्धन्तमसि प्रविशेत्।

तस्माच्च शब्दैकमात्रगम्यस्य सर्वविधव्यवहारस्य कल्पना एव ज्यायसी, तद्यथाह दण्डी –

**"इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"॥**[6]

---

[4] महाभाष्यम्

[5] मनुस्मृतिः, २/७

अतस्सर्वशक्तिमाञ्छब्दात्मा एव ज्योतिस्वरूपं सज्जगतः प्रकाशकः नास्त्यन्या शक्तिः प्रकाशो वा शब्दवत्। तदेव भर्तृहरिराह यज्जगद्विवर्ततो विद्यतेऽस्य शब्दात्मनः। न केवलमेतावदेव शब्देनैव सर्वविधाः क्रियाकलापाः प्रचाल्यन्ते। अतश्शब्दो द्विधा। व्यावहारिकः पारमार्थिकश्च। व्यावहारिकः शब्दो द्विधा स्वक्रियत। स च ध्वनिरूपः [7] स्फोटरूपः[8]।

अत्र च व्यावहारिकेन शब्देन सर्वविधो भूतभौतिको लोकव्यवहारः सञ्चाल्यते। तथैव पारमार्थिकः शब्दो व्यवहारातीतो जगत्कारणं च विद्यते तेन विवर्तः। तेन च शब्दस्य सर्वशक्तिमत्वं सर्वविकल्पातीततत्त्वत्वं भेदरहितत्त्वं समायति। यद्यथा भर्तृहरिराह-

**"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"**॥[9]

एतया कारकिया भर्तृहरिणा शब्दस्य आद्यन्तरहितत्वे सत्यक्षरत्वं जगदुपादानकारणत्वम् इति प्रत्यपादि। अर्थमयी सार्वकालिका सृष्टिश्शब्दब्रह्मणो विवर्तस्वरूपा। एतस्य मूलस्वरूपं तु वेदेभ्यः समायाति यथा चोक्तं विद्यते "**वाग्वै ब्रह्म**"[10] वाचो ब्रह्मपरत्वमेव वाचं विना न किञ्चिदपि प्रवर्तयितुं शक्यते जगतीह। यैरपि परमतत्त्वभूताया वाचः समुपासनं क्रियते। ते मृत्युमपि अतिवर्तन्ते तदाह- "**ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते"।**[11] वैयाकरणैरियं वाक् परावाक्त्वेन अभ्युपागम्यत। सा च परा वाक् परब्रह्मरूपा बिन्दुरूपिणी स्पन्दशून्येत्यादिभिर्शब्दैर्न्यगद्यत। तादृशवाच एव विवर्तभूतोऽयं संसारः, विवर्तश्चेत्थम् -

विवर्तस्य स्वरूपमाचार्येणेत्थं न्यगादि यत्– "**एकस्य तत्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहितत्वम्"।**[12] एवम्भूतं लक्षणं आचार्येण

---

[6] काव्यादर्श १/४

[7] "प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते"। व्या०म०, पश्पशाह्निकम्।

[8] "येनोच्चरितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"। व्या०म०, पश्पशाह्निकम्।

[9] वा०प०,१/१

[10] बृ०उ०, ४/१/२

[11] उद्धृतम्, पा०व्या०प्र०स०प्र०, पृ० ७

[12] वा०प०, हरिवृषभवृत्तिः, १/१

हरिणा विवर्तोऽवर्ण्यत। **"नामरूपे व्याकरवाणि"।**[13] शब्दार्थयोः स्वरूपं वेदानुमोदितं सत् प्रवर्तमानं विद्यते।

एवम्भूतया रीत्या शब्दस्य स्वरूपद्वयप्रतिपादनात् परमेव व्याहवारिकः स्फोटरूपः, तस्य च शब्दार्थसम्बन्धन्त्वं न्यगद्यत – "**आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यसितव्यः"**[14]

अत्र श्रुतिद्वारा साक्षात्कारलक्षणं मोक्षं तस्योपायभूतं श्रवणादिकं च प्रतिपादयन्ती साक्षादेव दर्शनविषयान् प्रतिबोधयति। तच्च यथा शब्दार्थसम्बन्धादिकाश्च। एते सर्वेऽपि विषया व्यचार्यन्त, अत्र च शब्दार्थसम्बन्धस्य व्याख्यानं शब्दशक्तीराश्रित्य कृतं विद्यते।

स च सम्बन्धः शक्तिरूपः। सम्बन्धश्च नित्यः शब्दार्थयोः, स च सम्बन्धः किंस्वरूप इति जिज्ञासायामाह- सम्बन्धो वृत्तित्वेन निगद्यते शास्त्रान्तरेषु। सम्बन्धविषये न कस्यापि वैमत्यं विद्यते। स च सम्बन्धः पदपदार्थयोः सम्बन्धरूपः स्वीक्रियते।

सम्बन्धमन्तरा शब्दैर्न बोध्यन्तेऽर्थाः, अर्थज्ञानमन्तरा च संभवति जागतिको व्यवहारोऽतः शब्दार्थसम्बन्धस्य आवश्यकत्वात्। तस्माद्वैयाकरणै-श्शक्तेस्स्वरूपं व्यचारीत्थम्- "**वृत्तित्वं च शाब्दबोधहेतुपदार्थो-पस्थित्यनुकूल-पदपदार्थसम्बन्धत्वम्"**[15] तात्पर्यमिदं भवति यच्छाब्दबोधे हेतुः उपस्थितपदार्थस्यानुकूलश्शब्दार्थयोः सम्बन्धविशेष एव वृत्तिः। अतो वक्तुं शक्यते यद्येन व्यापारेण शब्दोऽर्थविशेषं प्रतिपादयति स व्यापार एव वृत्तिपदाभिधायी। किमर्थं च वृत्त्यैव दीयतेऽर्थस्तस्य च कारणमपि प्रस्तौति- यथा घटशब्दश्श्रूयते तेन श्रुतिविषयभूतेन शब्देन यस्य अर्थस्यावगमनं भवति। स च कम्बुग्रीवादिमान् पदार्थ एव, तेन च प्रवाहस्य तटस्य पटस्य वा बोधो न जायते, यतोहि उच्चारणविषयीभूतस्य घटशब्दस्य कश्चन सम्बधः कम्बुग्रीवादिमता पदार्थेन सह विद्यते। न च तस्य सम्बन्धः प्रवाहेण पटेन तटेन

---

[13] छा०उ०, ६/३/२

[14] बृ०उ०, २/४/५

[15] वै०सि०म०, पृ० ६

वा[16], अन्यथाऽसम्बन्धितानामप्यर्थानां ज्ञानं स्यादेव अतः साक्षात्सङ्केतितस्य शब्दस्यैव अभिधायकत्वं तच्च सम्बन्धद्वारैव प्रसज्यते नान्यथा। स च सम्बन्धो वृत्तिरूपः सामान्यः। प्रायो दर्शनानीत्थं वर्णयन्ति यद्यथा वेदान्तपरिभाषायां वर्णितम्- "**तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथातैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते"।**[17] अतः सर्वत्रापि वृत्तिशब्दः प्रायुज्यत। व्यवहारदशायामपि वृत्तिशब्दस्य प्रयोगः पौनःपुन्येन कृतं विद्यते। किन्तु शब्दस्य सामर्थ्यरूपो व्यापारस्तत्रैव वृत्तिशब्दः प्रयुक्तो विद्यते यादृशस्य व्यापारस्य ज्ञानात् परमेव शब्दार्थो झटित्येव बुद्धिपथमधिरोहति। स च व्यापारः सम्बन्धशक्तिव्यपारदिमुखेन निगद्यते। तादृशस्यैव सम्बन्धस्य विशिष्टत्वेन तस्य कथनं शक्तिद्वारा क्रियत॥ शक्तेश्च त्रैविध्यं प्रतिपादयन्ति दार्शनिकाः। अभिधालक्षणाव्यञ्जनात्वेन।

अभिधायाशब्दशक्तिस्तादृशीशक्तिरस्ति यस्याश्शब्दशक्तेस्स्वीकारः प्रायशस्सर्वैर्दार्शनिकैः क्रियते। नास्ति तत्र कस्यचिदपि दर्शनस्य विमतिः। अभिधात्वं नाम साक्षात्सङ्केतितार्थबोधकत्वम्। मम्मटः काव्यप्रकाशे कथयते "**साक्षात्सङ्केतितमर्थं योऽभिधत्ते स वाचकः**"[18] साक्षात् सङ्केतस्य विषयीभूतो यः पदार्थः स पदार्थो येन व्यापारेण बोध्यते स व्यापारोऽभिधा। पदं च वाचकतामेति, अतः पदे वाचकत्वं चेदभिधयैव सम्भवति नान्यथा। वाचकत्वं चेदभिधाऽनन्तरा न सम्भवति। सङ्केतश्च वृद्धव्यवहारादिना जायते। अष्टौ च सङ्केतग्राहकाणि साधानानि कथ्यन्ते तद्यथा-

[16] "श्रुतादपि घटशब्दात् कम्बुग्रीवादिमदर्थव्यक्तेरेवावगमो भवति, न तु प्रवाहस्य नाऽपि पटस्येति घटशब्दस्य कम्बुग्रीवादिमदर्थेन कश्चन सम्बन्धो वर्तते, न प्रवाहेण नापि पटेनान्यथा तावपि प्रबोधयेत्, एवं च शब्दार्थयोः परस्परं कश्चन सम्बन्धः वाच्यः येन शब्दः सम्बद्धमेवार्थं प्रकाशयति नासम्बद्धं प्रदीपवतिति कल्प्यते। अयमेव सम्बन्धओ वृत्तिपदेन शब्दव्यापारादिपदेनोच्यते"। वैयाकरणानामन्येषां मतेन शब्दस्वरूपतच्छक्तिविचारः, पृ० ४८

[17] वे०प०प्र०परि०, पृ०३९

[18] का०प्र०, द्वि०उ०

**"शक्तिग्रहं व्याकरणोपमानं कोशाप्तवाक्यव्यवहारतश्च।**

**वाक्यस्य शेषाद् विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्य वृद्धाः"॥**[19]

सर्वेषु शक्तिग्राहकता किन्तु एतेषु शक्ति ग्राहकसाधनेषु वृद्धव्यवहारस्य प्रामुख्यं वेद्यते लोके तेन प्रमुखरीत्या सङ्केतो भवति। ततश्च साक्षात्सङ्केतितपदार्थानां बोधोऽभिधया शब्दशक्त्या कार्यते। तस्माद्यादृशेन शब्दव्यापारेणाचिरमेवार्थबोधो जायतेऽवरोधं विना स शब्दव्यापारोऽभिधेति कथ्यते। अतो नास्त्यभिधाव्यापारे कस्यचिदपि विदुषः काचिदपि विमतिः। व्याकरणे शक्तित्वेनैकैव वृत्तिः स्वक्रियत सिद्धान्ततस्ततोऽपि व्याकरणदर्शने तिसृणामपि शक्तीनां वर्णनं प्राप्यते। तत्र नागेशः साक्षात् तासां व्याख्यानं व्याख्यत् मञ्जूषात्रय्याम्। वृत्तेस्वरूपं प्रतिपाद्यं नागेशं मञ्जूषात्रय्यामलिखत् "**सा च वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यञ्जना च**"[20] इत्येतस्य व्याख्याने विद्वांसोऽलिखन् यद् वृत्तिस्त्रिधा इतिवाक्यं परमताभिप्रायेण इति रामप्रसादत्रिपाठीमहोदयो न्यगदत्, तस्य च व्याख्यानं विद्यते वैयाकरणसिद्धान्तलघुमञ्जूषायाष्टीकायाम्।

वैयाकरणसिद्धान्तमञ्जूषायां व्यञ्जनायाः खण्डनं कृतवान्, तेन अभिधालक्षणे एव स्याताम्। किन्त्वत्र विचारणाया विषयो यदत्र पूर्वपक्षत्वेनात्र नैयायिकास्तेनोद्धृताः किन्तु नैयायिकैस्त्रिधात्वं न शब्दशक्तीनां स्वीक्रियते। तैश्च द्विधैव शब्दशक्तिः, न्यायसिद्धान्तमुक्तावल्याश्शब्दखण्डे विश्वनाथः प्रतिपादयति यत् **"शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः"**[21] अर्थात् पदेन सह कस्यचित् पदार्थस्य सम्बन्धविशेषावबोधकः सम्बन्धः। सम्बन्ध एव शक्तिरिति नैयायिकाः। पुनश्च स च सम्बन्धो द्विविधः, "**शक्तिलक्षणा-न्यतररूपः**[22] तस्माच्छक्तिर्नाम अभिधा, लक्षणा च। तथा च शक्तिवादे

---

[19] न्या०सि०मु०, श०ख०

[20] वै०सि०म०, पृ० ६

[21] न्या०सि०मु०, श०ख०

[22] तत्रैव

**"सङ्केतो लक्षणा चार्थे पदवृत्तिः"**[23] अत्रापि सङ्केतपदाभिधायिनी अभिधा, शक्तिः वा, द्वितीया च लक्षणा। एवंरीत्या द्विधैव शब्दशक्तिः।

तस्मात् प्रत्यासत्या परमताभिधानं नैयायिकानामेव स्यात्। यदि च न्यायदर्शनातिरिक्तानां विदुषां यदि ग्रहणं स्याद्यदि। न च केनापि दार्शनिक-द्वारा तिस्त्रोऽपि शब्दशक्तयः स्वीकृताः। तेन च परमतभिप्रायत्वेन साहित्यिका एव आचार्या भवितुमर्हन्ति तेषां तादृशस्वीकाराभावे काव्यजगति चमत्काराभावात्। किन्तु व्याकरणं नाम दर्शनं तत्र दर्शनाभिप्रायकप्रयोगेण न सम्भवति एव त्रित्वं शब्दशक्तीनामतो विचारयितुं शक्यते यन्नागेशस्यैव अभिमतस्त्रिशक्तिवादः। तस्मादेव प्रत्यपाद्यत सा च शक्तिस्त्रिधा शक्तिनिरूपणावसरे। शक्तेस्वरूपमभिधाय तिसृणामपि शब्दशक्तीनां वर्णनं साक्षाच्छब्दमुखेनाकरोत्।

महाभाष्यस्योद्योतटीकायामपि वाच्यवाचकभावापरपर्यायस्य शक्तित्वं मनुते[24]

**नैयायिकेच्छारूपसम्बन्धस्य निरासः –**

नागेशो न स्वीकुरुते नैयायिकेच्छारूपं सम्बन्धम्, शब्दार्थयोराश्रयता नियामकत्वाभावात्। तस्य मतेन सम्बन्धस्य स्वरूपमित्थम्- **"सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति, द्विष्ठत्वे सति, आश्रयतया विशिष्टबुद्धिनियामक, इत्यभियुक्तव्यवहारात्। यथा घटवद्भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नः द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमिति**

---

23 श०वा०, पृ० ३

24 "यद्यपि वाच्यचाचकभावापरपर्यायमेव तयोः शक्तिः,तद्ग्राहकं चेतरेतराध्यासमूलकं तादात्म्यं सङ्केत्यापरपर्यायम्, तथापि तस्यापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः तदभिप्रेत्याह तादात्म्यमिति। तच्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्, अभेदस्याध्यस्तत्त्वान्न तयोर्विरोधः। तत्र भेदस्योद्भूतविवक्षा 'अस्यार्थस्यायं वाचकः''तस्य वाचकः प्रणव' इत्यादौ षष्ठी। अभेदस्योद्भूतविवक्षया तु प्रथमा। अत एवार्थे शब्दधर्मत्वव्यवहारः, पद्यं श्रुतम् अथार्थं श्रुणु' पद्यमुक्त्वा अर्थं वदति इत्यादिः। अत्यन्तभेदेऽश्वपुरुषयोरिव तद्व्यवहाराभावात्। नाप्यत्यन्ताभेदे सः। घटे स्वधर्मत्वव्यवहाराभावात्। कः शब्दः कोऽर्थः इति प्रश्ने घट इत्ययं शब्दः घट इत्ययमर्थः, इत्येकारोत्तरदर्शनात् तयोरध्याससिद्धिः, अध्यासस्यादिव्यवहारः ईश्वरकृत एव। अत एव स्थितोऽस्य वाचकस्य वाच्येन सह सम्बन्धः, सङ्केतस्तूक्तरूपः ईश्वरस्य स्थितमेवाभिसम्बन्धमभिनयति यथाऽवस्थितः पितापुत्रयोः सम्बन्धः संकेतेनावद्योत्यते-अयमस्य पिता अयमस्य पुत्रः,इत्यादि पातञ्जलभाष्ये उक्तम्। अत एव च हरिः- इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा। अनादिरर्थैस्शब्दानां सम्बन्धो योग्यता तथा। सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता। समयाद्योग्यता सविन्मातापुत्रादियोगवत्। सतिप्रत्ययहेतुत्वं समबन्धे उपपद्यते। शब्दस्यार्थे यतस्ततस्मात् समबन्धोऽस्तीत्यि गम्यते"॥ म०भा०पश्पशा०, पृ० १३

**विशिष्टबुद्धिनियामकश्च"।**[25] एवम्भूतस्य सम्बन्धस्य स्वरूपं सः प्रतिपादैतवान्, तस्मादिच्छायाः सम्बन्धत्वं न सम्भवति द्विष्ठत्वाभावात् यदा चेच्छायाः सम्बन्धत्वं सिद्ध्येत् तदैव तस्य शक्तित्वमपि स्यात्। सम्बन्धो हि लोके आधाराधेयभावस्य नियामको भवति। प्रकृते च इच्छीयविषयताश्रय-बोधनिष्ठजन्यतानिरूपितजनकताख्यविषयतासम्बन्धेन 'अयमर्थ इच्छावान्' 'अयं शब्दो वा इच्छावान्' इति व्यवहारस्यादर्शनात् तादृशेच्छायाः सम्बन्धत्वं न सम्भवत्येव, सम्बन्धत्वस्याभावात् शक्तित्वं स्वयमेव निरस्तं भवति। प्राचीनवैयाकरणैर्बोधजनकता शक्तिरिति स्वीक्रियते, स च पदेषु विद्यमाना भवति तदाह हरिः –

**"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा"॥**[26]

आचार्यपुण्यराजो योग्यतारूपायाश्शक्तेर्व्याख्यानं बोधजनकत्वरूपेण करोति- तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिः। तस्माद्धरिमतेन बोधजनकत्वरूपा शक्तिः मन्यते, आचार्यकौण्डभट्टोऽपि बोधजनकतारूपेण शक्तिं स्वीकृतवान्।

नागेशभट्टोऽपि शक्तेर्व्याख्यायां वैयाकरणसिद्धान्तलघुमञ्जूषायां व्याख्यत्- इन्द्रियाणां स्वविषयेषु..........योग्यता तथा॥ इत्यस्याः प्रसङ्गे

**"यथा चक्षुरादीनां रूपादिविषयज्ञानजननेऽनादिः पुरुषप्रयत्नानपेक्षा योग्यता तज्जनकताऽवच्छेदकधर्मवत्त्वरूपा, तथा शब्दानामर्थे अनादिः सम्बन्ध एव योग्यता। तद्बोधजनकताऽवच्छेदकोधर्मः"।**[27] व्याख्यानमदः स्पष्टयति, शब्दानामर्थैस्सह बोधजनकताऽवच्छेदकरूपो धर्मः स्वीक्रियते। स च धर्मः सर्वेषु शब्देषु तिष्ठति। तच्च यथा चक्षुरादीन्द्रियेषु बोधजनकताऽवच्छेदको धर्मः। यथा पटविषयकेऽर्थबोधे चक्षुरिन्द्रियमेव जनकतां भजतेऽर्थादिन्द्रियाणि ग्राहकाणि। बोधस्य जनकमिन्द्रियं तत्रैव च जनकता वर्तते। अतो

---

[25] परमलघुमञ्जूषा, पृ० १९

[26] वा०प०, ३/१

[27] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ९०

बोधजनकतारूपं सामर्थ्यञ्चक्षुरिन्द्रिये। बोधजनकतायामपि तस्या अवच्छेदको धर्मो भवति। स च चक्षुरिन्द्रिये, तद्वत्त्वं चक्षुरिन्द्रियमेव। तथैवार्थो बोद्धव्यो भवति। बोध्यत्वात्तस्य बोधकः शब्दो भवति, अतो बोधजनकश्शब्दः, तत्रैव च जनकता भवति, बोधजनकताया तदवच्छेदको धर्मः सामर्थ्यं तच्च शब्दे विद्यत एव, अतो बोधजनकताऽवच्छेदको धर्मः शब्दे भवति। सैव योग्यता, एवम्प्रकारेण नागेशो योग्यताया व्याख्यानं कृतवान्। एतादृग्व्याख्यानेन बोधजनकताऽवच्छेदकधर्मस्य सर्वत्र शब्देषु विद्यमानत्वात्। सैव च बोधजनकताऽवच्छेदको धर्म एव वाच्यवाचकभावसम्बन्धरूपः। अतो वृत्तिमत्वं धर्मत्वम्, इत्याधृत्य शब्दे सम्बन्धस्य सत्त्वाच्छब्दस्य धर्मः सम्बन्ध इति। योग्यतारूपा शक्तिर्बोधजनकताऽवच्छेदकत्वरूपेण व्याख्याता विद्यते।

**सङ्केतस्वरूपपुरस्सरं नैयायिकखण्डनम्–**

न्यायदर्शने ईश्वरेच्छा सङ्केतः सम्बन्धः सैव शक्तिरिति प्रतिपाद्यते। तस्यापि साधुत्वं न सम्भवति। अनुभवेनापि शक्तिसम्बन्धयोरेकता न भावयितुं शक्यते। "**अयमेतच्छक्यः अत्रास्य शक्तिः"।** सङ्केतस्य शक्तिग्राहकत्वेन मुख्यशक्तित्वाभावात्, अयमर्थ एतत्पदस्य शक्यः, अत्रार्थादस्मिन्नर्थेऽस्य पदस्य शक्तिरित्याकारकसङ्केतस्य शक्त्यपेक्षाभिन्नत्वरूपेण प्रसिद्धत्वात्। सङ्केतो यदि शक्तिरूपः स्यात्तदाऽत्र घटकतया शक्तिनिवेशो न स्यात्। स्वरूपस्य स्वघटकत्वाभावात्। "**उक्तेश्वरसङ्केत एव शक्तिरिति तु न युक्तम्, अयमेतच्छक्योऽत्रास्य शक्तिरित्यस्य सङ्केतस्यानापत्तेः। ईदृशेश्वरसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याप्यनुमानात्"।**[28] अत्रत्ये व्याख्याने साक्षात् सङ्केतस्य शक्त्या च सह पार्थक्यं विद्यते इतोपि सम्यक् प्रतिपादनं कृतवान्, साम्प्रतं स्वभिमतशक्तेस्वरूपमभिधत्ते।

**नागेशानुमोदितशक्तिस्वरूपम् –**

नैयायिकोक्तं निरस्य स्वाभीष्टं प्रतिपादयति- "**तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया"।**[29] अन्यः सम्बन्धः

---

[28] तत्रैव, पृ० १००

[29] तत्रैव, पृ० ६०

सम्बन्धान्तरः, वाच्यवाचकभावोऽपरपर्यायो यस्य, एवमभिमतं नागेशस्य। स चाखण्डोपाधिस्वरूपा। अर्थाद्वाच्यवाचकपदव्यपदेश्यो निरुक्तेच्छादिभिन्नः पदपदार्थयोः सम्बन्धः शक्तिः। तत्र वाचकत्वं वाच्यत्वञ्च न क्रमेण बोधजनकत्वरूपं बोधविषयत्वरूपञ्च किन्त्वखण्डोपाधिस्वरूपं पदार्थान्तरमेव। तस्याः वाच्यवाचकभावरूपायाः शक्तेर्ग्राहकञ्च तादात्म्याख्यः सम्बन्धो भवति। **"तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम्"।**[30] वाच्यवाचकभावरूपा शक्तिस्तादात्म्यसम्बन्धेन ज्ञाप्यते। तादात्म्यञ्चेतरेतराध्यासमूलकं भवति। एतेन निश्चीयते यद्वाच्यवाचकभावरूपायाः शक्तेः ज्ञानमेव शाब्दबोधे कारणत्वमुपैति, न तु स्वरूपमात्रेण। अतोऽग्नेर्दाहकता शक्तिर्दाहं प्रति स्वरूपेण कारणतामुपैति तथैव वाच्यवाचकभावशक्तिः स्वरूपमात्रेणैवार्थं न प्रत्याययिष्यति। **"तच्च सङ्केतः, तस्यापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः"।**[31] तादात्म्यञ्च सङ्केतात्मकं भवति, सङ्केतश्चाभिप्राय-विशेषेणेच्छाविशेषेण वा उच्यते। शक्तिज्ञापकश्च सङ्केतः।

तद्वदेव तादात्म्यमपि शक्तेर्ग्राहकत्वात् सङ्केतपदेन व्यवह्रियते। अतः सङ्केततादात्म्ययोरैक्यमिति। तादात्म्यमपि पदे विद्यमाना या शक्तिस्तस्याः प्रकाशकत्वाच्छक्तिपदेनापि व्यवह्रियते। यदेवं तर्हि तादाम्यमेव शक्तिरूपः सम्बन्ध इति स्वीकुर्यात्? तादात्म्यस्य सम्बन्धत्वाभावत्, अतो न सम्बन्धत्वमस्य। यतोहि भेदसमानाधिकरणाभेदरूपत्वात् तस्मिन् सम्बन्धपदव्यवहार्यत्वं न सम्भाव्यते। अस्याभ्यान्तरे वर्तमानभेदाभेदयोः सम्बन्धत्वधर्मस्य दर्शनाभावत्वात्। **"न च तादात्म्यघटकभेदाभेदस्य वा सम्बन्धत्वं कुत्रापि दृष्टम्"।**[32] 'नीलो घट' इत्यादौ सम्बन्धपदार्थघटक-सम्बन्धिभिन्नत्वाभावादभेदस्यापि सम्बन्धत्वं नास्ति। सङ्केतस्य च पातञ्जलभाष्येण समर्थनं करोति। **"सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो, योऽर्थः स शब्द इति**। अनेनैवाध्यासेन तादात्म्यस्य प्रकाशनं जायते। स्मृत्यात्मक इति पदेन ज्ञातस्यैव सङ्केतस्य शक्तिप्रकाशकता दृश्यते। **एवञ्चाधुनिकसङ्केतस्थले द्वादशेऽह्नि**

---

[30] तत्रैव, पृ० ६०

[31] तत्रैव, पृ०

[32] वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, पृ० २४

**क्रियमाणानामस्थले च लक्षणा"।**[33] शब्दकौस्तुभे पदपदार्थयोर्बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति। अर्थाद्दीक्षितमतेन पदपदार्थयोर्बोध्यबोधकभावस्य नियामिका शक्तिरेव सैव सम्बन्ध इति। शक्तिसम्बन्धयोरैक्यमिति प्रतिपद्यते। तन्न, यतोहि शक्तेर्भिन्न एव सम्बन्ध शक्तेः कार्यजनकत्वनियामकत्वेन दृष्टः। "**शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात्"।**[34] उदाहरणमुखेन प्रत्यायति- दीपगत-प्रकाशत्वशक्तेः कार्यजनकत्वे दीपवस्तुनोः प्रकाशकत्वशक्त्यतिरिक्तसंयोगादि-सम्बन्धसत्त्वे एव वस्तुनः प्रकाशकता, नान्यथा सम्भवति, तस्मात् सिद्ध्यत्येव पार्थक्यं शक्तिसम्बन्धयोः, अतः सामर्थ्यरूपायाः शक्तेर्विद्यमानत्वेऽपि सम्बन्धद्वारैव तत्कार्यक्षमत्वम्। तदाह नागेशः- दीपादिगतप्रकाशकत्वशक्तावपि सम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। तदुक्तं हरिणा- **"उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते। शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः"॥**[35]।।

**शब्दार्थयोरध्यासः –**

"**परस्मिन् पूर्वदृष्टावभासोऽध्यास"**[36] 'अतस्मिंस्तद्बुद्धिरध्यास' इति शाङ्करभाष्यमनुसृत्यान्यस्मिन् पूर्वज्ञातान्यधर्मस्य ज्ञानमध्यासः, प्रकृतप्रसङ्गे शब्देऽर्थस्यार्थे च शब्दस्य तादात्म्याध्यासोऽर्थाद् मिथ्याज्ञानं जायते। वस्तुतस्तु एतेषु पार्थक्यं विद्यते, तादात्म्यं नास्त्येव। तस्मादेव कारणादध्यासस्य विषया भवन्ति। यद्यपि मूले परारूपे शब्दे वास्तविकं तादात्म्यं वर्तते। तथापि व्यवहारदृशा मध्यमावैखरीवाचोः शब्दानां लौकिकैर्घटादिभिरर्थैः सह तादात्म्याध्यासो विधीयते। कः शब्द? कोऽर्थः? इति प्रश्ने सति 'घट' इत्ययं शब्दः घट इत्ययमर्थः।[37] इत्येकाकारस्योत्तरस्य दर्शनाच्छब्दार्थयोरध्यास-

---

[33] तत्रैव, पृ० ६५

[34] तत्रैव, पृ० ८०

[35] तत्रैव, पृ० ८०

[36] शाङ्करभाष्यम्

[37] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ८५

सिद्धिः। “**अत एव पदं श्रुतम्, अथार्थं श्रृणु, अर्थं वदतीत्यादिव्यवहारो भवति”।**[38] शब्दार्थयोस्तादात्म्याध्यासविषये लोकवृत्तं कथयति शब्दोच्चारिते सति कथयति - अर्थं श्रृणु' अर्थमभिधत्ते, इत्यादिव्यवहारस्तदैव सम्भवति। यदा तादात्म्याध्यासोऽवबुध्यतेऽन्यथा शब्दस्यैव श्रवणं कथनं वा सम्भाव्यते नार्थस्यासम्भवात्। तद्वदेव शास्त्रमुद्धरति- शब्दार्थयोरिततेतराध्यासत्वादेव **“ओमित्येकाक्षरं ब्रह्म'** इति श्रुतिवाक्ये तथा च **वृद्धिरादैच्”**[39] इति स्मृतिवाक्येऽपि शब्दार्थयोः सामानाधिकरण्येन प्रयोगः सङ्गच्छते।[40] सामानाधिकरण्येन प्रयोग समानमधिकरणं यस्य तस्य भावः सामानाधिकरण्यमत्राधिकरणशब्दस्यार्थपरकता विद्यते। तस्मादेव शब्दार्थयोः समानार्थबोधकत्वमिति। द्वयोरेव सामानाधिकरण्यं भवति- सञ्ज्ञासञ्ज्ञिनोर्विशेषणविशेष्ययोर्वा, प्रथमस्योदाहरणम्, आदैच् पदाभिन्ना वृद्धिः, आदैजिति सञ्ज्ञी, वृद्धिरिति सञ्ज्ञा, द्वितीयस्य तु 'नीलो घट' इति। आदैच्पदाभिधेयैः 'आ' 'ऐ' 'औ' इत्येभिः सह तादात्म्याध्यासादेव वृद्धिरादैचोः समानार्थबोधकत्वरूपसामानाधिकरण्यमुपपद्यते।

**तादात्म्यवर्णनम् –**

**“तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्”**,[41] शब्दार्थयोर्वास्तविकभेदे सत्यपि यत्र शब्दार्थयोरभेदात्मिका प्रतीतिस्तत्र तादात्म्यमिति। अर्थाद्भेदेऽभेदस्यारोपः क्रियते। तादात्म्यस्य भेदेऽभेदे च समानरूपेण विद्यमानत्वात् भेदाभेदयोर्न पारस्परिकविरोधः। भेदाभेदयोर्मध्ये यदा भेदविवक्षा तदा **“अस्यार्थस्य वाचकः' 'उञः प्रगृह्यम्' 'तस्य वाचकः प्रणवः' इत्यादौ षष्ठी”**[42] सिद्ध्यति। **“अभेदस्य तत्त्वविवक्षया तु प्रथमा**

[38] तत्रैव, पृ० ८५

[39] अष्टाध्यायी, १/१/१

[40] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ८५

[41] तत्रैव, पृ० ८८

[42] तत्रैव, पृ० ८८

**भवति"**।[43]अतः शब्दार्थयोः पारस्परिकाध्यासमूलकतादात्म्यात् 'श्लोकमश्रृणोद्' 'अथार्थं वदती'त्यादय व्यवहारा दृश्यन्ते। अध्यासश्चेश्वरकृतो भवति स देवतामहर्षिवृद्धपरम्परया ज्ञायते।

शब्दस्यार्थेन सह सम्बन्धे सति प्रत्ययहेतुता शब्दे भवति, यद्यपि भर्तृहरिणा तत्राध्यासशब्दस्य प्रयोगो न कृतस्तथापि नागेशः प्रथमकारिकामनुसृत्य तादात्म्यमध्यासमूलकं स्वीकर्तुं प्रयासरतो वर्तते। **"ज्ञानं प्रयोक्तुरर्थश्च स्वरूपञ्च प्रतीयते। शब्दैरुच्चारितैस्तेषां सम्बन्धः समवस्थितः"**।[44] इति कारिकायां शब्दार्थज्ञानानामध्यासस्य उपपत्तिः प्रादर्श्यत। कैयटेनापि शब्देऽर्थस्य तथा चार्थे प्रत्ययस्याध्याससम्बन्धः स्वीकृतो यश्चाभेदरूपेण प्रतीयते।[45] कैयटवचनस्य व्याख्यां कुर्वता नागेशेनाध्यासस्तादात्म्यरूपाध्यास एव स्वीकृतः।

**"तादात्म्याध्यासोऽत्र बोध्यः"**।[46] नागेशस्याध्यासमूलकतादात्म्याव-धारणायां प्रथमं पातञ्जलयोगभाष्यं तदनु हेलाराजस्ततः कैयटेति निधर्तुं शक्यते[47] एवं प्रकारेण तादात्म्यस्य वर्णनमक्रियत, अयं सास्नादिमान् पदार्थो गौरिति, लोकव्यवहारे सिद्ध्यति, अतः शब्दार्थयोरुक्ततादाम्यादेव तथाभूतार्थो स्वीक्रियते। एवम्भूतस्य तादात्म्यस्य स्वीकारे सति वह्निशब्दोच्चारिते सति मुखे दाहकत्वापत्तिः। मधुशब्दोच्चारिते सति माधुर्यापत्तिस्तत् सर्वं निराकृतम्, भेदस्य वास्तविकत्वादभेदस्य चारोपितत्वाद्।

**बौद्धार्थनिरूपणम् –**

व्याकरणदर्शने बौद्धार्थः स्वीक्रियते स्फोटरूपस्य पदस्य बुद्धिस्थत्वात्, तथैवार्थस्याप्युभयोः बुद्धिस्थयोः शब्दार्थयोस्तादात्म्यादेव बौद्धे वह्न्यादावर्थे

---

[43] तत्रैव, पृ० ८८

[44] तत्रैव, ३/३/१

[45] "शब्दस्वरूपमर्थेऽध्यस्याऽयं डित्थ इति सञ्ज्ञासञ्ज्ञिसम्बन्धः क्रियते। ततः शब्दस्वरूपसङ्गाद्यथा डित्थशब्दस्यार्थे प्रयोगस्तथैव शब्दस्वरूपेऽर्थेऽध्यस्यते प्रत्यय इत्यर्थः"। महाभाष्यम्, ५/१/११९

[46] महाभाष्यम्, प्रदीपोद्योतः, ५/१/११९

[47] नागेशभट्टस्य व्याकरणदर्शनचिन्तनम्, वृत्तिनिरूपणम्, पृ० ६३

दाहादिशक्तिमत्त्वाभावात्। यतोहि वह्नेर्बुद्धौ न प्रवेशः, योगसूत्रेण प्रमाणीकरोति- **"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"।**[48] शब्दज्ञानमात्रेण वस्तुशून्योऽर्थाद् बाह्यार्थरहितः सन् विशेषेण कल्प्यते, अर्थाद्बुद्धिपरिकल्पितः। शब्दार्थयोर्बुद्ध्यर्थकत्वमादायैव वन्ध्यासुतादीनां बुद्धिपरिकल्पितं वन्ध्यासुतवाच्यार्थं स्वीकृत्यैवार्थवत्त्वात् प्रातिपदिकसञ्ज्ञा विधीयते, प्रातिपदिकत्वादेव तादृशपदानां साधुत्वं स्वाद्युत्पत्तौ सत्यामेव जायते। **"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः। कूर्मक्षीरचये स्नातः शशश्रृङ्गधनुर्धरः"॥**[49] एवम्भूतेन बौद्धपदार्थव्याख्यानेन मध्वादिशब्दानामुच्चारणेन मुखे माधुर्यादिरसापत्तिरेव न, तथा च वह्न्यादिशब्दानामुच्चारणेन मुखे दाहकत्वाद्यापत्तिरपि न। इत्येवं बौद्धपदार्थस्य सिद्धिः।

**सङ्केतस्य पर्यायत्वम् –**

समयः सङ्केत आप्तोपदेशो वृद्धव्यवहारः, इत्येतेषां पर्यायत्वमधिगम्यते। **"समयः सङ्केत इति चाप्तोपदेशवृद्धव्यवहारपर्यायौ"।**[50] ।

**सङ्केतस्य न शक्तित्वम् –**

यथा च नैयायिकैः पदप्रकारिकार्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका, एवम्भूतो द्विविधेश्वरसङ्केतः सैव शक्तिरिति बाढं नेदं मतम्, यतोहि **"अयमेतच्छक्यः अत्रास्य शक्तिः"**,[51] अयमर्थोऽस्य पदस्य वाचकः, अस्मिन्नर्थेऽस्य पदस्य शक्तिः। इत्थं सङ्केतस्य शक्तिरूपे व्याख्यानं नोचितम्। यतोहि द्वयोः सङ्केतयोर्घटकतया शक्तिरपि प्रविष्टा शक्तिः सङ्केतस्य विषयभूता, शक्तिरूपे सङ्केते शक्तेर्विषयत्वाभावादात्माश्रयदोषप्रसङ्गात्। यदि च कैश्चिदिदं कथ्यते यदेवं प्रकारकसङ्केतो न भवत्येव तदपि न समीचीनम्। प्राथमिकरूपेण स ईश्वरीयः सङ्केत आसीत्, तस्मादेव

---

48 योगसूत्रम्, १/९

49 परमलघुमञ्जूषा, पृ० २९

50 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १००

51 परमलघुमञ्जूषा, पृ० २५

परम्परामनुसरन् व्यवह्रियमाणोऽद्यापि अधिगम्यते। तदुच्यते नागेशेन- **"ईदृशेश्वरसङ्केतस्य लोके दर्शनेन तादृशेश्वरसङ्केतस्याप्यनुमानात्"।**[52] तस्माद्यत्र कुत्रापि सङ्केते शक्तिपदव्यवहार्यत्वं तत्र लाक्षणिकमेवेति बोध्यम्। अत एव न्यायवाचस्पत्ये उक्तम्- "**सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः, तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत् सङ्केत इति"।**[53] योगवाचस्पत्येऽपि सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसङ्केतस्तु प्रकाशकः। अतः शक्तिसङ्केतयोर्भेदत्वात् सर्वत्र सङ्केतः शक्तिरूपसम्बन्धस्य प्रकाशकत्वेनेष्टः। अतः सङ्केतादीनां पर्यायवाचकतां प्रदर्श्य शक्तिसङ्केतयोर्भेदवर्णनपुरस्सरं सङ्केतेनैव वाच्यवाचकभावशक्तेः प्रकाशकत्वम्।

**तादात्म्यभेदे शब्दार्थयोरपि विभेदः –**

तादात्म्यमूलकस्य वाच्यवाचकभावापरपर्यायस्य शक्तित्वेऽर्थभेदात् तत्तादात्म्यापन्नशब्देषु भेदौचित्येनार्थभेदाच्छब्दभेद इत्युपपद्यते। समानाकारत्वमात्रेण तु एकोऽयं शब्दो नानार्थ इति व्यवहारः। शक्तिमिति रूपकार्थशक्त्याश्रयशब्दोभयभेदात् तादात्म्यभेदः शब्दभेदश्च। तदुक्तं न्यायकुसुमाञ्जलौ "**शक्तिभेदो न चाभिन्नः स्वभावो दुरितक्रमः**[54] **अर्थपदयोस्तादात्म्यात्तत्तदर्थतादात्म्यापन्नः शब्दो भिन्न इति हेतोरर्थभेदाच्छब्दभेद इति व्यवहारः। समानाकारमात्रेण तु, एकोऽयं शब्दो बह्वर्थव्यवहारः"।**[55]

**अपभ्रंशेषु शक्तिस्वीकारः –**

वैयाकरणैरपभ्रंशेष्वपि शक्तिः स्वीक्रियते। तत्र हेतुद्वयं दीयते- १- **व्यवहारस्य दर्शनम्**, २-**पूर्वजन्मानुभूतशक्तेः स्मरणम्**। पूर्वोक्तवाच्यवाचकभावलक्षणा शक्तिर्यथा साधुशब्देषु भवति

---

[52] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० ९९

[53] परमलघुमञ्जूषा, पृ० २५

[54] न्यायकुसुमाञ्जलिः, १/७

[55] परमलघुमञ्जूषा, पृ० ३१

तद्वदेवापभ्रंशेष्वपि। यतोहि शक्तिज्ञापकेषु शिरोमणिभूतव्यवहार उभयत्र समानरूपतां भजते। व्यवहारस्य दर्शनेन च पूर्वजन्मानुभूतशक्तेः स्मरणं भवति। अत एव बालानां स्तन्यपाने जन्मसमये प्रवृत्तिर्भवति, अन्यथेष्टसाधनत्वज्ञानाभावेन तत्र प्रवृत्तिर्न स्यात्, तथैव तिरश्चामपि विषये।

**"अत एव समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः"।**[56] एवं रीत्या साधुशब्दानामुच्चारणेन धर्मस्य प्राप्तिर्भवति। वस्तुतस्तु साधुशब्देषु यथा वाचकता भवति तथैवासाधुशब्देष्वपि। किन्तु साधुशब्दभाष्यमाणैर्जनैर्धर्मस्य प्राप्तिः क्रियते। एवं रीत्या नैयायिकमीमांसकयोः खण्डनमक्रियत।

**सधुत्वस्य प्रतिपादनम् –**

साधुत्वं कैमर्थ्यमिति। साधुत्वं तु नापभ्रंशानां शिष्टैर्धर्मबुद्ध्या तदप्रयोगात्।[57] यदा शिष्टा धर्ममुद्दिश्य शब्दानां प्रयोगमीहन्ते तदानीं ते साधुशब्दान् एव प्रयुञ्जते। तस्मात् साधुशब्दस्यासाधुशब्दस्य प्रयोगे च कृते बोधस्समान एव वैशिष्ट्यन्तु धर्माधर्ममात्रविषयकः। **"साधुत्वञ्च व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठ पुण्यजनकतावच्छेदको जातिविशेषः"।**[58] व्याकरणशास्त्रेण व्यङ्ग्योऽर्थविशिष्टः शब्दसत्ताकः पुण्यजनकताया अवच्छेदको जातिविशेषरूपो धर्म एव साधुत्वेन गृह्यते। एवम्प्रकारकमभिप्रायं महाभाष्यकारोऽपि प्रतिबोधयति **"एकः पूर्वपरयोः"**[59] इति सूत्रस्य व्याख्यानकाले- **"एकः शब्दः सम्यक्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति"**[60] तात्पर्यमिदं यदेक एव शब्दो सम्यग्रूपेणार्थाच्छास्त्रप्रक्रियया परिष्कृतः सन् शिक्षाशास्त्रीयरीत्योच्चारितः इहामुत्र सकलाभीष्टकामनानां सम्पूरको भवति।

---

[56] महाभाष्यम्, पस्पशाह्निकम्, पृ० ९९

[57] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १३९

[58] तत्रैव, पृ० १३९

[59] अष्टाध्यायी, ६/१/९४

[60] महाभाष्यम्, ६/१/८४

**"साधुत्वञ्च व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वम्"।**[61] एवम्भूतं साधुत्वस्यानुमापकत्वं कथं स्यादिति विचिकित्सायां नागेशेनोच्यते यत् साधुत्वस्य मानं व्यञ्जकं वा शिष्टपुरुषैः कृता प्रयोगाः, कोशाः, व्याकरणम्, निरुक्तम् इत्यादिनाऽनुमाप्यं भवति। साधुत्वस्य बोधकमद्यत्वे व्याकरणमेव विद्यते तच्च पाणिनिमुनिविरचितमेव नान्यदिति महाभाष्ये प्रतिपादितम्। **"एवञ्च पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्द-प्रयोगाद्धर्म इति बोध्यम्"।**[62] एतेनोपरितनेन व्याख्यानेन प्रतिभाति यत् पुण्यजकताया अवाप्तये साधुशब्दस्य प्रयोगो विधीयते तत्रैव व्याकरणशास्त्रस्य प्रवृत्तिविषयत्वं तदन्तरा असाधावपि बोधजनकतायाः समानता किन्तु पुण्यजनकताभाववत्ता व्याकरणाप्रवृत्तिश्च नूनमेव

**शक्तिभेदकथनम् –**

वाच्यवाचकभावापरपर्यायाः शक्तिस्त्रिधावबुध्यते वैयाकरणै। तत्र नागेशः त्रिधा स्वीकुरुते भेदान्- **शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च**। त्रिप्रकारिका चैषा शक्तिः नियमिता भवति नानार्थकस्थलेषु नियामकाश्च संयोगादयश्च भवन्ति ते च पूर्वमेव प्रादर्श्यन्त।\

**ज्ञानस्य स्वप्रकशकता-**

ज्ञानगतं प्रमात्वं तु स्वत एव गृह्यते ज्ञानस्य स्वप्रकाशकत्वात्, यथा वेदान्तविषयकज्ञाने ज्ञानान्तरं नापेक्षितं भवति तथैव तत्प्रमात्वज्ञानेऽपि तादृशज्ञानस्यापेक्षा न जायते[63] यतोहि ज्ञानं तु प्रकाशस्वरूपं प्रकाशस्य प्रकाशनाय नान्यस्य। कस्यचिदपि लौकिकस्य प्रकाशस्य आवश्यकता जायते ज्ञानस्य साक्षाद्ब्रह्मस्वरूपावबोधकत्वात्, ज्ञानं ब्रह्म स्वरूपमेव तस्मात् सर्वविधप्रकाशानां प्रकाशयित्रे नान्येषां प्रकाशानाम् आवश्यकता जायते। ईश्वरीयप्रमायास्तत्त्वमपि स्वत एव। परकीयज्ञानस्य प्रामाण्यं तु परपुरुषेण परत एव गृह्यते परज्ञानस्य परेणाप्रत्यक्षत्वात्।

---

[61] परमलघुमञ्जूषा, पृ० ३३

[62] वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ० १४४

[63] "एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत उत्पद्यते ज्ञायते च"। वे०प०, पृ० २९९

**शक्तिद्वारा बोधः-**

शक्तिद्वारा साक्षात् पदपदार्थयोः सङ्केतविषयाः पदार्था बोध्यन्ते। तस्मात् सर्वेष्वपि दर्शनेषु शक्तिमद्भिः साक्षादेव विशिष्टाः पदार्था बोध्यन्ते, ते च पदार्था अभिधाविषयतामुपयान्ति। यतोहि मीमांसकास्तावज्जातावेव शक्तिग्रहं मन्वते, नैयायिकास्तु जातिविशिष्टो व्यक्तिरिति, प्राचीनास्तु जात्याकृतिव्यक्तयस्तु पदार्थः। तथैव बौद्धा अपोहो शब्दार्थः। इत्येवं रीत्या सर्वैरपि साक्षात्सङ्केतविषत्वेन जातिः, व्यक्तिः, जातिविशिष्टो वा व्याक्तिः स्वीक्रियते, तत्र च वैयाकरणानां प्रवृत्तिरपि तथैव "**चतुष्टयी शब्दानां प्रवृत्तिः जाति शब्दः गुणशब्दः क्रियाशब्दः, यदृच्छाशब्दश्च"**[64]**' "त्रयीशब्दानां प्रवृत्तिः"।**[65] जातिशब्दः, गुणशब्दः, क्रियाशब्दः, न सन्ति यदृच्छाशब्दा इत्यपि पक्षः विद्यते वैयाकरणानाम्।

एवम्भूतेन सङ्केतविषयकवर्णनेन जातिगुणक्रियायदृच्छाशब्दा एव अभिधया शब्दशक्त्या बोध्यन्ते। कारणमिदमेव यत् साक्षात् सङ्केतितस्यार्थस्य प्रबोधिकैवाभिधा। सङ्केतविरहाभावे अभिधाया गतिर्न विद्यते। अतोऽभिधा सर्वत्रापि दर्शनिकैः स्वीकृता विद्यते। तथैवान्यत्रापि अभिधा निर्बाधगत्या पदैः पदार्थाभिधाने कारणतामुपयाति।

व्याकरणदर्शने च शक्तिद्वारा सर्वविधोऽप्यर्थो ज्ञायत इति सिद्धान्तपक्षः। दर्शनेऽस्मिन्नेकैव शब्दशक्ति स्वीक्रियते ततोऽन्यन्नस्त्यपरा काचिदपि शब्दशक्तिः, मतमेतद् भर्तृहरिणा नागेशेनान्यैश्च पोषितं विद्यते।

तत्रादौ भर्तृहरेः पक्षो विद्यते तेन च शक्तित्वेनैकैव शक्तिः स्वीकृता। वाक्यपदीये तेन प्रत्यपादि-

**"सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।**

**प्रसिद्धिभेदात् गौणत्वं मुख्यत्वं चोपवर्ण्यते"॥**[66]

शब्दः सर्वशक्तिमान् विद्यते तेन सर्वविधोऽप्यर्थो दीयते स चार्थश्शक्त्यैव प्रबोध्यते नान्या काचिदपि शक्तिस्तन्मते विद्यते, सप्रमाणं निरूपयति यथैकैव गोशब्दः समुच्चारितः सन्नभिधया सास्नासिमन्तं गोपदार्थं बोधयति, तथैव वाहीकपदार्थोऽपि बोध्यते, नान्या काचिदपि शक्तिः। अत्रैका

---

64 "ऋलृक्"। म०भा०, पृ० १०३

65 तत्रैव।

66 वा०प०, २/२५३

वाचो युक्तिरत्र दीयते तेन सा च यथा प्रसिद्धिरप्रसिद्धिश्च। प्रसिद्ध्या च लोके प्रसिद्धपदार्थको बोधो भवति, अप्रसिद्ध्या च तस्य लोकेऽप्रसिद्धः पदार्थो बोध्यते, तदेवास्यां कारिकायां प्रतिपादयति-

**"यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।**

**तथा स एव शब्दो वाहीकेऽपि व्यवस्थितः"॥**[67]

एतस्या कारिकाया व्याख्यानं रघुनाथशर्मणा क्रियते यदेकैव शक्तिरभिधाख्या ततोऽन्यन्न काचिदपि शक्तिः, अभिधयैव सर्वविधो बोधो भाव्यते। [68]

एवं प्रकारेण यत्र कुत्रापि साक्षात्सङ्केतविषयादतिरिक्तार्थस्य ज्ञानं कार्यते शब्ददारा तदा तत्राप्रसिद्धाया आश्रयणं नीयते। तदर्थं च निमित्तानामपि परिगणनं करोति यद्वशाच्छब्देनाप्रसिद्धोऽप्यर्थो दीयते।

आचार्यनागेशः स्वकीये व्याख्याने शक्तिमात्रमेव स्वीकुरुते पुनश्च शक्तेर्भेदद्वयं स्वीकृत्य अन्यां शक्तिं खण्डयति। **"शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम्,सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्। तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धाशक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्"।**[69] अत्रापि आचार्यभर्तृहरेरनुकरणमेव विद्यते साक्षाच्छक्तेः स्वरूपप्रतिपादने। लक्षणायाः खण्डने तेन परमलघुमञ्जूषायां भाष्यवचनत्वेनेदमुपन्यस्तं 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः'[70] इत्येतेन शक्तिद्वारैव सर्वविधोऽर्थो दातुं शक्यते इति सिद्धान्तपक्षो वैयाकरणानाम्। पदवाक्यप्रमाणज्ञैर्विद्वद्भिस्साक्षान्न शब्दशक्तीनां चर्चा कृता तिसृणाम्। अभिधाया लक्षणाया वा चर्चा कृता तैः। तेष्वादावेव आचार्यनागेशः पदवाक्यप्रमाणज्ञो लक्षणायाः स्वरूपं प्रतिपादितवान्। स्वरूपप्रतिपादने सः वैयाकरणसिद्धान्तपरमलघुमञ्जूषायां निगदति यद्योगिभ्यो न विद्यते

---

67 तत्रैव, २/२५२

68 "यथा गोत्वजात्यभिधानपुरस्सरं येन गोशब्देन सास्नादिमान्पिण्डोऽभिधीयतेऽर्थादभिधया बोध्यते, तथा स एव गोशब्दस्तयैव वृत्त्या अभेदेन स्वरूपभेदेऽप्यभिधात्वेनैकया, वाहीकेऽपि वाहीकार्थाभिधानेऽपि व्यवस्थितः, वयस्थात्राभेदे चापि शब्दैक्यरूपो नियमस्तां प्राप्त इति। एतेन शब्दैकदर्शनम्, शक्तिस्वरूपभेदेऽप्यभिधात्वेन-एकैववृत्तिः नास्ति लक्षणा नाम शुद्धा गौणी वा वृत्त्यन्तरम्"। तत्रैव, अ०क०टी०, पृ० ३३२

69 प०ल०म०, पृ० ५९

70 तत्रैव, पृ० ६०

आवश्यकता लक्षणायाः किन्त्वस्मदादिषु तदभवाद् विद्यते एव आवश्यकता[71] सा च लक्षणा शक्यतावच्छेदकारोपरूपा स्वीकृता।

तथैव व्यञ्जनायाः साक्षादेव लक्षणं करोति। स्फोटनिपातानां द्योतकत्वं व्यञ्जनयैव सम्भवति नान्यथा।[72] वैयाकरणानां शब्दशक्ति-विषयकचिन्तने आशाधरभट्टः कोविदानन्दे कथयति यच्छाब्दिकैरेकैव शब्दशक्तिः स्वीकृता किमर्थमेकैवेति प्रतिपादयति शाब्दबोधस्थले लाघवाय तदाह्-

**"शाब्दिकैः सा स्मृतैकैव त्रिविधापि स्वरादिवत्।**

**अभिधा लक्षणा व्यक्तिरित्याख्या त्रितयं मतम्"॥**[73]

तस्मादेकैव शक्तिर्विद्यते तस्या भेदास्तु यथा स्वर एकः सन्नपि त्रिविधो ह्रस्वदीर्घप्लुतभेदेन स्वीक्रियते। तथैव ह्रस्वतुल्या अभिधा दीर्घतुल्या लक्षणा प्लुततुल्या व्यञ्जना, साक्षात्तत्र भेदा न सन्ति। पुनश्चाशाधरभट्टस्य मतं विद्यते यत्त्रिविधापि वृत्तिरेकैव भवति तदुदाहरणमुखेन प्रतिपादयति-

**"त्रिविधा वृत्तिरेकैव वैलक्षण्येऽपि वस्तुतः।**

**इत्याहुश्शाब्दिकास्तेषां भिन्नत्वे गौरवाद्भयम्"॥**[74]

अत्र शाब्दिकान् समुद्धरन्नाचार्यः कथयति त्रिविधा परस्परविलक्षणा सती अपि वृत्तिरेकैव मन्यते। कारणं यदि भिन्न-भिन्नाश्शक्तयः स्वीक्रियन्ते चेद् गौरवाख्यस्य दोषस्य प्रसक्तिर्भविष्यति अतो हेतोरेकैव शक्तिरभिधाख्या इत्येव पौनःपुनिकं व्याख्यानमाचार्यस्य शाब्दिकाननुधावति। उदाहरणेन बोधयति-

**"नित्यं निवासनिरतौ गङ्गायां झषतापसौ।**

**हिंसकाहिंसकौ दृष्टौ प्रकृतिर्हि बलीयसी"॥**[75]

तस्योदाहरणं नित्यमिति- अत्र गङ्गापदेन प्रवाहतीरयोर्युगपदुपस्थित्या न वृत्तिभेद इति भावः। इति टीकायां

---

[71] "ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद इति चेत्? न, योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यसमदादीनां तदभावात्"। वै०सि०ल०म०, पृ० १९०

[72] "अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता, वैयाकरणानमप्येतत्स्वीकार आवश्यकः"। वै०सि म०, व्य०नि०

[73] को०न०, पृ० २३

[74] तत्रैव, पृ० ५४

[75] तत्रैव पृ० ५४

व्याख्यातम्। तस्मादेकैव वृत्तिस्तद्वारैव सांसारिकाः पदार्था बोध्यन्ते।
**लक्षणायाः व्याख्यानम्-**

आचार्यपाणिनेः "**पुंयोगादाख्यायाम्**"[76] इति सूत्रस्य व्याख्याने लक्षणायाः स्वरूपं व्यचारि, तत्त्वबोधिनीकारेणात्र स्पष्टं बोध्यते यत् पुंयोगात् "**स्त्रियां वर्तते इत्यनेन गौणीवृत्तिरुक्ता**"।[77] प्रष्ठी गोपी इत्यादिषूदाहरणेषु। तद्यथा- "**चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति तादर्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्**"।[78] एत्येवम्भूतैर्व्याख्यानैलक्षणायाः स्वरूपं स्पष्टत्वेन साधितं विद्यते। ततोऽपि वैयाकरणानां सिद्धान्तः परम्परायां शक्त्यैकवाद एव। नागेशेन सम्यग्रीत्या स्फोरितोऽयं वादः, स च शक्यतावच्छेकारोपरूपेण। तथैव व्यञ्जनाया अपि चर्चा तेन सक्षाल्लक्षणमुखेन प्रतिपादिता सकारणम्। व्याकरणदर्शने च शब्दशक्तीमामावश्यकता विद्यते तद्विना न पदार्था बुद्धावभासन्ते।

वैयाकरणनिकाये समुद्घोषणा विद्यते न शब्दैर्विरहिताः पदार्था बुध्यन्ते केनचिदन्येनोपायेन तदाह हरिर्व्याकरणस्य महत्त्वं प्रतिपादयन्-

**"अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।**

**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते"॥**[79]

अस्यां कारिकायां प्रतिपादयति यदर्थस्य प्रवृत्तौ व्यवहारे निमित्तभूतानि तत्त्वानि पदार्थाविवक्षारूपाः, तेषां निबन्धनं कारणं शब्दा एव भवन्ति।

लोके च विवक्षैयैवार्थेषु शब्दप्रयोगरूपो व्यवहारोऽवलोक्यते। प्रयोक्ता हि प्रत्यर्थविवक्षाप्रतिपादनयोग्यं हि शब्दं विवक्षाप्रापितसन्निधानेषु अभिधेयेषूपादत्ते। शब्दानां तत्त्वावबोधश्च व्याकरणं विना न सम्भवति। आचार्यभर्तृहरिस्तु पौनःपुन्येन कथयति – शब्दानामेव प्राधान्यं विद्यते लोके तेषां द्वारैवाभिधानं पदार्थानां जायते तद्यथा-

**"यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः"**[80] अर्थात् सर्वा अप्यर्थसम्बन्धिन्यो जातयशशब्दाकृतावेव समुपनिबद्धाः। अत्रेदं

---

[76] अष्टध्यायी, ४/१/४८

[77] वै०सि०कौ०त०बो०पृ० १५०

[78] म०भा०४/१/४८

[79] वा०प०१/१३

बोध्यमर्थगतानां जातीनां शक्यत्वम्, शब्दगतानां जातीनां शक्तत्त्वम्, लाघवकारणात्, व्यक्तीनां शक्यत्वे शक्तत्वे च गौरवाख्यो दोषः स्यादताह यथार्थजातय इति।

**शब्दस्य व्यवहारविषयत्वम्-**

शब्दस्य व्यहारः कथं जनैः क्रियते तदत्र बोध्यते- उच्चारणात् पूर्वं विशिष्टेन विलक्षणेनान्यशब्दव्यावृत्तेन रूपेण निरूपितः पुनश्चार्थविशेषे तस्य सन्निवेशः सोऽयमिति व्यपदेशार्हरूपेण तादात्म्येन समारोप्य स्थानकरणादिभिर्ध्वनिना सोऽनुगृह्यतेऽर्थादभिव्यज्यते-

**"वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।**

**करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते"॥**[81]

लोकव्यवहारे शब्दानां प्रयोगात् प्रागेव बुद्धौ चिन्तनं क्रियते। यदुच्चारविषयीभूतश्शब्दः प्रयुज्यमानेऽरविशेषे उपयुक्तो न वा। तस्य च शब्दस्य तेनार्थेन सह सम्बन्धस्साधुर्न वा एतत् सर्वं विचिन्त्यैव ताल्वाद्युच्चारणस्थानैर्ध्वनिनोच्चार्यते।

**स्फोटस्यैकत्वमखण्डत्वञ्च-**

शब्दो यद्यप्येकोऽखण्डश्च न तत्र किमपि परिवर्तनं जायते तदाह-

**"नादस्य क्रमजन्मत्वान्नापूर्वो नापरश्च सः।**

**अक्रमः क्रमरूपेण भेदवानिव जायते"॥**[82]

स्फोटो यद्यप्येकोऽखण्डश्च तथापि तत्र भेदः प्रतीयते तत्र कारणं किमिति। स्फोटस्याभिव्यक्तिर् ध्वनिना नादैर्वा जायते, नादो ध्वनयो वा क्रमवन्स्ततत्र क्रमिकव्यापारस्ताल्वाद्युच्चारणस्थानैः क्रियते तद्वशादेव क्रमवत्त्वं धवनौ नादे वा। न तु स्फोटात्मके शब्दे, स स्फोटो एकस्तत्र पौर्वापर्यभावः क्रमो वा न, स अक्रमः सन्नपि भेदवानिव प्रतीतिविषयतामुपयाति। क्रमेणोत्पत्तिर्नादैव न तु

[80] तत्रैव १/१५

[81] तत्रैव, १/४७

[82] तत्रैव १/४८

स्फोटस्य। पुनश्च बिम्वप्रतिबिम्बमाध्यमेन प्रतिबोधयति यदेकोऽखण्ड एव स्फोटो न च तत्र काचिदपि क्रिया विक्रिया वा सम्भवति-

**"प्रतिबिम्बं यथाऽन्यत्र स्थितं तोयक्रियावशात्।**

**तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः"॥**[83]

यथा चन्द्रादेः प्रतिच्छविः प्रतिबिम्बं तलेऽर्थात्तोयादौ स्थितमर्थात् पतितं भवति। ततश्च तोये यदा क्रिया जायते कम्पनादिक्रिया, तदा जलस्य चलिते सति चलति स्थैर्ये सति स्थितं भवति। तथैव स्फोटनादयोः पारस्परिको धर्मः, यथा प्रतिबिम्बतलयोः परस्परमस्ति प्रतिबम्बस्यान्वयस्तले भवति स्फोटस्य च नादे भवति। अत्र प्रतिबिम्बस्तलाभिन्नोऽभिन्नो वा, द्वयोर्मतयोरत्र चर्चा प्रतिबिम्बविषये- तत्र प्रथममते प्रतिबिम्बं बिम्बच्छायाछन्नस्तलावयव एव। स तलावयव एव प्रतिबिम्बति। द्वितीयं प्रतिबिम्बं तलोपाधिवशात् प्रतिभासते मिथ्याभूतं वा तदिति, द्वयोरप्युदाहरणयोर्बिम्बाद्भिन्नमेव प्रतिबिम्बम्।

अत्र च बिम्बत्वेन बुद्धिस्थस्य शब्दस्य परामर्शः। प्रतिबिम्बत्वेन ध्वनेश्च परामर्शः। वास्तविके विम्बे तु काथञ्चित्कमपि परिवर्तनं न दृश्यते, परिवर्तनं क्रिया वा प्रतिबिम्बे तदपि प्रतिबिम्बाश्रये क्रियावशादिति जायते। बिम्बस्य तु निश्चलत्वं निष्क्रियत्वमेकत्वञ्च साध्यते। स्फोटेऽपि वर्णैकत्वं पदैकत्वं च साध्यते। यद्यपि शास्त्रेषु नानाशब्दवादश्शब्दैकवादश्च तथापि वैयाकरणानां शब्दैककवादो वर्णैकवादश्चाभिमतो भवति तद्यथा-

**"पदभेदेऽपि वर्णानामेकत्वं न निवर्तते।**

**वाक्येषु पदमेकं भिन्नेष्वप्युपलभ्यते"॥**[84]

अत्र वर्णैकवादस्य साधनां करोति यथा गौः, गवयः, गगनम्, गतिः, इत्यादिषु भिन्न-भिन्नेषु शब्देषु गकारव्यक्तयः पठितास्तेन च तेषां भिन्नत्वं न प्रत्युत त एव गकारवर्णा इमे इति प्रत्यभिज्ञानवशात्, अतो भिन्न-भिन्नस्थलेषु

---

[83] तत्रैव १/४९

[84] तत्रैव १/७१

पठितगकाराणामेकतैवेति। तथैव पदेष्वपि 'घटमानय' 'घटं पश्य' 'घटं कुरु' 'घटं पूरय' पदमपि वर्णवदेकमेवोपलभ्यते वर्णवदिति तदेवमिति पदमिति प्रत्यभिज्ञानदशाया वशात्।तस्माद् विभिन्नवाक्यस्थानामपि पदानामेकत्वमेति सिद्धान्तः।

**"न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।**

**वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन"॥**[85]

पदमपि वर्णाद्व्यतिरिक्तं न, तथव वाक्यस्यापि वर्णपदाभ्यं व्यतिरिक्तता न स्वीकर्तुं शक्यत इति सिद्धान्तः। सर्वान्ते च वाक्यस्फोटस्य नित्यतामेकत्वं सत्यत्वं साधयति-

**"पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न चा।**

**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन"॥**[86]

अत्रत्यसमीक्षया ज्ञायते यत् सन्ति तावद्वर्णाः पदवाक्यानवयवाः, किन्तु तद्विवक्षानिष्पादितैस्तु ध्वनिभिरभिव्यक्तानां तेषां बुद्धिरुपजायते, वाक्येषु पदेषु च सन्ति आपोद्धारस्य कल्पनाद्वाराऽपोद्धृताः कल्पिताः वर्णाः।

पदेऽभिव्यञ्जनीये तद्विवक्षाया अभावेऽपि तदविवक्षानिष्पादितध्वन्य-भिव्यक्तात् पदादेवापोद्धारस्य परिकल्पना अपोद्धृतवर्णविषया अन्या बुद्धिरुपजायते। सा च बुद्धिः स्वाभिव्यञ्जकध्वन्यभिव्यक्तस्वतन्त्रवर्णबुद्धि-वन्निर्भासते। ताभ्यो बह्वीभ्योऽपोद्धृतवर्णप्रतिपत्तिभ्यस्तादृशवर्णसमुदाय-भूतस्य पदस्य प्रतिपत्तिर्जायत इति स्थितिः। यद्यपि पदाभिव्यञ्जनायै अपोद्धृतवर्णानां विवक्षा न भवति ततोऽपि पदस्य प्रतिपत्युपायभूतास्तदनुकूलाश्च ध्वनयस्तत्र जायन्ते,

तादृग्भ्यो बहुभ्य एव नादेभ्यो वर्णसमुदायभूतस्य पदस्याभिव्यक्त्यनुकूलो महाध्वनिरेक उपजायते। तथैव तेभ्य एव पदध्वनिभ्यो वाक्यध्वनिरेकः पदसमुदायभूतस्य वाक्यस्याभिव्यक्त्यनुकूलः। तस्माद्वर्णेभ्यः प्रारभ्य वाक्यपर्यन्तं न विद्यतेऽनेकत्वं प्रत्युतैकत्वमेवमेव यत्र कुत्रापि भेदः स

---

[85] तत्रैव १/७२

[86] तत्रैव १/७३

काल्पनिक एव मिथ्येति वदामः। एतस्या एव कारिकाया वृत्तौ कथ्यते– **"तत्त्वक्रममपूर्वापरमेकमेव नित्यमभेद्यं वर्णतुरीयोपपादैत इवैकात्मा"।**[87] तुरीयशब्दोऽत्रापकृष्टत्वादग्राह्यपरः, दृश्यते चाग्राह्यो निर्विशेषे आत्मनि तुरीयशब्दस्य प्रयोगो माण्डूक्योपनिषदि। ततश्चात्र "**प्रकारे गुणवचनस्य"**[88] इत्यनेन द्विरुक्तौ सत्यां तुरीयतुरीयकमिति। अग्राह्यमात्मसदृशमित्यर्थः। तस्मादपराद्वारा कत्वखत्वगत्वादिभिर्व्यपदेश्यानां न वस्तुसत्त्वम्, अयवयवसंस्थानविशेषरूपस्यावयविनोऽवयवानतिरेकात्।

तस्माच्चैवं वर्णासत्त्वे पदासत्त्वम्, वर्णपदयोरसत्त्वे वाक्यस्यासत्त्वम्। अतो वाक्यस्य पदैरनारभ्यमाणस्य नित्यत्वमखण्डत्वं च समसाधि। स च शब्दोऽविकारी विद्यते। स्थानकरणादीनां व्यापारवशादेव तस्याविकारिणः समुपलब्धिः समुपजायते। यथा प्रकाशस्य द्वारा घटपटादीनां पदार्थानामुपलब्धिर्भवति।

**शब्दानां विश्वकारणत्वम्–**

शब्दद्वारैव संसारस्य सत्ता, शब्दैर्विरहिता च शक्तिर्न दृश्यते न च श्रूयते तत्र सप्रमाणं भर्तृहरिराह-

**"शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।**

**यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते"॥**[89]

तात्पर्यमिदं यद्वाचवाचकभूतस्य निखिलप्रपञ्चस्य निबन्धनी वाचवाचकभावस्य नियामिका नियमस्य प्रयोजिका शक्तिः शब्देष्वेव आश्रिता विद्यते। नियमनं चेत्थम्- अयमेव शब्दोऽस्यैवार्थस्य वाचकः, यन्नेत्र इत्यत्र नेत्रपदस्य पारिच्छेदोपाये लक्षणा, शब्दशक्तेः प्रकाशसाधनत्वरूपनेत्र-साधर्म्यात्। या शब्दशक्तिर्नेत्रं परिच्छेदोपायो यस्य वाच्यस्यार्थात् पदार्थ-जातस्य।

---

[87] तत्रैव पृ० १२७

[88] अष्टाध्यायी ८/१/१२

[89] तत्रैव१/११८

सोऽयं यन्नेत्रः प्रयुक्तशब्दशक्तिप्रकाश्योऽयं वाच्यः पदार्थः प्रतिभात्मा, प्रतिभायामात्मा यस्येति विग्रहे कृते सति बुद्धिविषय इति, भेदरूपो गवादि-रूपवाच्यभेदभिन्नः प्रतीयते। न हि तदर्थविषयकशक्तिविशिष्टेन शब्देन विना गवादिपदर्थविषया प्रतिभा उत्पद्यत इत्यवश्यमवधेयम्। अत्रायं भावो नानाभेदरूपेषु प्रतीयमानस्यास्य जगतः कारणात्मिका शक्ति शब्देष्वेव विद्यते। शब्दानामेवम्भूतया कारणशक्त्यैव इदं सर्वं प्रातिभासकं भेदरूपं च प्रतीयते।

भौतिकसंसारेऽस्मिन् समेऽपि पदार्थाः स्व-स्वाकारेण स्व-स्वसत्तया च प्रसृताः सन्ति। किन्तु तेषां व्यावहारिकरूपेण प्रयोगस्तावन्न संभवति, यावच्छब्दैर्न तेषां वर्णनं क्रियते। कश्चन घटस्तावन्न घटरूपेण व्यवहर्त्तुं शक्यते यावद्घटशब्देन तस्य वर्णनं न क्रियते। घटश्चायमवर्णितः सन् घटमृत्पृथ्वीत्यादिरूपेषु कुत्रचिदपि भवितुमर्हति किन्तु जालाहरणरूपे घटवस्तुनि व्यवहर्त्तुं न शक्यते। अपरमपि नितरां सत्ताभाववन्त्यपि वस्तूनि शब्दद्वारा वर्णितानि सन्ति व्यवहाराङ्गतामुपयान्ति शशविषाणवत्। एवम्भूतेन व्याख्यानेन स्पष्टं प्रतिभाति यत् संसारस्य विविधरूपेषु प्रतीतिः शब्देष्वेवाश्रिता विद्यते। जगतो विश्वात्मकताविविधताया भेदरूपतायाश्च कारणात्मिका शक्तिश्शब्देष्वेव निहिता भवति, शब्दशक्तिश्च वस्तूनि यथेच्छं प्रकाशयितुं शक्नोति।

पदार्थस्य व्याख्यानमित्थं विचारयितुं शक्यते यद्यः पदार्थो दर्शने श्रवणेऽनुभवे च नागतस्तस्य ज्ञेयत्वाभाव एव, यत्र च ज्ञेयत्वाभावः, तस्य च ज्ञेयत्वाभाववतो वाच्यत्वाभावः, वाच्यत्वाभावे च सत्ताभाववान् स पदार्थः, **तदुक्तमस्तित्वाभिधेत्वज्ञेयत्वानि** पदार्थस्य लक्षणम्, अभिधेयत्वं च ज्ञेयत्वं च पदार्थसामान्यलक्षणम्। इत्यपि लभ्यते, तस्मादस्तित्त्वं नाम सत्तोपस्थितिर्वा, अभिधेयत्वं नामाभिधानयोग्यता, ज्ञेयत्वं नाम ज्ञानविषयत्वञ्च। तेन च ज्ञेयत्वस्यैवाभिधेयता, अभिधेयत्वस्यैव सत्ता, नान्यथा सत्ता पदार्थानां सम्भवति।

शब्दतत्त्वमेव मूलप्रकृतिः। अत्र च शक्तिद्वयं श्रुत्यर्थभेदात्। द्वाभ्यामपि शक्तिभ्यां शब्दतत्त्वं नामरूपयोर्विवर्तते, अतस्सर्वमपि नाम वा रूपं वा शब्दार्थौ वा तस्मिन्नेव शब्दतत्त्वेऽन्तर्भवति। श्रुतिशक्त्या समन्वितः शब्द

वाचकतामुपयात्यर्थाच्छब्दो भवति। तथैवार्थशक्त्या समन्वितः शब्दो वाच्य (अर्थः) इति भवति।

संसारेऽस्मिन् यावत्योऽप्याकारेण सत्तया च युक्ता अर्थव्यक्तयः सन्ति। तासु सर्वास्वर्थव्यतिषु श्रवणीयता शक्तिः, तत्तदनुकूलव्यक्त्यनुगुणशब्दैर्युक्ता विद्यते। प्रत्येकं च वस्तु स्वनाम्नि समाहितं भवति।

यद्यपि शब्दार्थौ शब्दतत्त्वस्य विवर्तभूतौ तथाप्युच्चरितश्रवणीयशब्दानां विशेषता भवति। यत्ते स्वकीयया वाचकशक्त्याऽर्थान् भेदरूपेषु संस्थापयन्ति। शब्देष्वद्भुता भेदिका शक्तिर् विद्यमाना भवति। या च प्रतिभा इति निगद्यते। तस्माद् विश्ववैविध्यस्वरूपख्यापिका शक्तिः शब्देष्वेव निहिता भवति। पदार्थानां सत्त्वमसत्वं च शब्दाधीनमेव।

विश्वस्य भेदरूप वास्तविकी ना प्रत्युत प्रातिभासिकी एव विवर्तसिद्धन्तानुसारं निखिलमिदं जगच्छब्दतत्त्वस्य स्वप्नप्रबोधप्रवृत्तिद्वारा सर्गं लयं च प्राप्नोति। यथा स्वप्नावस्थायां शयिते पुरुषे तदीयस्य संसारस्य लयं तस्मिन्नेव लीयते। तस्मिन्काले तेन सम्बद्धानि सर्वाण्यपि वस्तूनि तस्मिन्नेव भवन्ति। प्रबोधावस्थायाञ्च तानि सर्वाणि तस्मात् पृथक् बहिरायान्ति। तथैव शब्दतत्त्वं स्वप्नप्रवृत्तौ सर्वमात्मन्येव संस्थापयति प्रबोधे च विविधाकारेषु भासते। लयस्य स्थितौ सर्वं पुनस्तस्मिन्नेव लीयते।

पदार्थानां लयं शब्दत्त्वद्वारैव जायते, ईश्वरेण ब्रह्मणा वा नैव, एतस्य प्रमाणमिदमेव यद्विश्ववैविध्यस्य नियामिका शक्तिश्शब्देष्वेव निहिता भवति। यदि च वैविध्यं भेदरूपत्वं च शब्दतत्त्वेनैव तेन लयोऽपि शब्दे एव। अतस्समग्रस्य विश्वस्य सर्गलयौ शब्दद्वारैव। एतदर्थं शब्दतत्त्वातिरिक्तं किचिदप्यधिष्ठानं नावश्यकमत एवोक्तम्-

**"वागेव पश्यति वाग् ब्रवीति वागेवार्थं निहितं सन्तनोति।**

**वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते"॥**[९०]

न केवलमेतावदेव शब्दतत्त्वस्य जगतोऽभिव्यक्तिर्लयश्च मतमिदं न वयं कल्पयाम। प्रत्युत वेदविदामपि मतमिदमेव तत्प्रतिपादयति-

**"शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।**

---

[९०] तत्रैव पृ० १७३

**छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत"॥**[91]

अयं संसारश्शब्दस्य परिणाम इति आम्नायविद अगमज्ञा जानन्ति स्म, निखिलमिदं जगत् सर्गादौ छन्दोभ्योऽर्थाद्वेदेभ्यः सर्ववेदप्रकृतेः प्रणवादेव विवृत्तमभवत्। तत्र च प्रमाणमृग्वेदस्य मन्त्र एव-

**"वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।**

**अथेद वाग् बुभुजे वागुवाच पुरुत्र वाचो न पदं यच्च नाह"।**[92]

वागेव बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्त्वमेव सर्वाणि भुवनानि वाच्यवाचकोभयात्मकानि जज्ञे जात इन्द्रियाणि प्राणं च द्वारीकृत्य।

वाच इत् वाच एव, इदित्यवधारणेऽव्ययम्। यदमृतमाकल्पान्तः स्थायि वियदादिकं यच्च मर्त्यं मय्येव विनाशि कार्यजातम्, तज्जज्ञे, न केवलं वाग् मर्त्यामर्त्योभयरूपभोग्यात्मनैव जाता, किन्तु भोक्तृरूपेण वक्तृरूपेणापि जाता इत्याह-अथेद वाग् बुभुजे। अथ वाग् इद् वागेव बुभुजे आन्तरज्ञातृरूपेणावस्थिता बुभुजे भोक्त्री। वागेव पुरुत्रा बहुभिः प्रकारैः, पुरुशब्दात् बह्वर्थात् त्राप्रत्ययः प्रकारे, उवाच वक्त्री प्राणं द्वारीकृत्य शब्दानां बहुधा प्रयोक्त्री। यच्च न च नेत्यप्यर्थे निपातः। यत्किञ्चिदप्याह वक्ति जनः, तत्सर्वं शब्दाभिधेयमर्थजातं वाचो न परं न भिन्नम्, किन्तु वागात्मकमेव वागुपादानकत्वात्।

**शब्दैकमात्रगम्यं ज्ञानम्-**

संसारेऽस्मिन् ज्ञानं शब्दैर्विना न संभवत्येव, यतोहि कस्यचिदपि पदार्थस्य सत्ता शब्दविरहिता न जायते। **"यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः, अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्"।**[93] अर्थाच्छब्दा एव अर्थस्य प्रत्यायका भवन्ति। ततोऽन्यदतिरिक्तः पन्था न विद्यते। इत्येव द्रढयन् भर्तृहरिराह-

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

---

[91] तत्रैव, १/१२०

[92] ऋग्वेदः

[93] वा.पा० ५/१०

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"॥**[94]

संसारस्य कस्यचिदप्युपदेष्टुर्बुद्धौ संस्थितः प्रतिपत्तुर्बुद्धौ वा संस्थितस्तथाभूतः प्रत्ययः नास्ति यश्शब्दानुवेधशून्यः स्यात्। ज्ञानं शब्दमेवानुधावति, शब्दमन्तरा संसारिकैः काथञ्चित्कममपि ज्ञानं कुत्रापि प्राप्तुं प्रापयितुं वा न शक्यते। अत्र च अनुभव एव प्रमाणत्वमेति, उपदेष्टुः प्रतिपत्तुर्वा सर्वमपि ज्ञानं शब्देनानुविद्धमिव भासमानं भवति। तादात्म्यसम्बन्धेन तन्मूलकेन वाच्यता सम्बन्धेन वाऽर्थे विशेषणीभूतेन शब्देनानुविद्धमिव सर्वं ज्ञानं स्वग्राहकेण ज्ञानेनानुव्यवसायेन साक्षिणा निमित्तेन भासते। कारिकायमस्यामिव शब्दस्य प्रयोगः शब्दार्थयोस्तादात्म्यस्याभावेन तन्मूलकवाच्यतासम्बन्धस्याप्यभावेनेति।

श्रोतुः प्रतिपत्तुः वा ज्ञानं त्रिविधं भवति।

१- बहिरत्यन्तासदर्थविषयकज्ञानं वन्ध्यापुत्रादिविषयकं विकल्पपद-व्यपदेश्यम्।

२- कदाचिदसदर्थविषयकं भूतभविष्यदर्थग्राही। एतयोर्दिविधयोर्ज्ञानयोर्नार्थेन शब्दस्य तादात्म्यं वाच्यवाचकभावादिरूपो वा सम्बन्धान्तरः सम्भवति बाह्यार्थस्यासत्त्वात्। बौद्धार्थश्च बुद्धेः परिणामरूपः, अतो बुद्ध्या सह तादात्म्यसम्भवः।

३- बहिर्विद्यमानार्थविषयकं तृतीयं ज्ञानम्। एवं रीत्या त्रिप्रकारकं ज्ञानं प्रत्यपादि तत्सर्वमपि शब्दैकमात्रगम्यं तद्विना न विद्यतेऽर्थस्य काचिदपि सत्ता।

वाचा सर्वे पदार्थाः प्रकाश्यन्ते तत्प्रतिपादयति-

**"वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वतीः।**

**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी"॥**[95]

यदि ज्ञानस्य नित्या शब्दमयता विच्छिन्ना स्यात् तदा प्रकाशोऽर्थाज्ज्ञानं न प्रकाशेत, वाग्रूपतैव ज्ञानस्य प्रकाशिका प्रत्यवमर्शिनी

---

[94] वा०प०,१/१२३

[95] तत्रैव १/१३५

शक्तिरिति, प्रत्यवमर्शिनी इत्यस्य विवेचने कथ्यते अनुव्यवसायः प्रत्यवमर्शः। प्रकाशितस्य ज्ञातस्य चावधारिका हि वाग् भवतीत्यर्थः। 'योऽयं जातवेदाः' इत्यादिश्रुतिभिः प्रकाशस्य बाह्यतेजोरूपेण प्रकटस्य पुरुषान्तरावस्थितस्य। अत एवाप्रकटस्य इत्युभयोः प्रकाशयोः प्रकाशयिता शब्दतत्त्वाख्यः प्रकाशो वाक्। सा च वागुभयोः प्रकाशयोः प्रकाशितमपि प्रकाशयतीति तस्या अनुव्यवसायः।

वाग्रूपताया अनुगमं विना ज्ञातं जातं च सर्वमनुपपन्नमिति सैव प्रत्यवमर्शिनी। तास्यामेव वाचि सर्वमुपनिबद्धं भवति चराचरं तस्याश्चोच्छेदे सति न किमपि संसारेऽस्मिन् संभविष्यति।

**संसारिणां सञ्ज्ञा शब्द एव-**

वाग्रूपतैव वाणी वा संसारे निवसतां प्राणिनां पदार्थानां सञ्ज्ञा अर्थाच्चेतना विद्यते। एषा च प्राणिनां वस्तूनां च बहिरन्तश्च विद्यमाना दृश्यते। प्राणिषु या चेतना वस्तुमात्रे च या सञ्ज्ञा सा वाग्रूपतैव वाग्रूपतां विहाय चेतना सञ्ज्ञा व न भवतः। सञ्ज्ञाया अर्थो भवति चेतना संविद् वा, परश्चार्थो भवति नाम संसारस्य सर्वेषु प्राणिषु या चेतना, अनुभवस्य च या शक्तिः, तत्सर्वं वाण्याः कारणादेव वस्तुमात्रस्य पृथक्-पृथगभिज्ञानं नामाभिधानं वा तत्र च वाणी एव करणमुपयाति, तस्माच्चेतनानामचेतनानां च सञ्ज्ञा वाणी एव।

बहिरन्तश्च कथं वाण्याः प्रवेशो जायते। एवम्भूता वाणी मनुष्येषु प्राणिषु च वैखरीवाणीरूपेण बहिर्मध्यमाऽथवा पश्यन्तीरूपेण अन्तः संस्थिता भवति। स्पर्शादिसंवेदनानामपि रूपेण प्रणिनां बहिरन्तश्च दृश्यते, प्राणिभिः सह समस्तेषु पदार्थेषु बहिर्नामाभिधानरूपेण भवति तथा च शब्दस्य विवर्तत्वादर्थशक्तिरूपेण पदार्थानामन्तर्भवति।

चैतन्यं चितिक्रियास्वरूपम्, तच्च चैतन्यं सर्वेषूत्पत्तिमत्सु जीवेषु पदार्थेषु च वाग्रूपतामात्रामनतिक्रम्यैव वर्तते। यस्मिन् प्राणिनि पदार्थे वा यावान् यावान्वाग्रूपताया अनुगमः भवति। तस्य प्राणिनः पदार्थस्य वा तावदेव चेतनत्वम्, तद्यथा मनुष्यस्य विशिष्टचेतनत्वन्, पशूणां सामान्यचेतनत्वम्, वनस्पतीनामल्पचेतनत्वम्, पाषाणादीनामचेतनत्वम्।

पाषाणादीनामपि नामानि भवन्ति। अतस्तेषामपि सञ्ज्ञा जायते। सञ्ज्ञाया अर्थश्चेतना अपि। अतः पाषाणादीनामपि सचेतनत्वम्। पदार्थेषु स्पन्दनं संवेदनत्वमपि जायते, तद्यथा वैद्युतकीयोपकरणेषु द्रष्टुं शक्यतस्। भौतिक्यः रासायनिक्यश्चोर्जाः संवेदनशीला स्पन्दशीलाश्च भवन्ति। स्पन्दनसंवेनशक्तिश्चैवम्भूतेषु पदार्थेषु मानवापेक्षा विशाला सूक्ष्मा च भवति। अतः स्पन्दनसंवेदनयोर्दृष्ट्याऽचेतनत्वं न प्रत्युताचेतनस्य मुख्यं कारणं वागरूपताया न्यूनतैव। चैतन्यस्य च प्रधानतत्त्वं वाग्रूपतैव, तस्मात् किमपि संवेदनं स्पन्दनं प्रत्ययो वा तादृग् न विद्यते यस्य ज्ञानं वाणीं विना संभवेत्।

**"सैषा संसारिणां सञ्ज्ञा बहिरन्तश्च वर्तते।**

**तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजातिषु"॥**[96]

इह जगति यत्किमपि चराचरं विद्यते तस्य सर्वस्य वाग्द्वारैवोत्पत्तिस्तस्यामेव वाचि लयश्च। वाचा विना न विद्यतेऽस्य स्थावरस्य जङ्गमात्मकस्य च संसारस्य सत्ता इति बहुभिरुद्धरणैः प्रमाणैर्निर्णीतम्। एतेन शब्दतत्त्ववादस्य सीमा दृढा भवति तेन च शब्दैकत्ववाद एव समायाति। शब्दं विना कस्यचिदप्यर्थस्य सत्ता न केनापि बोधयितुं शक्यते। व्यवहारविषयत्वं च न प्रापयितुं शक्यते। लोके वाङ्मूलकप्रवृत्तेरेव सत्त्वात् 'ससञ्ज्ञोऽयम्' इति व्यदेश, वाङ्मूलकप्रवृत्तेरसद्भावे विसञ्ज्ञ इति व्यवहारः क्रियते तद्बोधयति-

**"अर्थक्रियासु वाग् सर्वान् समीहयति देहिनः।**

**तदुत्क्रान्तौ विसञ्ज्ञोऽयं दृश्यते काष्ठ्यकुड्यवत्"॥**[97]

वाग्रूपतानुविद्धं चैतन्यमेवसफलासु क्रियासु प्राणिनः प्रेरयति। वाग्रूपताया अभावे तु विसञ्ज्ञः सन्नास्ते न च तेन काचिदपि क्रिया कर्तुं पार्यते। अभिधानमेव सञ्ज्ञा, सा च वाग्। स च परमात्मा शब्दतत्त्वं कथं जगत् सृजतीति ज्ञापयति –

**"प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान्।**

**सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते"॥**[98]

---

[96] तत्रैव,१/१२६

[97] तत्रैव, पृ० १८१

स्वयमेव स्वकीयविभागं कृत्वा वहुविधानां पदार्थानां रचनां कृतवान्। स च सर्वेश्वरः सर्वमयः स्वप्नेऽपि भोक्ता जायते। तस्मात् स्वकीयदैनिकव्यवहारे संलग्नः पुरुषो वाणीद्वारैव स्व-स्वकार्येषु प्रवृत्तो जायते। मानवस्य च जागृतावस्थायां कार्याणि वाणीद्वारैव सम्पाद्यन्ते। किन्तु सैव मानवो यदा स्वप्नावस्थायां भवति। तदात्वे तु वाणी एव कार्यवस्तु भूत्वा स्वप्नगतव्यवहारान् सम्पादयति।

तत्र च कारणमिदमेव यज्जगच्छब्दब्रह्मणो विवर्तः। अतः साध्यसाधनयोर्विभक्ताः पदार्था मूलत एकस्मिन्नेव शब्दतत्त्वे समाहिता भवन्ति, साध्यसाधनयोर्विभक्तं सच्छब्दतत्त्वं प्रविभागदशायां भवति। साध्यसाधने च यदा शब्दब्रह्मणि लीयेते। तदाऽविभागाऽवस्था भवति शब्दब्रह्मणः। प्रविभागाप्रविभागदशायामुभयथापि संसारोऽयं शब्दमयो विद्यते विवर्ततसंवर्तयोः। केचिद्दार्शनिकाः कथयन्ति यत् स्वस्यार्थाज्जीवत्मनः स्वरूपं केचिच्च परमात्मनः स्वरूपं संसारोऽयं विद्यते। येन केनापि तेषां प्रवादा भवन्तु किन्तु श्रुत्या प्रकल्प्यतेऽर्थाच्छब्देन प्रारभ्यते। यथा च शब्देन प्रतिपाद्यते तथैवार्थस्य सप्रसिद्धिर्भवति, तस्माद्वाणी शब्दो वा यं कमपि पदार्थं यादृशं स्वरूपं प्रददाति तस्य पदार्थस्य तस्मिन्नेव रूपे प्रसिद्धिर्जायतेऽतो वाण्येवार्थं विधत्ते।

**असत्पदार्थसत्तामपि प्रकल्पयति शब्दः-**

कस्यचित्पदार्थस्य संसारे सत्ता यदि नापि भवति किन्तु शब्दद्वारा सत्ताभाववतः पदार्थस्याभिधानं क्रियते। चेच्छब्दप्रयोगवशादेव तस्यार्थभूतस्य वस्तुन आकृतिस्वरूपं वा मनस्युपजायते। अलातचक्रमेवास्योदाहरणम्।

**"अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात्।**

**दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा"॥**[99]

वस्तुन आकारो वस्त्वाकारस्तस्य निरूपणा, इति वस्त्वाकारनिरूपणा। अर्थाद्वस्तुन आकारस्य तदभावेऽपि रूपकरणं दृश्यते। तच्च अलातचक्रस्योदाहरणेनोदाह्रियते- अलातचक्रं नाम- अलातं ज्वलनशीलं काष्ठं

---

[98] तत्रैव, १/१२७

[99] तत्रैव, १/१२९

तस्य च ज्वालनं कृत्वा यदा भ्रमणं कार्यते तदा तच्चक्रवद्भवति। तदेवालातचक्रम्। अलातचक्रस्य वास्तविकसत्ता न भवति तथापि तादृशस्य शब्दस्य प्रयोगो भवति, तस्य च शब्दैकप्रयोगविषयता जायते। तस्माच्छब्देनैव वस्तुविधानम् आकारविधानं वा जायते। तस्माच्छब्दस्तादृशेभ्यः पदार्थेभ्यः स्वरूपं ददाति येषां नितरामभावः, भूतभविष्यतोरथादस्ति नास्ति, वर्तमानस्यापि। अत्यन्तविरुद्धस्यापि वर्षतीवाञ्जनं नभ इत्यादीनाम्। तस्माच्छब्द एव विश्वस्य कारणम्।

**शब्द एव परमात्मा–**

**"अपि प्रयोक्तुरात्मानं शब्दान्तरमवस्थितम्।**

**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते"॥**[100]

अपि प्रयोक्तुरर्थाच्छब्दं व्यवहर्तुः पुरुषस्य शरीरान्तः प्रतिष्ठितं विद्यमानं वा शब्दस्वरूपमात्मतत्त्वंमहान्तमर्थात् सर्वोत्कृष्टमृषभमर्थाद्देवमिति कथयन्ति श्रुतयः। येन शब्दात्मना ऋषभेण सायुज्यमर्थात्तादात्म्यं काम्यते शाब्दिकैर्मुमुक्षुभिः। एतद्वेदेषु व्यख्यातं विद्यते तद्यथा **"चत्वारि शृङ्गा.........आविवेश"॥**[101] **"महो देवो मर्त्यां आविवेश"** इत्येनेनैवभूतैव वार्ता न्यगद्यत। तथैव उपनिषत्सु "अङ्गुष्ठमात्रं पुरुषोऽयमात्मा सदा जनानां हृदि सन्निविष्टः" इत्यदिभिस्तस्य परमतत्त्वस्य विषये ख्यापितं विद्यते। एवम्भूतस्य शब्दतत्त्वस्य द्विधा व्याख्यानं क्रियते वृत्तिकृता – नित्यकार्यभेदात् कृतं विद्यते। इह द्वौ शब्दात्मानौ नित्यः कार्यश्च।[102] एतयोः कार्यशब्दः ध्वन्यात्मकः, ध्वनयश्चोच्चरणविषयीभूताः सन्तश्श्रूयन्त उत्पद्यन्ते नश्यन्ति च। एते ध्वनयोऽनित्या नाशवन्तः सन्तोऽप्यवान्तरवस्थितस्य नित्यशब्दात्मनः प्रतिबिम्बोपग्राहिणोऽर्थाच्छब्दात्मनो बिम्बं प्रतिबिम्बयन्ति। शब्दात्मनो

---

100 तत्रैव १/१३०

101 ऋ०वे०४/५८/३

102 "इह द्वौ शब्दात्मानौ—नित्यः कार्यश्च। तत्र कार्यो व्यावहारिकः पुरुश्ःअस्य वागात्मनः प्रतिबिम्बोपग्राही। नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तःसन्निवेशी प्रभवो विकाराणामाश्रयः कर्मणामधिष्ठानं सुखदुःखयोः,सर्वत्राप्रतिहतकार्यशक्तिर्घटादिनिरुद्ध इव प्रकाशः, परिगृहीतभोगक्षेत्रावधिः, सर्वमूर्तीनामपरिणामा प्रकृतिः, सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभास-स्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यांपर्जन्यवद् दावाग्निवच्च प्रसवोच्छेदशक्तियुक्तः, सर्वेश्वरः सर्वशक्तिमहान् शब्दवृषभः, तस्मिन् खलु वाग्योग्विदो विच्छिद्याहङ्कारग्रन्थीन् अत्यन्तविनिर्भागेण संसृज्यन्ते"॥ तत्रैव पृ० १९८

गुणधर्माश्श्रुतशब्देषु प्रकटिता भवन्ति। द्वितीयश्च सर्वशक्तिमाञ्छब्दस्तस्य स्वरूपमपि वर्णितं विद्यते।

**शब्दसंस्कारः परमात्मनस्सिद्धिः–**

तस्माद्धेतोर्व्याकरणद्वारक्रियमाणश्शब्दसंस्कारः परमात्मनश्शब्दतत्त्वात्मकस्य सर्वेश्वरस्य सिद्धिः, शब्दतत्त्वात्मनः प्रवृत्तेस्तत्वं यो जानाति सैव शब्दब्रह्मामृतं शब्दब्रह्मणोऽमृतमयमास्वादमनुभवति। उक्तं च महाभाष्ये **"एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते"।**[103] इत्यादीनि वचांसि संपोषयन्त्यमुमेव भावम्। एतस्य भावस्य प्रकाशिका हरेः कारिकेयं विद्यते-

**"तस्माद्यः शब्दसंस्कारः स सिद्धिः परमात्मनः।**

**तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते"॥**[104]

**शब्दाद्वैतवादे वाचां स्वरूपम्-**

**"वागेव विश्वा भुवनानि जज्ञे, वाग्वै ब्रह्म"** चेत्यादिभिश्श्रुतिभिर्वाचं परमतत्त्वं सर्वोत्कृष्टमास्पदं च व्याख्यातं विद्यते। ततो लोकव्यवहारे लौकिकैस्त्रिधा चतुर्धा वा वाचां स्वरूपं व्याख्यान्ति। तत्रादौ वाचां स्वरूपव्याख्याता। भर्तृहरिरेव तेन च त्रिधा वाचां स्वरूपमभ्यधायि, तेषु च स्वरूपेषु पश्यन्त्याः वाचः सर्वोत्कृष्टतमं स्थानं व्याख्याय तस्याश्च सर्वविकल्पातीतादिगुणराहित्यं च साधयति तद्यथा-

**"वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**

**अनेकतीर्थप्रभेदायास्त्रय्या वाचः परं पदम्"॥**[105]

एतासां तिसृणां वाचां परिज्ञानं च व्याकरणदर्शनेनैव जायते। तासां वाचां स्वरूपमप्यवधारयति।

---

103 महाभाष्य

104 तत्रैव, १/१३१

105 तत्रैव १/१४२

**वैखरीस्वरूपम्-**

परैः सवेद्यं यस्याश्श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी।[106] परैरर्थाज्नैः प्रतिपत्तृभिश्श्रोत्रेन्द्रियेण नियतानुपूर्वीकत्वेन शब्दरूपेण कत्वखत्वादिवर्णसमूहत्वेन श्रूयमाणा वैखरी। वैखरी चेयं द्विधा- व्यक्तवर्णसमुच्चारणविषया, श्लिष्टा अव्यक्ताक्षरा वा। पुनश्च द्विधा भवति- प्रसिद्धसाधुस्वभावा, भ्रष्टसंस्कारा च। साधुस्वाभावायाः संस्कारो व्याकरणेन क्रियते। वीणादुन्दुभ्यादीनां शब्दा न संस्क्रियन्ते व्याकरणेन। वैखर्यास्वरूपं नागेशो व्याख्यातीत्थम्- **"तत आस्यपर्यन्तमागगच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते"॥**[107]

**मध्यमा वाक्–**

**"मध्यमा तु अन्तःसन्निवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना"।**[108] मध्यमा वाक् तु बुद्धिस्थिता भवति। तस्मादेवान्तः सन्निवेशिनी बुद्ध्मात्रोपादाना च कथ्यते। मध्यामाया वाचि क्रमराहित्यं क्रमराहित्येऽपि क्रमवत्ता तत्तदानुपूर्वीकत्वेन प्रयवभासनात् तथा चैतस्याः बुद्ध्युपदानत्वेन बुद्धिस्थत्वमपि। सा तु वर्णानुपूर्वीरूपस्य क्रमस्य संहारसत्त्वेऽपि यतः सूक्ष्मया प्राणवृत्त्यानुगता., अतोऽव्यक्तक्रमपरिग्रहमेव अधिष्ठानतया व्यक्तप्राणप्ररिग्रहेव च केषाञ्चिन्मते व्याख्यायते।

मध्यामाया वर्णनं नागेशेन- ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकस्फोटशब्दरूपा **"श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या माध्यमा वागुच्यते"**[109] अर्थात् हृदयतो नाभिपर्यन्तं यो वायुरायाति तेन चाभिव्यज्यते, स्फोटशब्दरूपा च मध्यमा वाक्, तस्मान्मनसि

---

[106] तत्रैव, वृत्तिः पृ० २१४

[107] प०ल०म० पृ० ७१

[108] वा०प०पृं २१४

[109] प०ल०म० पृ०७१

तस्य तस्यार्थस्य च वाचकता स्फुटति। अत्यन्तं सूक्ष्मा सती जपे प्रयुज्यमाना बुद्ध्या च निर्ग्राह्या श्रोत्रेन्द्रियेणैतस्या ग्रहणं कर्तुं न पार्यते।

### पश्यन्ती वाक्–

**पश्यत्यात्मनि जगदिति पश्यन्ती**। पश्यन्तीयं द्विधा प्रविभक्ता विद्यते, परपश्यन्ती, अपरपश्यन्ती च। आचार्यनागेशस्य पश्यन्ती त्वेकैव न तत्र परापराकृतो विभागः पश्यन्ती च सविकल्पकज्ञानविषया योगिनां समाधौ भवति, सविकल्पकत्वं च विशेषणविशेष्यसहितं ज्ञानं किन्त्वेतादृशं ज्ञानं केवलं समाधौ योगिनां कृते एव न तु सामान्येभ्यो जनेभ्यः। तदाह- **"नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते"।**[110] मूलाधारेण प्रेरितः सन् वायुर्यदा नाभिं यावदायाति, तदा नाभिमागतवता वायुना अभिव्यज्यमाना मनोविषयीभूता च पश्यन्ती वाक् कथ्यते, अत्र च स्पन्दसामान्यं भवति। एवम्भूता व्याख्यानविषयीभूता पश्यन्ती वाग् नागेशस्य हरिणाऽपरपश्यन्त्या कथ्यते।

### अपरपश्यन्ती-

वर्णक्रमाः प्रतिसंहृता भवन्ति नाभिदेशे संस्थिता बुद्धिमात्रस्वरूपा बुद्धयैव ग्राह्या, ग्राहकबुद्धेरभेदे समारोपितवर्णक्रमशक्तिः, सा च चलाचला, रूपादिषु हि विषयेष्ववर्वाग् दर्शनानां विक्षिप्ता बुद्धिरुत्पद्यते, सा च वाग्रूपानुविद्धत्वात् वागेव। विक्षिप्तत्वाच्चलाचला। अतिचञ्चलाऽपरा। सा च यदा प्रतिलब्धसमाधाना, अर्थात् समाधिप्राप्तदशायां तदा परा पदेन व्यपदिश्यते। योगिनामविक्षिप्ता शब्दपूर्वकयोगद्वारा समाहितत्वात्, वैखर्यात्मके शब्दे मनः समाधाय पश्यन्त्यात्मभूते शब्दे क्रमद्वारा मनसः समाधानत्वात्। तत्र च चलाचला, आवृता अविद्या, अविद्यया आवृतं यत्क्रमवत्तया भासमानं वाग्रूपं तदनुबिद्धारूपादिबुद्धिरूपत्वादपभंशैर्वा समाकीर्णा तैरवष्टब्धा आवृता अपरा। विशुद्धा च परा, क्रमाभावत्वेन रूपविशुद्धियुक्तपश्यन्तीरूपशब्दात्मकबुद्धिरूपत्वात्, सा च वाग् वाग्योग्विदाम्, ते हि तामक्रमां वाचं विदन्ति, सविकल्पकज्ञानविषयैषा,

---

[110] प०ल०म० पृ० ७१

अत्राज्ञानमस्यूतं तथैव शब्दोऽप्यर्थाकारेणानुस्यूतं भवति। विशुद्धा अपभंशैर्रहिता च वैयाकरणैर्वेद्यते।[111]

## परपश्यन्ती वाग्, आचार्यनागेशस्य परा, भर्तृहरेश्शब्दब्रह्म—

परपश्यन्त्याः स्वरूपं प्रतिपादयन्नाचार्यो ब्रूते यदस्यां वाचि सङ्कीर्णताया अभावः, अपभ्रंशराहित्यं लोकव्यवरातीतविषयत्वमपि भवति। अर्थाल्लोकेऽस्या वाचो व्यवहारो न कर्तुं शक्यते एवम्भूताया एव वाचः परिज्ञानं व्याकरणद्वारा सधुत्वपूर्वज्ञानलभ्येन शब्दपूर्वकयोगेन चाधिगम्यते।[112]

परपश्यन्त्या विषये प्रतिपादयति यत्तस्याः स्वरूपं यदा दृष्टं भवति तदा सर्वविधा नियोगा अर्थाद्बन्धास्ततो निवर्तितिता भवन्ति, यतो येन विधिना नियुक्त इव पुरुषोऽविद्यावशात् संसारे उत्पत्तिं विनां च समनुभवन् सन्तिष्ठते, अतोऽधिकारे निवृत्ते सति परावाचि परिशुद्धात्वम्, अद्वितीयात्मरूपत्वम्।

तस्मादविद्याया नाशे सति भेददर्शनकारणकस्य विधेर्निरासः, तदा तस्या परावाचोऽद्वितीयत्वं भेददृष्टेरुपमर्दितत्त्वात्। विधिप्रवृत्त्यभावे च जन्ममरणपरम्पराऽविच्छेदलक्षणः संसारो नादृष्टद्वारा, तदुत्तरति पुरुषे सोममये षोडषकले तां परां वाचममृतामरूपत्वेन नित्यां कलाम् आहुश्शास्त्रस्य वेत्तारः।

**"तस्या दृष्टस्वरूपायामधिकारो निवर्तते।**

**पुरुषे षोडशकले तामाहुरमृतां कलाम्"॥**[113]

नागेशभट्टः परावग्विषये प्रतिपादयतीत्थम्- **"मूलाधारस्थपवनसंस्कारी-भूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते"।**[114] कुण्डलिन्यां सस्थितो यो वायुस्तेनाभिव्यञ्जिता शब्दब्रह्मरूपा सर्वगता सत्यपि प्राणिनां मूलाधारे

---

111 "प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती। सा चलाचला प्रतिलब्धसमाधानां चावृता विशुद्धा च। सन्निविष्टज्ञेयाकारा प्रलीनाकारा निराकारा च, परिच्छिन्नार्थं प्रत्यवभासा चेत्यपरिणामभेदा"। वा० प० पृ०२१५

112 "परं तु पश्यन्तीरूपमनपभ्रंशमसङ्कीर्णं लोकव्यवहारातीतम्। तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेनाधिगम्यत इत्येकेषामगमः"। वा०प० पृ० २१४

113 तत्रैव पृ० २२०

114 प०ल०म०स्फो०नि०पृ०७१

कुण्डलिन्यां संस्कृतवायुप्रेरणेनाभिव्यज्यते, अस्यां वाचि स्पन्दशून्तत्वं पश्यन्त्यां तु स्पन्दसामन्यं मध्यमायां स्पन्दविशेषो जायते, अतः स्पन्दशून्या बिन्दुस्वरूपिणी निर्विकल्पकज्ञानविषया साक्षात्परब्रह्म स्वरूपा परावग् भवति तदाह भर्तृहरिः-

**"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥**[115]

अत्रत्यव्याख्यानं महत्तमं स्थानं धारयति तच्च यथा नागेशेन वाचश्चतुर्भेदाः स्वीक्रियन्ते हरिणा च त्रयः। आचार्यहरिस्तु पश्यान्त्या भागद्वयं विधाय परपश्यन्त्यास्तथाभूतामेव स्थितिं साधयति यथा च नागेशस्य परावाचः स्थितिः।

अत्र विद्वांसः प्रतिपादयन्ति यन्नागेशस्तान्तन्त्रदर्शनैः प्रभिवतः सन् तान्त्रिकीं व्याख्यामुपास्थापयत्। वस्तुतो नागेशस्य व्याख्यानं शब्दब्रह्मरूपतां साध्नोति परा वाचः, तथैव आचार्यभर्तृहरिरपि परपश्यन्त्या लोकव्यवहारातीत्वं निर्विकल्पकज्ञानविषयत्वं स्पन्दशून्यत्वं शब्दब्रह्म परपश्यन्तीपदेन साधयति। अत्र केषाञ्चन विदुषां मतमित्थमपि विद्यते, यदाचार्यभर्तृहरिरपि चतसृणां वाचां चर्चां करोति- 'त्रय्या वाचः परं पदमि'त्यस्य सम्बन्धं प्रथमया कारिकया सह संयोजयन्ति, अर्थात् त्रय्या वाचश्चर्चाऽत्र पुनश्च परमद्भुतं पदमनादिनिधनं ब्रहम तच्चाक्षरं शब्दतत्त्वं विद्यते। एवं रीत्या चतुर्विधत्वं व्यख्यायमानं भवति।

एतासां वाचां विषये हरिः कथयति त्रय्या भागस्तु मनीषिणां ब्राह्मणानां विदुषां वैयाकरणानां ज्ञानगोचरा, तत्रापि मनुष्यैर्व्यवहारविषये तुरीये भागे किञ्चिदेवास्याः स्वरूपं सर्वेभ्यो मनुष्येभ्यो व्यहारविषयतां याति। अन्यत्तु समान्यव्यवहारेणातीततत्त्वं व्याकरणस्य समध्ययनेन समुत्पन्नविशिष्टमनीषावतां विद्वन्मात्रसंवेद्यम्।[116]

---

[115] वा०प० १/१

[116] चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।ऋ०वे० १/१६४/४५

**शब्दप्रमाणम्-**

ज्ञातपदानां द्वारा पदार्थस्य स्मरणे सत्यसन्निकृष्टवाक्यस्यार्थज्ञानमेव शाब्दप्रमाणम्। द्विधा चैतत्प्रमाणं पौरुषेयापौरुषेयभेदात्। तत्राप्तपुरुषस्यवचनानि पौरुषेयाणि, अपौरुषेयाणि च वेदवाक्यानि। पुनश्च द्विधा सिद्धार्थविधायकत्वाभ्याम्। निश्चितार्थाभिधायि वाक्यं सिद्धार्थवाक्यम्, कस्यचित् कार्यस्य प्रेरकं वाक्यं विधायकवाक्यम्। उपदेशातिदेशाभ्यां विधायकवाक्यमपि द्विधा। सः एवं कुर्यादिति वाक्यमुपदेशवाक्यम्। दर्शपूर्णमासयागेनेष्टं भावयेद् इत्यतिदेशवाक्यम्।

**अद्वैतवादो व्याकरणस्य-**

शब्दब्रह्मवादिनस्तु (परावाग्) एव ब्रह्म तदेवाविद्यायां नानारूपेण भासते इति प्राहुः।[117] तत्त्वदीपिकाकारः साक्षाद् अद्वैतवादी हरिरिति प्रतिपादयति महाभाष्यं व्याचक्षाणो भगवान् भर्तृहरिरप्यद्वैतवादमेवा-भुपगच्छति।[118]

**भर्तृहरिशङ्कराचार्ययोरद्वैवादस्य तुलना-**

शब्दाद्वैतवादस्याभ्यान्तरे परा वागेवाद्वैततत्त्वम्, अद्वैतवेदान्ते च ब्रह्मतत्त्वमेव सर्वोच्चं परमार्थतत्त्वभूतं विद्यते। आचार्यभर्तृहरेश्शब्दतत्त्वं शाश्वतं त्रैकालाबाध्यत्वरूपं च विद्यते। तथैव अद्वैतवेदान्तिनामपि ब्रह्मतत्त्वं विद्यते। यथा भर्तृहरेः सांसारिकसृष्टौ विवर्तवादः[119] स्वीक्रियते, तथैवाद्वैत-वेदान्तिनोऽपि संसारं विवर्तत्वेन[120] स्वीकुर्वन्ति। तस्मादुभयोर्मते संसारोऽयं ब्रह्मणो विवर्तः, द्वयोश्च वादयोर्मते परमतत्त्वस्य भोक्तृरूपेण भोक्तव्यरूपेण भोगरूपेण चैकैव परब्रह्म जायते ततोऽन्यन्न किञ्चिदपि विद्यते।[121]

---

117 वा०प० १/१३२,भा०प्र०टी०

118 उमामहेश्वरकृत तत्त्वदीपिका

119 "अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥ वा०प०१/१

120 "अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः"। वे०सा०

121 "एकस्य सर्वबीजस्य यस्य चेयमनेकधा। भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः"।वा०प०१/४

शब्दाद्वैतवादे ब्रह्माद्वैतवादे चोभयत्राविद्ययैव ब्रह्मतत्त्वं नानारूपतां प्रयाति।[122]

एवं रीत्या बहुविधे साम्ये सत्यपि तत्र भेदस्तु तत्त्वमूलकः। द्वयोस्तत्त्वप्रतिपादने भेदः, एकत्र शब्दब्रह्मापरत्र ब्रह्ममात्रमेव। तस्माद्यदि तत्त्वविषयकचिन्तनं त्यक्त्वा अन्यद्विचारयामश्चेत् समानता तु दृग्गोचरायते। व्याकरणदर्शने शब्दब्रह्मणा सह तादात्म्यमेव जीवस्य मोक्षः, वैयाकरणानां मते मोक्षदशायामपि शब्दात्मनः स्थितिर्भवति।[123]

अद्वैतवेदान्ते जीवस्य ब्रह्मणा सह तादात्म्यमेव मोक्षः, मुक्तावस्थायां सच्चिदानन्दस्वरूपिणी ब्रह्मात्मकतायाः स्थितिः सम्पद्यते। शब्दाद्वैवादे वैयाकरणानां शब्दब्रह्म जगतः कारणं तु वर्तते किन्तु ब्रह्माद्वैतवन्नोपादानकारणम्।[124]

वस्तुतो विचारे कृते सति च परमत्त्वस्यैव भेदः समायात्युभयोर्मते तस्मान्मूले सत्तायां भेदो विद्यते।

आचार्यभर्तृहरेश्शब्दद्वैतवादः, शब्दं विना लौकिका पारलौकिकाश्च प्रवृत्तिनिवृत्ती न संभवतः। तस्माच्छब्दादेवेदं सर्वं प्रभवति। आचार्यशङ्करस्याद्वैवादे ब्रह्मतत्त्वमेव तेनैव सर्वविधं जगद्घटाद्यर्थाकारेण विवर्तते। अतोऽत्र ब्रह्मतत्त्वं शब्दतत्त्वात् साक्षाद्भिन्नमेव विद्यते। पुनश्चाविद्यामूलिका सृष्टिर्यथा शब्दाद्वैतवादे तथैव ब्रह्माद्वैतवादेऽपि।

**अद्वैतवेदान्तेऽपि ब्रह्मातिरिक्तसत्ताया अभावः-**

वेदान्तदर्शने घटादयः पदार्था मिथ्यात्वेन राजन्ते तस्मात् तत्र प्रमात्वं कथं सङ्गच्छेत यद्ब्रह्मणः साक्षात्कारो न भवति तावज्जागतिकपदार्थानां सत्ता भवति। यदा च ब्रह्मणः साक्षात्कारो जायते तदानीमेव लौकिकानां घटपटादीनां विषयाणां बाधो जायते, न तु संसारदशायां कदाचिदपि बाधो भवति। ' ब्रह्मसाक्षात्कारादनन्तरं हि घटादीनां बाधः। “**यस्तु सर्वमात्मैवाभूत्**

---

122 “विमर्श परावाक् एवब्रह्म तदेवाविद्यया नारूपेषु भासत”॥ इति प्राहुः वा०प०ब्र०का०भा०प्र० पृ०१११

123 “वैयाकरणमते शब्दब्रह्मणा तादात्म्यमेव जीवस्य मोक्षः, मोक्षेऽपि शब्दात्मनोपस्थितिरिति यावत् “॥ तत्रैव

124 अ०वे०, इ०सि० पृ०३४२

**तत्केन कं पश्येत्' इति श्रुतेः"।**[125] तस्मात् तत्त्वसाक्षात्कारस्य दशायां ब्रह्मज्ञाय सर्वमात्मस्वरूपमेव भवति, तस्यां परिस्थितावात्मातिरिक्तस्याभावे केनेन्द्रियेण कं पश्येत्। तस्माद्वैतदशायां विषयो विषयी जीव इत्यादयो भेदा भवन्ति, दशैषा संसारस्य, अतो व्यावहारिकसत्ताया विषयभेदास्तावदेव स्वीक्रियन्ते यावद् ब्रह्मणः साक्षात्कारो न- "**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति**"[126] तस्माद् भेदस्य दशायामेव जीवः प्रमाता सन् इतरभेदान् पश्यति। सति साक्षात्कारे लौकिकानां घटादीनां विषयाणां बाध एव भवति, किन्तु ब्रह्मसाक्षात्कारात् पूर्वमपि घटादीनां लौकिकानां पदार्थानाम् अबाधितत्वेन प्रमात्वं जायत एव। उच्यते हि व्यावहारिकसंसारस्य ज्ञानाय सर्वेऽपि पदार्था यथार्थत्वेन विषत्वेन स्वीक्रियन्ते यावद्ब्रह्मणः साक्षात्कारो न जायते तावत्तु तेषां विषयाणां सत्ता न बाध्यते तदुक्तम्—

**"देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।**

**लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्"॥**[127]

तात्पर्यमस्य यद्देह एव आत्मा इत्याकारकं ज्ञानं ब्रह्मसाक्षात्कारं यावदेव, ईदृशं च ज्ञानं प्रमाणत्वेन स्वीक्रियते तथैव लौकिकानां पदार्थानां ज्ञानमपि प्रमात्वेन स्वीक्रियते। तस्माद् 'आ आत्मनिश्चयात् प्राक् ब्रह्मसाक्षात्कारपर्यन्तं लौकिकं ज्ञानं जायत एव संसारदशायां द्वैतं भवतीव। प्रपञ्चोपादानभूतेनाज्ञानेन द्विचन्द्रादिदर्शनवत्।

प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। प्रत्यक्षप्रमाणस्य लक्षणं कुर्वन् कथयति, प्रत्यक्षप्रमाया करणं प्रत्यक्षप्रमाणमिति जानीमः। प्रत्यक्षप्रमा च चैतन्यमेव वेदान्तदर्शने वेदान्ते ब्रह्मातिरिक्तसत्ता कस्यचिदपि पदार्थस्य न भवति, तस्मात् "**सर्वं खल्विदं ब्रह्म, ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापर"** इत्यादयः श्रुतयः सङ्गच्छन्ते, तादृशस्य ब्रह्मणः साक्षाकारो भवति

[125] बृ०उ० ४/५/१५

[126] तत्रैव

[127] वे०प०

प्रत्यक्षं न तु परोक्षम्, यत् "**साक्षादपरोक्षाद् ब्रह्म**"[128] तस्मात् वेदान्तशास्त्रे प्रत्यक्षप्रमा चैतन्यमेव भवति चैतन्यातिरिक्तं किमपि नास्ति।

**इन्द्रियजन्यज्ञानेन ब्रह्मणो साक्षात्काराभाव एव-**

अत्र प्रत्यक्षज्ञानस्य प्रयोजकत्वं प्रतिपादयति वेदान्ते ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकत्वं दर्शयति- आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्यस्याभेद इति ब्रूमः[129] प्रमाणत्वेन वृत्तेर् ग्रहणम्। तेन वृत्तेरवच्छिन्नं चैतन्यं विषयावच्छिन्नचैतन्यमित्यनयोस्तादात्म्यमेव प्रत्यक्षस्य प्रयोजकम्। यद्युभयोरभेदश्चेद्भेदः कथम्? उपाधिकृतो भेदस्तत्र संभवति, चैतन्यं त्रिविधं भवति प्रमास्थले विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यम्। तत्र घटादिभिर्विषयैरवच्छिन्नस्य चैतन्यस्य विषयचेतनत्वम्, अन्तःकरणस्य वृत्त्याऽवच्छिन्नस्य चैतन्यस्य प्रमाणचेतनत्वम्, अन्तःकरणावच्छिन्नं चैतन्यं च प्रमातृचैतन्यम्। यथा तडागस्य जलं छेदान्निर्गत्य नालिकया गच्छत् सत् क्षेत्रस्य केदारेषु प्रविश्य तदाकाराकारेणाकारितं भवति तथैव तैजसमन्तःकरणमपि चक्षुश्रोत्रादीन्द्रियैः सह घटादीनां विषयाणां देशेषु गत्वा तदाकाकरितं भवति, तदाकाराकारित्वं परिणामः सैव वृत्तिः। वस्तुतः क्षेत्राकारेण परिणतं जलं तडागस्य जलाद्भिन्नं न भवति तथैव विषयाकाराकारितं मनो मुख्यमनसो भिन्नं न भवति। अतः आकारेषु जायमानोऽन्तःकरणस्य परिणाम एवान्तःकरणस्य वृत्तिः॥[130]

**घटादिषु प्रत्यक्षस्य प्रकारः-**

इन्द्रियविषययोः सन्निकर्षेऽन्तःकरणं शरीराद्बहिर्निष्कसति तदा 'अयं घटः' इति प्रत्यक्षप्रमायां घटादिविषयस्य तदाकाराकरिताया (घटाकारा) अन्तःकरणवृत्तेश्च एकस्मिन् स्थलेऽवस्थानत्वादुभयोरवच्छिन्नं चैतन्यमेकमेव यतोह्यन्तःकरणवृत्तिः घटादिविषयश्च इत्युपाधिद्वयम्, उपहिते भेदस्य

---

128 तत्रैव, ३/४/१

129 वे०प० पृ० ३७

130 तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति। तथैव तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते। स एव परिणामो वृत्तिरित्युच्यते। तत्रैव, पृ० ४१

कारणतायां सत्यामपि तयोरेकदेशे स्थितत्त्वात् भेदाभाव एव, अर्थात् समदेशे स्थितयोरुपाध्योर्भेदकरणसामर्थ्यं न भवति। अतएव घटाकाशस्य मठाकाशेन च सह् भेदो नास्ति प्रत्युताभेद एव[131] अत्र विवरणटीकाकारः कथयति- **“उपाधिः उपाधित्वेन उपधेयस्य चैतन्यस्य न भेद प्रयोजकः, अपि तु भिन्नदेशस्थितत्वेन। एकदेशस्थितत्वेन तु स एव अभेदस्य प्रयोजकः। एवञ्चात्र उपाध्योर्वृत्तिविषययोः एकदेशस्थितत्वात् उपधेययोश्चैतन्ययोर्न भेदव्यवहारः किन्तु अभेदव्यवहार एव”।**[132] अत एव 'अयं घटः' इत्यत्र घटाकाररवृत्तेर्घट-सम्बन्धे सति विषयस्य घटावच्छिन्नचैतन्यस्य, प्रमाणस्य घटसंयुक्तघटा-कारान्तःकरणवृत्त्यवच्छिन्नस्य चैतन्यस्य च एकदेशोपस्थितोपाधिद्वया-वच्छिन्नत्वेन अभेदादभिव्यक्तं घटावच्छिन्नचैतन्यं घटप्रत्यक्षमित्युच्यते।

**प्रत्यक्षस्य प्रयोजकम्-**

विषयगतस्य प्रत्यक्षज्ञानस्य प्रयोजकत्वं किमिति चेत् तत्र प्रमात्रा सह् घटादिविषयाणामभिन्नत्वमेव नान्यत्किमपि विनिगमकं तत्र।

प्रश्नस्स्यात् कदाचित् यत्कथमिव प्रमातृप्रमेययोरभेद इति, तेन प्रमात्रभेदो नाम न तदैक्यं किन्तु अन्तःकरणावच्छिन्नचैतन्यरूपप्रमातुः सत्तायाः भिन्ना घटादिविषयाणां सत्ताया अभाव एवात्राभेदत्वेन विविक्षितः। घटादिविषयैरवच्छिन्ने चैतन्ये घटादिविषयाणामध्यारोपाद् (अध्यासात्) विषयचैतन्यसत्ता एव घटादिविषयाणां सत्ता विद्यते। वेदान्तिनयेऽधिष्ठान-सत्तातः आरोपितसत्ता भिन्ना न जायते इति सिद्धान्तः, यथा शुक्तिरूपाधिष्ठानसत्तयाऽऽरोपिता रजतस्य पृथक् सत्ता नास्ति, शुक्तेः सत्तयैव शुक्तिः रजतवत् प्रतीयमाना भवति। अतः प्रमातृचैतन्यमेव विषयचैतन्यम्, प्रमातृचैतन्ये घटादिविषयाणामधिष्ठानतायाः सत्वात्, प्रमातृसत्तैव घटादिसत्ता तस्यां सत्तायां च भिन्नत्वं न। एवंरीत्या घटादीनां विषयाणामपरोक्षत्वं साध्यतेऽर्थात् प्रत्यक्षत्वम्।

---

131 “विभाजकयोरप्यन्तःकरणवृत्ति-घटादिविषययोरेकदेशस्थत्वेन भेदाऽजनकत्वात्”। तत्रैव पृ० ४१

132 तत्रैव पृ० ४१

**इन्द्रियजन्यत्वं प्रत्यक्षे न प्रयोजकम्–**

वेदान्तिनः प्रत्यक्षज्ञानं न इन्दियजन्यत्वमिति तत्र हेतुः पूर्वमेव प्रादर्शि। नैयायिकाः कथयन्ति यच्छब्दैः परोक्षज्ञानमेव दीयते तन्न दूषितत्त्वादत्र पूर्वमेव प्रतिपादितं यद् अन्तःकरणावृत्त्यवच्छिन्नं चैतन्यं बहिर्विषयचैतन्यदेशं गत्वा ज्ञानं जनयति तत्र चोभयोश्चैतन्ययोरभेद एव।[133]

**सोऽयं देवदत्तः इति वाक्यस्य ज्ञानप्रकारः**। आदौ सोऽयं देवदत्तः इति ज्ञानस्य प्रकारं पश्यामः, तद्वदत्येतस्य वाक्यज्ञानस्य विषयः सन्निकृष्टः समीपे विद्यतेऽत एवम्भूते ज्ञाने बहिर्निस्सृतामन्तःकरणवृत्तिं स्वीकुर्मः। एतस्मादेव वाक्यजन्यज्ञानस्य विषयस्य समीपत्वात् सन्निकृष्टविषयमुद्दिश्यान्तःकरण-वृत्तिर्बहिर्निस्सरति, वेदान्तिनामेवम्प्रकारकस्य सिद्धान्तस्य सत्त्वादेव देवदत्तावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्य चाभेद एव।[134] अर्थाद्विषया-वच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्यस्याभेद एव, अत्र च विषयावच्छिन्नं चैतन्यं देवदत्तः, विषयाकारवृत्त्यवच्छिन्नं चैतन्यमिति लौकिके विषये।

**तत्त्वमसीति निर्विकल्पकमपि ज्ञानं शब्दद्वारैव भवति—**

'सोऽयं देवदत्तः' इत्यस्य बोधं कारयति, वाक्यद्वारा तद्वाक्यज्ञानं प्रत्यक्षमेव, वैदिकेषु महावाक्येषु न तावत्तथा संभवति तत्प्रतिपद्यतेऽत्रानयैव रीत्या 'तत्त्वमसि' इत्यस्य वाक्यजन्यज्ञानस्य विषयः सन्निकृष्ट एव विद्यते, तत्त्वंपदयोर्लक्ष्यार्थश्चैतन्यं तादृशज्ञानस्य विषयः, वाक्येन चान्तःकरणवृत्ति-र्जायते, इति सिद्धान्तस्य सत्त्वादेव लक्ष्यचैतन्यस्य वृत्यवच्छिन्नचैतन्ययोरभेद एव। एवम्भूतस्याभेदस्य सत्त्वादेव, तत्त्वमसीति महावाक्यज्ञानस्य प्रत्यक्षत्वम्। 'तत्त्वमसी'ति महावाक्यस्य श्रवणे सति सर्वज्ञत्वाल्पज्ञत्वकर्तृत्वाकर्तृत्वादि-विशिष्टवस्तुना सहाभेदबोधो न जायते।

---

133 "न हि इन्द्रियजन्यत्वं प्रत्यक्षे तन्त्रं दूषितत्त्वात्।किन्तु योग्यवर्तमानविषयकत्वे सति विषयचैतन्याभिन्नत्वमित्युक्तम्"।

134 "सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तवच्छिन्न वृत्त्यवच्छिन्नचैतन्ययोरभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम्"॥तत्रैव पृ० ७९

अत्र कारणमिदमेव यत्परस्परविरुद्धधर्मयोस्तत्त्वंपदयोरैक्यासम्भवात्। विरुद्धयोर्धर्मयोरैक्याशक्यत्वमेव। एतद्विपरीतं तत्त्वंपदयोर्लक्ष्यार्थयो-श्चैतन्ययोस्सन्निकृष्टत्वमेव, अत एव तत्त्वससीति वाक्यद्वारा जायमानाया अन्तःकरणवृत्तेः स्वीकारे न किमपि बाधकतत्त्वम्। अतो हेतोरेव लक्ष्यचैतन्यं वृत्त्यवच्छिन्नचैतन्यम् इत्यनयोरेकदेशस्थितत्त्वादुपाधि-द्वयावच्छिन्नत्वम्। समानदेशे उपाधिद्वयावच्छिन्नत्वेनभेदाभाव एव। उभयोश्चैकत्वादेव तत्त्वमसीति वाक्यजन्यज्ञानस्यापि प्रत्यक्षत्वमेव। ज्ञानेऽस्मिन् प्रमातुरेव विषयत्वम्, प्रमातृपदं तत्त्वमिति पदम्, लक्ष्यभूतचैतन्यं विषय इति, अतो विषयचैतन्यस्य वृत्तिचैतन्यस्य चैकत्वादैक्यमेव।[135]

अत्रैकया शङ्कया भूयते यत् तत्त्वं पदाज्जायमानं लक्ष्यभूतं ब्रह्म शास्त्रजन्यज्ञानस्य विषयः एवमुक्ते सति विज्ञातारमरे केन विजानीयाद् इत्यादिश्रुतीनां का स्थितिर्वर्तते?

श्रुतिश्च विज्ञातुः फलव्याप्यत्वस्य निराकरणं करोतो नतु वृत्तिव्याप्यत्वस्य। पञ्चदश्याः वचनं वेदान्तसारे समुद्धरति-

**"फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्।**

**ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता"॥**[136]

**फलव्याप्यत्ववृत्तिव्याप्यत्वयोः स्पष्टीकरणम्-**

इन्द्रियसन्निकर्षत्वादन्तःकरणस्य घटादिविषयाकारवृत्तेरुत्पन्नायां सत्यां तस्यां चैतन्यं प्रतिबिम्वते, तच्चैतन्यं फलमित्युच्यते। चैतन्यप्रतिबिम्बेन युक्ता वृत्तिः, विषयं व्याप्नोति, एतस्मात् कारणात् तया वृत्त्या सह फलरूपचैतन्यस्यापि व्याप्तिः सिद्धा भवति। इत्थम्भूते सति घटादिजडविषयाणां फलव्याप्यत्वं विद्यते किन्तु तादृशं फलव्याप्यत्वं ब्रह्मणि न संभवति, कारणं ब्रह्म साक्षाच्चैतन्यं विद्यते। एतस्मात् कारणाद् वृत्त्या सह संस्थीयमानं चैतन्यमपि चिद्रूपब्रह्मणि काथञ्चिकमपि अतिशयत्वं न जनयति, अपरमपि ब्रह्मणि फलव्याप्यत्वस्वीकारात् ब्रह्मण्यपि जडत्वं समापतेत्, कारणं जडे एव फलव्याप्यत्वसम्भवात्, जडसाक्षात्कारायैव फलव्याप्तेरपेक्षितत्त्वात्। तत्त्वमसीति वाक्यस्य श्रवणे सति जायमानया वृत्त्या ब्रह्मणो व्याप्तत्वे न

---

135 "एवं तत्त्वमसि इत्यादिवाक्यजन्यज्ञानस्यापि। तत्र प्रमातुरेव विषयतया तदिभयाभेदस्य सत्त्वात्"। तत्रैव

136 प० द० उद्धृतम्, वे०स० पृ०१४८

कश्चिदपि दोषः। प्रत्युत कस्यचित् पदार्थस्याज्ञाननिवृत्तिं विना तस्य भानं(ज्ञानं) न जायते, अज्ञाननिवृत्तिश्चान्तःकरणवृत्त्या जायते। तस्माद् ब्रह्मविषयकाज्ञाननिवृत्तये वृत्तिव्याप्तिः स्वीक्रियते एव। तस्मात् पदार्थज्ञानस्याज्ञाननिवृत्तिरज्ञाननिवृत्तिश्चान्तःकरणवृत्तिद्वारा।

**वाक्येन सविकल्पकज्ञानस्य भ्रमः –**

वाक्यजन्यज्ञानेनैव ब्रह्मणोऽपि बोधो जायत इति प्रतिपाद्यत्वात् पूर्वपक्षिणा शङ्केयं समुत्थाप्यते, यद्वाक्यज्ञानं पदार्थानां संसर्गपूर्वकं जायते तत्र च संसर्गादिभी रहितस्य निर्विकल्पकस्य ब्रह्मणो बोधो जायतां कथम्?[137]

'सोऽयं देवदत्तः' इत्यादिभिर्वाक्यैर्जन्यं ज्ञानं निर्विकल्पकं ज्ञानं नास्ति, संसर्गस्य-अवगाहनत्वात्, संसर्गमाश्रित्यैव प्रवर्तते। यथा 'गामानय' इत्यादिवाक्येन यथा ज्ञानं जन्यते, तद्यथा 'आनय' इति क्रियापदस्य प्रयोगात् तत्र त्वमित्यस्याभेदेन कर्तृत्वेन च सम्बद्धात् 'गो' इत्यस्य च कर्मत्वेनान्वयात्, त्वदभिन्नैककर्तृकगोकर्मकानयनम् इत्याकारकशाब्दबोधस्य सत्त्वात् संसृष्ट-वाक्यार्थत्वम्।

वाक्यजन्यज्ञाने पदार्थज्ञानस्य कारणता जायते, पुनश्च पदार्थानामपि संसर्गः कर्तृत्वाद्युपयुक्ततत्वेनान्वयपुरस्सरं विषयीकरोति। 'डित्थोऽयम्' "श्यामोऽयम्' 'छात्रोऽयम्' इत्यादिषु सविकल्पकज्ञानस्य सत्वान्न निर्विकल्पकं सम्भवति वाक्यैः। एवम्भूतायां परिस्थितौ निर्विकल्पकं ज्ञानं कथं वक्तुं पार्यते वाक्यजन्यज्ञानम्।

**वाक्यजन्यज्ञाने पदार्थसंसर्गस्य निरासः-**

अत्रत्यव्याख्याने वाक्यजन्यं ज्ञानं सविकल्पकमेव इत्यस्य निरासो युक्त्या क्रियते। वाक्यजन्यज्ञानस्य निर्धारणायां सत्यां यदि पदार्थसंसर्गस्यैव निमित्तत्त्वं तेन तज्ज्ञानं न निर्विकल्पकं स्यात्। वस्तुतः पदार्थसंसर्गविषयत्वं न वाक्यजन्यज्ञाने प्रयोजकं नो चेद् अनीप्सितस्यापि वाक्यजन्यत्वापत्तिस्यादेव 'सैन्धवमानय' इत्यादिषु।[138] भोजनकाले 'सैन्धवमानय' इति प्रयोतव्ये सति लवणस्यानयनं सम्भवति किन्तु हयादिसंसर्गस्यापि वाक्यजननत्वं प्राप्यते एव।

137 "ननु वाक्यजन्यज्ञानस्य पदार्थसंसार्गावगाहितया कथं निर्विकल्पकत्वम्"? तत्रैव पृ०८१

138 "उच्यते वाक्यजन्यज्ञानविषयत्वे हि न पदार्थसंसर्गत्वं तन्त्रम्। अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः"। तत्रैव पृ०८२

तस्माद्भोजने सैन्धवपदेन लवणस्यैवानयनं क्रियते न अश्वस्य, अश्वकर्मकस्यानयनस्य प्रयोक्तुर्भोजनकालेऽनभीष्टत्वात्, तस्मात् पदार्थसंसर्गमात्रं न वाक्यजन्यज्ञानस्य प्रयोजकम्।

**वाक्यजन्यज्ञाने तात्पर्यज्ञानस्य प्रयोजकत्वम्-**

वाक्यजन्यज्ञानस्य विषयो वक्तुस्तात्पर्यस्य विषय एव।[139] तच्च तात्पर्यविषयत्वं पदार्थानां संसर्गोऽस्तु न वा, एवम्भूतस्य विचारस्यावश्यकता न भवति। यथा 'सोऽयं देवदत्तः' इत्यत्र वक्तुस्तात्पर्यं देवदत्तस्य देहे (तस्य देहः) सत्वात् तात्पर्यस्याविषयभूतपदार्थसंसर्गस्य वाक्यजन्यज्ञानविषये प्रयोजकता न भवति।

उपरितनेन विवेचनेनैव 'तत्त्वमसीति' वैदिकमहावाक्यस्य तात्पर्यमद्वितीये विशुद्धे चैतन्ये (ब्रह्मणि) विद्यते। अयं च निश्चय उपक्रमोपसंहारादिभिर्लिङ्गैः सञ्जायतेऽत एव वाक्यजन्यज्ञाने पदार्थसंसर्गोऽविषयत्वमेव। यतोहि एवम्भूतेषु वैदिकवाक्येषु पदार्थसंसर्गः कारणतां नोपयाति। तात्पर्यविषयकत्वेन वाक्यजन्यज्ञानेन निर्विकल्पकं ज्ञानं कार्यते। अत्र वैदिकोदाहरणेन प्रबोधयति- **"सदेव सौम्येदमग्र आसीत्"**[140] इत्युपक्रम्य **"तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो"**[141] इत्युपसंहारद्वारा तत्त्वमसीति वाक्यस्य तात्पर्यमद्वितीये विशुद्धे ब्रह्मणि निश्चीयते। अत एव तात्पर्यस्याविषयं संसर्गं न बोधयति, तस्मात् पदार्थसंसर्गता नैवम्भूतेषु वाक्येषु सङ्गच्छते।

संसर्गस्याविषयत्वयथार्थज्ञानजनकत्वमेवतत्त्वमस्यादिवाक्यस्याखण्डार्थत्वम्। **"अखण्डार्थत्वं नाम संसार्गानवगाहियथार्थजनकत्वम्**।[142] **प्रातिपदिकार्थमात्रपरत्वमखण्डार्थत्वम्"**।[143] पदार्थसंसर्गविषयराहित्यमेव महावाक्यानां सम्बोधं कारयितुं प्रभवतीति चित्सुखाचार्यः।[144] तस्माद्वाक्यैरेव निर्विकल्पकं ज्ञानं जायते नान्यथा।

---

139 तात्पर्यविषयत्वम्॥तत्रैव

140 छा० उ०६/२/१

141 तत्रैव, ६/८/७

142 तत्रैव पृ०८४

143 तत्रैव

144 "संसर्गासङ्गि सम्यङ् धी हेतुता या गिरामियम्।उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता"। तत्रैव

**वाक्यजन्यज्ञानस्यैव प्रत्यक्षत्वम्-**

'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानमुत्पद्यते।[145] दशमस्त्वमसि इत्याकरकस्य ज्ञानस्य विषयस्य सन्निकृष्टे सति तद्विषयकवाक्याज्जायमानो बोधः प्रत्यक्षमेव इत्येव वेदान्तिनां सिद्धान्तः। यतोहि दशमस्य प्रत्यक्षत्वेऽपि तस्य तावन्न बोधो जायते यावच्च वाक्यैर्न बोध्यते, वाक्यस्य बोधात्परमेव तस्य ज्ञानं जायते ज्ञात्वा च हृष्यत्येव तस्मान्न बाधकं किमपि वाक्यस्य प्रत्यक्षत्वे। तस्मान्नैयायिकानां कथनमपि निरस्यतेऽनेन यच्छब्दस्तु परोक्षजनस्वभावो भवति, इति जिज्ञासायां सत्यां 'दशमस्त्वम्' इति ज्ञानमपरोक्षमेव, न परोक्षत्वमीदृशस्य ज्ञानस्य। अन्यथाऽपरोक्षस्य भ्रमस्याऽनिवृत्तेः। सिद्धान्तोऽयं यदपरोक्षज्ञानमेव भ्रमस्य निवर्तकं भवति तदाह पञ्चदश्याम्-

**"न मृतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा।**
**परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत्॥**
**त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः।**
**अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति"॥**[146]

अत इन्द्रियाणां सत्त्वेऽपि आप्तज्ञानश्रवणात्पूर्वं न कस्यापि ज्ञानं तावदभवति॥ अतो वाक्यस्यश्रवणानन्तरमेव दशमस्त्वमसीति ज्ञानस्य प्रत्यक्षत्वं तथैव 'तत्त्वमसी'ति ज्ञानस्य प्रत्यक्षत्वं वाक्याज्जायमानां सत् प्रत्यक्षब्रह्म एवानुभावयति।

**कल्याणसाधकवाक्येन ब्रह्मप्राप्तिः-**

हितस्य साधनां यत्करोतीति तदेव शास्त्रं भवति तस्मात् कल्याणसाधकं ब्रह्म प्रतिपादकं वाक्यमपि शास्त्रम्।[147] अतो वेदान्तवाक्यैर्ब्रह्मस्वरूपं प्रतिपाद्यते एव।

---

[145] वे०प० पृ०४८

[146] प०द० उद्धृतम्,वे०प०पृ० ४८

[147] "हितसाधनादपि शास्त्रत्वोपपत्तेः"। स०द० सं पृ०६८०

ब्रह्मणः स्वरूपप्रतिपादनस्य प्रयोजनं वेदान्तवाक्यश्रवणात् परं मनननिदिध्यासादिके सति अद्वितीयात्मनोऽभ्यासस्तेन विद्योदयस्तेन संसारहेतुभूताया अविद्याया नाशस्ततो ब्रह्मस्वरूपत्वमेव परमपुरुषार्थः शास्त्रवाक्यानां मुख्यार्थबोधस्योपयोगो विद्यत एव। आनन्दस्य साक्षात्कारात् फलरूपत्वेनाविधानं वाक्यानाम्। 'आनन्दो ब्रह्म' स्वरूपपरं वाक्यम्,तस्मास्वरूपप्रतिपादकानि वाक्यानि न विधायकानि। वेदान्तवाक्यानामविधायकत्वमेव **अर्हे कृत्यतृचश्च**[148] इत्यनेन श्रोतव्यो द्रष्टव्य इत्यादीनां श्रुतिवाक्यानामर्थोऽर्हता योग्यता वा यतोहि सिद्धे ब्रह्मणि स सङ्गच्छते विधायकता, एवम्भूतस्य व्याख्यानस्य फलस्वरूपं वाक्यानि यथा 'श्रोतव्यो मन्तव्यो' इत्यादीनां श्रवणस्य योग्यं मननस्य योग्यमित्यादिष्वस्थलेऽपि तथैव बोध्यम्।[149] तस्माद् ब्रह्मसिद्धौ प्रमाणमागम एव, तस्मादागमद्वारैव ब्रह्म प्रतिपादनं सम्भवति,तस्माच्छास्त्राणां विषयं ब्रह्म

**वेदान्ते तात्पर्यम्-**

वेदान्ते तात्पर्यस्य स्वरूपमित्थं विद्यते- "**तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्**"[150] वाक्ये वक्तुर्विवक्षितार्थस्य ज्ञानं या कारयति तादृशी योग्यतैव तात्पर्यम्। यथा 'गृहे घटः' इत्यस्य वाक्यस्योच्चारणे सति वक्तुस्तद्वाक्यस्यार्थज्ञानं भवतु न वा किन्तु तस्मिन् वाक्ये गृहघटयोराधाराधेयभावसंबन्धस्य ज्ञानकारयित्री योग्यता तु भवत्येव।

तस्मादेव श्रोतुर्विवक्षितार्थस्य ज्ञानं जायते। तस्माद्वाक्ये गृहघटयोराधाराधेयभावस्य सम्बन्धस्य बोधयितुं या योग्यता तस्य ज्ञानमेव तात्पर्यज्ञानम्। एवम्भूतेन तात्पर्यज्ञानेनैव सर्वत्र शाब्दबोधो जायते, तात्पर्यनिश्चयश्च तद्वाक्यर्थप्रतीतेरन्वयव्यतिरेकाभ्यां जायते। यथा गेहे घट इत्युच्चार्यमाणे सति गृहघटयोरेव सम्बन्धस्य ज्ञानं भवति न तु गृहपटयोर्वा

---

148 अष्टाध्यायी ३/३/१६९

149 "तस्माज्ज्ञातव्य इत्यादीनामविधायकत्वात् 'अर्हे कृत्यतृचश्च' इति कृत्यप्रत्ययानामर्हार्थे विधानादर्हार्थतैव व्याख्येया। तथा च सर्वेषां वेदान्तवाक्यानामुपक्रमोपसंहारादिषड्विधतात्पर्योपेतत्त्वात् नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मपरत्वमास्थेयम्"। तत्रैव पृ० ६८२

150 वे,प०पृ२४७

सम्बन्धस्य[151] ज्ञानं भवति। वाक्यस्य तात्पर्यमेतस्मिन्नेवार्थे विद्यते इति निश्चितरूपेण ज्ञायते।

**सैन्धवमानयेत्यस्य विश्लेषणम्-**

एतस्य वाक्यस्य प्रयोगे सत्येककालावच्छेदेन लवणानयनस्य कृते यथा योग्यता, तथैव अश्वादिसंसर्गस्यापि स्वरूपयोग्यता भवति, तेन सम्मोहः स्यादित्याशङ्का चेत् प्रतिपादयति-

तात्पर्यस्य लक्षणे विवक्षितार्थाद्भिन्नार्थस्य प्रतीतेरिच्छया तदनुच्चरितत्त्वमिति विशेषणस्य निवेशनात् तत्र स्वरूपयोग्यतया वर्तमानस्य पदार्थस्य बोधाप्रसङ्ग एव। **"तदितरप्रतीतीच्छयाऽनुच्चरितत्त्वस्यापि तात्पर्यं प्रतिविशेषणात्"।**[152] तस्माद्येषां वाक्यानामुच्चारणं यत्तात्पर्यमादाय क्रियते तद्वाक्यं तादृशमेव वाक्यार्थं जनयति नान्यथा। यद्यपि सैन्धवमानय इत्यादेषु वाक्येषूच्चतितेषु सत्सु यादृशी लवणकर्मकानयनाय योग्यता तादृशी एव अश्वकर्मकपदार्थानयनाय योग्यता योग्यतयोः समत्वात्तत्र वक्तुस्तत्तात्पर्यं लवणकर्मकानयनायैव भवति, प्रतीतेच्छाया अनुच्चरितत्त्वात्मकं तात्पर्यमेव कारणम्। तस्माच्च लवणकर्मकानयनस्यैव बोधो जायते, न तु अश्वकर्मकस्यानयनस्य। तत्र च लोके प्रकरणादिकं नियामकं भवति, प्रकरणत्वादपि तत्र यथोचितो व्यवहारविधानं विधीयते। एवम्प्रकारस्य तात्पर्यविषयकस्य निर्धारणे सति तत्र पुनश्शङ्का सञ्जायते यच्छुकसारिकादयोऽव्युत्पन्ना वा वाक्यस्योच्चारणे सति तथाभूतामिच्छां न धरन्ते, येनैतेन वाक्येनैवम्भूतस्यार्थस्य प्रतीतिस्स्यात्, तद्भिन्नार्थे वा, तेषु तत्प्रतीतेच्छाया अभावात्।

अत्रोच्यते यच्छुकसारिकादिष्वव्युत्पन्नेषु चोच्चारणकाले' एतद्वाक्यममुमर्थं बोधयेत्, एतभिन्नमर्थं वाबोधयेत्, इतीच्छाया अभावः, श्रोताऽप्यमुमर्थं तद्भिन्नार्थं वा जानीयादेवमपीच्छाया असम्भवात्। वाक्ये तु विशिष्टार्थस्य बोधनाय योग्यता भवत्येव तस्मात्तात्पर्ये न दोषः। 'सकृदुच्चरितः

---

[151] "गेहे घट इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यम्, नतु पटसंसर्गप्रतीतिजननयोग्यमिति वाक्यं घटसंसर्गपरम्,न तु पटसंसर्गपरमित्युच्यते"। तत्रैव

[152] तत्रैव पृ० २४९

शब्दः सकृदेवार्थं जनयति' इति नियमस्य सत्त्वात् सैन्धवमानय इत्यादिषु अनेकार्थत्वस्वीकरणं न वरम्, 'अन्यायश्चानेकार्थत्वम्' उपयुक्तवाक्येन कथं लवणाश्वयोरुभयथा प्रतितिविषयता। एतस्य समाधानाय कथ्यते यन्नैवम्भूतो नियमोऽस्माभिस्स्वीक्रियते।

वक्त्रा वाक्यं सकृदुच्चरितं भवति श्रोता च वक्तुस्तात्पर्यमवबुध्य वाक्यं मनस्यावर्तते, तथापि प्रथमक्षणे वाक्यश्रवणानन्तरं लवणपदार्थस्यैव तदन्वश्वपदार्थस्य प्रतीतिर्जायते। अतः पूर्वोक्तनियमेन सह न विप्रतिपत्तिः। तस्मान्निकृष्टलक्षणं तात्पर्यस्य- तत्प्रतीतिजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्त्वम्। विशिष्टार्थस्य बोधनाय स्वरूपयोग्यतायाः सत्वादपि स्वरूपयोग्यताया भिन्नार्थस्य प्रतीतेरिच्छया वाक्यस्योच्चारणम्।

**तात्पर्यस्यावच्छेककत्वम्**

वेदान्तशास्त्रे शक्तिरेव कारणत्वमुपयाति शाब्दबोधे तस्मादर्थप्रतीतिजननयोग्यताया अवछेदकत्वं शक्तेरेव नान्यस्य। तस्मात् सर्वत्र शाब्दबोधस्य कारणताया अवच्छेदिका शक्तिरेव। अर्थाच्छब्दे विशिष्टशक्तित्वात् विशिष्टार्थबोधनाय योग्यता भवति। सैन्धवमानय इति वाक्यं यदा लवणप्रतीतेच्छयोच्चरितं स्यात् तदात्वे तु लवणप्रतीतेच्छयोच्चरितत्त्वं कारणतावच्छेदकम्,

यदा च लवणाप्रतीतेच्छयोच्चरितत्वं वाक्यं तदा तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वम्, इत्यादिभिन्न-भिन्नावच्छेदकत्वस्वीकारे गौरवाख्यो दोषः समापतेत्, तदपेक्षया शक्तिरेव कारणताया[153] अवच्छेदिका वेदान्तशास्त्रे शाब्दबोधस्थले।

---

153 "उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः,अस्माकं मते तु सर्वत्र कारणतायाः शक्तेरेवावच्छेदकत्वान्न कोऽपि दोषः"।तत्रैव पृ० २५३

**तात्पर्यनिर्धारणम्-**

तात्पर्यस्य निर्धारणं वेदवाक्येषु मीमांसाद्वारा परिशोधितैर्न्यायवाक्यैर्जायते, लौकिकवाक्येषु च प्रकरणादिना[154] तात्पर्यस्य निर्धारणं भवति। प्रकरणादिकस्य व्याख्यानं भर्तृहरिणा कृतं विद्यते-

**"अर्थात् प्रकरणाल्लिङ्गादौचित्याद्देशकालतः।**

**शब्दार्थास्तु विभिद्यन्ते न रूपादेव केवलात्"॥[155]**

प्रयोजनम्, प्रकरणम्, शब्दसामर्थ्यात्मकं लिङ्गम्, औचित्यम्, देशः कालश्च। इत्येतानि लोके सन्ति तात्पर्यावधारकतत्वानि, एभिरेव सम्मोहात्मकस्थले तात्पर्यार्थस्य निर्धारणं क्रियते।

शाब्दबोधस्थले तात्पर्यज्ञानस्य विषये विशिष्टं व्याख्यानं किं शाब्दबोधे तात्पर्यज्ञानं कारणतामुपयाति न वा तदा यत्रत्यस्थले वाक्यार्थबोधेऽयमेवार्थोऽपरो वा इत्याकारा प्रतीतिस्तत्र शाब्दबोधे तात्पर्यस्यावश्यकता जायते तात्पर्यं तत्रत्यं भ्रमं निस्सार्य वाक्यवोधं कारयति। किन्तु यादृशेषु स्थलेषु वाक्यार्थबोधे तथाभूतो संशयो नास्ति तत्र तात्पर्यज्ञानस्य कारणता नैवावधार्यते, न कश्चिदेवंभूतो नियमो यद्वारा तात्पर्यज्ञानस्य सर्वत्र शाब्दबोधे कारणता स्यात्।

**सिद्धार्थबोधकत्वे शब्दानां प्रामाण्यम्-**

लौकिकार्थबोधनाय यथा कार्यशब्दानां प्रामाण्यं जायते तथैव सिद्धार्थबोधकत्वेऽपि वेदान्तवाक्यानामपि प्रामाण्यं जायते, ब्रह्मणि[156] च वेदान्तवाक्यानामेव प्रामाण्यं भवितुमर्हति नान्यथा।

**आगमविभागः-**

आगमो द्विधा पौरुषेयापौरुषेयभेदात्। पौरुषेयत्वञ्च पूर्वसर्गसिद्धि-वेदानुपूर्वीसमानानुपूर्वीकत्वम्। ईश्वरः सृष्ट्यारम्भे पूर्वकल्पे सिद्धमनुक्रममेवा-नुसृत्य तयैवानुपूर्व्या अक्षरमात्रपरिवर्तनं विना रचनां कृतवान्।अर्थात्

---

[154] "तच्च तात्पर्यं वेदे मीमांसा परिशोधितन्यायादेवावधार्यते, लोके तु प्रकरणादिना"। तत्रैव पृ० २५६

[155] वा०प० वा० का०

[156] वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम्। वे०प०पृ० २५८

पूर्वकल्पे विद्यमानस्य वेदस्य कल्पेऽस्मिन्नपि तथैव तदक्षरैरेवाभिव्यक्तित्वात्तत्रापौरुषेयत्वम्।[157]

### अपौरुषेयत्वम्-

यत्र सजातीयोच्चारणं विना विजातीयानुपूर्वीकमुचारणं भवति तस्यापौरुषेयत्वम्। तस्मात् शब्दो द्विधा, लौकिकः शब्दः पौरुषेयः, वैदिकः शब्दोऽपौरुषेयः।

### वेदान्तस्य प्रयोजनम्-

यदवगतं सत्स्ववृत्तितयेष्यते तत्प्रयोजनम्। मुख्यगौणभेदात्। सुखस्य साधनं यागादिकं दुःखपरिहारसाधनं प्रायश्चित्तादिकं गौणसुखम्। मुख्यं सुखमपि द्विधा सातिशयनिरतिशयभेदात्। व्यावहारिकविषयसंसर्गेण जायमानं सुखं सातिशयं तत्रात्मानन्दस्यांशः आविर्भवति। यतोहि व्यावहारिकविषयजन्ये सुखे न्यूनाधिक्यभावो भवति[158] निरतिशयं सुखं तु ब्रह्मैव ब्रह्मप्राप्ततावेव निरतिशयस्य सुखस्य प्राप्तिर्जायते।[159] तस्माद्ये सांसारिका सातिशयस्य सुखस्य कृते प्रयासरता भवन्ति तेषां जननमरणादिकमनवरतं प्रचलति 'पुनरपि जनं पुनरपि मरणं पुनरपि जननीजठरे शयनम्' इति शङ्कराचार्यस्य कथनं तेषां विषये। किन्तु निरतिशयसुखस्याभिलाषुकाः तादृशं सुखमनुभूय जननमरणलक्षणसंसारान्मुक्ता सन्तो मोमुद्यन्तेतमाम्।

### मोक्षस्य स्वरूपम्-

आनन्दात्मकब्रह्मावाप्तिः मोक्षः शोकनिवृत्तिश्च।[160] निरतिशयसुखात्मिका ब्रह्मप्राप्तिरेव मोक्षः, तस्मादानन्दात्मकब्रह्मणः प्राप्तिः सर्वविधदुःखानां निवृत्तिश्च मोक्षपदेन व्यवह्रियते।[161] ब्रह्मणो वेत्ता ब्रह्मज्ञाने सति ब्रह्मैव भवति, ब्रह्म ज्ञात्वा च शोकानलसंततं भवसागरमपि तरति।[162] मोक्षश्च

---

157 तथा व सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धि-वेदानुपूर्वीसमानुनुपूर्वीकं वेदं विरचितवान्, न तु तद्वजातीयम्।तत्रैव, पृ २६५

158 "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति"। बृ०उ० ४/३/२

159 "आनन्दो ब्रह्म इति व्यजानात्" तै०उ० ३/६

"विज्ञानमानन्दं ब्रह्म", बृ०उ० ३/९/२८

160 वे०प० पृ० ३८२

161 "ब्रह्मवेद ब्रह्मैव भवति"। मु०उ० ३/२/९

162 "तरति शोकमात्मवित्"। छा०उ० ७/१/३

कथं लभ्यते तत्प्रतिपत्तये तदुपायभूतत्वेन ज्ञानं प्रतिपादयति। ज्ञानद्वारैव मोक्षो [163]साध्यते, ज्ञानातिरिक्तः कश्चिदपि तादृशो मार्गो नास्ति येन तदवगतिस्स्यात्। वेदेषु विद्यते यत्- 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति तत्र भवगवत्याश्श्रुतेर्निर्देशो विद्यते ज्ञानस्य विषयश्च क इति जिज्ञासायां सत्यां तस्य ज्ञानस्य स्वरूपमित्थं प्रतिपादयति ब्रह्मात्मैक्यमेव[164] तज्ज्ञानस्य विषयः।

तस्मात् 'तत्त्वमसि' इति वाक्याज्जायमानं ज्ञानमेव मोक्षसाधनम्। तादृशं ब्रह्मात्मैक्यस्य गोचरं वाक्यमपरोक्षं[165] ज्ञानमेव कारयति, अपरोक्षं नाम प्रत्यक्षम्। यतोहि व्यावहारिकदशायामपरोक्षतायाः सत्त्वात् भ्रमस्य निवृत्तिरपि प्रत्यक्षब्रह्मात्मैक्यज्ञानं विना न संभविष्यति, तस्मादपरोक्षमेव ज्ञानं वेदान्तदर्शने स्वीक्रियते।

**वाक्यद्वारैव ब्रह्मात्मविषयकैक्यज्ञानम्-**

ब्रह्मात्मैक्यविषयकं ज्ञानं वाक्यैनैव ज्ञायते इत्येकं मतं वेदान्तिनां विद्यते तस्य च पोषकाः पद्मपादादय आचार्या विवरणप्रस्थानस्यानुयायिनः। वाक्येन परोक्षज्ञानं जायते इति, कथं वाक्यैरपरोक्षज्ञानं साध्यते चेदुत्तरति ज्ञानस्य परोक्षत्वमपरोक्षत्वं केवलमिन्द्रियेषु निर्भरं न भवति प्रत्युत ज्ञेयविषयस्य सन्निहिते सति (समीपे सति) ज्ञानगस्य प्रत्यक्षस्य निर्भरत्वम्, ज्ञेयविषयस्य समीपे सति बहिर्निर्गतया अन्तःकरणवृत्त्या सह सम्बन्धे सति वृत्तेर्विषयचैतन्ययोरेकीभावे सति तस्य ब्रह्मणः प्रत्यक्षज्ञानं जायते।[166] तत्त्वमसीति वाक्याज्जायमानस्य शब्दज्ञानस्य विषयो यद्ब्रह्म, तत्प्रमातृचैतन्याभिन्नत्वात् सदैव सन्निहितं भवति। एतस्मात्कारणाच्छब्दा-ज्जायमानस्य ज्ञानस्यापरोक्षत्वस्वीकारे न काचिदपि क्षतिरस्ति। अत्र च प्रमाणं प्रतर्दनाधिकरणं विद्यते- शास्त्रदृष्ट्या तूपदेशो वामदेववत्।[167] इति सूत्रेण साध्यते यत् प्राणशब्दो ब्रह्मणो वाचक इति।

---

[163] "स च ज्ञानैक साध्यः", वे०प० पृ० ३८४

[164] "तच्च ज्ञानं ब्रह्मात्मैक्यगोचरम्"। तत्रैव

[165] "तच्च ज्ञानमपरोक्षरूपम्"। तत्रैव

[166] "संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबन्धनम्, किन्तु प्रमेयविशेषनिबन्धनमित्युपपादितम् तथा च त्द्ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यज्ञानमपरोक्षम्"। तत्रैव पृ० ३८५

[167] ब्र०सू०१/१/३०

आख्यायिका चेत्थं "**स होवाच प्रतर्दनस्वमेव वृणीष्व यं त्वं मनुष्याय, हिततमं मन्यस इति"**[168] प्रतर्दनाय वरमयच्छत् किन्तु प्रतर्दनोऽवदद् यन्मानवेभ्यो कल्याणाय यदन्त्यनतमावश्यकं तथ्यं स्यात्तद् वरं ब्रूहि मे। एवमुक्तः सन्निन्द्रस्तं प्रतर्दनं ब्रह्मज्ञानमुक्तवान्, तत्र वदति यदहं प्राणः प्रज्ञात्मा विद्ये, मदीयामुपसनां कुरु। "**स होवाच प्राणोऽस्मि प्रज्ञात्मा"**[169] अत्र प्राणशब्दस्यार्थः प्राणवायुर्न प्रत्युत प्राणशब्दः परब्रह्मणो वाचक इति। तस्मान्ममेन्द्रस्योपासनां कुरु, इत्यस्यार्थो मम ब्रह्मणोपासनां कुर्वित्यर्थः। एवं ब्रह्मात्मनस्तादात्म्यमवगत्यैव वदति यथा गर्भावस्थायामेवाहं 'मनुरासम्' 'सूर्य आसम्' इत्याकारकं प्रत्यक्षज्ञानमभवत् "**तद्यो यो देवानां प्रत्यबुद्ध्यता स एव तत्तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यनृषिर्वामदेवो प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति"**[170]

अत्र प्रतिपाद्यते यदृषिषु मानवेषु च ब्रह्म ज्ञात्वा तत्तद्रूपा एवाभवन्। आत्मैक्यं ज्ञात्वैव वामदेव आत्मानं मनुसूर्यत्वेन च प्रत्यपद्यत। एतेन निष्कर्षो निष्कसति यद्यो महापुरुषः एकत्वमनुभवन् ब्रह्मभावापन्नः सन्नेवं भणति तत्साध्वेव।तथैव वामदेववदिन्द्रस्य ब्रह्मभावापन्नायां दशायां शास्त्रदृष्ट्या कथनम् अहं ज्ञानस्वरूपः प्राणः परमात्माऽस्मि| हे प्रतर्दन त्वं मामुपास्व अत्र प्राणशब्दः ब्रह्मणो वाचकः। तेन तत्वमसेति महावाक्याज्जायमानं ज्ञानमहं ब्रह्मास्मीत्यपरोक्षमेव। निर्देशोऽयं प्रत्यक्षवाचीदृष्टिशब्दद्वारा शास्त्रदृष्ट्या इति सूत्रे विद्यते। एतेन शाब्दिकानां पक्षः प्राबल्येन सक्षात् सिद्धं भवति।[171]

**वाक्यजन्यज्ञानस्य परोक्षत्वमेव-**

वेदान्तसम्प्रदाये वाक्यरेवापरोक्षं ज्ञानं जायते इत्यस्य पक्षस्य व्याख्यानानन्तरं विद्यतेऽपरोऽपि पक्षः वाचस्पतिमिश्रमहोदयस्य। तन्मते इन्द्रियगतविशेषे एव ज्ञानस्य प्रत्यक्षत्वं संभवति न तु विषयविशेषे। कस्यचिदपि सूक्ष्मवस्तुनोऽपरोक्षत्वं परोक्षत्वं वेन्द्रियसामर्थ्येऽसामर्थ्ये

---

168 कौ०उ० ३/१

169 तत्रैव ३/२

170 बृ०उ०१/४/१०

171 "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"॥वा०१/१२३

वाऽवलम्बते। एवम्भूतायां परिस्थितौ ज्ञानस्यापरोक्षत्वे इन्द्रियजन्यत्वस्यैव प्रयोजकत्वे वाक्याज्जायमानं ज्ञानं नापरोक्षत्वमावहति। तस्मादिन्दियजन्यत्वमेवप्रत्यक्षत्वं शब्दाज्जायमानं परोक्षत्वम्।[172]

## ब्रह्मसाक्षात्कारप्रकारो वाक्यप्रत्यक्षविरोधिनां मते-

**"ब्रह्मसाक्षाकारेऽपि मननिदिध्यासनसंस्कृतं मन एव करणम्"**।[173] एतेषां मते मननिदिध्यासनादिभिः संस्कारवतो मनस एव कारणता ब्रह्मसाक्षात्कारे न तु शब्दस्य हेतुं ददाति **"यतो वाचो निवर्तर्तन्ते अप्राप्य मनसा सह"।**[174] तत्र मनसाऽपि तस्याज्ञेयत्वम्, किन्तु तदर्थं भावयत्याचार्यो यदसंस्कृतं मनसो प्रवृत्तिर्न जायते। संस्कृतमनसा तु प्राप्यते एव। मनसैवानुद्रष्टव्यमितिश्रुतिमुद्धरति।

मनसैवानुद्रष्टव्यमित्यस्य स्वीकारे सति ब्रह्मण औपनिषदत्वे विरोधः। **"तं त्वौपनिषदं पुरुषं पृच्छामि"**[175] अत्रोत्तरति वेदाज्जायमानज्ञानानन्तरमेव संस्कृतं मनः प्रवर्तते[176] तत्पूर्वं तु वयमपि भावयामो यद् ब्रह्मास्तित्वस्य ज्ञानं वेदवाक्यैरेव जायते नान्यथा, तस्माच्च परोक्षं ब्रह्मज्ञानं वेदवाक्यैरेव जायते तस्मान्न विरोधः। एवम्भूतेन वाचस्पतिमिश्रमहोदस्य ब्रह्मसाक्षात्कारविषकमतेन सह विरोधः, अनेन महोदयेन ब्रह्मणः साक्षात्कारो न शब्दैः स्वीकृतः, किन्तु शङ्कराचार्यस्य साक्षाच्छिष्यः पद्मपादाचार्यो वाक्यद्वारैव स्वीकुरुते ब्रह्मणो साक्षात्कारः। अतो वैयाकरणानामिव वेदान्तशास्त्रेऽपि सर्वविधमपि व्यावहारिकं पारमार्थकं वा ज्ञानं शब्दैरेव जायते। तस्माद्वैयाकरणानां पक्षो शब्दाद्वैतवादस्य बलीयान् प्रतिभाति।

## श्रवणमननिदिध्यासनानां ज्ञानसाधनत्वप्रतिपादनम्-

ज्ञानस्य साधनं द्विधान्तरङ्गबहिरङ्गभेदात्। विविदिषाद्वारा ज्ञानस्य साधनं कर्म वहिरङ्गसाधनत्वेन गण्यते। अन्तरङ्गसाधनत्वेन श्रवण-मनन-निदिध्यासनानि च भवन्ति। बृहदारण्यकोपनिषदि याज्ञवल्क्यमैत्रेयीसंवाद-

---

[172]"करणविशेषनिवन्धनमेव ज्ञानानां प्रत्यक्षत्वं, न विषयविशेषनिबन्धनम्, ए कास्मिन्नेव सूक्ष्मवस्तुनिपटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्"। वे०प० पृ०३८७

[173] वे०प० पृ० ३८७

[174] तै०उ० २/४/१

[175] बृ०उ० ३/९/९६

[176] "अस्मदुक्तमनसो वेदजन्यज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात्"। वे०प० पृ० ३८८

स्थले प्राप्यते वर्णनम्- "**आत्मा वा अरे द्रष्टव्य**"।[177] केन प्रकारेण चात्मनो दर्शनं भवत्विति प्रतिपादयति साधनत्वेन- "**श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**"।[178]

## ब्रह्मसाक्षात्कारे श्रवणस्य प्राधान्यम्-

श्रवणस्य प्राधान्यं पद्मपादाचार्यस्तदनुयायिनश्च मन्वते। "**श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया**"।[179] अद्वितीयब्रह्मणि तात्पर्यस्य निश्चायिका मानसिकी क्रिया। अर्थाद्वेदान्तस्य तात्पर्यमद्वितीये ब्रह्मणि विद्यते, एवम्प्रकारकस्य मनसो निश्चयस्य कारयित्री प्रवृत्तिः श्रवणम्। अत्र वाचस्पतिमिश्रस्य मतेन निदिध्यासनस्य प्राधान्यं विद्यते, तत्र च श्रुतिमुपस्थापयति प्रमाणत्वेन "**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्**"।[180]

ऋषयो ध्यानयोगस्य सहायतया देवानां स्वगुणैर्गूढां शक्तिं दृष्टवन्तः। तस्मान्निदिध्यासनस्य प्राधान्यमेतेषु निदिध्यासनं च मनने मननं च श्रवणे क्रमशः समाश्रितं भवति, तस्माच्छ्रवणमननोभनिष्ठं निदिध्यासनं ब्रह्मसाक्षात्कारे कारणं निदिध्यासनं च प्रधानम्।[181]

वाचस्पतिमिश्रस्य मतं नोचितं प्रतिभाति यतोहि श्रवणस्याभावेऽग्रेतनानामभाव एव।

पद्मपादाचार्यस्य तार्किकं व्याख्यानमत्र विद्यते ब्रह्मदर्शने प्रधानं कारणं श्रवणमेव[182] मनननिदिध्यासनयोस्तु गौणत्वम्। शक्तितात्पर्याभ्यां विशिष्टं शब्दज्ञानं प्रमेयस्यार्थाद् ब्रह्मात्मैक्यरूपवाक्यार्थस्य ज्ञाने साक्षात्कारणं भवति यतोहि प्रमाणं प्रमेयस्य ज्ञाने साक्षात्कारणं जायते न तु परम्परया, प्रमाणाव्यवहितोत्तरं प्रमेयोऽभिव्यज्यते। मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मश्रवणसंस्कारैर्निष्पन्नां ब्रह्मैकाग्र्यवृत्तिं कारयित्वा ब्रह्मानुभवे हेतुत्वं संयातः। मनननिदिध्यासने चाप्रधाने श्रवणस्यार्थाच्छब्दस्यापेक्षया। तस्माद् ब्रह्मात्मैक्यरूपवाक्यार्थरूपं फलं प्रति तात्पर्यविशिष्टस्य शब्दज्ञानस्यापेक्षा

---

177 बृ०उ० २/४/४

178 तत्रैव

179 वे०प० पृ० ३९१

180 श्वे०उ० १/३

181 "तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्करणम्"। वे०प० पृ ३९२

182 "श्रवणं प्रधानम्"। तत्रैव पृ० ३९३

भवति तेन च साक्षात् प्रमेयज्ञानमविनाभावेन कार्यते। मनननिदिध्यासनयोस्तु श्रवणाङ्गत्वमेव स्वीकार्यम्।[183]

वैयाकरणानामपि श्रवणप्रधानत्वं व्याख्यानमेव यतोहि सर्वविधप्रत्ययानां कारणं श्रवणमेव शब्दा एव। भर्तृहरिः प्रतिपादयति यच्छब्दं विना तु भवसागरस्य व्यवहार एव असम्भवी। अतो पद्मपादाचार्यस्य व्याख्यानं श्रवणप्रधानं यतोहि "**वागेव विश्वा भुवनानि जज्ञे, अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा"** इत्यादीनि श्रुतवाक्यानि शब्दस्य प्राधान्यं दर्शयन्ति। तस्माच्छब्दस्य प्रधान्यं जायते शब्दसमूहत्वमेव वाक्यत्वम्, वाक्यैश्च ब्रह्मसाक्षात्कारो जायत इति तत्र भवतां पद्मपादाचार्याणां विवरणे मतम्।

श्रवणादिषु च मुमुक्षूणामधिकारो भवति न तु जनसामान्यानां कारणं यस्य यस्मिन् काम्ये स्पृहा तस्य तत्फलककर्मण्येवाधिकारः। तस्मान्मुमुक्षूणां श्रवणादिष्वधिकारो विद्यते। तस्माच्छ्रवणादीनां ब्रह्मानुभवसाधनत्वमुपेयते। पुनश्च ये सगुणोपासकाः सन्ति तैर्या उपासना क्रियते तस्या अपि सगुणोपासनायाः फलं चित्तैकाग्र्यद्वारा निर्गुणनिविकल्पकस्य ब्रहमणः साक्षात्कार एव। सगुणोपासना च मन्दबुद्धिजनानां दुर्वासनावासितान्तः-करणानां श्रवणादिसाधनहीनानां कृते श्रुतिः सविशेषब्रह्मणो निरूपणं करोति।

सगुणब्रह्मणोऽभ्यासाच्चित्तस्य वशीभूते सत्युपाधिकल्पनया रहितं सत्तदेव निर्विशेषं ब्रह्म साक्षात् प्रकटितं भवति। तदाह्-

**"निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः।**

**ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥**

**वशीकृते मनस्येषां सगुणब्रह्मशीलनात्।**

**तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्"॥**[184]

ब्रह्मज्ञाने सति मुक्तस्सन्नास्ते पुनश्च तस्य समये सति विदेहमुक्तिर्भवति। एवं प्रकारेण ब्रह्मज्ञानान्मोक्षो जायते। स च मोक्षो जरा-शोक-मोह-मरणाद्यनर्थेभ्यो

---

183 "फलं प्रत्यव्यवहितकरणस्य तात्पर्यविशिष्टशब्दावधारणास्य व्यवहिते मनननिदिध्यासने तदङ्गेऽङ्गीक्रियेते"॥ तत्रैव पृ० ३९७

184 तत्रैव पृ० ३९९

निवृत्तिस्वरूपो निरतिशयब्रह्मानन्दप्राप्तिरूपश्च। 'न तस्य प्राणा उत्क्रामन्ति' इत्याद्याः श्रुतयो मोक्षावस्थाया वर्णनं कुर्वन्ति।[185]

**असदर्थस्य ज्ञानाभावः-**

अविद्यमानस्य विषये ज्ञानस्योत्पत्तिर्यदि स्वीक्रियते, तदात्वे तु रजतस्याभावेऽपि रजतस्य ज्ञानं स्वीकरिष्यते, तेन च यत्र कुत्रापि सम्यग्ज्ञानं तत्रापि ज्ञानं स्वविषयाद् व्यभिचरिष्यति, अर्थाद्विषयाभावेऽपि ज्ञानस्योत्पत्तिर्भविष्यति तेन च सर्वविधमपि ज्ञानं शङ्कायुतं सद् व्यवहारप्रसङ्गाभाव एव। यतोहि व्यवहारास्तु निश्चितज्ञानात्परमेव जायन्ते।

अत एव प्रोक्तं यदि किमपि ज्ञानं वस्त्वपेक्षां विनैव प्रकाशितं स्यात् तदा तादृशज्ञानस्य विषयो व्यभिचरति। यदि रजतस्याभावेऽपि तस्य ज्ञानं भवतु तदा तादृशज्ञानस्य विश्वासाभाव एव। एवम्भूतं ज्ञानं नियमं न पालयति, यतोहि ज्ञानमिति सविषयकं कस्य ज्ञानमिति जिज्ञासायां सत्यां कस्यचिद्विषयस्यान्वयो जायते। विषयहीनं ज्ञानं च कथं विषयस्वरूपत्वेन पदार्थस्य सत्तां बोधयिष्यति, एतेन निष्कर्षो भवति यदविद्यमानं वस्तु प्रत्यक्षज्ञानस्य विषयो नास्ति।

**"यदि चार्थं परित्यज्य काचिद्बुद्धिः प्रकाशते।**
**व्यभिचारवति स्वार्थे कथं विश्वासकारणम्"॥**[186]

**व्याकरणस्य स्थितिः-**

व्याकरणे आगमस्य प्राधान्यं विद्यते, शब्दानां सम्यग्रूपेण निर्णयस्य सम्बन्धे ज्ञानस्य प्रामाणिकसाधनत्वेन तर्कापेक्षया आगमस्यैव प्राधान्यं वर्तते। ब्रह्मकाण्डे सम्यग्रूपेण ब्रह्मणः स्वरूपप्रतिपादनं कृतं विद्यते, ब्रह्मणो वर्णनं कदाचित् सत्तारूपेण कृतं विद्यते। व्याकरणदर्शने साधुशब्दप्रयोगस्य प्रयोजनद्वयं व्यवस्थापितं विद्यते, प्रत्ययो धर्मश्च। प्रत्ययं नामार्थज्ञानं जनयति धर्मं च प्रापयति, धर्मश्चाभ्युदयेन संयुनक्ति। अभ्युदयस्य च सामान्यत्वेन

185 "तदेवं ब्रह्मज्ञानान्मोक्षः, स चानर्थनिवृत्तिर्निरतिशय-ब्रह्मानन्दावप्तिश्चेति सिद्धं प्रयोजनम्"। तत्रैव पृ० ४०८

186 स०द० पृ० ६८९

स्वर्गरूपार्थो नीयते तद्यथा महाभाष्यकारो ब्रवीति- **"एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति"**।[187]

आचार्यपतञ्जलेः व्याख्याने प्राप्यते वर्णनं न केवलमेतावदेव प्रत्युत अग्रेऽपि प्रतिपादयति महत्त्वमक्षरसमाम्नायस्य- **"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः"**।[188] अत्राचार्यभर्तृहरिः पुष्पितपदेन स्वर्गं तथा च फलित इति पदेन मोक्षं वेदयति महाभाष्यस्य टीकायाम्। अग्रे च वाक्यपदीये व्याकरणमेवापवर्गस्य मार्गो मोक्षेच्छूणां कृते इत्यपि प्रत्यपद्यत। 'तद्वारमपवर्गस्य' इति कारिकया, तदनु तदग्रेतने व्याख्याने तस्य घोषणा विद्यते यत् साक्षात् कौटिल्यादिराहित्ये सति मोक्षस्य राजमार्गभूतं व्याकरणम्, व्याकरणमन्तरा अन्यानि साधनानि ऋजुवन्ति सन्ति मुमुक्षुभ्यो जनेभ्यः। तस्माच्छब्दस्य साधुत्वविषयकं संस्कार एव तस्य परमात्मनः प्राप्तौ साहायकस्तेनैव शुद्धस्य बुद्धस्य मुक्तस्य नित्यस्य च शब्दब्रह्मणोऽधिगतिर्नान्यथा।

**"तस्माद्यः शब्दसंस्कारः स सिद्धिः परमात्मनः।**

**तस्य प्रवृत्तितत्त्वज्ञः तद्ब्रह्मामृतमश्नुते"॥**[189]

संसारस्य कारणभूतं तत्त्वमेव शब्दब्रह्मत्वेन स्वीक्रियतेऽखिल-ब्रह्माण्डभेदश्चानेनैव भाव्यतेऽनुभवस्य समेऽपि विषया स्वयञ्च समस्तानुभवाः समस्तानुभवविषयाश्च ये शब्दद्वारा भाव्यन्ते, ते सर्वेऽपि विषयानुभवस्यापि कारणभूताश्शब्दास्तेन शब्दतत्त्वेनैवाभिव्यज्यन्ते।

एवम्भूतस्य ब्रह्मणः प्राप्तेः साधनं वेदो विद्यते, वेदश्चैतस्याभिव्यक्तिस्वरूपः। तस्मादागमप्रमाणैनैव समस्तं दिव्यञ्ज्ञानञ्जायते। ज्ञानञ्च शब्दापशब्दोभयसाधारणं विद्यते, ततोऽपि साधुभिरेव भाषितव्यं नासाधुभिस्तत्र च कारणमिदमेव साधुशब्दप्रयोगेण पुण्यजनकतावच्छेदकधर्मस्य प्राप्तिः भवति, नापशब्देभ्यस्था, तदाह हरिः-

---

187 म०भा० ६/१/४८

188 म०भा० पश०

189 वा०प०१/१२३

**“शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम्।**

**अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः”॥**[190]

व्याकरणे च पदं द्विधमेव सुप्तिङ्भेदात्। पदानि च वर्णैर्भिव्यज्यन्ते, पदैश्च वाक्यानि। वाक्याष्टविधलक्षणानि समदीयन्त।[191] वाक्यमेव सत्यभूतं परमार्थतो वैयाकरणानाम्। उक्तं च सम्प्रदाये वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मे मति[192] वाक्यस्फोटो मुख्यस्तेनैवार्थसमाप्तेश्च। तस्माद् वाक्यैरेव वाक्यार्थो दीयते, तेषामेव सत्यत्वं ततोऽतिरिक्तानां पदवर्णानां च विभागः काल्पनिक एव, ते च विभागाः सामान्यानां जानानां कृते एव क्रियन्ते। पुनश्चासत्यकल्पनया सत्यान्वेषणाय तेषां सामर्थ्यं जायते। वाक्यार्थश्च प्रतिभैव विद्यते तदाह-

**“विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।**

**वाक्यार्थ इति तामाहुः पदार्थरुपपादिताम्”॥**[193]

तस्मात् परमार्थतो वाक्यस्यैव सत्तायाः स्वीकरणं कृतं विद्यते। वाक्यस्वरूपं शब्दतत्त्वमेव आन्तरं ब्रह्म वाक्यतत्त्वत्त्वेन विवर्तते तद्यथा द्रष्टुं शक्यते- **“यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम्। तदाहुरपरे शब्दं तस्य वाक्ये तथैकता”॥**[194]

आचार्यश्शब्दार्थयोर्नित्यतां स्वीकुर्वन् सम्बन्धस्यापि नित्यतामसाधयत्। नित्यता च द्विधा निर्धारिता विद्यते, कूटस्थनित्यता, प्रवाहनित्यता।[195] तेन शब्दब्रह्मकूटस्थनित्यं स्फोटश्च प्रवाहनित्यम्। अथवा तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते इत्यपि लक्षणं स्वीकरोति।

अर्थस्वरूपप्रतिपादने कथयति यद्बाह्यार्थस्वरूपविचारो न क्रियतेऽस्माभिः प्रत्युत शब्दार्थ एव, शब्देन दीयमान एवार्थः। **“किमस्माकं वस्तुगतेन विचारेण”**। वैयाकरणास्तु शब्देनाभिधानता यस्यार्थस्य सैव स्वीक्रियते। **“अर्थश्चास्माकं यः शब्देनाभिधीयते”**।[196] महाभाष्यकारो ब्रवीति

---

[190] तत्रैव १/२७

[191] “आख्यतशब्दः सङ्घातो जातिःसङ्घातवर्तिनी। एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः।।
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि। वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्”॥तत्रैव २,१-२

[192] वै०भू०सा० स्फो०नि०

[193] वा०प० २/१४३

[194] तत्रैव, २/३०

[195] “यत्तर्हि कूटस्थं ध्रुवमनपयोपजनविकार्यनुपत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यम्”, म०भा०पश०

[196] भर्तृहरि पृ ७५

यच्छब्द एव प्रमाणं वैयाकरणेभ्यश्शब्दमन्तरा न किमपि तथा प्रामाण्यपथि समायति तत्पतञ्जलिः पुष्यतीत्थम्- "**शब्दप्रमाणका वयम्।**[197] **'वैयाकरणानां शब्दोऽर्थः, न वस्त्वर्थोऽर्थः' इति हेलाराजो वदति"।**[198] तस्माल्लौलिकार्थानां वस्तुभूतानां न प्रत्युत शब्देनागस्यार्थस्य प्रतिपादनमेव वैयाकरणानां प्रतिपाद्यो विषयः। परमार्थतश्शब्दः परमतत्त्वस्य शब्दब्रह्मणो द्योतकमेव, प्रत्येकं च शब्द एतस्य द्योतनमसत्योपाधिमुखेन करोति, सत्यस्योपस्थापनं मिथ्याशब्देनैव जायते। अपरेषु शब्देष्वेवं वक्तुं शक्यते यन्मिथ्या च सत्ये प्रतिभासते। व्याकरणदर्शने तात्विकरूपेण ब्रह्मणः स्वतन्त्रशक्तिः काल एव वर्तते, यस्य प्रतिफलनवशादेव दृश्येऽस्मिन् संसारे कालिकः क्रमोऽवभासत, कालस्य षड्भावविकाराः स्वीक्रियन्ते जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, नश्यति, इति कृत्वा तत्र समये समये परिवर्तनमवलोक्यते वस्तुतस्तत्र भेदाभावः क्रमराहित्यं संसर्गाभावश्च, विद्यादशायां आनन्दस्वरूपं संवर्तदशायामेवावतिष्ठते। संसारिका भेदास्तमिन्नेव प्रलीयन्ते। एतादृशं परमतत्त्वं शब्दब्रह्म कथ्यते शास्त्रेषु तत्त्वमिदं सूक्ष्मं व्यवहारातीतं च विद्यते।

## शब्दशक्तीनां समीक्षणम्-

अत्र प्रकृतशोधविषयश्शब्दशक्तीनां समीक्षात्मकमध्ययनमत्र विचारणायां जातायां सत्यां वैयाकरणा वेदान्तिनश्च शब्दशक्तेश्च स्वरूपं पदार्थबोधकत्वेन स्वीकुर्वते। सा च शक्तिः पदेभ्यः पदार्थबोधाय सामर्थ्यं विदधाति। तस्या लक्षणमित्थं विद्यते शाब्दबोधोपयिकः पदपदार्थसम्बन्धत्वं वृत्तित्वम्। तेन शाब्दबोधायोपाभूता पदपदार्थयोः सम्बन्धस्य नियामिका च शक्तिर्भवति। व्यावहारिकदशायां समेऽपि शब्दाश्शब्दार्थमवबोधयन्त्यवरोधं विना। व्यावहारिकप्रतिभासिकपारमार्थिकभेदाच्च सत्तात्रैविध्यमवबुध्यते। तत्र व्यावहारिकी सत्तायाः प्रचालनाय जातिगुणक्रियायदृच्छाब्दानामवबोधाय सर्वत्र दर्शनेषु साहमत्यं विद्यते, शक्तिमात्रस्य स्वीकाराय। तस्माद्वैयाकरणा अपि शक्तिद्वारैव पदैः पदार्थानवबोधयन्ति। पदार्थाश्च शक्तिपुरस्सरमेव व्यवहारपथ्यायान्ति। आचार्यो भर्तृहरिः कथयति-

---

[197] "शब्दप्रमाणका वयम्, यच्छब्दाह तदस्माकं प्रमाणम्। शब्दश्चेह सत्तायामाह।अयं दण्ड अस्तीति गम्यते। स दण्डः कर्ता भूत्वाऽन्येनाभिसंबन्ध्यमानः करणं सम्पद्यते"। म०भा० १०१२-१५

[198] भर्तृहरिः,पृ० ७५

**"अतो निर्ज्ञातरूपत्वात् किमाह इत्यभिधीयते।**

**न सत्तैव तेऽर्थानामग्रहीताः प्रकाशकाः"॥**[199]

तात्पर्यमेवास्याः कारिकाया यच्छक्तिज्ञानं विना शब्दाः सत्तावन्तो सन्तोऽपि नार्थस्य प्रकाशनं कुर्वन्ति। तस्माच्च शक्तेर्ज्ञानमावश्यकं भवति। सा च शक्तिः सम्बन्धशब्दव्यारादिपदेनोच्यते। सम्बन्धमुखेनैव शब्दा अर्थस्य प्रत्यायनं कुर्वन्ति। अर्थस्य भाने जाते सत्येव संसारिकाणां जानानां व्यवहारे प्रवृत्तिः। व्यवहारस्योच्छेदो विधातुं न शक्यते। वस्तुतस्तु जगद्ब्रह्मणो विवर्तभूतं ब्रह्मातिरिक्तं न विद्यते तदेवाविद्यादशायां असत्योपाध्यवच्छिन्नत्वेनावभासते। ततोऽपि व्यवहारस्य प्रवर्तनाय शब्दशक्तीनामावश्यकत्वात्। तत्र सार्वत्रिको नियमो विद्यते येन सर्वमिदं जगन्नियम्यते। तस्माच्छब्दस्यार्थस्य सम्बन्धस्य च ज्ञानम् आवश्कयमेव भवति, सम्बन्ध एव शक्तिपदाभिधेयवान्। स च विशिष्टत्वेन अभिधालक्षणाव्यञ्जनापदेनोच्यते। तेन च शक्तित्वं सामान्यमभिधादीनामभिधानं विशिष्टत्वेन। ताश्च तिस्रोऽपि शब्दशक्तयो व्याकरणदर्शने स्व्यक्रियन्त, तत्र पौर्वापराचार्याणां व्याख्याने भेदस्तु सम्प्रतीयते, किन्तु यथाकथञ्चिदपि तिस्रोऽपि मन्यन्ते। तिसृणामपि स्वीकर्ता आचार्यनागेश एव., 'पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्या' तद्ग्राहकं चेतरेतराध्यासमूलकं तादात्म्यं भवति। सा च शक्तिश्शाब्दबोधे कारणतामुपयाति 'तद्धर्मावच्छिन्नविषयकशाब्द-बुद्धित्वावच्छिन्नं तद्धर्मावच्छिन्ननिरूपितवित्तिविशिष्टं ज्ञानं हेतुः' इतीत्थं कार्यकारणभावः स्वीक्रियते। तदानीमेव शाब्दबोधो जायते नान्यथा। लक्षणायाः खण्डनं कुर्वताऽप्याचार्येण प्रकारान्तरेण लक्षणाभ्यधायि। खण्डनञ्च योगिनाङ्कृते कृतं विद्यते, योगिभ्यो लक्षणाया अभावात्। एतया पङ्क्त्या कथयति ननु सर्वेषां सर्वार्थवाचकत्वे लक्षणोच्छेद इति चेत्? न। योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्मदादीनां तदभावात्। तस्माच्च जनसामान्यानां कृते लक्षणाया आवश्यकत्वादित्यनेन प्रतिध्वन्यते। सा च लक्षणा 'शक्यतावच्छेदकारोपरूपा' अत्र स्वकीयं मतमवतारयति 'परे तु शक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः' लक्षणा च सङ्कुचितमनसा स्वीकृता विद्यते एतत्सर्वं महाभाष्यादिप्रमाणैर्निर्णीतं विद्यते। लक्षणाऽपि

---

[199] वा०प० १/५७

वैयाकरणैर्वस्तुतः शक्तित्वेन स्वीक्रियते, पश्चाच्च सैव तस्या एव शक्तेरभिधानं लक्षणया जायत इति नागेशस्य मतम्।

नागेशद्वारा लक्षणायाः खण्डनमपि **"सर्वे सर्वार्थवाचकाः"** इति मत्वा व्यधायि। हरिणाऽपि शक्तिरूपैकैव शक्तिस्स्वयक्रियत स च प्रसिद्धाऽप्रसिद्धात्मको भेदस्तु नागेशेन तत एव प्राप्तः। वैयाकरणैर्बहुत्र स्थलेषु लक्षणायाः प्रवृत्तिस्स्वीकृता विद्यते तया विना न सम्भवन्ति पदस्यार्था इति सर्वं लक्षणाविषयकव्याख्यानस्थले प्रादर्शि। व्यञ्जनापि सर्वत्र पूर्वाणामाचार्याणां व्याख्यानेन समगम्यत, तथा च पश्चाद्वर्तिषु विद्वत्सु नागेशेन स्पष्टत्वेन व्याख्यानमकारि व्यञ्जनायाः। व्यञ्जनायाश्च वैयाकरणैरवश्यमेवाङ्गीकार्यत्वात्।

उपरितनेन व्याख्यानेन व्याकरणदर्शनस्य स्थितिः सम्यग्रूपेण स्पष्टा जायमाना विद्यते। यत्तत्र दर्शनेऽवश्यमेव शब्दशक्तीनां स्वीकरणं स्यात्। ताभिर्विना न सम्भवत्येव व्यवहारो जागतिकः।

**वेदान्तस्य परिस्थितिः-**

वेदान्तदर्शनस्य स्थितिरपि तथैव विद्यते शब्दशक्तीनां विषये। सा च शक्तिः पदार्थान्तरत्वेन स्वीकृता विद्यते। शक्तिरेव सर्वविधानर्थान् बोधयितुं क्षमा भवति। आगमस्य व्याख्याने कथयति धर्मराजाध्वरीन्द्रः- यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्। अत्र च तात्पर्यविषयीभूतसंसर्गस्य चर्चा विद्यते। संसर्ग एव सम्बन्धः शक्तिर्वा। 'सा च शक्तिः पदार्थान्तरम्' तस्यां च शक्तौ पदार्थबोधनसामर्थ्यं भवति यद्द्वारा पदार्थो बोध्यते। न केवलं पदार्थबोधनरूपं सामर्थ्यं प्रत्युत संसारे सर्वत्र स्थलेषु कार्योत्पत्त्यनुकूला शक्तिपदार्थत्वेन निगद्यते।

द्विधा चात्र पदार्थश्शक्य लक्ष्यभेदेन। शक्यस्यार्थोऽभिधया लक्ष्यार्थश्च लक्षणया बोध्यते। पदार्थस्य बहुत्र चर्चा विद्यते तन्मुखेनाभिधाया व्याख्यानं कृतं विद्यते। सौन्दर्यलहर्यां कथयति आचार्यशङ्करः 'शिवः शक्त्या युक्तो यदि भवति शक्तः' इति कृत्वा शक्तस्य चर्चा व्यधीयत। सैव शिवः शक्तस्सन्नेव जागतिककार्येषु समर्थो भवति। सर्वत्र ग्रन्थेषु अभिधायाः स्वरूपं यदासीत्, तेन च ततस्ततोऽभिधां स्वीकृत्य तस्या व्याख्यानं व्यधायि। अभिधा चास्तीति गम्यते व्यवहारे वेदान्तिनः साक्षाल्लक्षणं कृतवन्तः। तथैव लक्षणा तु प्राणभूता शक्तिर्वेदान्तिनां वेदान्ते लक्षणां विना महावाक्यार्थस्य बोधासम्भवात्। तत्र च

जहतोऽजहतो जहदहतोर्वर्णनमत्यन्तं प्रसिद्धं विद्यतेऽद्वैतवेदान्तदर्शने। तत्त्वमसीति महावाक्यार्थस्य बोधं कारयितुं लक्षणाया आवश्यकत्वात्, सति च महावाक्यार्थभेदे सति भेदस्य निवृत्तौ सत्यामखण्डान्तानन्दस्वरूपस्य परब्रह्मणस्तत्त्वज्ञानं जायत एव, तच्च ज्ञानं साक्षान्मोक्षस्वरूपमेव, इति प्राचीनवेदान्तिनां मतानि सर्वत्र जगति प्रासिध्यन्त।

अत्र तु नव्यानामद्वैतवेदान्तिनां मते लक्षणाया अनावश्यकत्वात्। महावाक्यार्थस्य बोधनाय लक्षणाया आश्रयो न नीयते, लक्षणया विनाऽपि निर्वाहस्य सम्भवात्। शक्त्यैव महावाक्यर्थस्य तत्त्वमसीतित्यस्य ज्ञानं सम्भवति सा युक्तिरस्माभिर्लक्षणाया अध्याये व्यचारि।

व्यञ्जना शब्दश्शक्तेरत्रावश्यकतैव नास्ति न क्वाप्यऽद्वैतवेदान्तिनो व्यञ्जनां स्वीकृतवन्तः, सा च व्यञ्जना न वेदान्तशास्त्रे व्याख्याता। ततोऽप्यत्राभिव्यक्तिवादो व्याख्यायते। अद्वैतवेदान्तस्य सत्कार्यवादि-दर्शनत्वात्। अभिव्यक्तिरस्त्यतो व्यापारस्तु स्यादेव तेन विना अभिव्यञ्जनं न सम्भाव्यते। अभिव्यक्तिवादाय सम्प्रदाये नादीयत कश्चिदपि व्यापारविशेषः। स च चिन्तनीयो विद्वद्भिर्यतोहि सिद्धान्तो विद्यते शक्तिं विना कार्याभिव्यक्तिस्तावन्न सम्भवत्ये तदर्थं कस्य व्यापारस्याङ्गीकारस्स्यात्।

निष्कर्षतश्शब्दशक्तीनामावश्यकता व्याकरणेऽद्वैतवेदान्ते च विद्यत एव। उभयत्र च स्थूलतस्सूक्ष्मपर्यन्तं गन्तुं व्यावहारिकजगतस्स्वीकारो विद्यते, व्यवहारदशाया अपलापो न कर्तुं शक्यते। स्थूलात् सूक्ष्मं सूक्ष्माच्च सूक्ष्मतमं गन्तुमेष मार्गो विद्यते। भाषां विना न कस्यचिदपि पदार्थस्य स्वरूपं बोधयितुं शक्यते यथार्थतः। पदार्थस्य च बोधनाय शब्दशक्तयो भवन्ति। तस्मादुभयेऽर्थादद्वैतवेदान्ते व्याकरणे च शब्दशक्तीनां समाना आवश्यकता विद्यते। तत्र च शक्तीनां स्वरूपं व्याख्यातं विद्यते।

ब्रह्मणः प्राप्तिस्साक्षाच्छब्दैर्न विद्यते तस्य निर्गुत्वात्, निर्विकारत्वच्च। भाषायाः कार्यं केवलमेवाज्ञाननिवृत्तिः, अज्ञानस्य निवृत्तौ सत्यां साक्षान्मोक्षावगतिरेव जायते। अतो भाषायाः कार्यं तु अज्ञानस्य नाश एव। अज्ञाननाशं यावदेव भाषा प्रवर्तते ततश्च भाषायाः कार्यं समाप्तं जायते। अज्ञाननाशस्य तात्पर्यं ज्ञानस्वरूपस्य ब्रह्मणः सच्चिदानन्दस्वरूपस्य प्रकटनमेव। तादृशं सच्चिदानन्दस्वरूपं ब्रह्म सार्वकालिकं सत्तावच्च विद्यते। तस्यैव वशाज्जगतोऽस्य प्रवृत्तिनिवृत्ती भवतः। तेन विना नेदं जगत् प्रवर्तते तदाह स्मृतौ 'तस्य भाषा सर्वमिदं विभाति' तेन च साक्षात्कारानन्तरं

व्यक्तिरावगमनस्य निवृत्तः सन्निहलोकपरलोकादिभी रहितो ब्रह्मानन्दः स्वरूपं जायते।

न पुनस्तदा तस्य जगतो कार्यं विद्यते। एतत् सर्वं भाषा द्वारा एव सम्भवति। यतोहि अज्ञाननिवृत्तिरूपं कार्यं भाषयाः, भाषयैव जगतिकव्यवहारस्य प्रवृत्तिनिवृत्ती भवतः एतस्मान्मुख्तत्वं समायाति तस्याः। भाषा अस्ति चेद्वाक्यात्मिकैव, वाक्येषु च पदानां सत्त्वात्, पदानि च शक्तिं विना न बोधन्त्यर्थं तस्माच्छब्दशकीनामावश्यकत्वात्, व्यावहारिकजगतो ज्ञानाय शब्दशक्तीनामावश्यकत्वाद् यतोहि व्यावहारिकजगतः समुच्छेदो विधातुं न शक्यते। आत्मानुभवात् प्राक् तु जगद्विद्यत एव कोऽपि प्राणी जागतिकव्यवहारस्यान्थात्वं साधयितुं न समर्थः। तासां शब्दशक्तीनां भाषायाम् उपयोगत्वादत्राद्वैतवेदान्ते च तासां कथमुपयोगित्वमित्यादिकं सर्वं व्याख्यानपुरस्सरं व्याख्यायि।

तथैव व्याकरणदर्शनेऽपि भाषा एव सर्वविधमर्थजातं प्रत्याययति। भर्तृहरेर्घोषणा विद्यते यत् संसारस्य कश्चिदप्यर्थो भाषां विना न प्रवर्तते, भाषा च शक्तिं विना, शक्तिग्रहं न कारयेत्, तदभाभावे च काथञ्चिकस्य बोधस्यासम्भवत्वात्। तस्मादुभयत्र भाषायाः साम्यत्वात्, समानता तु विद्यते भाषायाश्चिन्तने, भाषाया विरोधाभाव एव।

पुनश्च तत्त्वविषयकचिन्तने भाषा (शब्दाः) साक्षात्परमतत्त्वमवबोधयन्ति न वा, इति विचारे मतभेदस्समायाति. स च मतभेदोऽस्माभिर्व्याख्यायीत्थम्। अद्वैतवेदान्ते भाषाया कार्यं शास्त्रस्य वा कार्यमविद्याया निवृत्तिरेव, इति तत्र भवन्तश्शङ्कराचार्यादय आचार्याः पौनःपुन्येन प्रतिपादयन्ति। परवर्तिषु च विद्यमानेष्वाचार्येषु मतभेदो विद्यते। तेषु वाचस्पतिमिश्रस्तदनुयायिनः कथयन्ति तद्ब्रह्मणः प्राप्तौ साक्षात्करणं निदिध्यासनं भवति, श्रवणस्य मननस्य च प्राधान्याभाव एव, तयोर्निदिध्यासने समाश्रितत्वादिति भामती प्रस्थानम्।

अत्र च विवरणकारास्तदनुयायिनश्च मन्वते यच्छ्रवणमेव साक्षात्कारतामुपैति ब्रह्मणः साक्षात्कारे। तस्यासाधरणकारणतां विना न सम्भवत्येव ब्रह्मसाक्षात्कारः। तस्मादपरोक्षस्य ब्रह्मणः साक्षात्काराय श्रवणमेव प्रधान्यमुपैति। श्रवणं विना कस्य मननं मननेन विना कस्य च निदिध्यासनं तस्मान्मनननिदिध्यासानयोश्श्रवणे एव समाश्रितत्वं श्रवणस्य च प्राधान्यम्।

अत्र श्रवणपदेन च शब्दस्यैव ग्रहणम्। तस्माच्छब्दः साक्षात्कारणं ब्रह्मसाक्षात्कार इति विवरणकाराः।

अत्रैवं शोधार्थिना विचार्यते। विवरणप्रस्थानस्य च साक्षाच्छब्दकारणवादस्तत्र च किं कारणं भावयितुं शक्यते इति विचारणायां विवरणकारं केवलं वेदान्तस्य जगद्गुरोश्च साक्षाच्छिष्य आसीत्, तस्मात्तस्यान्तःकरणं वेदान्तसंस्काराहितमासीत्। तस्माच्च तस्य विचारो वेदान्तानुगुणको विद्यते। वेदान्ते च साक्षात्कारः श्रवणेनैव जायते। पुनश्च शब्दस्य साक्षात्कारणत्वमपि। अत्रत्यविचारणायां शब्दस्य महत्त्वं विद्यते, वाचस्पतिमिश्रस्तु न तथा तत्र च कारणमिदमेव प्रतिभाति यत् सः सर्वतन्त्रस्वतन्त्र आसीत्, तत्रापि विशिष्य च नैयायिकः, न्यादर्शने च साक्षाच्छब्दद्वारा परमतत्त्वस्य साक्षात्कारः कारयितुं न शक्यते, कारणं ब्रह्मणोऽपरोक्षत्वात्, शाब्दस्य चापरोक्षत्वात्। न शब्देन प्रत्यक्षं ज्ञानं कारयितुं शक्यत इति नैयायिकं मतं तत्र च सर्दैव शाब्दस्यापरोक्षत्वात्। अतस्तत्रन्यायदर्शनस्य भावनया प्रधानत्वेन भावितान्तःकरणत्त्वात् तस्य विचारा ईदृशा विद्यन्ते। तस्मादुभयोर्व्याख्याने भेदः समायाति।

वैयाकरणेषु तु शब्दद्वारा साक्षात्कारमात्रं न प्रत्युत शब्दमूलकोऽयं संसारः, तच्च च शब्दब्रह्म विद्यते त्रिविधसत्तावतस्संसारस्य कारणम्, शब्दब्रह्म विना न सम्भवन्त्येव अविद्यामूलकानि कारणनि,, शब्दब्रह्म एव आविद्यादशायां त्रिविधसत्ताकत्वेनाभासते तस्मादभिन्नमेव सर्वमिददं जगत्, न विद्यते तस्मात् किञ्चिदपि भिन्नं विद्यादशायां भेदसंसार्गादीनां नाशाद् ब्रह्ममात्रमेवावशिष्यते। तस्मादत्र शब्द एव ब्रह्म। एतस्य शब्दब्रह्मणः प्रमाणत्वे श्रुतयः प्रतिपद्यन्ते- **“वाग्वै ब्रह्म, वागेव विश्वा भुवनानि जज्ञे, अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा”** चेत्यादिकं सर्वं विद्यते तेन वैयाकरणानां मते शब्द एव ब्रह्म इत्येव समायाति। तच्च ब्रह्म श्रुतिवाक्यैः प्रतिपादितं विद्यते।

तदेवपरमतत्त्वं ‘नामरूपे व्याकरवाणि’ ‘नामरूपे व्याकरोत्’ इति कृत्वा नामरूपात्मिकां सृष्टिं कृतवान्। नाम इति शब्दस्तेन च शब्दमयीं सृष्टिं स्वीकृत्य व्याकरणदर्शनं प्राचलत्। रूपं नामार्थः, अर्थं स्वीकृत्य च वेदान्तं प्राचलत्। तेनोभयोरपि मूलं तदेव, किन्त्वादौ शब्द एव ‘भूरिति व्याहरत् भुवमित्यसृजत्’ तस्माच्च पूर्वं शब्दानामेवोच्चारणं कृतवान्। ततश्चार्थस्य रचनायां प्रवृत्तमविद्यत। अखिलस्य ब्रह्माण्डस्य कारणं परं सत्तैव विद्यते सा च सत्ता परब्रह्म शब्देति गीयते वैयाकरणैर्वेदान्तिभिश्च ब्रह्ममात्रमेवागीयत।

परब्रह्मणः साक्षात्कारदशायां कीदृशी स्थतिर्जायत इति कठोपनिषदि न्यगद्यत-

**"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**

**बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम्"॥**

इति मोक्षस्य स्वरूपम्।

**"औपनिषदाः, तु भगवता नीलाचलनायकेन नारायणेनाग्रुहीताः, निरतिशायानन्दबोधरूप आत्मा एव, अनाद्यविद्यानिवृत्त्युपलक्षितो मोक्ष इत्याचक्षते। अविद्यायाः सर्वदुःखोपादानत्वात् तस्य च स्वरूपे साधनानपेक्षत्वेऽपि व्यञ्जकतया महावाक्यकरणकः, तत्स्वरूपसाक्षात्कारः, एव प्रतिबन्धचतुष्टयरहितो मोक्षसाधनमित्युपचर्यते"।**[200]

तात्पर्यमिदं यदौपनिषदा अर्थाद्वेदान्तिनः कथयन्ति यदात्मा निरतिशयानन्दस्वरूपो विद्यते तस्मादानन्दो बोधविग्रहोऽयमात्मेति प्रथ्यते लोके लौकिकैः। एवम्भूतस्य परमात्मनः साक्षात्कारे बाधकतत्त्वं किमिति तदा पौनःपुन्येन वेदान्तग्रन्थेषूपनिषत्सु च कथ्यतेऽविद्या। एषा चाविद्या सर्वविधदुःखानामुपादानकारणं निगद्यते वेदान्तविद्भिः। सर्वदुखोपादान-भूताया अविद्यायाश्च नाशो वेदान्तमहावाक्यैरेव सञ्जायते। दुःखानामुपादानत्वेन स्वीकृताया अविद्याया नाशे सति तन्मूलकानामशेष-कार्याणां स्वयमेव नाशः समापतति। महावाक्यैरेवाविद्याया नाशे सत्यविद्यानिवृत्त्युपलक्षितो मोक्षः। मोक्षश्च परब्रह्मणा सह साक्षात्कार एव।

**"ज्ञानमेवाज्ञानस्य निवर्तकम्"**।[201] साक्षात्कारे च ज्ञानमेव कारणत्वमुपयाति, ज्ञानं हि निवर्तयत्यज्ञानमित्येव सिद्धान्तः सर्वत्र, तेन च विद्यायाऽमृतमश्नुते इत्यादिकमुपनिषद्वाक्यं सङ्गच्छते। अमरत्वप्राप्तवतो जनस्यार्थान्मोक्षपदभाग्जनस्य संसारे गमनागमनराहित्यं श्रुतिषु प्रत्यपादि मनीषिभिः "**न स पुनरावर्तते, तमेव विदित्वा अतिमृत्युमेति"**।[202] तादृशस्य ब्रह्मणो ज्ञाने सत्येव भवसागराज्जना निवृत्ताः सन्त आनन्दादिस्वरूपवन्तो ब्रह्मैकमात्रमनुभवन्ति। तस्य चापरोक्षात्मकमनुभव एव ब्रह्मसाक्षात्कारो मोक्ष

---

200 वे०क०ल० पृ० १२

201 प०पा० उद्धृतम्, वे०क०ल० पृ०सं ३५०

202 श्वे०उ०३०८,६०१५

वा कथ्यते ऋषिभिः– **"तस्मादखण्डानन्दाद्वितीयचैतन्यसन्मात्र आत्मा ज्ञातः सन्, अद्यानिवृत्तिरित्युच्यते अत्रैव सर्वपुमर्थविश्रान्तिः"।**[203] आत्मपरमात्मनो-रनुभवश्चाविद्यानिवृत्तिपरमेव जायते। अविद्यानिवृत्तिश्च भाषयैवेति सिद्धान्तो बहुत्र ग्रन्थेषु प्रत्यपादि।

अविद्याया विषये गोस्वामीतुलसीदासो बहुसुन्दरशब्दैः स्वकीयेऽनुपमे रामचरितमानसाभिधे ग्रन्थे प्रतिपादयति-

**"झूठेहु सत्य जाहि बिनु जाने। जिमि भुजंग बिनु रजु पहिचाने।**

**जेंहि जाने जग जाइ हेराई । जागे जथा सपन भ्रम जाई।।**

**बन्दउं बाल रूप सोइ रामू । सब सिधि सुलभ जपत जिसु नामू"॥**[204]

अर्थाद् यस्य ज्ञानात् पूर्वं मृषाऽपि सर्वं सत्यवत् प्रतिभाति, रज्जुभुजङ्गयोरुदाहरणेन प्रतिबोधयति यथा असर्भूतायां रज्जौ सर्पत्वस्य सम्भावना भ्रमवशाज्जायते तथैव जगत्यप्यविद्यायाः कारणादेव संसारः सत्यत्वेन प्रतिभासते। यस्य भगवतो निर्गुणनिर्विकारस्य लीलाकैवल्यमात्रात्सगुणावतारभूतस्य मर्यादापुरुषोत्तमस्य श्रीरामचन्द्रस्य साक्षात्कारानन्तरं जगदिदं सर्वं मृषा किमपि न जगतीह प्रतिभाति। तस्मादविद्यैव कारणमविद्याया नाशे सत्येव परमतत्त्वस्य ब्रह्मणो साक्षात्कारो मोक्षस्वरूपो नान्यथा।

वैयाकरणानामपि तथैव शब्दब्रह्मणा सह तादात्म्यमेव मोक्षः। तच्च तादात्म्यं **"प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते"।**[205] सायुज्यं नाम तादात्म्यमेव। तथैव महाभाष्यकारोऽपि महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणमिति पश्पशाह्निके। हरिवृषभो वृत्तौ कथयति 'सर्वमूर्तीनामपरिणामा प्रकृतिः सर्वेश्वरः' इत्यादिभिश्शब्दैः परमशब्दतत्त्वमद्युतत।

**"सत्यं ज्ञानमनन्तं ब्रह्म"।**[206] तच्च ब्रह्म सत्यज्ञानानन्ताद्वयादिस्वरूपमेव विद्यते तस्यैवम्भूतस्य स्वरूपस्य कदापि हानिर्न जायते तस्य स्वरूपं च

---

[203] वे०क०ल० पृ० ५४

[204] रा०च०मा० बा०का० दो०१११ चौ० १-२

[205] वा०प० १/१३०

[206] तैत्ति०उ०, २०१

वैखरीवाग् द्वारा चक्षुरिन्द्रियेण वा न ग्रहीतुं शक्यते।[207] **"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अभेदेऽपि चैतन्यात् पृथगिव भासन्ते"॥**[208] एवम्भूतस्य वागादीन्द्रियेभ्योऽगोचरस्य ब्रह्मणोनित्यधर्मा विद्यन्ते सत्यत्वादयः, ब्रह्मणो भिन्ना सत्ता नैतेषां ततोऽपि भेदवदाभासन्ते पृथगिव तत्र कारणमज्ञानमेव। अज्ञानस्य नाशदशायामेव ब्रह्मज्ञानं जायते यस्य स ब्रह्मज्ञः सन् ब्रह्मैव भवति तदाह श्रुतौ **"ब्रह्मवेद ब्रह्मैव भवति"**[209] ब्रह्मज्ञानवाञ्नो भवार्णवं सन्तरति शोकानां निवृत्तिर्जायिते, तथा चाखण्डानन्दस्वरूपः सञ्जगति सन्नपि जीवन्मुक्तो विहरति यथा श्रुतिः प्रतिपादयति- **"तरति शोकमात्मवित्"।**[210] अज्ञानस्य मोक्षव्यवधायकत्वं गीतायां अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव।[211] गीतायां प्राणिनां मोहात्मिकायाः परिस्थितेर्वर्णनं लभ्यते तच्चाज्ञानदशैव नान्यथा, वेदान्तवाक्येषु चापरोक्षज्ञानजनकता जायते येन च तादृशशस्य ब्रह्मणः साक्षात्कारोऽपरोक्षमेव तत्र च श्रवणस्यैव प्राधानयं विद्यते इति तत्र भवतां परमाचार्याणां विवरणकाराणां मतं विद्यते प्राधान्येन यतोहि तेषां वेदान्तभावनाभावितान्तःकरणमात्रैकत्वात्। श्रवणञ्चात्र शब्दत्वेनैव गृह्यते तस्माच्छब्ददवारैव ब्रह्मणोऽवबोधो जायते साक्षात्कारणता तस्य ब्रहणि विद्यते, तच्च वेदान्तवाक्यं संसर्गादिभी रहितं सदखण्डं परमानन्दमभिव्यनक्त्येव। वाचस्पतिमिश्रस्तु यां श्रुति प्रददाति प्रमाणत्वेन मननस्य प्राधान्यं प्रतिपादयितुं **"मनसैवानुद्रष्टव्यम्"** इत्यस्या एव श्रुतेर्बाधिकत्वेनापरा श्रुतिर्विद्यते-**"यन्मनसा न मनुते येनाहुर्मनो मतम्"।**[212] एतस्मादनिमीयते यदत्र प्रधानं कारणं ब्रह्मसाक्षात्कारस्य शब्द एव विद्यते तद्वारैव ब्रह्मणः साक्षात्कारो जायते। एतत्सर्वं पूर्वमस्माभिर्यथा ग्रन्थं यथासम्प्रदायं व्यवेचि। अपरोक्षजनत्वं श्रवणे विद्यते ब्रह्मणोऽपरोक्षत्वान्नान्यत् किमपि तत्र प्रमाणं विद्यते, यत्साक्षादपरोक्षाद्ब्रह्म इत्यादयश्श्रुतयः सङ्गच्छन्ते अपरोक्षज्ञानजनिकाः।[213] अत्र च शब्द न ब्रह्म प्रत्युत आगमोपायको ब्रह्म वेदान्तवाक्योपायको वा ब्रह्म इत्येव निष्कर्षः।

---

207 "यतो वाचो निवर्ततन्ते अप्राप्य मनसा सह", तत्रैव २०४

208 प०पा० उद्धृतम्, वे०क०ल० पृ १२०

209 मु०उ० ३/२/९/

210 छा० ७०१०३

211 गी०५/१५

212 के०उ० १/५

213 वे०क०ल० पृ० १४७

वेदान्तसम्प्रदायेऽर्थाद्वैतवाद एव स्वीक्रियते तच्च **"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्"** इत्येवम्प्रकारकैर्बहुविधैर्वेदान्तवाक्यैर्बहुत्रा-ववर्णत।

वैयाकरणानामपि समानैव संस्थितिर्विद्यते बहुभेदो न वेद्यतेऽत्र शब्दब्रह्मापि तथैव विवर्तते यथा वेदान्तिनां ब्रह्म विद्यते, तत्रापि च अविद्याशक्तिर्विराजमाना भवति यस्मात् कारणादभिन्नेऽखण्डैकरसे शब्दब्रह्मणि भेदा अन्वमीयन्त, स्वोपज्ञवृत्तौ व्यविच्यतैतद्यच्छब्दब्रह्मणो हि दशाद्वयी प्रसिद्धा, विद्या दशाऽविद्यादशा च। अविद्यादशायां विवर्तोऽवभासते तेनोपसंहृतक्रमाच्छब्दतत्त्वाज्जगदाख्या विकारा जायन्ते, शब्दब्रह्मणि याश्शक्तयो विद्यन्ते तास्वविद्यावशादेव निर्विकारममृतस्वरूपं ब्रह्म कालुष्यमिवापन्नः सद्विविधभेदेषु विवर्तत्वेन प्रतीयते।[214] एवम्भूता प्रातिभासिकी व्यावहारिकी वा जगतः सत्ता विर्वतपदेन व्यपदिश्यते। विद्यादशायां च विवर्तभूतस्य निखिलस्य प्रपञ्चस्य बाधे सति सर्वमिदं तस्मिन्नेव विलीयते, तथैव तृतीयकान्डे भर्तृहरिर्वक्ति 'प्रथमं तदविद्यायां यद्विद्यायां न विद्यते' पूर्वोक्तमेव भावं विद्योतयति। विलीनं शब्दब्रह्ममात्रमेवावशिष्यते। दशैषा च 'अनेकस्यैकत्रोपसंहारः संवर्तः' अर्थाद् विवर्तोपायभूतस्य भेदवतो जगतो तत्रैवोपसंहारत्वात्, शब्दब्रह्ममात्रं जायते, तदेव शब्दतत्त्वमुपनिषत्सु वाक्पदेन व्यवह्रियते- **"वाग् वै ब्रह्म"।**[215] वाचः परब्रह्म स्वरूपवत्तैव- **"वाग्घि ब्रह्म,**[216] **पृच्छामि वाचः परमे व्योमन्,**[217] **सर्वाणि च भूतानि वाचैव सम्राज्ञायन्ते, वाग्वै सम्राट्,**[218] **परमं तेजोमयी वाक्,**[219] **तदेतद् ब्रह्म,**[220] **स यो वाचं ब्रह्मत्वपास्ते यावद्वचोगतं तत्रास्य यथा कामाचारो भवति"।**[221]

एवं रीत्या सर्वत्र वाचः सर्वशक्तिमत्त्वं शब्दब्रह्मत्वं परमतत्त्वत्वं च व्याख्यातं विद्यते। अत्र च वेदान्तिभिः सह मतभेदः सामन्यरूपेण यत्ते

---

214 तथेदममृतं ब्रह्म निर्विकारमविद्यया। कलुषत्वमिवापन्नं भेदरूपं विवर्तते॥ चा०दे० पृ०८

215 बृ०उ० १/२१

216 ऐ०ब्रा० २/१५/४

217 ऋग्वेदः १/१६४

218 बृ०उ० ४/१

219 छा०उ० ६/५/४

220 तत्रैव २/५/१९

221 छा०, ७/२/२

ब्रह्ममात्रमेव तत्त्वमिति प्रतिपादयन्ति, वैयाकरणाश्च शब्दब्रह्म इति प्रतिपादयन्ति उभयत्र श्रुतयः प्रमाणम्, किन्तु तत्वतो विचारिते सति वाग्ब्रह्म शब्दब्रह्मणोऽतिरिक्तं न, न च शब्दब्रह्मणोऽतिरिक्तं ब्रह्मतत्त्वं वेदान्तिनां तच्च स्व-स्वसम्प्रदाये बोधनशैली भिन्न-भिन्ना विद्यते। किन्तु सर्वशक्तिमत्तादि-विषयकविचारणायां सत्यां भोक्तृ-भोक्तव्य-भोगरूपेण च ब्रह्मैव विद्यते ततोऽतिरिक्तं न किमपि।

वैयाकरणानां विचारे यथा विवरणकारस्य मतं विद्यते तथैव व्याकरणदर्शनं समीपतरवर्ति विद्यते शब्द ब्रह्मणः। तस्य च शब्दब्रह्मणः साक्षात्काराय व्याकरणदर्शनस्याध्ययनं विधेयं तस्यैव च वेदाङ्गेषु प्राथम्यं विद्यते[222] तस्य च शब्दात्मनः यः सर्वोत्कृष्टो रसास्वादस्तस्य च मार्गः व्याकरणम्, तत्त्वस्य बोधः शब्दानां व्याकरणेनैव ज्ञायते, तैश्च शब्दैरेव स शब्दात्मा ज्ञायते। शब्दतत्त्वस्य साक्षात्कार मोक्षः। स च मोक्षो व्याकरणदर्शने 'महता देवेन नः साम्यं स्यात्' अथवा 'प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते' इत्यादिभिर्वाक्यैर्ज्ञायते। एतस्य शोधविषयस्य "व्याकरणाद्वैत-वेदान्तयोश्शब्दशक्तीनां समीक्षात्मकमध्ययनम्" इत्यस्य समीक्षणीयो विषय आसीच्छब्दशक्तय इति। तासामत्र विस्तृता समीक्षणपुरस्सरा विवेचना व्यक्रियत। तत्र व्यावहारिकसत्तायाः सञ्चालनाय सांसारिकव्यवहाराणां समेषां यथायोग्यं प्रयोगाय शब्दशक्तीनामवश्यकता विद्यते व्याकरणाद्वैतवेदान्तयोः। असकृदस्माभिर्व्याख्यायीत्थम्। यावच्चास्य ब्रह्मणस्तात्त्विकं ज्ञानं न जायते तावत्तु भेदबुद्धिर्भवति, तस्या एव भेदबुद्ध्या नाशाय भाषायाः प्रयोगः। भाषया च अविद्यातन्मूलकधर्माणां निवृत्तिपुरस्सरं शान्तं शिवमद्वैतं चतुर्थं बोध्यते इत्यर्थः। अत्र च भेदबुद्धस्तावदेवास्तित्त्वमावहति यावचाज्ञानस्य तज्जन्यस्यातद्धर्मस्य निवृत्तिर्न न भवति, निवृत्तेऽज्ञाने ब्रह्मसाक्षात्कारो जायते, तच्चार्थाद्वैतत्वेनैवेति सिद्धान्तोऽद्वैतवेदान्तिनाम्। वैयाकरणानां तु सर्वमपि ज्ञानं शब्दमूलकं तद्वविना नावगतीयन्तेऽर्थाः संसारस्य। अत्रापि शब्दस्य द्विधा स्थितिः नित्यात्मा कार्यात्मा च। कार्यात्मा च व्यवहारस्य विषयोऽत्रैव शब्दार्थसम्बन्धः प्रवर्तते, शक्तयश्चात्रैव व्यावहारिके शब्दे व्यवहारं सञ्चाल्योपरता जायन्ते। नित्यस्तु सर्वव्यवहारयोनिरप्रतिहतकार्यशक्तिः सर्वेश्वरः सर्वमूर्तीनामपरिणामा प्रकृतिरित्यादिभिः शब्दैर्बहुधा विचारतो विद्यते। एवम्भूते शब्दब्रह्मणि शब्दशक्तयो न प्रवर्तन्ते तादृशस्य शब्दब्रह्मणो

---

[222] वा०प० १/११

व्यवहाराविषयत्वाच्च। तदाह भर्तृहरिः- सर्वपरिकल्पातीततत्त्वं भेदसंसर्गसमतिक्रमेण समाविष्टं सर्वाभिश्शक्तिभिर्विद्याविद्याभिरविभक्तं विभक्तं च सर्वावस्थास्वनादिनिधनता तस्य ज्ञायते। एवम्भूतं ब्रह्मैव-

**"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"॥**

अनया व्याख्यया व्याख्यातं विद्यते।

**"उपायश्शिक्षमाणानां बालामुपलालनाः।**

**असत्ये वर्त्मनि स्थित्वा ततस्सत्यं समीहते"॥**

असत्यस्य मार्गस्यावलम्बनं कृत्वा सत्यं प्रति यान्ति जना इत्येव सिद्धान्तः। तस्मात् ब्रहसाक्षात्कारात् पूर्वं तु विद्यत एव संसारस्तस्यां संसारदशायामेव सांसारिकेभ्योऽर्थजातस्य ज्ञानं कारयितुमेव शब्दा अर्था सम्बन्धा वा शक्त्यात्मकाः स्वीक्रियन्ते। पुनश्च शनैः शनैर्निति नेतीति कृत्वां तत्पररमं ब्रह्म ज्ञाप्यते सांसारिकेभ्यः। यथा वेदान्तदर्शने 'अरुन्धतीतारान्यायेन' अथवा पञ्चकोशादीनां माध्यमेव तस्य ब्रह्मणो ज्ञानं कार्यते। तदाह नागेशभट्टः- **"पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता। उपेयप्रतिपत्त्यर्थमुपाया अव्यवस्थिताः"॥**[223] तथैवात्रापि व्याकरणशास्त्रे कल्पनया पदानि पदेषु प्रकृतिप्रत्ययविभागकल्पना, तत्रापि चान्यवव्यतिरेकाभ्यां ततद्वर्थविषयकानुभावनं व्यधीयत। ब्रह्मणि विचारे कृते सति वक्तुं शक्यते व्याकरणे शब्दब्रह्मैवाद्वैतवेदान्ते ब्रह्म इति न्यगद्यत। अत्र कश्चिद्भेदोऽपि विद्यते, वेदान्तिनां ब्रह्मणि सर्वा अपि शक्तयः नष्टा भवन्ति तासां सत्ता ब्रह्मसाक्षात्कारपरं न जायते, किन्तु व्याकरणदर्शने शब्दब्रह्मणः शक्तयो लयेऽपि ब्रह्मणि एव समाश्रिता भवन्ति। वेदान्ते च ब्रह्मणशक्तिरविद्यैव विद्यते। व्याकरणे च ब्रह्मणः कालशक्तिरपि विद्यते सा च कालशक्तिरविद्यादशायां प्रस्फुटति जगच्च स्फोरयति।

व्यवहारे च शक्तिर्वैयाकरणैपि प्राचीनैरेकैव शक्तिः स्व्यक्रियत। प्रसिद्ध्या च लौकिकार्थः प्रबोध्यतेऽप्रसिद्ध्या च लोकेऽप्रसिद्धार्थो बोध्यते। तत्र च कारणं 'सति तात्पर्ये सर्वे सर्वार्थवाचका' इति भाष्यमेव किन्तु नव्येषु विशिष्याचार्यनागेशेन तिस्त्रोऽपि शब्दशक्तयो यथाकथञ्चित् स्वीकृताः। वेदान्तिनोऽप्यभिधाः लक्षणां च स्वीकुर्वते। न च व्यञ्जनां किन्तुवत्र

---

[223] प०ल०म०, शक्तिनिरूपणम्

विचारणीयोऽयं विषयो यत् कथं व्यञ्जनाया अभावेऽभिव्यक्ति-वादोऽद्वैतवेदान्तिनां स्यात्। यथा वैयाकरणानां स्फोटनिपातादीनां व्यञ्जकत्वाय व्यञ्जना स्वीकृता तथैवात्रापि स्यादेव अत्र विद्वांस एव प्रमाणम्। अद्वैतवेदान्ते च वेदान्तवाक्यानामवबोधाय तात्पर्यज्ञानस्य कारणता जायते। तर्हि तात्पर्ये सति सर्वविधोऽप्यर्थो ज्ञातुं शक्यते व्याकरणाद्वैतवेदान्तयोः। तस्मादुभयत्र परम्परा विद्यते वैयाकरणानां शब्दाद्वैतवादोऽद्वैतवेदान्तिना-मर्थाद्वैतवाद इति सर्वं सुरूढम्।

## ॥ उपसंहारः ॥

भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रतिष्ठते। वेदमूलकमेव व्याख्यानं भारतीयसंस्कृतौ श्रेष्ठत्वं लभते।

**"यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः।**

**स सर्वो निगदितो वेदे सर्वज्ञानमयो हि सः"॥**[1]

वेदानां सर्वज्ञानमयत्वात् तत एव व्याकरणवेदान्तादिशास्त्राणां प्रभवत्त्वात्। इतोप्यग्रे आचार्यमनुर्निगदति-

**"श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः।**

**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्"॥** [2]

तात्पर्यमिदं यच्छ्रुतिस्मृतिभ्यां यद् बोध्यते तस्यैव धर्मानुष्ठानं क्रियते। किमर्थं वेदस्मृतिद्वारा प्रत्यायिते धर्मे एव प्रवृत्तिस्तद्वदति। उत्तरार्धेनेह संसारेऽर्थादेतस्यात्मनो हेतोः भोगायतनविषयभूताय शरीरायाभ्युदयपूर्विकां कीर्तिं संदायान्ते च सति नाशे शरीरस्य प्रेत्यभावे उत्तमोत्तमेन सुखेन संयुनक्ति। तस्माद्धेतोर्भारतवर्षस्य संस्कृतिस्तथा च एतस्यास्संस्कृतेः समुपासकाः "वेदाः" इत्येव सर्वासां संविद्यानामौत्सस्थलमित्यामनन्ति तदेवावलम्ब्य व्याकरणाद्वैतवेदान्तयोरुभयोरपि वेदमूलकत्वात् तत्रत्या विचारणा व्यावहारिकी पारमार्थिकी च व्यभायत। अस्माकं भारतीयपरम्परायां चत्वारः पुरुषार्थाः स्व्यक्रियन्त। ते च समेऽपि पुरुषार्था मानवमात्रेण प्राप्याः। तदर्थं जगति तेषां व्यवस्था कृता विद्यते। धर्मार्थकाममोक्षेष्वन्तिमो पुरुषार्थः मोक्ष इति। अन्येषां समेषां पुरुषार्थानां मोक्षमूलकत्वान्मोक्षस्य प्राधान्यं विद्यते। **"आनन्दात्मकब्रह्मावाप्तिर्मोक्षश्शोकनिवृत्तिश्च"।**[3] तस्मादानन्दमयस्य ब्रह्मणः

---

[1] मनुस्मृतिः, २/७

[2] तत्रैव, २/९

[3] वेदान्तपरिभाषा, पृ० ३८२

स्वरूपावगतिरेव मोक्षपदेन कथ्यते। निरतिशयं सुखमेव ब्रह्म इति न्यगयत। तस्य च प्राप्तिः कथं स्यादिति विचारे कृते सति ब्रह्मावरोधकं तत्त्वं अविद्येति विद्यते। तस्या अविद्यायोन्मूलनमेव ब्रह्मप्राप्तिरिति। "नामरूपे व्याकरवाणि"[4] इति विचिन्त्य तेन ब्रह्मणा नाम्नामर्थाच्छब्दानां रूपमर्थादर्थानां रचना कृता। अतएव द्वयोश्शास्त्रयोर्मूलं तत्त्वं 'नाम' इति स्वीकृत्य व्याकरणदर्शनं प्रावर्तत। रूपमर्थादर्थान् स्वीकृत्याद्वैतवेदान्तं प्राचलत्। मूलं त्वेकैव न तत्रभेदः परमसत्ताया इति विद्वांसो व्याख्यान्ति। इत्येवम्भूतेषु विचारेषु शोधार्थिना विचारा व्यभाव्यन्त।

शोधप्रबन्धेऽस्मिन् पञ्चाध्याया विद्यन्ते तेषु प्रथमाध्याये व्याकरणदर्शनस्य वेदमूलकत्वं संसाध्य मुनित्रयाणां विषये एतिहासिकदृष्ट्यागभीरं चिन्तनं कृतं विद्यते। एतस्मात् परमन्येषां मुनित्रयेतराणां वैयाकरणविदुषां समालोचनात्मकमध्ययनं विचारितं विद्यते। ततश्चाध्यायेऽस्मिन्नेवाद्वैतवेदान्त-दर्शनस्यापि परम्पराया एतिहासिकदृशा चिन्तनं कृतं शोधार्थिना। तत्र च वैदिकबीजानादाय ब्रह्मसूत्रतः समारभ्य ब्रह्मसूत्रे संस्मृतानामाचार्याणां विचारपुरस्सरमेकोनविंशतिशताब्द्यां रामकृष्णपरमहंस-विवेकानन्दादीनां चर्चा कृता विद्यते। द्वितीयाध्याये व्याकरणाद्वैतवेदान्तयोश्शब्दस्वरूपविमर्श इत्यस्मिन्नध्याये शब्दविषयिकानामव-धारणानां स्पष्टीकरणं कृत्वा शब्दस्य व्याकरणे पारमार्थिकं शब्दतत्त्वात्मकं स्वरूपं प्रतिपादितं विद्यते। पारमार्थिकस्वरूपप्रतिपादनात्परमेव व्यावहारिकस्वरूपत्वं शब्दानां व्याख्यातं विद्यते। व्यावहारिके जगति शब्दानां व्यवहारविषयता। विषयता च केन सम्बन्धेन स्यादिति विचारणायां तत्र शक्तिस्वरूपस्य सम्बन्धस्य कारणताऽवबुध्यते। शक्त्यात्मिकायां कारणतायां सत्त्यां शक्तेः स्वरूपं प्रतिपाद्य तस्य व्याकरणानुगुणं विश्लेषणं तथा चालोचनापुरस्सरमध्यायनं विहितमवर्तत। पुनश्च शक्तेर्व्याख्यानात् परं शब्देनैव जगतो प्रवृत्तिनिवृत्तिविषयकव्यवाहाराः प्रचाल्यते तथ्यस्यैतस्य प्रतिपादनं व्याकरणादिशास्त्राणामुद्धरणपूर्वकं कृतं वर्तते।

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**अनुविद्धमिव ज्ञानं सर्वंशब्देन भासते"॥**

---

[4] छान्दोग्योपनिषद्, ६/३/२

इत्यतश्शब्दसमूह एव भाषा इति लभ्यते। आशयविनिमयार्थं य उपायः सा भाषा, भाषा च शब्दानां समूह एव निष्कर्षतश्शब्दा एव कारणमर्थप्रत्यायनेऽन्यत्किमपि तथाभूतं कारणं न विद्यते जगतीह। आचार्यभरतस्यापि कथनं विद्यतेऽस्मिन्नेव स तु व्यावहारिक-पारमार्थिकयोश्शब्दयोः चर्चां कुर्वन्नास्ते। प्रतिपादनञ्च शब्देष्वेव सर्वमपि शास्त्रं विश्वस्य शब्दमयं विद्यते, शब्दातिरिक्तसत्ता न विद्यते संसारे शास्त्राणमभावे ज्ञानविज्ञानशून्याः सन्तः पशुवद्यत्किमप्याचरेयुरिति। तस्माच्च शब्दवतां शास्त्राणामावश्यकत्वात् सभ्यसंसाररचनायै।

**"वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च।**

**तस्माद्वाचः परं नास्ति वाग्हि सर्वस्य कारणम्"[5]॥**

तदानीमेव वैदिकवाक्यानां तात्पर्यमवबुध्यते। अहमेव स्वयमिदं वदामि देवेभिरुत मानुषेभिः। "वागेव विश्वा भावनानि जज्ञे" "वाग्वै ब्रह्म" इत्यादिकं जगदुपादानकारणीभूता वागेव विद्यते। निखिलस्य संसारस्याधिष्ठात्री। तदेव शब्दब्रह्म परावागित्याद्यपि निगद्यते। अशेषवैयाकरणपरम्परा व्याख्याता विद्यते। तदेव शब्दब्रह्म अविद्यायाः प्रभावात् कालशक्तेराश्रयणेन प्रतिबन्धाभ्यनुज्ञाभ्यां जगद्रूपेण विवर्तते। तेनैव प्राणिनां व्यवहारास्सञ्चाल्यमाना भवन्ति।

अद्वैतवेदान्तदर्शने शब्दस्य किं स्वरूपं तत्रादौ पारमार्थिकं शब्दस्वरूपं श्रुतिस्मृतिसम्मतं व्याख्याय तस्य च ब्रह्मरूपता समसाध्यत। पुनश्च वेदान्तिनां मते ब्रह्मणोऽवधारणाया विचारणायां सत्यां तत्र वाग्ब्रह्मत्वेन व्यगद्यत वाच्येव सर्वकारणत्वं जगन्निर्माणकारत्वं चाभ्यधीयत। व्यावहारिकश्च शब्दोऽचर्च्यत। शब्दानां च शक्तिमत्वमत्रापि वैयाकरणवदावश्यकत्वात्। शक्तीर्विना न काथञ्चित्कोऽपि बोधो न भावयितुं शक्यते।

सा च शक्तिश्शाब्दबोधे कारणत्वमुपयाति। तस्माच्च शाब्दबोधानुकूलपदपदार्थसम्बन्धत्वमेव वृत्तित्वमित्याति। सा च वृत्तिसम्बन्ध-व्यापारादिनामभिरकथ्यत शास्त्रेषु। व्याकरणाद्वैतवेदान्तयोरभिधा-शब्दशक्तेः प्रतिपादनमध्यायेऽस्मिन् कृतं विद्यते।

---

[5] नाट्यशास्त्रम्

तृतीयेऽध्याये च वयाकरणाद्वैतवेदान्तयोः लक्षणाविमर्शः कृतो विद्यते। सा च लक्षणा किं स्वरूपवती। एतत्सर्वमभ्यधायि, तथा च वैयाकरणेषु मतद्वयत्र विषये समायात॥ एकस्मिन् मते त्वभिधामात्रं स्वीक्रियते। किन्तु नागेशभट्टेन साक्षाल्लक्षणाया व्याख्यानं शक्यताऽवच्छेदकारोपरूपत्वेन कृतं विद्यते। अद्वैतवेदान्ते तु महावाक्यार्थावबोधाय लक्षणाया आवश्यकत्वात्। तद्विना ब्रह्मणो ज्ञानं न भवितुं शक्यते। अतोऽद्वैतवेदान्तस्य प्राणभूतेयं लक्षणा तत्रापि च जहदजहद्द्वारैव ज्ञायते ब्रह्म। भागत्यागपदेनाप्यभिधीयते लक्षणा। वैयाकरणाः किमर्थं लक्षणां मन्वते तत्र नागेश भट्टस्य व्याख्यानमेव शरणम्। तेन च स्वकीये मञ्जूषाया व्याख्याने प्रादर्शि यत् "**सति तात्पर्ये अर्थे सर्वार्थवाचका**"[6] इति तु योगिभ्य एव केवलं न त्वास्मदादीनां कृते तस्मादमादीयेभ्य आवश्यकत्वाल्लक्षणायाः। अत्र च व्याकरणसम्प्रदायस्य सर्वत्र ग्रन्थेषु लक्षणाविषयकविचारानन्विश्याभाव्यत तथैवाद्वैतवेदान्तस्यापि।

चतुर्थाध्याये तु व्याकरणाद्वैतवेदान्तयोर्व्यञ्जनाविमर्शो व्यधीयत। व्यञ्जनाया विषये वैयाकरणानां मतभेदो न दृश्यते। तत्र समेऽपि वैयाकरणा व्यञ्जनां समर्थयन्ति। आदौ तु शक्त्यैकवादः प्राचलत्। तत्र च शक्त्यैकवादस्य मूलं किं सम्भवति तदस्माभिः पूर्वमेव व्यचारि। व्यञ्जनाया लक्षणं साक्षाच्छब्दमुखेन तत्र भवता नागेशेन कृतं विद्यते। ततः पूर्वमपि भर्तृहर्यादिभिर्व्यञ्जना अमीमनत न साक्षात् किमपि लक्षणं तैरदाय। किन्तु **व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्** इति वचनेन व्याख्यानमुखाप्रेक्षित्वं व्यञ्जनाया गम्यते तद्यथा-

**"ग्राह्यग्रहणयोः सिद्धा योग्यता नियता यथा।**

**व्यङ्ग्यव्यञ्जकभावेन स धर्मः स्फोटनादयोः"॥** [7]

अस्यां कारिकायां व्यङ्ग्यव्यञ्जकभावाख्यव्यापारस्य चर्चां कृत्वा व्यञ्जनायाः स्वरूपं स्पष्टीकृतवान्। तथैव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यत्वसमर्थनायापि व्यञ्जना स्यादेव नोचेद्वैयाकरणधुरीणानां स्फोटाख्यं जगदेव व्याहन्येत्। तदर्थं समर्थयति द्योतकत्वादिकम्-

[6] परमलघुमञ्जूषा, लक्षणाप्रकरणम्

[7] वाक्यपदीयम्, १/९७

**"निपाता द्योतका केचित् पृथगर्थाभिधायिनः।**

**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः"॥[8]**

तस्मान्निपातानां द्योतकत्वाय स्फोटस्य च व्यङ्ग्यत्वाय व्यञ्जनाया आवश्यकत्वात्। व्यञ्जना स्वीक्रियत एव। नागेशभट्टः प्राह- निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यता हर्यादिभिरुक्ता[9]

उपरितनेन सयुक्तिकविवेचनेन वैयाकरणानां व्यञ्जनाऽपरिहार्यतत्त्वेन राजते। तथैव वेदान्तिनां मते व्यञ्जनाया अनावश्यकत्वादेव व्यञ्जना न स्वीक्रियते। किन्त्वत्र विचारणीयोऽयं विषयो यदि व्यञ्जना न स्यात् तदात्वेऽद्वैतवेदान्तस्य सत्कार्यवादः कथं सिद्ध्येत्। सत्कार्यवादे कारणमेव कार्यत्वेन विवर्तते, अर्थादभिव्यज्यते, तस्मादभिव्यक्तिवादस्य समर्थनाय कश्चित्तादृशो व्यापारस्स्वीकार्यो येन चाभिव्यक्तिस्यात्। स च व्यापारोऽभिधा-लक्षणाभ्यामतिरिक्त एव स्यात्। विषयेऽस्मिन्नद्वैतवेदान्तदर्शने न विद्यते विचारणा। ततोऽपि शोधार्थिनो दृष्टौ व्यञ्जनात्मको व्यापारः स्यादेव तद्विना न किमप्यभिव्यङ्क्तुं शक्यते। अवेदान्तिनामभिव्यक्तिवादः, आभासवादः, विवर्तवादः, परिणामवादः, प्रतिबिम्बवाद इत्यादीनां व्याख्यानमप्यध्यायेऽस्मिन् कृतं विद्यते।

पञ्चमेऽध्याये व्याकणाद्वैतवेदान्तयोश्शब्दशक्तीनां समीक्षा कृता विद्यते। 'व्याकरणाद्वैतवेदान्तयोः शब्दशक्तीनां समीक्षा' इति नामधेयेऽध्यायेऽस्मिञ्छब्दस्य विचारविषयीभूतस्य समीक्षा कृताऽविद्यत। अत्राध्याये द्विप्रकारकस्य शब्दस्य व्यावहारिकस्य पारमार्थिकस्य च विचारणोद्भाविता विद्यते। तथा चैकस्य व्यावहारिकस्य शब्दस्य सांसारिकव्यवहारसाधनायै तस्य स्वीकार्यता विद्यत एव। व्यावहारिकेन शब्देन विना संसारे विद्यमानानां पदार्थानां कथमपि ज्ञानं न सम्भवति ज्ञानाभावे तु व्यवहारोऽप्यसम्भवी। तस्मात्तस्यावश्यकत्वात्। वैयाकरणाननुसरन्तोऽद्वैतवेदान्तिनोऽपि तथैव मन्यन्ते। तेषामपि मते व्यावहारिकसत्ताया बाधकत्वाभात्। संसारस्थानां पदार्थानां व्यवहाराय शब्दानामवश्यकत्वाद् व्यावहारिकशब्दस्वीकारे न काचिद्धानिर्विद्यते।

---

[8] तत्रैव, २/१९२

[9] परमलघुमञ्जूषा, पृ० ६१

व्यावहारिकजगदवबोधयितुं सामर्थ्यं शब्देष्वेव विद्यते। शब्दाश्च केनोपायेनार्थं प्रतिबोधयेयुरिति जिज्ञासायां जायमानायां सत्यां तत्र शक्तिरवतरति व्यावहारिकजगति तयैवानुप्राणिताः सन्तः शब्दा गृहीतशक्तिका भूत्वा च सम्प्रत्याय्यार्थं व्यवहारविषयत्वमुपयाति। शक्तेश्च स्वरूपसामान्यविशेषरूपेण व्याख्यातं विद्यते। शब्दानां व्यवहारविषयता। स्फोटस्यैकत्वं नित्यत्वम्, शब्दमात्रैकगम्यत्वम्, शब्दस्य परमात्मत्वम्, परमात्मसिद्धिश्चशब्दद्वारैव, वाणीनां व्याख्यानम्, तत्र च विशिष्य हरिनागेशयोरस्मिन् भेदव्याख्यानपुरस्सरं सकारणं वैयाकरणाद्वैतवेदान्तयोरद्वैतवेदान्तयोरद्वैतवादस्य तोलननिका समीक्षा व्यधीयत।

सर्वान्ते ब्रह्मणो ज्ञानाय सयुक्तिकं व्याख्यानं समीक्षणपुरस्सरं समक्रियत। अवेदान्तवेदान्ते च ब्रह्मणि भाषाया अविषयतैव विद्यते। भाषायाः कार्यं तु अज्ञाननिवर्तनमेव ब्रह्मसम्बन्धिनः। अज्ञाने निवृत्ते सति परमात्मस्वरूपं साधका अनुभवति। ब्रह्मनुभवसाक्षात्कार एव मोक्षः। एतादृशस्य ब्रह्मणः साक्षात्कारोऽपरोक्षं परोक्षं वा।

एवम्भूते प्रश्ने समुदिते वेदान्ते सिद्धवस्तुनो ब्रह्मणोऽनुभवः साक्षात्कारो वाऽपरोक्षमेव। तत्र च प्रस्थानभेदात् साक्षात्कारप्रक्रियायां भेदस्समापतति। तद्यथा- वाचस्पतिमिश्रस्य मतेन शब्दद्वारा साक्षात्कारो न कारयितुं शक्यते, शब्दस्यापरोक्षाजनकत्वस्वभावात्। मननमेव ब्रह्मसाक्षाकारे साक्षात्कारणं न तु शब्दाः। पुनश्च निदिध्यासादिना ब्रह्मसाक्षात्कारो जायते। किन्तु विवरणप्रस्थानानुयायिनां मते शब्द एव साक्षात्कारणं ब्रह्मसाक्षात्कारे। शब्देनैव ब्रह्मणोऽपरोक्षानुभवो भावयितुं शक्यते तस्य प्राधान्यत्वात्। मनननिदिध्यासनादीनां शब्द एव समाश्रितत्वान्मननादीनामप्राधान्यं विद्यते। अत्र व्याख्याने विचारणा यदि विधीयते तदात्वे तु ज्ञायते यदाचार्यवाचस्पतिमिश्रो सर्वतन्त्रस्वतन्त्रः पदवाक्यप्रमाणज्ञः सर्वशास्त्रविशारदः सन् सर्वत्र दर्शनेष्वप्रतिहतगतिक आसीत्। तस्मात्तस्यान्तःकरणस्य वासनायामद्वैतवेदान्ताकाराकारितमात्रत्वं नासीत्। प्रत्युत सर्वदर्शनविषयाकारा-कारितं तस्यान्तःकरणमासीत्। तस्मात्तस्य मतमेवेदमित्थन्तया प्रतिपादयितुं न शक्यते।

एतद्वैपरीत्येन तत्र भवत्स्वद्वैतवेदान्तिषु विवरणकारः साक्षादाचार्य-शङ्करस्य शिष्यत्वमभजत। तस्यान्तःकरणमद्वैतवेदान्ताकाराकारितं

साक्षाच्छङ्काराचार्योपदिष्टसंस्कारकं सदद्वैतवेदान्तसिद्धान्तस्य यथार्थतत्त्व-प्रतिपादने प्रामाण्यमभजदिति वक्तुं शक्यते। अतश्शब्द एव साक्षात्कारणं शब्दैरेव ब्रह्मावबोधो जायतामिति तत्र भवतां वेदान्तिनां मतं विद्यते। तादृशं च मतं श्रुतिसम्मतं स्मृत्यादिभिः पोषितं च विद्यते। तस्माच्छाब्दानामेवप्राधान्यं विद्यत इह जगति। शब्दमूलिकाश्च प्रवृत्तयो निवृत्त्यश्च। व्याकरणदर्शनेऽपि तथैव मोक्षस्य स्वरूपं शब्दब्रह्मणा सह तादात्म्यमेव। शब्दब्रह्मणा स तादात्म्यमेव मोक्षः। शब्दब्रह्मणैव संसारो भाव्यत॥ तेनैव च पोष्यते तस्मिन्नेव च लीयते। शब्दातिरिक्ता सत्ता न विद्यते जगतीह। संसारोऽयं शब्दब्रह्मणो विवर्तोऽविद्यादशायाम्। विद्यादशायां च संसारोऽयं शब्दब्रह्मणि लीयते। लीनः सन्नानन्दस्वरूपे ब्रह्मणि आनन्दमनुभवति। एवम्भूतं शब्दब्रह्म सर्वत्र वेदेषु व्याख्यातं विद्यते। **"वागेव ऋक्प्राणः साम ओमित्येतदक्षरमुद्रंथः"।** जैमिनीयोपनिषद् ब्राह्मणे 'चत्वारि वाक्' इत्येतस्य मन्त्रस्य व्याख्याने वाचस्सर्वशक्तिमत्त्वं सर्वकारणत्वं च प्रत्यपद्यत।

**"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीति"॥**[10]

वाचश्च ब्रह्मत्वं बृहदारण्यकोपनिषदो भाष्ये व्याख्यातं विद्यते- **शैलिनिः वाग्वै ब्रह्म। यथा मातृमान् पितृमान् अचार्यवान् ब्रूयात्तथा तच्छैलिनिरब्रवीद् वाग्वै ब्रह्मेति,**[11] **वाग्वै सम्राट् परमं ब्रह्म,**[12] **वाचं धेनुमुपासीत,**[13] **वाग्वै ब्रह्म, वाच्य एव तद् ब्रह्मन् प्रतितिष्ठति।**[14]

---

[10] "वागेव साम वाचा हि साम गायति वागेवोक्थं वाचा ह्युक्थं शंसति वागेव यजुः वाचा हि यजुरनुवर्तते, तद्यत्किं चार्वाचीनम्ब्रह्मणस्तद्वागे व सर्वमथ यदन्यत्र ब्रह्मोपदिश्यते नैव हितेनार्त्विज्यं करोति परोक्षेणैव तु कृतम्भवति, तस्या एतस्यैवाचोमनः पादश्चक्षुः पादश्श्रोत्रम्पादो वागेव चतुर्थः पादः। तद्यद्वैमनसाध्यायति तद्वाचा वदति यच्च क्षुषा पश्यति तद्वाचा वदति यच्छ्रोत्रेण शृणोति तद्वाचा वदति। तद्यदेतत्सर्वं वाचमेवाभिसमयति तस्माद्वागेव साम स ह वै सामवित्स सामवेद य एवंवेद, तस्या एतस्यैवाचः प्राणा एवासुः एषु हीदं सर्वमसूतेति"। जैमिनीयोपनिषद्ब्राह्मणस्य, त्रयोदशानुवाकः, प्रथमखण्डः

[11] बृहदारण्यकोपनिषद्भाष्यम्, ४/१/३

[12] तत्रैव, ४/१/२

[13] तत्रैव, ५/८/१

[14] जैमिनीयब्रह्मणम्, काण्डम्, १/१०४

**"ब्रह्मेशाय नमस्तुभ्यं ब्रह्मादेर्ब्रह्मरूपधृक्।**
**परब्रह्म नमस्तेऽस्तु शब्दब्रह्म नमोऽस्तुते"॥**[15]

शब्दब्रह्मपरब्रह्मणोर्न विद्यते भेदः। तच्च पुराणेनापि प्रतिपादयते, एकैव शब्दसृष्टिदशायां भेदवदाभासते। परमार्थतश्शब्दब्रह्मणोरैक्यमेवेति सर्वत्र प्रतिपादैतं विद्यते। वैयाकरणानामभिमतं शब्दब्रह्म वेदादिशास्त्रेषु सर्वत्र परब्रह्मत्वेन प्रतिपादितं विद्यते तस्य चोपाधिको भेदा अवबुध्यन्ते किन्त्वविद्याया नाशे सति समेषां भेदानामतीतत्वादेव शब्दब्रह्ममात्रमेवावशिष्यते। तस्माच्च व्याकरणाद्वैतवेदान्तयोर्मध्ये वैयाकरणानां शब्दब्रह्म एवाद्वैतवेदान्तिनां ब्रह्म इति प्रत्यपाद्यत। अद्वैतवादस्य समीक्षणे कृते सति व्याख्यातृषु भर्तृहरेव प्राथम्यं विद्यते ततश्चाद्वैतवेदान्तस्य प्रतिष्ठापकाचार्यस्य शङ्करस्य।

**"शब्दब्रह्म परं ब्रह्म नानयोर्भेद इष्यते।**
**लये तु एकमेवेदं सृष्टौ भेदः प्रवर्त्तते"॥**[16]

तदेव शब्दब्रह्म संसारस्य दशायां भिन्न-भिन्नस्वरूपेषु सांसारिकप्रवृत्तौ जनानां पुरतःसमायति।[17]

---

[15] वामनपुराणम्, ८७/३५

[16] स्कन्दपुराणम्, वैष्णवखण्डः, २८/४२ (पुरुषोत्तमजन्नाथमाहात्म्यम्)

[17] "अन्योन्यापेक्षिणौभूपशब्दार्थौहिपरस्परम्।अर्थाभावेनशब्दोऽस्तिशब्दाभावेनबुद्ध्यते॥
"अर्थस्तस्माच्चतुर्वेदाःशब्दाह्यर्थाश्चतादृशाः। ऋग्वेदरूपीहलधृक्सामवेदोनृकेसरी"॥
"यजुर्मूर्त्तिस्त्वियंभद्राचक्रमाथर्वणंस्मृतम्।। वेदश्चतुर्द्धाभेदोऽयमेकराशिरभेदतः"॥
"अतस्तेसंशयोमाभूदेकस्तुबहुधाविभुः।। अवतारेषुचान्येषुन्यायेनैतेनवर्त्तते"॥ तत्रैव श्लोक-४४-४६

# ॥ सन्दर्भग्रन्थसूची ॥

➢ **प्राथमिक-स्रोतांसि -**


❖ *आत्मबोधः*, शङ्कराचार्यः, टीकाकारः- सूर्यदीनशुक्लः, विवरणम् अनुपलब्धम्

❖ *अपरोक्षानुभूतिः*, शङ्कराचार्यः, सम्पादकः- स्वामीविमुक्तानन्दः, स्वामी पवित्रानन्द अद्वैत आश्रम, मायावती अल्मोडा, हिमालयः, १९३८

❖ *अद्वैतमकरन्दः*, लक्ष्मीधरः, पी.डी.एफ.- हरिप्रसाददासः, २०१४

❖ *अष्टाध्यायी,* पाणिनिः, व्याख्याकारः- ईश्वरचन्द्रः, चौखम्भासंस्कृत-प्रतिष्ठान : वाराणसी, पुनर्मुद्रितंसंस्करणम्, २००९

❖ *उपदेशसाहस्री,* शङ्कराचार्यः, मराठी टीकाकारः- सीताराम महादेव फडके, रसिकरञ्जनग्रन्थप्रसारकमण्डली, पुणे, शकसंवत्, १८३२

❖ *काशिकावृत्तिः*, वामनजयादित्यौ, व्याख्याकारः- ईश्वरचन्द्रशर्मा, चौखम्भासंस्कृतसुरभारतीप्रकाशनः, वाराणसी, १९६५-६७

❖ *काव्यप्रकाशस्य* बालबोधनीटीका, वामनभट्टाचार्यो झलकीकरः, परिमल पब्लिकेशन्सः दिल्ली, पुनर्मुद्रितं संस्करणम्, २००८

❖ *काव्यप्रकाशः*, मम्मटः, व्याख्याकारः- आचार्यविश्वेश्वरसिद्धान्त-शिरोमणिः, सम्पादकः डॉ. नरेन्द्रः, ज्ञानमण्डललिमिटेड : वाराणसी, पुनर्मुद्रणम्२०११

❖ *खण्डनखण्डखाद्यम्*, श्रीहर्षः, सम्पादकौ- श्रीकृष्णपन्तशास्त्री गोविन्दनरहरिश्च, अच्युतग्रन्थमालाकार्यालयः, काशी, वि.सं. २०१८

❖ *तत्त्वबोधः*,शङ्कराचार्यः, शङ्करानन्दप्रकाशिकाटीका,लक्ष्मीवेङ्कटेश्वर छापखाना,कल्याण मुम्बई संवत् १८५३

❖ *दशरुपकम्,* धनञ्जयः, (चन्द्रकला-हिन्दी-व्याख्योपेतम्) हिन्दीव्याख्याकारः- डॉ.भोलाशंकरव्यासः, चौखम्भाविद्याभवन : वाराणसी, १९९७

❖ *ध्वन्यालोकः*, आनन्दवर्धनः, (लोचनाख्यटीकयासहितम्) हिन्दी व्याख्याकारः- जगन्नाथपाठकः, चौखम्भाविद्याभवन :वाराणसी, २००९

❖ *नाट्यशास्त्रम्*, भरतमुनिः, व्याख्याकारः- बाबूलालशास्त्री, चौखम्भासंस्कृतसंस्थान: वाराणसी, १९८४

❖ *नैष्कर्म्यसिद्धिः,* सुरेश्वराचार्यः, सम्पादकः- श्रीकृष्णपन्तशास्त्री, अच्युतग्रन्थमाला कार्यालयः,काशी, सं. २००७

❖ *न्यायशास्त्रपरिचर्चा*, (शक्तिवादः), प्रधानसम्पादकः- प्रो.वाचस्पति उपाध्यायः, संपादकः- पीयूषकान्तदीक्षितः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठम् :नवदेहली, २००९

❖ *नव्यन्यायभाषाप्रदीपः*, महेशचन्द्रःन्यायरत्नः, अनुवादकः– उज्ज्वलाझा, एशियाटिकसोसाइटी: कलकत्ता, २०१०

❖ *पञ्चदशी*, विद्यारणयमुनिः, अनुवादको व्याख्याकारश्च- पं.रामावतारो विद्याभास्करः,प्रकाशकः
पं.कृष्णकुमारशर्मा.पो.रतनगढ,जि.विजनौर,यू.पी. मुद्रकः- श्रीदेवचन्द्रविशारद हिन्दी प्रेस भवन लाहौर, विवरणम् अनुपलब्धम्

❖ *परमलघुमञ्जूषा,* नागेशः, व्याख्याकारः-जयशङ्करलालत्रिपाठी, चौखम्भाकृष्णदासअकादमी : वाराणसी, संस्करणं तृतीयम्, वि.सं. २०६१

❖ *परमलघुमञ्जुषा,* नागेशभट्टः, टीकाकारः–शशिनाथझा, कामेश्वरसिंहदरभङ्गा, संस्कृतविश्वविद्यालयः : बिहार, १९८३

- *परमलघुमञ्जूषा,* नागेशभट्टः, व्याख्याकारः- पण्डितवंशीधरमिश्रः, सम्पादकः- आचार्यश्रीनिवासशर्मा, चौखम्भाविद्याभवन: वाराणसी, २००६
- *पातञ्जलयोगदर्शनम्,* पतञ्जलिः (व्यासभाष्यसहितम्) हिन्दी-व्याख्याकारः- सुरेशचन्द्रश्रीवास्तवः, चौखम्भासुरभारतीप्रकाशन : वाराणसी, २०११
- *पाणिनीयव्याकरणमहाभाष्यम्,* (श्रीमन्नागेशभट्टविरचितप्रदीपोद्योतोद्भासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) प्रथमखण्डम्, सम्पादकः– भार्गवशास्त्री, चौखम्भासंस्कृतप्रतिष्ठानम् : दिल्ली, १९८७
- *पाणिनीयव्याकरणमहाभाष्यम्,* (श्रीमन्नागेशभट्टविरचितप्रदीपोद्योतोद्भासितेन श्रीमदुपाध्यायकैयटप्रणीतेणभाष्यप्रदीपेनसमुल्लसितम्) द्वितीयखण्डम्, सम्पादकः–भार्गवशास्त्री, चौखम्भासंस्कृतप्रतिष्ठानम् :दिल्ली, १९८८
- *पाणिनीयव्याकरणमहाभाष्यम्,* (श्रीमन्नागेशभट्टविरचितप्रदीपोद्योतोद्भासितेनश्रीमदुपाध्यायकैयटप्रणीतेणभाष्यप्रदीपेनसमुल्लसितम्) पञ्चमखण्डम्, सम्पादकः– भार्गवशास्त्री, चौखम्भासंस्कृतप्रतिष्ठानम् : दिल्ली, १९८८
- *पाणिनीयशिक्षा*( शाम्भवी-अनुश्रुतिव्याख्यासंवलिता) राजस्थानी ग्रन्थागारः, जोधपुर, २००४
- *प्रकरणपञ्चिका,* शालिकनाथमिश्रः (नारायणभट्टविरचितान्यायसिद्धिटीकासहिता) सम्पादकः-श्रीसुब्रह्मण्यशास्त्री, काशीहिन्दुविश्वविद्यालयः : बनारस, द्वितीयंसंस्करणम्, २००३

❖ *प्रकरणपञ्चिका*, शालिकनाथमिश्रः, सम्पादकः– डॉ.टी.आर.वी. मूर्त्ति, बनारसहिन्दुविश्वविद्यालयः : वाराणसी, ११६१

❖ *प्रौढ़मनोरमा,* (अव्ययीभावान्तोभागः), महामहोपाध्यायश्रीमद्भट्टोजि-दीक्षितविरचितामहामहोपाध्यायभैरवमिश्रःरत्नप्रकाशिका, पायगुण्डो-पाह्ववैद्यनाथपण्डितकृतभावप्रकाशिका, व्याकरणाचार्यपण्डित-गोपालशास्त्रीनेनेकृतसरलाटीका-त्रयविभूषितः, चौखम्भासंस्कृत-संस्थानम् : वाराणसी, तृतीयसंस्करणम्, २००३

❖ *प्रौढमनोरमा,* सशब्दरत्नबालप्रकाशिकाख्यसंस्कृतहिन्दीव्याख्या-संवलिता, द्वितीयोभागः, सम्पादकः- द्वारिकाप्रसादद्विवेदी, भारतीय-विद्यासंस्थानम् : वाराणसी, २००४

❖ प्रौढमनोरमा, भट्टोजीदीक्षित, भैरवीसरलाटीकासहिता, चौखम्बा-सुरभारतीप्रकाशन : वाराणसी२००५

❖ ब्रह्मसिद्धिः, मण्डनमिश्रः, टीकाकारः- शङ्खपाणिः, सद्गुरु पब्लिकेशन , दिल्ली, द्वितीयसंस्करणम्, १९८४

❖ भगवद्गीताभाष्यम्, शङ्कराचार्यः, प्रथमो भागः, वाणीविलासप्रेस श्रीरङ्गम्, विवरणम् अनुपलब्धम्

❖ *मीमांसायांकाव्यशास्त्रेचशब्दशक्तिः,* व्याख्याता-विरूपाक्षः वि. जड्डीपालः, अमरग्रन्थ पब्लिकेशन्सः दिल्ली, २००२

❖ *मीमांसाश्लोकवार्त्तिकम्*, कुमारिलभट्टप्रणीतः, लेखकः- श्यामसुन्दरशर्मा, सम्पादकः- विजयशर्मा, भारतीयविद्यासंस्थानः वाराणसी, २००२

❖ *मीमांसाकुतूहलम्,* कमलाकरभट्टविरचितम्, सम्पादकः-पण्डितश्रीपट्टाभिरामशास्त्री, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः :वाराणसी, १९८७

❖ *मनुस्मृतिः* (हिदीभाषानुवाद-टिप्पणी-विषयसूची-श्लोकसूची-विस्तृतभूमिकासहिता) मनुः, अनुवादकः-गिरिजाप्रसादद्विवेदी, एम.एल.भार्गवनवलकिशोर, प्रेस: लखनऊ, १९१७

❖ *याज्ञवल्क्यस्मृतेर्मिताक्षराटीका*, विज्ञानेश्वर: हिन्दीव्याख्याकारः एवं सम्पादकः– डॉ.गङ्गासागरराय, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली : २०११

❖ *रसगङ्गाधरः*, पण्डितराज-जगन्नाथः, सम्पादकद्वयम्- दुर्गाप्रसादः काशीनाथपाण्डुरङ्गपरबश्च, निर्णयसागरमुद्रणालयः :बाम्बे, १८८८

❖ *लघुशब्देन्दुशेखरः*, नागेशभट्टः, सम्पादकः- गुरुप्रसादशास्त्री, चौखम्भासंस्कृतसुरभारतीप्रकाशन : काशी, २०१२

❖ *लघुशब्देन्दुशेखरः*, (बालबोधिनीव्याख्यासहितः) नागेशभट्टः, व्याख्याकारः- सत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम् : तिरुपति, २००७

❖ *वाक्यपदीयम्*, भर्तृहरिः (पुण्यराजकृतयाटीका), रघुनाथशर्मप्रणीतया अम्बाकर्त्रीव्याख्ययासमुपेतम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, १९०२

❖ *वाक्यपदीयम्*, ब्रह्मकाण्डः, हरिवृषभटीका, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः : वाराणसी, २००६

❖ *वाक्यपदीयम्*, भर्तृहरिः, ब्रह्मकाण्डः (पुण्यराजटीकायुक्तम्) अम्बाकर्त्रीव्याख्या, पण्ड़ितरघुनाथशर्मा, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः : वाराणसी, १९७६

❖ *वाक्यपदीयम्,* भर्तहरिः, द्वितीयकाण्डः (पुण्यराजटीकायुक्तम्) रघुनाथशर्मप्रणीतया अम्बाकर्त्रीव्याख्ययासमुपेतम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, २००६

❖ *वाक्यपदीयम्,* भर्तृहरिः, तृतीयकाण्डः (पदकाण्डः) सम्पादकः- पण्ड़ितरघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, १९१२

❖ *वाक्यपदीयम्*, भर्तृहरिः प्रकाशव्याख्या, हेलाराजः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, २०००

❖ *वाक्यपदीयम्*, भर्तृहरिः, स्वोपज्ञवृत्तिः हरिवृषभः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः :वाराणसी, २००६

❖ *वाक्यवृत्तिः,* शङ्कराचार्यः, सम्पादकः- हरि नारायण आप्टे, आनन्दाश्रममुद्रणाअलयः, पुण्यपत्तनम्, शालिवाहनशकः १८३७

❖ *विवरणप्रमेयसङ्ग्रहः,* विद्यारण्यस्वामी, सम्पादकः श्रीकृष्णपन्तः, श्रेष्ठिप्रवरगौरीशङ्करगोयनका, अच्युत ग्रन्थमाला,काशी, १९९६

❖ *विवेकचूडामणिः*, शङ्कराचार्यः, अनुवादकः मुनिलालः, गीताप्रेस गोरखपुरम्, विवरणम् अनुपलब्धम्

❖ *वेदान्तकल्पलतिका,* मधुसूदनसरस्वती, सम्पादकः- आर.डी.करमाकरः भण्डारकर रिसर्च इन्स्टीट्यूट प्रेस, भण्डारकर रिसर्च ओरियेण्टल रिसर्च इंस्टीट्यूट पूना, १९६२

❖ *वेदान्तदर्शनम् (ब्रह्मसूत्रम्)*, वेदव्यासः, व्याख्याकारः हरिकृष्णदास गोयन्दका, गीताप्रेस गोरखपुर, सं. २००९

❖ *वेदान्तपरिभाषा*, श्रीधर्मराजाध्वरीन्द्रः, व्याख्याकारः- श्रीगजानन-शास्त्रीमुसलगांकर, चौखम्भाविद्याभवन : वाराणसी, २०१०

❖ *वेदान्तपरिभाषा*, श्रीधर्मराजाध्वरीन्द्रः, व्याख्याकारः- केशवशास्त्री, चौखम्भासंस्कृतप्रतिष्ठानः दिल्ली, २००९

❖ *वैयाकरणभूषणम्,* कौण्डभट्टः, सम्पादकः- प्रभाकरमिश्रः, अरविन्दमिश्रः, मकरन्दमिश्रः, रामानुजसंस्कृतमहाविद्यालयः :वाराणसी, १९८२

❖ *वैयाकरणभूषणसारः*, कौण्डभट्टः, सम्पादकः-कृष्णनन्दनझा एवं शशिनाथझा, मिथिलाइस्टीट्यूटः दरभङ्गा, २००२

❖ *वैयाकरणभूषणसारः*दर्पणटीका, हरिवल्लभकृतव्याख्या चन्द्रिका-प्रसादद्विवेदी, चौखम्भासंस्कृतप्रतिष्ठानः बनारस, २०११

❖ *व्याकरणमहाभाष्यम्प्रदीपोद्योत (भावबोधिनी हिन्दीटीका*) व्याख्याकारः- प्रो.जयशंकरलालत्रिपाठी, चौखम्भा कृष्णदास अकादमी : वाराणसी

❖ *व्याकरणमहाभाष्यम्*, (प्रथमकाण्डः) महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः- श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *व्याकरणमहाभाष्यम्*, (द्वितीयकाण्डः), महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः-श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *व्याकरणमहाभाष्यम्*, (तृतीयकाण्डः), महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः-श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *व्याकरणमहाभाष्यम्*, (चतुर्थकाण्डः), महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः -श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *व्याकरणमहाभाष्यम्* (पञ्चमकाण्डः), महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः- श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *व्याकरणमहाभाष्यम्*, (षष्ठकाण्डः), महर्षिपतञ्जलिः, भाष्यप्रदीपो-द्योतसमुल्लसितम्, संशोधकः- श्रीभार्गवशास्त्रीजोशी, चौखम्भासंस्कृत-प्रतिष्ठान : दिल्ली, २००६

❖ *सङ्क्षेपशारीरकम्,* सर्वज्ञातमुनिः, सुबोधिनी टीका, पुरुषोत्तममिश्रः, ग्रन्थांकः ८३, सम्पादकः नारायण आप्टे, आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्,१९१८

❖ *सिद्धान्तकौमुदी,* (जिनेद्रसरस्वतीरचिततत्त्वबोधिनिटीकयासंवलिताजयकृष्णविहितसुबोधिन्याख्यटीकयासमुपेताच) भट्टोजिदीक्षित:, सम्पादकः- भार्गवशास्त्री, निर्णयसागरमुद्रणालयः: मुम्बई, १९४२

❖ *सिद्धान्तकौमुदी,* (तत्त्वबोधिनीसमाख्यव्यख्यासंवलिता) भट्टोजि-दीक्षितः, सम्पादकः- वासुदेवलक्षमणशास्त्रिपणशीकरः, श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् : नवदेहली, २००९

❖ *सिद्धान्तबिन्दुः,* मधुसूदनसरस्वती, सम्पादकः- श्रीकृष्णपन्तः, अच्युतग्रथमालाकार्यालयः, काशी, १९३२

❖ *सौन्दर्यलहरी,* शङ्कराचार्यः, पं. श्रीधरशिवलालः, ज्ञानसागर छापखाना बम्बई, विवरणम् अनुपलब्धम्

❖ *संस्कृत वाङ्मय का वृहद् इतिहास,* (द्वितीयखण्डम्- वेदाङ्गम्) सम्पादकः- ओमप्रकाशपाण्डयः, उत्तरप्रदेश संस्कृत संस्थान : लखनऊ, १९९७

❖ *संस्कृत व्याकरण शास्त्र का इतिहास,* युधिष्ठिरमीमांसक, सम्पादकः- रामनाथत्रिपाठीशास्त्री, चौखम्भापब्लिशर्स : वाराणसी, २००६

❖ *सर्वदर्शनसङ्ग्रहः,* सायणमाधवाचार्य:, हिन्दीभाष्यकारः- उमाशंकङ्करः, चौखम्भाविद्याभवन : वाराणसी, २०१२

❖ *साहित्यदर्पणः,* विश्वनाथः, सम्पादकः एवं व्याख्याकारः- दुर्गाप्रसाद-द्विवेदी, मेहरचन्दलच्छमनदास :दिल्ली, १९८२

❖ *शक्तिवादः,* गदाधरभट्टाचार्यः, चौखम्भासंस्कृतसीरीज :वाराणसी, विक्रमसम्वत्, १९८६

❖ *शक्तिवादः,* गदाधरभट्टाचार्य: विवृत्तिटीकासहितः, हरिनाथभट्टाचार्यः, चौखम्भासंस्कृतसीरिजआफिस: बनारस, १९८६

❖ *शक्तिवादः,* श्रीगदाधरभट्टाचार्यविरचिता, सम्पादकौ- डॉ०श्रीनिवास वरखेडी, डॉ.वीरनारायणपाण्डुरङ्गी, संस्कृतपरिषद्राष्टियसंस्कृत-संस्थानेन मानिता आदर्शशोधसंस्था उस्मानियाविश्वविद्यालयः, हैदराबाद, २००९

❖ *शब्दशक्तिप्रकाशिका,* जगदीशतर्कालङ्कारः, चौखम्भासंस्कृतसंस्थान : वाराणसी, तृतीयंसंस्करणम्, वि०सं० २०५९

❖ *श्रीमद्द्वैपायप्रणीतानि ब्रह्मसूत्राणि,* बादरायणः, सम्पादकः- हरिनारायण आप्टे, आनन्दाश्रमसंस्कृतग्रन्थावली, आनन्दाश्रममुद्रणालयः, पुण्यपत्तनम्,१९००

❖ *शास्त्रदीपिकाप्रभासहिता,* (प्रथमोभागः) पार्थसारिथिमिश्रः, सम्पादकः- डॉ.सी.आर.स्वामीनाथन्, आचार्यपी.एन्. पट्टाभिरामशास्त्री, श्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठम् : नईदिल्ली, १९७८

❖ *श्लोकवार्त्तिकम्,* (न्यायरत्नाकरव्याख्यान्वितद्वितीयोभागः) कुमारिलभट्टः, सम्पादकः- गङ्गानाथझा, चौखम्भासंस्कृतप्रतिष्ठान :दिल्ली: २००९

❖ *शब्दव्यापारविचारः,* मम्मटः, सम्पादकः- रेवाप्रसादद्विवेदी, चौखम्भाविद्याभवन :वाराणसी, १९७३

❖ *त्रिवेणिका,* आशाधरभट्टः, सम्पादकः- ब्रह्ममित्रअवस्थी, इन्दुप्रकाशन :दिल्ली, १९७८

❖ *वाक्यपदीयसम्बन्धसमुद्देशः,* हेलाराजीयव्याख्या के प्रकाश में एक विवेचनात्मक अध्ययन, डॉ. वीरेन्द्र शर्मा, विश्वेश्वरानन्द-विश्ववन्धु-संस्थान ऑफ संस्कृत इण्डोलाजा, पञ्जाब वि० वि० होशियारपुर, १९७७.

- *वैयाकरणसिद्धान्तपरमलघुमञ्जूषा,* नागेशभट्टः, किरणावली-संस्कृतव्याख्योपेता हिन्द्यनुवादसहिता, व्याख्याकारः-आचार्यलोकमणिदाहालः, चौखम्बासुरभारतीप्रकाशन : वाराणसी, २००६
- *वैयाकरणसिद्धान्तमञ्जूषा,* नागेशभट्टः, सम्पादकः-कालिकाप्रसादमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, १०७७
- *वैयाकरणभूषणसारः,* कौण्डभट्टः, सम्पादकः– कृष्णनन्दनझा एवं शशिनाथझा, मिथिलाइंस्टीट्यूट : दरभङ्गा, २००२
- *वैयाकरणसिद्धान्तमञ्जूषा,* नागेशभट्टः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, १९७७.
- *शब्दशक्तिप्रकाशिका,* जगदीशतर्कालङ्कारः, चौखम्भासंस्कृत-संस्थानम्, वाराणसी, तृतीयसंस्करणम्, वि०सं० २०५९.

**द्वितीयकस्रोतांसि–**

- *अद्वैतानुभूतिः,* शङ्कराचार्यः, अनुवादकः- लक्ष्मीकान्तविमलः, चौखम्भा संस्कृत पब्लिकेशन, दिल्ली, २०१३
- *उपनिषद् भाष्यम्,* (ईश, केन, कठ, प्रश्न, मुण्डक) गीताप्रेसगोरखपुर, सप्तम संस्करण संवत्,२०१०
- छान्दोग्योपनिषद्, शाङ्करभाष्यम्, गीताप्रेस गोरखपुरम्, सत्रहवां सस्करण, वि.सं. २०६९
- *तर्कसङ्ग्रहः,* अन्नम्भट्टः (तर्कसंग्रहदीपिका-न्यायबोधनी-पदकृत्य-श्रीनिवाससमुल्लासिनी, श्रीधरमुखोल्लासिनीव्याख्यासंवलितः) व्याख्याकारः- गोविन्दाचार्यः, चौखम्भा सुरभारती प्रकाशन : वाराणसी, २०१२

- *तर्कसङ्ग्रहः,* अन्नम्भट्टः, व्याख्याकारः-डॉ.राकेशशास्त्री, चौखम्भासंस्कृतप्रतिष्ठान: दिल्ली, २०११
- *तर्कभाषा,* केशवमिश्रः, व्याख्याकारः-डॉ.गजाननशास्त्रीमुसलगाँवकर, चौखम्भासुरभारतीप्रकाशन : वाराणसी, २००९
- *तत्त्वबिन्दुः,* वाचस्पतिमिश्रः, हिन्दीटीकाकारः-बृजकिशोरत्रिपाठी, चौखम्भा संस्कृत पब्लिकेशन, दिल्ली,२०१२
- *तत्त्वबिन्दुः,* वाचस्पतिमिश्रः, सम्पादकः रजनीशशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००१
- *न्यायदर्शनम्,* (वात्स्यायनभाष्यसहितम्)सम्पादकः- श्रीनारायणमिश्रः, चौखम्भासंस्कृतसंस्थान : वाराणसी, १९९०
- *न्यायसिद्धान्तमुक्तावली,* विश्वनाथपञ्चाननभट्टाचार्यः, व्याख्याकारः-श्रीकृष्णवल्लभाचार्यः, काशीग्रन्थमाला: बनारस, १९७२
- *न्यायसिद्धान्तमुक्तावल्याः,* रामरुद्रीयटीका, रामरुद्रभट्टाचार्यः, चौखम्भासंस्कृतभवन : वाराणसी, वि.सं.२०६६
- *पाणिनिकालीनभारतवर्ष,* लेखकः- वासुदेवशरण अग्रवाल, चौखम्भा विद्याभवन : वाराणसी, तृतीयं संस्करणम्, १९९६
- *पाणिनीयव्याकरणेप्रमाणसमीक्षा,* आचार्यश्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः : वाराणसी, १९९७
- *पारिभाषिकः, श्रीमत्स्वामिदयानन्दसरस्वतीकृतव्याख्यासहितः, वैदिक पुस्तकालय केशरगंज : अजमेर, वि.सं२०५४*
- *प्रकरणपञ्चकम्,* शङ्कराचार्यः, चौखम्भा संस्कृत पब्लिकेशन, दिल्ली,२०११
- *बृहदारण्यकोपनिषद्,* शाङ्करभाष्यसहितम्, गीताप्रेस गोरखपुरम्, पन्द्रहवां संस्करण, वि.संवत् २०८६

❖ *शब्दशास्त्रीयवृत्तिविमर्शः*, आचार्यरामप्रसादत्रिपाठी, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः : वाराणसी, २०५४

❖ *अभिधावृत्तिमात्रिका*,मुकुलभट्टः, हिन्दीभाष्यानुवाद, रेवाप्रसादद्विवेदी, चौखम्भाविद्याभवन : वाराणसी, संस्करण, १९९५

❖ *व्याकरणतन्त्र का काव्यशास्त्र पर प्रभाव*, डॉ.हरिराममिश्रः, ईस्टर्नबुकलिंकर्स : दिल्ली, १९९४

❖ *शब्दवृत्तिविमर्शः*, अविनाशचन्द्र, वाणी विनायक प्रकाशन : इलाहाबाद, २००२

❖ *शब्दार्थतत्त्व*, शोभाकान्तमिश्रः, बिहार हिन्दी ग्रन्थ अकादमी : पटना, १९८६

❖ *शाब्दबोधमीमांसा*, एन.एसरामानुजताताचार्यः, राष्ट्रियसंस्कृत-संस्थानम् : नईदिल्ली, २००५

❖ *रामचरितमानस*, गोस्वामीतुलसीदास, गीताप्रेस : गोरखपुर, सम्वत् २०६२

**कोशग्रन्थाः(Lexicon):**

❖ *अमरकोषः*, अमरसिंहः, धराख्यटीका, श्रीमन्नालाल, चौखम्बाविद्याभवन : वाराणसी, १९९९

❖ *संस्कृत-हिन्दी-कोश,* वामनशिवराम आप्टे, मोतीलाल बनारसीदास, दिल्ली : २००७

❖ *भारतीयदर्शनबृहत्कोश*, बच्चूलालअवस्थी, शारदा पब्लिशिंग हाऊस, २००४

❖ *पारिजातकोशः*, सम्पादकः- ईश्वरचन्द्र, परिमल पब्लिकेशन्स : दिल्ली, २००५

❖ *शब्दकल्पद्रुमः,* राजाराधकान्तदेव, राष्ट्रियसंस्कृतसंस्थान : नईदिल्ली, पुनर्मुद्रितसंस्करण, २००२

❖ *वाचस्पत्यम्,* सङ्कलनकर्त्ता, तारानाथवाचस्पति, राष्ट्रियसंस्कृत-संस्थानम् : नईदिल्ली, पुनर्मुद्रितसंस्करण, २००२

➢ **अन्तर्जालीयस्त्रोतांसि –**

☑ http://www.sanskrit.nic.in/Thesis_Modified/Thesis-E-H/Thesis%20Modified/directory/T/index.htm

☑ http://www.sanskrit.jnu.nic.in/

☑ http://indcat.inflibnet.ac.in/

☑ http://dsal.uchicago.edu/dictionaries/apte/

☑ http://csl.du.ac.in/online/theses-dissertation.htm

☑ https://www.worldcat.org/

☑ https://archive.org/